व्याप्तिसप्तकसारः

(मूल-भूमिका-सहितः)

डा० पीयूषकान्तदीक्षितः

NAG PUBLISHERS

नाग प्रकाशक

व्याप्तिसप्तकसारोऽयं प्रस्तूयतेऽल्पायासेन नव्यन्यायशास्त्रे प्रवेशाय। नव्यन्यायशास्त्रं प्रामुख्येनानुमानप्रमाणं लक्षणस्वरूपप्रामाण्यादिभिः प्रवितनोति। व्याप्तिश्चानुमानप्रमाणस्य मेरुदण्डा-यिता। सन्ति च व्याप्तेः पूर्वोत्तरपक्षीय-लक्षणानि। तेषु पूर्वपक्षीयाणि सप्तलक्षणानि प्रथममवगन्तव्यानि नव्यन्यायशास्त्रप्रविविक्षुभिरिति वस्तुस्थितिमनुरुध्य प्रथमं तान्येव यथासम्भवं सरलया पद्धत्या विस्तार्यन्तेऽस्मिन् व्याप्तिसप्तकसारे।

व्याप्तिसप्तकसारस्य प्रकाशनादर्वाक् अनुमान-प्रामाण्यं तत्स्वरूपनिरूपणादिकं च सङ्क्षिप्यावश्यं प्रतिपादयितुं युक्तमिति तदपि सप्रमाणं निरवद्यं निरूपितमस्ति प्रबन्धेऽस्मिन्।

मध्ये-मध्ये ग्रन्थ-ग्रन्थिस्फोरणाय प्रसङ्गागत-विषयस्पष्टतायै चापेक्षितायाष्टिप्पण्याः संयोजनेन ग्रन्थोऽयमुपादेयतामासादयति।

विविधानि क्रोडपत्राण्यपि यथापेक्षं सम्पाद्य ग्रन्थस्यास्य चरमे भागे निबद्धानि नूनं विदुषां मनांसि रञ्जयिष्यन्ति।

एवम् व्याप्तिसप्तकसारोऽयं नव्यन्यायशास्त्रे व्युत्पत्तिं कामयमानानां नूनमुपकरिष्यतीति दृढः समाश्वासः।

[illegible] द्विवेदी
28-3-06

व्याप्तिसप्तकसारः

प्रसक्तानुप्रसक्तविषयनिरूपणोपचितः

[चिन्तामणि-माथुरी-दीधिति-
गादाधरी-जागदीशी-तत्त्वालोक-
टिप्पणीसहितः]

प्रणेता
डॉ० पीयूषकान्तदीक्षितः
न्यायवैशेषिकविभागाध्यक्षः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-११००१६

NAG PUBLISHERS

नाग-प्रकाशकः

११ ए०/यू० ए० जवाहरनगरम्, दिल्ली-११०००७

राष्ट्रियसंस्कृत-संस्थानस्य, नवदेहलीस्थितस्य वित्तीयसाहाय्येन प्रकाशितः ।

(१) ११ए/यू. ए. जवाहरनगरम्, दिल्ली-११०००७

(२) संस्कृतभवनम्, १२,१५ आवासः, संस्कृतनगरम्, प्लाट सं० ३, प्रखण्डः-१४
रोहिणी, नव-देहली-११००८५

(३) जलालपुरम् माफी (चुनार-मिर्जापुरम्) उ० प्र०

ISBN 81-7081-370-0

प्रथमं संस्करणम्

१९९७

मूल्यम् रूप्यकाणि [illegible]६·०[illegible]

श्रीसुरेन्द्रप्रतापः, द्वारा नागप्रकाशकः, ११ए, यू. ए., जवाहरनगरम्, दिल्ली ११०००७, द्वारा प्रकाशितः तथा जी. प्रिंट प्रासेस, ३०८/२, शहजादाबाग, दयाबस्ती, दिल्ली ११००३५ द्वारा मुद्रितः ।

अक्षरयोजकः तथा मुद्रकः

अमरप्रिंटिंगमुद्रणालयः

८/२५, विजयनगरम्, दिल्ली-११०००९

VYĀPTI SAPTAKA SARAḤ

PRASAKTĀNUPRASAKTA VISAYANIRŪPAṆOPACHITAḤ

[Chinṭamaṇi-Māthurī-Dīḍḥiti-Jagaḍīś-Taṭvālok-Ṭippaṇī-Sahita]

Author

DR. PIYUṢHKANT DIXIT

Head of Nyayavaishika Department
Shri Lalbahadur Shastri Rashtriya Sanskrit
Vidyapitha (Deemed University)
New Delhi-110016

NAG PUBLISHERS

11A, U.A. JAWAHAR NAGAR
DELHI-110007

This publication has been brought out with the financial assistance from the Rashtriya Sanskrit Sansthan, New Delhi

(i) 11A/U.A., Jawahar Nagar, Delhi-110007

(ii) Sanskrit Bhawan, Residence, Sanskrit Nagar
Plot No. 3, Block-14 Rohini, Delhi-110085

(iii) Jalalpur Mafi (Chunar, Mirzapur) U.P.

ISBN : 81-7081-370-0

First Edition

1997


Price Rs.

Published by Sh. Surendra Pratap for Nag Publishers 11A/U.A., Jawahar Nagar, Delhi-110007 and printed at G.Print Process 308/2, Shahazada Bag Daya Basti, Delhi-110035

Lasertypesetting

Unique Print Media

Delhi-110009



आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिभिः।

स चेन्निरर्थकं नीतः का नु हानिस्ततोऽधिका॥

एवं विधैः सुभाषितैः सततं प्रवर्तयतां ज्योतिषशास्त्रस्य मर्मविदां तपः पूतात्मनां शिवसायुज्यमवाप्तानाम् अस्माकं पितामहचरणानां शुभाशिषां फलम्, अनघं 'व्याप्तिसप्तकसारम्' तेषामेव पुण्यस्मृतौ सश्रद्धं समर्पयामि।

प्रस्तावना

आयुष्मता प्रियेण श्रीपीयूषकान्तदीक्षितेन विरचितं 'व्याप्तिसप्तकसारम्' अधिकृत्य स्वाशयं प्रकाशयितुम् उद्यतमना अहं नितरां प्रसीदामि। यथा-शक्ति संस्कृतस्य संस्कृतशास्त्राणाञ्च सेवायै अहर्निशमुद्यतस्य मम तान् यूनः प्रति सहजः स्नेहः प्रवर्तते ये संस्कृतं संस्कृतशास्त्राणि च रक्षितुं सोत्का भवन्ति। यदि अयं युवा मम नितरां प्रियः श्रीपीयूषकान्तदीक्षितः कर्मेदं समाचरति तर्हि तस्मिंस्तु सर्वथा स्वीये स्नेहातिशयः स्वाभाविकः।

नव्य-न्यायशास्त्रम् अष्टादशविद्यास्थानेषु अभ्यर्हिततमम् आन्वीक्षिकीपदाभिधेयं सर्वविद्यानां मूलस्तम्भभूतमिति को न सुधीर्वेत्ति। वदति जयन्तभट्टः—

'न्यायविस्तरस्तु मूलस्तम्भभूतस्सर्वविद्यानाम्, वेदप्रामाण्यरक्षाहेतुत्वात्.' इति।

यथा वेदा अस्माकम् अमूल्यः शेवधिः तथैव इदं वेदप्रामाण्यरक्षणैकप्रवणं न्यायशास्त्रमपि अस्माकम् अमूल्यः शेवधिः इत्यपि जयन्तभट्टवाक्येनानेन प्रमाणितं भवति। सर्वेषां संस्कृतशास्त्राणां विशेषतो जीवातुभूतं न्याय-शास्त्रमिति प्रमाणयत्येव नितरां प्रथितेयं सूक्तिः—

'काणादं पाणनीयं च सर्वशास्त्रोपकारकम्' इति।

अत्र सूक्तौ प्रथमं काणादस्यैव निर्देशः कञ्चन विशेषं सङ्केतयति। स चायम्— बुद्धेर्नैर्मल्यं सूक्ष्मपदार्थानामाशुग्राहित्वञ्च शास्त्राण्यध्येतुं प्रवृत्तस्य सर्वप्रथममपेक्षितम्, तच्च काणादस्याध्ययनेनैव जायतेऽतस्तत्प्रथममध्येतव्यमिति।

यद्यपि काणादशब्दः साम्प्रतं वैशेषिकदर्शनपरतया प्रसिद्धः परं न्याय-वैशेषिकयोः दर्शनयोः समानतन्त्रतया न्यादर्शनस्य तदनु नव्य-न्यायदर्शनस्यापि बोधकः। अयमेव आप्तः सम्प्रदायः। अमुमेव आप्तं सम्प्रदायं स्पष्टयितुं चतसृषु विद्यासु आन्वीक्षिक्याः प्रथममुपादनं तत्रभवान् कौटिल्यः करोति—

'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती' इति ।

आन्वीक्षिकीशब्दस्तु न्यायदर्शनपर एवेति वात्स्यायनो न्यायदर्शनभाष्ये स्पष्टं वदति—

'यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या' इति ।

न्या० द०, अ० १ सू० १, वा० भा० पृ० ३

'तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्' इति ।

न्या० द०, अ० १ सू० १, वा० भा० पृ० ४

सङ्क्षेपेणेदं वदन्नहम् इदमेव स्पष्टयितुं वाञ्छामि—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।

आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता ।

इति न्यायभाष्यकर्तुः वात्स्यायनस्य उक्तिमनुसृत्य सर्वविधव्यवहाराणाम् उपायभूतमिदं नव्य-न्यायशास्त्रं संस्कृतशास्त्रेषु व्युत्पित्सूनां तु सर्वस्वभूतम् इति । संस्कृतशास्त्रेषु पारदृष्वनां महीयसाम् अस्माकं गुरूणाम् इमामुक्तिम् असकृदहं स्मरामि—

'नव्य-न्यायशास्त्रस्य अध्ययनं विना शास्त्रान्तरस्वारस्यं नैवाधिगन्तुं शक्यम् । यदि हि व्याकरण-साहित्य-मीमांसादिशास्त्राणां वास्तविको रसोऽनुभवितुमिष्यते तर्हि नूनं सश्रद्धं सर्वप्रथमं नव्य-न्यायशास्त्रमध्येतव्यमिति' ।

अस्माकं भारतस्यास्य देशस्य जगद्गुरोः अजस्रं प्रवहमाना काचन विशिष्टा लोककल्याणकारिणी परममङ्गलास्पदा संस्कृतिः संस्कृतशास्त्राणां सम्यगवबोधेनैव रक्षितुं संवर्धयितुञ्च शक्या अत एव संस्कृतशास्त्राणां वास्तविकं स्वारस्यम् अवश्यमेवाधिगन्तव्यं तदर्थञ्च न्यायशास्त्रावबोधः सर्वप्रथमम् अनिवार्य इति वस्तुस्थितिं समीक्ष्य तद्दिशि साम्प्रतं विधीयमानः प्रयासो महदुपकारक इति निर्विवादम् । प्रियस्य श्रीपीयूषकान्तदीक्षितस्य अस्यामेव दिशि श्लाघ्योऽयं प्रयासः ।

नव्य-न्यायशास्त्रव्यसनिनो विदन्ति—आद्ये वयसि गङ्गेशोपाध्यायरचित-तत्त्वचिन्तामणिग्रन्थान्तर्गतस्य व्याप्तिपञ्चकप्रकरणस्य मथुरानाथतर्कवागीशरचित-रहस्यसमन्वितस्य अध्यापनं बालकानां बुद्धिवैशद्याय अनिवार्यम् । स्वभावतः विविधविषयावबोधसमर्थमतयो बालाः अमुं प्रकरणग्रन्थं प्रथमे वयसि साधु

अवगच्छन्ति चेत् नव्य-न्याये तेषां प्रवेशः सुकरो भवति। नव्य-न्यायशास्त्रस्य पारिभाषिकपदानां विशेष्यत्वप्रकारत्वावच्छेदकत्व-प्रतियोगित्वप्रभृतीनाम्, अनपेक्षितविषयाप्रवेशपुरस्सरमपेक्षितविषयस्पष्टतायै नितरामपेक्षितानां साधीयान् परिचयः अस्य प्रकरणग्रन्थस्य अध्ययनेन सम्पद्यते। अत एव अस्मिन् प्रस्तुते स्वीये प्रथमग्रन्थे श्रीदीक्षितः व्याप्तिपञ्चकरहस्यम् आश्रित्यैव व्याप्तेः पूर्वपक्षरूपेण स्वीकृतानि पञ्चलक्षणानि अतिस्पष्टया प्रसादगुणभूयिष्ठया संस्कृतभाषया विवृणोति। न्यायशास्त्रस्य वेत्तारः ग्रन्थममुम् अवलोक्य अवश्यं प्रमाणयिष्यन्ति व्याप्तेः पञ्चानामपि लक्षणानाम् अस्मिन् ग्रन्थे कृतं विवरणं ऋजुमतीनां बालानां महदुपकारकमिति। तदनु पूर्वपक्षीयमतिरिक्तं लक्षणद्वयमपि सिंहव्याघ्रलक्षणमिति नाम्ना न्यायपरम्परायां प्रसिद्धम् अत्र विवृतमस्ति श्रीदीक्षितेन। यद्यपीदं लक्षणद्वयं साम्प्रतं नाध्याप्यते परं पूर्वपक्षीयव्याप्तिलक्षणानाम् अवश्यं ज्ञातव्यानां प्रारम्भिकं प्रकरणम् अवसितं स्यादिति धियैव इदं लक्षणद्वयमपि अत्र विवृतम्। एवं सप्तानामपि पूर्वपक्षीयव्याप्तिलक्षणानां सङ्क्षिप्तस्य स्पष्टस्य विवरणस्य अत्र ग्रन्थे समुपलभ्यमानतया 'व्याप्तिसप्तकसार' इति नाम ग्रन्थस्यास्य निर्धारितमस्ति।

न केवलमस्मिन् ग्रन्थे सप्तलक्षणानि प्रामाणिकया सम्प्रदायशुद्धपरम्परया विवृतानि अपितु तदुपयोगिनः अन्येऽपि विषयाः सङ्क्षिप्य प्रारम्भे निरूपिताः सन्ति। यथा 'अनुमानस्वरूपम्' 'अनुमानस्य स्वतन्त्रं प्रामाण्यम्' 'चार्वाकस्य तत्सम्बन्धी पूर्वः पक्षः' 'अनुमानं व्याप्तिज्ञानं हेतुर्वा' इत्येवमादयः। इमे विषयाः एकत्र कुत्रचिद्ग्रन्थे सरलया सङ्क्षिप्तया च स्पष्टया पद्धत्या निरूपिता नोपलभ्यन्ते। अत एव न्यायशास्त्राचार्यपरीक्षोत्तीर्णा अपि बहवो न्यायाधीतिनः व्याप्तिलक्षणपरिष्कारादिकन्तु कथञ्चिदवगच्छन्ति परं नैतान् विषयान् स्पष्टं सयुक्तिकं जानन्ति।

तथ्यमिदम् यद्ययं ग्रन्थः विश्वविद्यालयैः शास्त्राध्येतृणां कृते, विभिन्नेषु पाठ्यक्रमेषु अवश्यमध्येतव्यत्वेन निर्धार्यते चेत् अनायासेन नव्य-न्यायपरिचयः सुकरः स्यात्।

या दिक् श्रीदीक्षितेन अत्र ग्रन्थे समाश्रिता तयैव दिशा यदि सर्वानपि साम्प्रतं पाठ्यक्रमे निर्धारितान् नव्य-न्यायग्रन्थान् आश्रित्य तद्गतरहस्यावबोधोपयोगिविषयनिरूपणोपचितान् स्वतन्त्रग्रन्थान् रचयेयुः न्यायशास्त्रमर्मज्ञा विद्वांसः तर्हि संस्कृतशास्त्राणां महत्त्वं तद्गतरहस्यञ्च अभिनवया सरलया शैल्या बहुतरजनसम्बद्धं स्यात्।

अहं तु कामये श्रीदीक्षितः अनेनैव क्रमेण सिद्धान्तलक्षण-पक्षता-व्यधिकरणादिसर्वेषामपि प्रकरणग्रन्थानां सङ्क्षिप्तं प्रामाणिकं सरलं स्वतन्त्रं विवरणात्मकं प्रबन्धमेवमेव सोत्साहं रचयेत् परमेश्वरश्च अस्मै एतदनुरूपं सामर्थ्यं दद्यात् ।

अमुं स्वीयं ग्रन्थरत्नं प्रकाशपथमानेतुं प्रवृत्तः श्रीदीक्षितः अनेनैव ग्रन्थेन सह पूर्वपक्षीयव्याप्तिसप्तलक्षणान्यधिकृत्य बहून् उपयोगिनः परमप्रामाणिकान् व्याख्याग्रन्थान् संयोजितवान् । इमे च ते—

व्याप्तिपूर्वपक्षीयसप्तलक्षणसम्बद्धं तत्त्वचिन्तामणिप्रकरणम्, तदधिकृत्य मथुरानाथतर्कवागीशकृतं रहस्यम्, व्याप्तिसप्तकमधिकृत्य प्रवृत्तस्य चिन्तामणिप्रकरणग्रन्थस्य रघुनाथशिरोमणिकृतं दीधितिनामकं महत्त्वपूर्णं विवरणम्, गदाधरजगदीशाभ्यां दीधितिमधिकृत्य कृतं विवरणम्, श्रीबच्चाझाकृतं गूढार्थतत्त्वालोकाभिधं क्रोडपत्रञ्च ।

इदं सर्वं श्रीदीक्षितः सुसम्पाद्य यथाक्रमं संयोज्य उपयुक्ताभिः सङ्क्षिप्ताभिः प्रामाणिकटिप्पणीभिः सम्प्रदायप्रसिद्धेन शास्त्रार्थोपयोगिशास्त्रीयविमर्शेन च सम्भूष्य अत्र प्रकाशयति । यावदहमवगच्छामि एवं विधं सङ्कलनं नाधुना यावत् प्रकाशितमस्ति । एतेन च ग्रन्थोऽयं नितरां महत्त्वपूर्णः अवश्यं सङ्ग्राह्यश्चास्ते ।

संस्कृतशास्त्राणां संरक्षणदिशि बद्धपरिकरं राष्ट्रियसंस्कृतसंस्थानम् अमुं ग्रन्थरत्नं प्रकाशयत् नूनम् आत्मनो गुणग्राहितां प्रकामं स्फुटयति । संस्थानस्येदं कर्म प्रयोजनद्वयं साधयति । प्रथमं प्रयोजनं श्रीपीयूषकान्तदीक्षितसदृशानां भविष्णूनां शास्त्ररक्षणदिशि सततमुद्यमशीलानामुत्साहवर्धनम् । द्वितीयं प्रयोजनं सहस्राधिकवर्षेभ्यः अध्ययनाध्यापनपरम्परायां प्रसिद्धानां ग्रन्थानां सारस्य मौलिकग्रन्थरूपेण प्रकाशनपरम्परायाः प्रवर्तनम् । एतादृशपरम्परया नूनम् अस्माकं प्रामाणिका ग्रन्था नवनवायमाना युवसु शास्त्रीयां प्रौढिं समुत्पादयितुं पर्याप्तम् उपयोगिनो भविष्यन्ति ।

श्रीपीयूषकान्तदीक्षितो वाराणस्या वैदुष्यशृङ्खलाया प्रशस्ततमः शिखामणिः । शास्त्रार्थविद्वत्ता शास्त्राध्ययने अध्यापने च प्रवृत्तिरस्य पारम्परिकी सम्पत् । एतस्य पितामहाः श्रीयदुनन्दनदीक्षिताः ज्यौतिषविद्याया विख्याता मनीषिण आसन् । श्रद्धेयश्रीकरपात्रस्वामिमहोदयानां स्वाध्यायत्यागतपश्छत्रच्छायायां सम्वर्धिता एतस्य पितृचरणा नैयायिककेसरिणः श्रीसुधाकरदीक्षिताः सम्प्रति सम्पूर्णानन्दसंस्कृतवि-

श्वविद्यालयस्य न्यायशास्त्रविभागमलङ्कुर्वन्ति। इतः पूर्वम् इमे पूनाविश्वविद्यालयमलङ्कुर्वन्।

एतादृशस्य विद्वत्कुलस्य रत्नमत्र भारतराजधान्यां विद्यापीठे राराजत इति संस्थायाः सौभाग्यम्। सोऽयं दीक्षितः कुलीनताऽनुशासनपाण्डित्यदीक्षया दीक्षित एकत्र विभिन्नासु जगद्गुरुश्रृङ्गेरीशारदापीठाधीश्वरसान्निध्ये समायोजितासु शास्त्रार्थसदस्सु न्यायशास्त्रदिशा दिल्लीविद्यापीठस्य गौरवं सम्वर्धयन्, अपरत्र च विद्यापीठस्य विनयाधिकारिराष्ट्रियकैडेटकोरनायकत्वेन च कुलपतीनां दक्षिणहस्तत्वेन विद्यापीठं सेवमानः सम्प्रति शास्त्रीयविषयस्योत्कृष्टलेखकत्वेनात्मानमभिव्यनक्ति इति मे हर्षप्रकर्षस्य विषयः। वस्तुत इदं हि प्रकाशनमहं तस्यैव परिवारस्यावदानं विभावयन् स्वकीयानि वर्धापनानि समर्पयामि। प्रार्थये च भगवन्तं विश्वनाथं तस्यायुष्यैश्वर्यवैदुष्यसमृद्धये, येन तस्य लेखन्या शास्त्राणां रहस्यानां संरक्षणं सर्वजनसुलभत्वं सुगमत्वञ्च सम्पाद्येत।

इदमाकर्षकं प्रकाशनं समवलोक्य नागप्रकाशनसंस्थानस्य संस्थापकानां कीर्तिशेषाणां श्रीनागशरणसिंहमहोदयानां सादरं स्मरणं कुर्वन् तेभ्यः स्वकीयं श्रद्धापुष्पाञ्जलिं समर्पयामि। तैः प्रवर्तितां परम्परां सम्वर्धयन्तौ तेषां यशस्विनौ पुत्रौ श्रीसुरेन्द्रनरेन्द्रमहोदयौ वर्तेत इति तौ ममाशीर्वादपात्रतां भजेते। प्रकाशनञ्चेदं संस्कृतविदुषामभिनन्दनभाजनम्।

—डॉ. मण्डनमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी

१ जनवरी, १९९७

कृतवेदितावेदनम्

नमामि जननीं देवीं शारदामिष्टसिद्धये।

यस्याः स्नेहसुधावृष्टिः, पीयूषस्यावलम्बनम्॥

शास्त्राध्ययनेऽभिरुचिः प्रवृत्तिश्च महतां गुरूणां कृपाकटाक्षमन्तरा न सम्भवति। ग्रन्थरचनापाटवमधिगन्तुमपि गुरूणामाशीर्वादो नितरामुपयोगित्वमावहत्येवेति स्पष्टम्। मम कुलपरम्परायां शास्त्राध्ययनपरिपाटी प्राचीनतमाऽस्ते। अस्माकं पितामहचरणाः शिवसायुज्यमवाप्ताः पं० श्रीयदुनन्दनदीक्षिताः ज्योतिषशास्त्रस्य मर्मवेत्तारः काश्यां शास्त्रसेवयाध्ययनाध्यापनेन च तपः पूतं जीवनमुज्जीवितवन्तः। श्रीमतां पितामहचरणानामाशीर्वादेन अक्षय्यतपःप्रभावेणैव च वयं सफलं निर्विघ्नं च जीवनं निर्वहाम इति मे दृढा मतिः। एतेषां यशःशरीराणां चरणयोः नमोवाक्प्रशासनं विना किमप्यन्यदुचितं न पश्यामि। सर्वदा भवामि एतेषां विषये कृतज्ञः।

मम जन्मप्रभृति आकिशोरावस्थाम् अनितरसाधारणेन स्नेहातिशयेन मां लालयतां प्रारम्भिकसर्वविधशिक्षाप्रदातॄणां ज्येष्ठपितामहानां वैद्यसम्राजां सनातनधर्मस्वरूपाणां शिवसायुज्यमवाप्तानां महनीयचरितानां पं० श्री वायुनन्दनदीक्षितानामवसरेऽस्मिन् पुण्यस्मरणं भविष्यति मम महते श्रेयस इति धिया एतानपि नितरां द्रुतेन चेतसा स्मरामि।

बाल्ये न्यायशास्त्राध्ययनं प्रति ममाभिरुचिः नैवासीत्। परमश्रद्धेयानां नव्यन्यायशास्त्रमर्मज्ञानाम् अन्येष्वपि विविधशास्त्रेषु कृताधिकाराणां मत्पितृचरणानां पं० श्रीसुधाकरदीक्षितानां दृढायासानुशासनप्रभावादेव नव्य-न्यायशास्त्रस्याध्ययने प्रवृत्तिरभिरुचिश्च मम समजनि। अनन्तरं काश्यां विविधासु पण्डितसभासु शास्त्रार्थोपस्थापनकलाऽपि पितृचरणैरेव मयि विकासमानीता। प्रबन्धरचनायाः सरणिरपि श्रीमद्भिः पितृचरणैरेव प्रादर्शि। ग्रन्थस्यास्य विषयनिर्धारणम्, तत्र-तत्रस्थलेषु विषयगतदुरूहतायाः स्वकीयगम्भीरविचारप्रकाशनेन निवारणञ्चानुष्ठाय पितृचरणैः

यन्मम साहाय्यमनुष्ठितं तदर्थमहमेतेषामाशीर्वादं कामयमानो हृदयेन कृतवेदितामावेदयामि ।

आबाल्यादेव मम प्रेरणास्रोतसां प्रातः-स्मरणीयानां पण्डितराजश्रीराजेश्वरशास्त्रिद्रविड़महोदयानां राष्ट्रपतिसम्मानितानां पं० प्र० श्रीबदरीनाथशुक्लमहाशयानाम्, पं० प्र० श्रीहरिरामशुक्लमहोदयानाञ्च चरणयोः कार्तज्ञ्यसमन्वितानि श्रद्धासुमनानि समर्पयामि ।

पद्मभूषणविभूषितान् ब्रह्मलीनान् पण्डितराजश्रीपट्टाभिरामशास्त्रिवर्यान् प्रत्यप्यहं हार्दिकीं कार्तज्ञ्यभावनां प्रतिवेदयामि । एभिरधिगतम् स्वाभाविकम् स्नेहम् न कदाप्यहं विस्मतुं प्रभवामि ।

ममाध्ययनकाले विभागाध्यक्षपदमलङ्कुर्वाणानां राष्ट्रपति-पुरस्कृतानां पं० प्र० श्रीश्रीरामपाण्डेयमहोदयानां मां प्रति सहजः स्नेहो नोपवर्णयितुं शक्यते । अखिलभारतीयासु विविधासु संस्कृतभाषणप्रतियोगितासु सम्मिलितोऽहमेतेषां गुरुवर्याणां निर्देशने साफल्यमध्यगच्छम् । एभिर्यत्साहाय्यमाचरितं तदर्थमहं हृदयेन कार्तज्ञ्यमनुभवामि ।

मुक्तात्मनां राष्ट्रपतिसम्मानितानां पण्डितप्रवराणां श्रीमतां रामचन्द्रशास्त्रिहोसमनेमहोदयानां पितृतुल्यः सहजः स्नेहातिशयो मयाधिगत इति गर्वमनुभवामि । एतेषामहमाजीवनं कृतज्ञोऽस्मि । एवं त्यागमूर्तीनां ब्रह्मीभूतानां श्रीमतां हेब्बारशास्त्रिमहोदयानाम् (श्रीकृष्णाश्रमस्वामिवर्याणाम्) अपि अहं मनसा कृतज्ञतां स्वीकरोमि ।

प्राचीनाध्ययनाध्यापनपरिपाटीसंरक्षणे साम्प्रतमपि बद्धपरिकराणां पं० प्र० महामहोपाध्यायश्रीविश्वनाथशास्त्रिदातारमहोदयानां सन्निधावप्यहमाशैशवादासम् । नितरां स्नेहेन एभिर्यदहमध्यापितो न्यायशास्त्रे व्युत्पादितश्च तदुपकारभरं कदाचिदपि नाहं विस्मर्तुं शक्नोमि ।

अध्ययनकाले पद्मविभूषणानां साहित्यजगति लब्धप्रतिष्ठानां कामेश्वरसिंहदरभङ्गसंस्कृतविश्वविद्यालयस्य कुलपतीनां श्रीमतां वि० वेङ्कटाचलम्महाशयानां विविधासु सङ्गोष्ठीषु अध्ययनदिशि उत्साहवर्धकं यन्निर्देशनं मयाऽवापि तदर्थं स्वान्तेनाहमेतेषामाभारमावहामि ।

श्रमक्रमाभ्यामध्ययनस्य परमं फलमध्यापनमेव। मम अध्यापनकर्मणि नियोजनं संस्कृतजगतः पितामहानाम् इदानीं वाराणसेयस्य सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य कुलपतिपदं विभूषयतां श्रद्धेयानां डॉ० मण्डनमिश्रमहोदयानां निदेशकत्वे राष्ट्रियसंस्कृतसंस्थानान्तर्गते जम्मूनगरस्थिते श्रीरणवीरकेन्द्रीय-संस्कृतविद्यापीठे इदम्प्रथमतया सञ्जातम्, मानितविश्वविद्यालयत्वेन परिणते श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे श्रेयस्करं मम द्वितीयमपि नियोजनन्तावत् डॉ० मिश्रमहोदयानां कुलपतित्व एव जातं 'क्लेशः फलेन हि पुनर्नवतां विधत्ते' इति न्यायेन वस्तुतो मयि नवताया आधायकमिति दृढं मन्ये।

अध्यापनकर्मणः प्रतिफलं ग्रन्थरत्नमिदं 'व्याप्तिसप्तकसार' नामधेयं साशीर्वादं श्रीमतां डॉ० मिश्रमहोदयानामुपदेशस्यैव फलमिति निर्विवादम्।

बहूनामपि शत्रूणां यदीच्छेत् कर्त्तुमप्रियम्।
आत्मा तेन गुणैर्योज्यः तत्तेषाम्महदप्रियम्॥

इत्येवं विधाभिः सूक्तिभिः गुणदृष्टिमुन्मीलयतां तत्र भवतां स्नेहमाशिषञ्च कामयमानोऽहं सुधियां हृन्मण्डनभूतानां श्रीचरणयोः हार्दिकीं कृतवेदितां सश्रद्धं समर्पयामि।

अन्ते तावद्विद्वत्तल्लजानां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिपदमलङ्कुर्वाणानां प्रो० वाचस्पति उपाध्यायानां वाङ्निष्यन्दभूतोऽहं पीयूषः श्रीमतां सहजाः स्नेहसन्ततीः स्मारं-स्मारं नितरां द्रुतेन चेतसा भवतां वचसि स्वीयां सावधानतां सत्सुतमिव वाक्यपुष्पोपहरणव्याजेन विजिज्ञापयिषामि—

मातः सरस्वति पुनः पुनरेष नत्वा बद्धाञ्जलिः किमपि विज्ञपयाम्यवैहि।
वाक्चेतसोर्मम तथा भव सावधाना वाचस्पतेर्वचसि न स्खलतो यथैते॥

एवं कार्तज्ञ्यं यथामति विज्ञाप्य अहं स्वीयं ग्रन्थं न्यायविद्यारसिकेषु समर्प्य विरमामीति शिवम्।

वि० सं० २०५३ पीयूषकान्तदीक्षितः

ज्येष्ठशुक्ल-द्वितीया

सङ्केताक्षरसूची

अनु० चि०	अनुमानचिन्तामणिः
अव० प्र०	अवयवप्रकरणम्
का०	कारिकावली
चि० १	चिन्तामणिः (प्रत्यक्षखण्डः)
चि० २	चिन्तामणिः (अनुमानखण्डः)
चि० दीधि०, चि० दीं०	चिन्तामणिदीधितिः
चि० दी० गादाधरी, चि० दी० गा०	चिन्तामणि-दीधिति-गादाधरी
चि० दी० जागदीशी, चि० दी० जा०	चिन्तामणि-दीधिति-जागदीशी
चि० दी० प्रकाशः	चिन्तामणि- दीधितिप्रकाशः
चि० दी० प्रसारिणी	चिन्तामणि-दीधिति-प्रसारिणी
चि० प्र०	चिन्तामणिः प्रकाशव्याख्यासहितः
चि०दी० गा० ब०	चिन्तामणि-दीधिति-गादाधरी-बलदेवी
चि० रहस्य, चि० रह०	चिन्तामणि-रहस्यम्
त० प्र०	तर्कप्रकाश-शितिकण्ठी
त० भा०	तर्कभाषा
तं० सि० र०	तन्त्रसिद्धान्तरत्नावलिः
त० सं०	तर्कसंग्रहः
त० सं० दी०	तर्कसंग्रहदीपिका

त० सं० दी० ग०	तर्कसंग्रह-दीपिका गङ्गाव्याख्यासम्वलिता
त० सं० दी० नृसिं० प्र०	तर्कसंग्रहदीपिका नृसिंहप्रकाशिका-सहिता
त० सं० न्याबो०	तर्कसंग्रह- न्यायबोधिनी
त० सं० नील०	तर्कसंग्रहनीलकण्ठी
त० सं० नी० प०	तर्कसङ्ग्रहः नीलकण्ठी-पट्टाभिरामीसमन्वितः
त० सं० सि०	
तर्क० सं० सि० चं०	तर्कसंग्रहः सिद्धान्तचन्द्रोदयसमन्वितः
त० सं० सि० च०	
त० सं० सु०	तर्कसङ्ग्रहः सुखप्रवेशनीसम्वलितः
न्या० कु० का०	न्यायकुसुमाञ्जलिकारिका
न्यायको०	न्यायकोषः
न्या० कु० प्र०	न्यायकुसुमाञ्जलिः प्रकाशव्याख्योपेतः
न्या० वा०	न्यायवार्तिकम्
न्या० वा० ता० प०	न्यायवार्तिकतात्पर्यपरिशुद्धिः
न्या० वा० ता० प० प्र०	न्यायवार्तिकतात्पर्यपरिशुद्धिः प्रकाश - व्याख्योपेता
न्या० सि० मु०	न्यायसिद्धान्तमुक्तावली
न्या० सू०	न्यायसूत्रम्
न्या० सू० भा०	न्यायसूत्रभाष्यम्
न्या० सू० भा० प० टी०	न्यायसूत्रभाष्यपरिशुद्धिटीका
न्या० सू० भा० वा०	न्यायसूत्रभाष्यवार्तिकम्
न्या० सू० भा० वा० टी० प०	न्यायसूत्रभाष्यवार्तिकटीकापरिशुद्धिः
न्या० सू० वा० टी०	न्यायसूत्रवार्तिकटीका
प०	पक्षता
पा० अष्टा०	पाणिनीया अष्टाध्यायी

प्रशस्त०, प्र० श० भा०	प्रशस्तपादभाष्यम्
प्रशस्त० टि०	प्रशस्तपादभाष्यटिप्पणी
भा० दी०	भाट्टदीपिका
मनु०	मनुस्मृतिः
मी० न्या० प्र०	मीमांसान्यायप्रकाशः
मी० परि०	मीमांसापरिभाषा
व्य०	व्यधिकरणम्
व्या० पञ्च०	व्याप्तिपञ्चकम्
वाच०	वाचस्पत्यम्
वेदा० परि०	वेदान्तपरिभाषा
वै०द०	वैशेषिकदर्शनम्
वै० सू० उ०	वैशिषिकसूत्रम् उपस्कारसहितम्
श्लो०	श्लोकवार्तिकम्
शक्तिवा०	शक्तिवादः
शब्द० क० द्रु०	शब्दकल्पद्रुमः
श्रीमद्भा० म० पु०	श्रीमद्भागवतमहापुराणम्
सत्प्र०	सत्प्रतिपक्षः
सव्य० प्र०	सव्यभिचारप्रकरणम्
सर्वद० सं०	सर्वदर्शनसङ्ग्रहः
सर्वद० सं० दर्शनाङ्कुर	सर्वदर्शनसङ्ग्रहः, दर्शनाङ्कुरव्याख्यासहितः
सा० नि०	सामान्यनिरुक्तिः
सि० चं०	सिद्धान्तचन्द्रोदयः
सि० ल०	सिद्धान्तलक्षणम्

भूमिका

कस्यापि ग्रन्थस्य भूमिका, केवलमाप्तपरम्पराया अनुपालनमिति वक्तुमशक्यम्, सम्बद्धग्रन्थे प्रवेशार्थमस्यानितरामुपयोगित्वात् । अल्पा भूमिः भूमिकाशब्देनाभिधीयते । भूमिशब्दव्यवहारस्तावत् क्षेत्रमधिकृत्य प्रसिद्धः । उन्नतां प्रशस्तां च भूमिमधिरोढुं स्वल्पभूमिस्वरूपस्य सोपानस्य पादपीठस्य वा महदुपयोगित्वम् । विविधविस्तृतप्रमेयपरिवेष्टितस्य ग्रन्थस्य आसमाप्तिमध्ययने प्रवृत्तिमुत्पादयितुं सामान्यतो विषयप्रयोजनसम्बन्धाधिकारिणाम् अवंगमप्रयोजिका भूमिका एव सोपानस्थानमावहति ।

विस्तीर्णे क्षेत्रे शस्योत्पिपादयिषायां सत्याम् लघुभूमिखण्डे प्रथमं बीजानि उप्यन्ते । अनन्तरं तत्राङ्कुरितानां तेषाम् अभीष्टायां विस्तृतभूमौ पुनः आरोपणे सति विपुलं सस्यं प्राप्यते कस्यापि ग्रन्थस्य दुरूहतत्त्वबहुलस्य अध्ययनादर्वाक्ग्रन्थस्य भूमिकायाः समीक्षणेन आसमाप्ति ग्रन्थाध्ययने अभिरुचिः, ग्रन्थे निरूपितानां विषयाणां सम्यग्बोधानुगुणा शक्तिश्चोपजायते । दृष्ट्यानया भूमिकापदं अल्पभूमेः वाचकमिति नितरां स्फीतम् ।

'भूमिरेव भूमिका' इति व्युत्पत्या भूमिकापदं क्षेत्रं भूमिं वा बोधयति । अङ्कुरमारभ्य फलपर्यन्तं बीजानां विकासस्य योग्यं स्थानमेव भूमिः । सस्यादीनाम् उत्पत्तये क्षेत्रपरिष्कार आवश्यकः । वनस्य परिष्कारो भूमिकर्षणेन सेचनक्रियया च भवति । गम्भीरविचारसङ्कुलस्य ग्रन्थस्यापि समाप्तिपर्यन्तम् अध्ययने प्रवृत्तये, ग्रन्थाशयं सम्यगाकलयितुं च भूमिका अनितारसाधारणं महत्त्वमादधाति । ग्रन्थेऽस्मिन् निबद्धं विषयं परिचाययितुं भूमिकेयमारभ्यते । ग्रन्थाध्ययने प्रेक्षावतां प्रवृत्तये तद्धर्मिकबलवदनिष्टाजनकत्वस्य इष्टसाधनत्वस्य च ज्ञानमावश्यकम् । भूमिकया ग्रन्थाध्ययने बलवदनिष्टाजनकत्वम् इष्टसाधनता च ज्ञाप्यते ।

सर्वशास्त्रोपकारकतया आन्वीक्षिकीत्यपराभिधं न्यायशास्त्रं सुविख्यातम्। शास्त्रस्यास्य महत्त्वं ख्यापयता महर्षिणा कौटिल्येनापि अर्थशास्त्रे एवम् उपवर्णितम्—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।

आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥

कौ० अ० १/२/१

इदन्न्यायशास्त्रं स्मृतिपुराणादिषु चतुर्दशविद्यास्थानान्यतमत्वेन परिगण्यते।[१] संसारान्धकूपप्रतिघातमसहमानान् असुभृतः समुद्दीधिर्षुणा करुणावरुणालयेन भगवताक्षपादेन न्यायदर्शनं व्यरचि। प्रमाणप्रमेयादिषोडशपदार्थानां प्रमात्मकं ज्ञानं निश्रेयसाधिगमसाधनमित्यपि अत्र न्यरूपि। वैशेषिकदर्शनस्य प्रवर्तको महर्षिः कणादः मोक्षोपयोगितया 'अथातो-धर्मं व्याख्यास्यामः' इत्यादीनि वैशेषिकसूत्राणि निरमात्। एतदुभयमपि दर्शनं यथापेक्षं नास्तिककुतर्कनिरासार्थं, मर्मज्ञैः व्याख्यातृभिः भाष्यवार्तिकटीकाभिः प्रपञ्चितं रहस्यमयं विस्तृतं च समजनि। न्यायशास्त्रीयसिद्धान्तानां तदाश्रितविचारपरम्पराणाञ्च परिवर्धनमपि शनैः शनैर्न्यायनये लब्धास्पदमदृश्यत। गोतमीयप्रमाणप्रमेयादिषोडशपदार्थानामनुशीलनमपेक्ष्य उत्तरकालीनन्यायशास्त्रपरिशीलयितृणां गङ्गेशोपाध्यायादीनां प्रत्यक्षानुमानोपमानशब्दात्मना प्रमाणचतुष्टयस्य विचार एव समभिकावधानभाजनं समपद्यत। वैशेषिकदर्शनं द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायरूपेण विभक्तस्य पदार्थषट्कस्य, अभावाभिधसप्तमपदार्थसमन्वितस्य सूक्ष्मतमं विवेचनमादधत् भारतीयदार्शनिकानां विचारपरिपाटीं सपरिष्कारं विस्तारयामास।

अनयोः द्वयोः[२] तर्कशास्त्रयोः वैशेषिकशास्त्रं प्रमेयप्रधानं, न्यायशास्त्रञ्च प्रमाणप्रधानमिति विदुषामतिरोहितम्। न्याय-वैशेषिक-शास्त्रयोः परस्परमुपकारकयोः सम्मेलनेन मिश्रितं परिष्कृतं च भव्यं शास्त्रं नव्यन्यायशास्त्रमिति वस्तुस्थितिः। नव्य-न्यायस्याधारभूमिः, प्रमाणादिषोडशपदार्थनिरूपणस्य पञ्चाध्यायसमन्वितस्य न्यायशास्त्रस्य प्रमाणप्रकरणमेव। यद्यपि आत्मशरीरेन्द्रियादिद्वादशप्रमेयाणां

---

१. पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ —याज्ञवल्क्यस्मृतिः, आचाराध्यायः, ३

२. तर्कोऽपि द्विविधो वैशेषिकनैयायिकभेदेन। सर्वदर्शनकौमुदी, पृ० ४

प्रामुख्यं सर्वापरोक्षम्, तथापि सर्वेषां प्रमेयाणां प्रतिपत्तिः प्रमाणमन्तरा न सम्भवतीति अशेषाणां प्रमेयाणां यथार्थप्रतिपत्तये प्रमाणतत्त्वावधारणार्थम् एव नव्य-न्यायप्रजापतिना गङ्गेशोपाध्यायेन तत्त्वचिन्तामणिर्नाममहानिबन्धो निरमायि। तत्त्वचिन्तामणेरिदमादिमं वाक्यम्—

"अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय, तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादितत्त्वज्ञानान्निश्रेयसाधिगम इत्यादावसूत्रयत्। तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते" इति।

न्यायदर्शनस्थं "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति सूत्रमेकमाधारीकृत्य श्रीमता गङ्गेशेन यथा स्वमतिप्रागल्भ्येन चिन्तामणिर्महानिबन्धो व्यधायि तथा नाविदितं नव्यन्यायपयोनिधिपरिशीलनमतीनां तर्करसिकानाम्। नव्यन्याय-शास्त्रस्य गम्भीरता, अवर्णनीया। अनुमानचिन्तामणौ तार्किकशिरोमणिः रघुनाथः अपि एवं गृणाति—


न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः॥ इति

न्यायशास्त्रस्य नव्य-प्राच्यविमर्शः

अधुनाऽपि न्यायदर्शनस्य भागविशेषः नव्यः अंशविशेषश्च प्राचीनः इति व्यवह्रियते। व्यवहारोऽयम् आप्तानां किं मूलकः, इति प्रश्नः प्रथमं तावदवतरति। केचित् अवच्छेदकावच्छिन्नशब्दादिभिः व्याख्यातत्वेन भागविशेषस्य नव्यत्वसाधनमभिलषन्ति। परमेतत् शास्त्रतात्पर्यस्यानवबोधान्न रमणीयम्। अन्यथा पातञ्जलदर्शनीयसमाधिपादस्थिते "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इति सूत्रे व्यासभाष्यादौ च अवच्छेदकादिपारिभाषिकपदानां व्यवहारात् तेषामपि नव्यत्वमापद्येत।

यद्यपि न्यायस्त्रीयप्रमाणभागनिरूपणपरत्वात् गङ्गेशोपाध्यायप्रवर्तितशैलीसमन्वितानां ग्रन्थानां प्राचीनेष्वेवान्तर्भावो युक्तः, एवं चिन्तामणिमहानिबन्धादारभ्य गादाधर्यादितद्विवेचनपरेषु ग्रन्थेषु आसमाप्ति कुत्रापि नव्य-न्यायशास्त्रं प्राच्यन्यायशास्त्रञ्चेत्युल्लेखो नावाप्यते, अतः सम्पूर्णोऽपि न्यायवाङ्मय एकविध एव, इति प्रतिभाति, तथापि वाचस्पतिमिश्रादयः आचार्या एव भारद्वाजकृतेः न्यायवार्तिकस्य

"अतिजर[१]तीनामि" त्यादिवाग्व्यवहारेण प्राच्यत्वं व्यवस्थापयन्तः, न्यायदर्शनमधिकृत्य नव्यप्राच्यव्यवहारं सम्पोषयन्ति ।



एतावता तत्त्वचिन्तामण्यादिनिबन्धानां नव्यत्वं न सिद्ध्यति परं न्यायसारमारभ्य प्राप्तेषु न्यायशास्त्रप्रबन्धेषु "इति प्राच्याः, इति नव्याः" एतादृशस्य व्यवहारस्य विदुषां निवहे प्रसिद्धत्वात् नव्यत्वव्यवहारो नापलपितुं योग्यः ।

निरात्मवादिनां चार्वाकाणाम्, विज्ञानात्मवादिनां बौद्धानाञ्च मतं विखण्डयितुम् आत्मादिप्रमेयजातानां यथार्थज्ञानान्निश्रेयसं स्वीकुर्वद्भिः गोतमादिमहर्षिभिस्तावत् आत्मनोऽनुमानप्रमाणेन सिद्धिः प्रादर्शि । परार्थानुमानाभिधस्य न्यायस्य पूर्वाङ्गोत्तराङ्गसाहित्येनैव पदार्थसाधनसामर्थ्यमिति तदनुसारिणां सूत्रग्रन्थानां शास्त्रीयाशेषपदार्थप्रतिपादनपराणां भाष्यवार्तिकतात्पर्यटीकादिव्याख्याग्रन्थानां प्राचीनत्वम्, व्याख्यासहितानां चिन्तामण्यादिप्रबन्धानां प्रामुख्येन प्रमाणविवेचनपराणां नव्यत्वमिति केचन समालोचकाः प्रत्यवतिष्ठन्ते । इयं कल्पनापि तर्कपदवीमधिरोढुमक्षमा,

---

१. न्यायवार्तिकं तात्पर्यटीका ।

एवं सति जैनबौद्धादिग्रन्थानां प्राचीनानामपि प्रमाणमात्रव्याख्यानपराणां नव्यत्वं व्यपदिश्येत।

अन्ये समालोचकास्तु, नास्तिकत्वेन लब्धप्रतिष्ठानां चार्वाकबौद्धादीनामेव प्राचीनेषु सूत्रभाष्यादिग्रन्थेषु खण्डनदर्शनात् एतेषां प्राच्यत्वव्यवहारः, आस्तिकत्वेन विख्यातानां सांख्यमीमांसादिशास्त्राणामपि तत्त्वचिन्तामण्यादिषु महाप्रबन्धेषु निराकरणोपलम्भात् तत्त्वचिन्तामण्यादिग्रन्थानाम् नव्यत्वव्यवहार इति अभ्युपयन्ति।

वस्तुतस्तु निखिलतन्त्रविशारदेन गङ्गेशोपाध्यायेन प्राचीनानां भाष्यादिग्रन्थानां सम्यगालोडनपुरस्सरं प्राचीनसिद्धान्तसारभूतोऽयं तत्त्वचिन्तामणिः नूतन एव निरमायि, कालादस्मादारभ्य निर्मितस्य न्यायशास्त्रनिकरस्य नव्यत्वकीर्तनं ततः पूर्वं रचितानां भाष्यादिग्रन्थानाञ्च प्राचीनत्वस्वीकरणमेव सर्वथा युक्तियुक्तमिति निर्धारणीयम्।

आत्मज्ञानार्थं मननस्यानितरसाधारणं महत्त्वं श्रुतिसिद्धमेव। तर्कस्यैव उपनिषत्सु [1]मननपदेन व्यपदेशः प्रसिद्धः। तर्कापरपर्यायं मननं, नव्यन्यायशास्त्रं विशेषरूपेण विशदयतीति विद्यते अस्य शास्त्रस्य सर्वशास्त्रमूर्धन्यत्वम्। यद्यपि बाल्मीकिप्रणीते रामायणे आन्वीक्षिक्या निन्दा[2] श्रूयते परमियं निन्दा आन्वीक्षिक्याभासमधिकृत्य कृतेति निर्धारणीयम्। यथार्थाया आन्वीक्षिक्या धर्मशास्त्रादिना विरोधः स्वप्नेऽप्यसम्भवी। विवेचिते आन्वीक्षिकीपदार्थे[3] रहस्यमिदं प्रमाणितं भवति। अपवर्गाभिधस्य श्रेष्ठतमस्य सर्वाभीष्टस्य प्रमेयस्याधिगतये मननमत्यावश्यकमित्यभ्युपेयते। आत्मनः तत्त्वज्ञानार्थं मननमविधाय अपवर्गप्राप्तये विधी-

---

१. आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। बृ. आ. उ. ४/५
(क) युक्त्या सम्भाविततत्त्वानुसन्धानं मननं तु तत्। पञ्चदशी १/५३
(ख) अत्र श्रुतितः कृतात्मश्रवणस्य मननेऽधिकारः,
मननञ्च आत्मन इतरभिन्नत्वेनानुमानम्। तर्कामृतम्, पृ० २

२. धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः।
बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते॥ —बा० रा० २/१००/३९

३. प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा,
तया प्रवर्तते इति आन्वीक्षिकी न्यायविद्या न्यायशास्त्रम्।
यत् पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः स इति। न्या० भा० १/१/१

यमानं मननमनुचितमिति चिन्तनन्तु अज्ञानविजृम्भणमात्रम्, अपवर्गस्य आत्मस्वरूपाधिगमरूपत्वात्।[१]

आत्मनो मननमनुमानं वा अनुमानस्वरूपाधिगमं विना असम्भवि, व्याप्तिज्ञानात्मकञ्चानुमानं व्याप्तिग्रहोपायनिरूपणायत्तम्। व्याप्तिग्रहोपायप्रतिपादनस्य अप्रतिपाद्य व्याप्तिस्वरूपमशक्यत्वात् प्रथमं तावत् व्याप्तिस्वरूपनिरूपणमेव सङ्गच्छते। फलतः अनुमानाटवीप्रविविक्षूणां न्यायशास्त्राध्येतृणां "व्याप्तिसप्तकम्" प्राग्द्वारमिति आस्थेयम्। व्याप्तिस्तावत् साहचर्यनियमः। सहचर्यनियम इत्यत्र पदद्वयं साहचर्यं नियमश्च। नियमपदं निपूर्वकयमधातोः भावार्थके 'अप्' प्रत्यये विहिते प्रसिद्ध्यति। "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायो वाक्यार्थव्युत्पत्तिमतामपरोक्षः। इदमाकूतम्, कृता "कृत्प्रत्ययेन, बोध्यमानो भावो द्रव्यवत् प्रकाशते" इति। द्रव्यवत् इत्यत्र सप्तम्यन्तात् 'वति' प्रत्ययः एषितव्यः। द्रव्यपदञ्च स्वाश्रयपरम्। स्वपदेन च प्रसङ्गानुसारं भावो गृह्यते। एवं हि द्रव्यपदस्य भावाश्रयपरतया द्रव्यवत् पदं भावाश्रये विशेषणतया बोध्यमानो भावः स्वाश्रयविशेषणतयापि प्रकाशत इति न्यायस्यास्य फलितार्थोऽवसीयते। प्रकृते नियमशब्दो भावप्रत्ययान्तो भावार्थस्याश्रयीभूते साहचर्ये स्वार्थस्य विशेषणतया बोधे पर्यवसितो नियमवत् साहचर्यं बोधयितुं प्रवर्तते। नियमवत् साहचर्यं नियतसाहचर्यमिति प्रसिद्धमेव, तेन च साहचर्य-नियमो नियमवत्साहचर्यपरः। नियमवत्साहचर्यं नाम नियतसाहचर्यमिति दिशा नियतसाहचर्यं व्याप्तिरिति पर्यवस्यति।

साहचर्यशब्दश्च सहचरशब्दात् भावार्थके ष्यञि विहिते सम्पद्यते। सहचरशब्दश्च सहचरतीति विग्रहे 'अच्' प्रत्यये सति व्युत्पद्यते। अत्र चरतीत्यस्य वर्तते इत्येवार्थः। प्रकरणानुसारं हेतुना साध्यमनुमातुं प्रवृत्तः पुरुषः हेतुः साध्यसहचर इति पूर्वमवश्यमाकलयति। धूमं साक्षात्कृत्य वह्निमनुमिन्वतः पुरुषस्य नूनमियं दृढावधारणा-"वह्निना सह वर्तते धूम" इति। वह्निसहचरो धूम इत्येवास्यार्थः। अत्र सहशब्दः अधिकरणार्थकः। एवं वह्निना सह वर्तते धूम इति वाक्यस्य वह्न्यधिकरणवृत्तिर्धूम इत्यर्थः संगृह्यते। अत एव धूमे विद्यमानं वह्न्यधिकरणवृत्तित्वं साहचर्यशब्देन ज्ञायत इत्यवधार्यम्। इदञ्च साहचर्यं नियतमनियतञ्चेत्युभयथा व्याकृतमाचार्यैः। यद्यपि धूमघटयोः वह्निना सह वर्तमानत्वरूपं साहचर्यं समानम्,

१. स्वरूपेण व्यवस्थानमात्मनो मोक्ष इति मोक्षविदः, तत्रात्मस्वरूपमेव कीदृक् इति चिन्त्यम्, न पृथक् मोक्षस्वरूपम्। न्या० मं० पृ० ८०

परं धूमे तत् नियतं घटे चानियतं व्यपदिश्यते। अत एव लोके न कोऽपि घटेन वह्निमनुमिनोति। धूमेनैव सर्वोऽपि व्युत्पन्नो जनो वह्निमनुमातुमुन्मुखो लक्ष्यते एतावता विवरणेन धूमे विद्यमानं वह्न्यधिकरणवृत्तित्वरूपं नियतं साहचर्यं "वह्नि-निरूपितव्याप्तिशब्देन" व्युत्पन्नैः अभिहितमिति एष्टव्यम्।

वह्न्यधिकणवृत्तित्वात्मके साहचर्ये नियतत्वविशेषणं किल व्यापकत्वात्मक-मेव परीक्षकैः न्यरूपि। फलतो नियतं साहचर्यमित्यस्य व्यापकं वह्न्यधिकरणवृ-त्तित्वमर्थो युज्यते। वह्न्यधिकरणवृत्तित्वञ्चेदं धूम एव प्रतिपाद्यते। अतस्तत्र नियतपदेन व्यपदिश्यमानं व्यापकत्वं धूमनिरूपितमेवेति अभ्युपेयम्। धूमनिरूपि-तव्यापकत्वं नाम "धूमनिष्ठाभावाप्रतियोगित्वम्" जगद्व्यापको विष्णुः इत्यत्र तथा दर्शनात्। "जगद्व्यापको विष्णुः" इति यथार्थव्यवहारो विष्णौ जगन्निरूपितं व्याप-कत्वम् उपपादयितुमेव अभ्युपेयते। व्यवहारोऽयं जगन्निष्ठाभावाप्रतियोगित्वमेव जगन्निरूपितव्यापकत्वमिति निश्चित्य याथार्थ्यं लभते। एवं सति प्रस्तुतप्रसङ्गे धूमनिष्ठाभावाप्रतियोगित्वस्य वह्न्यधिकरणवृत्तित्वे प्रकाशनेन यत्र- यत्र धूमत्वं तत्र-तत्र वह्न्यधिकरणवृत्तित्वमिति सिद्धान्तः सूपपद्यते। एतेन धूमेऽनिवार्यस्य वह्न्यधिकरणवृत्तित्वस्य प्रतिपत्तिरपि सुकरा। फलतो नियतसाहचर्यरूपाया अस्या व्याप्तेः विशिष्टाद् धूमादापामरोऽपि वह्निमनुमिनोति। अत एव वह्नेः लिङ्गं धूम इति सामान्योऽपि जनः प्रतिपत्तुमर्हति। लिङ्गस्यास्य धूमस्य तृतीयं ज्ञानं परामर्शपदव्य-पदेश्यमनुमित्युदये व्याप्तिज्ञानस्य व्यापार-विधया नियमेनापेक्ष्यते। तृतीयस्य लिङ्गज्ञानस्यास्य परामर्शस्योत्पत्तिमन्तरा अनुमित्युदयोऽप्यसम्भवी। चत्वरादौ वह्निसाहचर्यस्य धूमेऽवधारणानन्तरं वह्निव्याप्यो धूम इत्येवं वह्निव्याप्यत्वेन रूपेण प्रथममुत्पद्यमानं धूमज्ञानं प्रथमं लिङ्गज्ञानम्। अनन्तरं पर्वतादौ जायमानं धूमज्ञानं द्वितीयं लिङ्गज्ञानम्। अस्यैव द्वितीयस्य लिङ्गज्ञानस्य प्रथमलिङ्गज्ञानजन्यव्याप्ति-विषयकसंस्कारोद्बोधकतया, धूमो वह्निव्याप्य इत्येवं व्याप्तिस्मरणपुरस्सरं पर्वतो वह्निव्याप्यधूमवान् इत्येवं विधं यज्ज्ञानं पर्वतेन सह वह्निव्याप्यधूमस्य संसर्गमव-गाहते तदेव तृतीयं लिङ्गज्ञानं परामर्शात्मकम्। अन्तिमस्यास्यानुमितिकारणस्य सति सन्निधाने बाधकविशेषस्य कस्यचनासत्त्वदशायामनुमितिरवश्यमुदेत्येव।

तृतीयलिङ्गज्ञानरूपोऽयं परामर्शो व्याप्तिं पक्षधर्मतां च प्रामुख्येन विषयीक-रोति। पक्षधर्मताशब्दः खलु पक्षेण सह हेतोस्तं सम्बन्धमभिधत्ते येन सम्बन्धवि-शेषेण हेतुः साध्यव्याप्यो व्यपदिश्यते। तृतीयमिदं लिङ्गज्ञानं यतो

व्याप्तिविशेषितस्य हेतोः पक्षेण सह वैशिष्ट्यावगाहकमत एव विशिष्टवैशिष्ट्यावगाहिज्ञानात्मकतया विशेषणतावच्छेदकप्रकारकज्ञानं विना उत्पत्तुं सामर्थ्यन्नावहति, तेन चास्योत्पत्तेः पूर्वं हेतौ साध्यनिरूपितव्याप्तेः ज्ञानस्यापरिहार्यतयापि न्यायनयपारावारपारदृश्वानस्तर्करसिका व्याप्तिमेव प्रथमं प्रपञ्चयन्ति ।

व्याप्तिलक्षणम्

न्यायसिद्धान्तः

व्याप्तिरियं भाष्यकारेण वात्स्यायनेन अनुमानसूत्र-व्याख्यानावसरे लिङ्गलिङ्गिनोः सम्बन्धदर्शनम् इत्यत्र सम्बन्धपदेन असूचि । (न्या. भा. २८१) वार्तिककारेण भारद्वाजोद्योतकरेण 'तत्पूर्वकमि' त्यस्य व्याख्यानावसरे प्रथमप्रत्यक्षतया भाष्यकारेण व्याख्यातमवलम्ब्यैव लिङ्गलिङ्गिसम्बन्धदर्शनम्, आद्यं प्रत्यक्षम् इति स एव सम्बन्धो निरदेशि । (न्या. वा. २८२)'

लिङ्गलिङ्गिनोः सम्बन्धमिमं प्रथमतो वार्तिककारो व्याप्तिपदेन व्याजहार (न्या० वा० ३०१) ततः पश्चात् टीकाकारो वाचस्पतिमिश्रस्तथा बहु बारं व्याहरत् (ता० टी० ३०३) । अयं च सम्बन्धः स्वाभाविको नियतश्च यदि, तदा गमको भवति । अतो नियतः सम्बन्धः व्याप्त्यपरपर्यायः अनुमानाङ्गं भवितुमर्हति ।[1]

न्यायमञ्जरीकारो जयन्तभट्टः "यद्दर्शनाद् यत्र यस्य प्रतीतिर्भवति, अस्ति कश्चनसम्बन्धस्तयोरर्थयोः स च सम्बन्धस्तादात्म्यतदुत्पत्तिरूपो नहि सम्भवति । साहचर्यमेव स सम्बन्ध इति नैयायिकमतम् । अयमेव अविनाभाव इत्युच्यत इत्यभिदधे ।[2] इदम्प्रथमतया अनेन अन्तर्व्याप्तिः बहिर्व्याप्तिरिति नूतनो व्याप्तिविभागः कृतः ।

---

१. यो वा स वास्तु सम्बन्धः केवलं यस्यासौ स्वाभाविकः, नियतः स एव गमको गम्यश्चेतरः सम्बन्धीति युज्यते । तथाहि धूमादीनां वह्न्यादिसम्बन्धः स्वाभाविकः । न तु वह्न्यादीनां धूमादिभिः । ता० टी० पृ० ३०९

२. अतो यद्दर्शनाद्यत्र प्रतीतिरुपजायते ।
तयोरस्त्यर्थयोः कश्चित् सम्बन्ध इति मन्महे ॥
तादात्म्यतातदुत्पत्ती न श्रद्दधति तद्विदः ।
साहचर्यं तु सम्बन्धं इति नो हृदयङ्गमम् ॥
तस्मिन् सत्येव भवने न विना भवनं ततः ।
अयमेवाविनाभावो नियमः सहचारिता ॥ न्या० म० पृ० १२१

साध्यसाधनयोः व्याप्तिः कणादेन प्रसिद्धिरित्युक्ता (वै०द० ३/१/१४)। प्रशस्तपादंस्तु अविनाभावपदेन व्याप्तिमुवाच। तद्ग्रहणप्रकारः विधिरित्युक्तवान् किरणावल्यामुदयनाचार्यः।[१]

व्यापकस्य व्याप्याधिकरणोपाध्यभावविशिष्टः सम्बन्धो व्याप्तिरिति शिवादित्यः सप्तपदार्थ्याम् (स०प० ७०) सा चेयं व्याप्तिः सिद्धान्तेऽस्मिन् प्रमुखस्थानमधिरोहति अनुमानप्रमाणमूलभूतत्वात्। बहूनि व्याप्तिलक्षणानि बहुभिः प्रणीतानि, येषु तदनन्तरकालिकैः दोषाः समुद्भाविताः। विस्तरभिया न तानि सर्वाणि अत्र समुपस्थाप्यन्ते। सिद्धान्त-व्याप्तिलक्षणं मणिकारोक्तं त्विदम्—"प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः"(गादा० ३०७) इति। तेनैव पुनः विशेषव्याप्तिलक्षणानि त्रीण्येवं प्रतिपादितानि पश्चात् यथा—

(क) यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभाव-प्रतियोगितासामानाधिकरण्यम्,

(ख) यत्समानाधिकरणान्योन्याभावप्रतियोगि यद्वन्न भवति तेन समं तस्य सामानाधिकरण्यं वा,

(ग) स्वसमानाधिकरणान्योभावाप्रतियोगियद्वत्कत्वं वा (गादा० ५५९-६७)इति।

इमानि च लक्षणानि तदनन्तरकालिकैः रघुनाथशिरोमणि-मथुरानाथ-गदाधर-जगदीशादिभिः बहुधा व्याख्यातानि। बहूनि व्याख्यातानि प्रकृते अप्रस्तुतया विस्तरभियात्र न तानि प्रस्तुतानि।

मुक्तावल्यां विश्वनाथो हेत्वधिकरणवृत्तिः योऽभावस्तद-प्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरित्यब्रवीत्।[२] अन्नम्भट्टस्तु यत्र -यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिरित्युक्त्वा (त०सं० ३४) साहचर्यं सामानाधिकरण्यं, तस्य नियमः अर्थात् हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्य-

---

१. विधिस्तु अविनाभावग्रहणप्रकारः। किर० पृ० २९५

२. अथवा हेतुमन्निष्ठविरहाप्रतियोगिना।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते॥ कारि० ६९

सामानाधिकरण्यं व्याप्तिरिति विवृणोति स्म । धूमव्यापकवह्निसामानाधिरकरण्यं व्याप्तिः, इति न्यायबोधिन्यां गोवर्धनः (न्या० बो० ३६) ।

सा चेयं व्याप्तिः भूयोदर्शनग्राह्या अन्वयव्यतिरेकभेदेन सिद्धान्तेऽस्मिन् द्विधा भिद्यते । यथा भावयोः साहचर्यम् अन्वयव्याप्तिस्तथा, अभावयोः साहचर्यं व्यतिरेकव्याप्तिः । अन्वयः भावः व्यतिरेकस्त्वभावः ।

इयान् विशेषो यद् यो व्याप्यव्यापकभावो भावयोः दृष्टः अन्वयव्याप्तौ, स व्यतिरेकव्याप्तौ अभावयोः विपर्यस्तो भवतीति ।[1]

भाट्टसिद्धान्तः

कौमारिलैरपि व्याप्तिस्वरूपं प्रत्यपादि—नियतसम्बन्धो व्याप्तिरिति । हेतुसाध्ययोः नियतः सम्बन्धः संयोगः, समवायः, एकार्थ-समवायः, कार्यकारणभावः तादात्म्यलक्षणो वा व्याप्तिः[2] नैते सम्बन्धाः प्रयोजका गम्यगमकभावे । कृत्तिकारोहिण्यादीनां तदभावेऽपि लिङ्गलिङ्गिभावस्योपपत्तेः । एवमेव कार्यस्यापि कारणगमकता न कार्यत्वनिबन्धना किन्तु नियतत्वप्रयुक्ता ।[3]अनुमानव्यवहारे व्याप्तिलक्षणः अयं सम्बन्धः अङ्गमिति एतेषां मतम् । व्याप्यमधिकदेशकालावृत्ति, व्यापकञ्च अधिकदेशवृत्ति ।[4] एवं चैतदुक्तं भवति । यत् दृश्यमानेषु देशकालादिषु यो हेतोः साध्येन सह सहभावः स एव नियमः । तेन नियमेन यस्य येन यथादृष्टेषु देशकालादिषु येन केनापि सम्बन्धेन पूर्वोक्तेन साहित्यं नियततया उपलभ्यते सा व्याप्तिरिति सा च व्याप्तिः भूयो दर्शनेन व्यभिचारादर्शनेन सम्यगवगम्यते[5] व्याप्तिः अविना-

---

१. भावसामान्ययोर्यद्वत् तथैव तदभावयोः ।
भावयोः साहचर्यं यदन्वयं तत्रचक्षते ॥
व्यतिरेकं तु मन्यन्ते साहित्यं तदभावयोः ।
इयानेव विशेषस्तु भावयोर्यादृशो ययोः ॥
व्याप्यव्यापकता सैव व्यत्यस्ता तदभावयोः । न्या० मं० पृ० १२३

२. शा० दी० पृ० ६०

३. सम्बन्धो व्याप्तिरिष्टात्र लिङ्गधर्मस्य लिङ्गिना । श्लो० वार्तिक पृ० ३४८

४. व्याप्यस्य गमकत्वं च व्यापकं गम्यमिष्यते । यो यस्य देशकालाभ्यां समो न्यूनोऽपि वा भवेत् । स व्याप्यो व्यापकस्तस्य समो वाऽभ्यधिकोऽपि वा ।श्लो० वा० पृ० ३४८

५. भूयोदर्शनगम्या च व्याप्तिः सामान्यधर्मयोः ।
ज्ञायते भेदहानेन क्वचिच्चापि विशेषयोः ॥ श्लो० पृ० ३५०

भाव:, नियम:, प्रतिबन्ध:, अव्यभिचार इति अनर्थान्तरम् । तथैवं व्याप्यम्, नियम्यम्, गमकम्, लिङ्गम्, साधनमिति च पर्यायाः ।[१]

मानमेयोदये तु स्वाभाविकसम्बन्धो व्याप्तिरित्युक्तम् । अर्थात् निरुपाधिकसम्बन्धरूपा व्याप्तिरिति फलितम् ।[२] सा च व्याप्ति: अन्वयव्याप्ति: व्यतिरेकव्याप्तिरिति द्विधा भिद्यते। सति साधने साध्यसद्भाव: अन्वयव्याप्ति: । सति साध्याभावे हेतोरप्यभावो व्यतिरेकव्याप्ति: ।[३]

गागाभट्टस्तु भाट्टचिन्तामणौ अत्र "गौडमैथिलसर्वस्वम्" इत्युपक्रम्य नव्यन्यायसरण्या बहूनि व्याप्तिलक्षणान्युपन्यस्य, हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्वावच्छिन्नवृत्तित्वं व्याप्ति: ? इति जरन्मीमांसकमतमुपन्यस्य, यादृशप्रतियोगितावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षिततत्वात्[४] तामलिलक्षत् ।

प्राभाकरसिद्धान्त:

अनुमानलक्षणघटकज्ञातसम्बन्धस्येति पदेनैव व्याप्तिरभिहिता । प्रभाकर: कथयति बृहत्यां, यथा व्याप्यं हि दृष्टं व्यापकं गमयति (बृहती ९३) इति । तेनेदमवगम्यते यद् दृष्टस्य व्याप्यस्य व्यापकावगमसामर्थ्यं यद्वर्तते सैव व्याप्तिरिति । अव्यभिचरितत्वमित्यर्थ: । शालिकनाथ: ऋजुविमलपञ्चिकायां अमुमेवाभिप्रायं मनसि कृत्य प्रतिपादयति "अव्यभिचारो हि व्याप्ति: । अव्यभिचारश्च सकलदेशकालव्यापित्वम्"[५] इति । स चाव्यभिचार: कथं ज्ञायत इत्युक्तौ भूयो दर्शनेनेति तत्रैव तेन प्रत्यपादि ।[६]

---

१. व्याप्तिर्नियम: प्रतिबंन्धो व्यभिचारस्तथाविनाभाव: ।
व्याप्यं पुनर्नियम्यं गमकं लिङ्गञ्च साधनं हेतु: ॥
इत्युभयो: पर्याया इति तस्य तु दर्शनं त्रिविधम् ।मा० मे० पृ० ४८

२. स्वाभाविक: सम्बन्धो व्याप्ति: । स्वाभाविकत्वं उपाधिराहित्यम् । उपाधिरिति च साध्यस्य साक्षात् प्रयोजकं हेत्वन्तरमुच्यते ।मा० मे० पृ० २६

३. द्वेधा हि व्याप्ति: अन्वयव्याप्ति: व्यतिरेकव्याप्तिश्चेति । तत्र साधनस्य सद्भावे साध्यस्यापि सद्भाव: अन्वयव्याप्ति: साध्यस्याभावे साधनस्याभाव: व्यतिरेकव्याप्ति: । मा० मे० पृ० ५३-५५

४. भा० चि० पृ० २६

५. बृहती पृ० ९५

६. अव्यभिचारस्त्वसकृद्दर्शनगम्य: । बृहती पृ० ९६

एवं च हेतुहेतुमतोः नियतसाहचर्यं व्याप्तिरित्युक्तं भवति । प्रत्यपादि चैवमेव प्रकरणपञ्चिकायां शालिकनाथेन । ज्ञातसम्बन्धनियम-पदव्याख्याने सोदाहरणम् ।[१] एतावता निरुपाधिकसम्बन्धो व्याप्तिरित्युक्तं भवति । अत्रोपाधिशून्यता अन्वय-व्यतिरेकाभ्यां गृह्यते । असकृद्दर्शन-निबन्धनं चैतत्(प्र० प० २०६) ।

एवं स्थिते नन्दीश्वरः प्रभाकरविजये सकृद्दर्शनगम्या व्याप्तिरिति कथयन्, भूयोदर्शनानावश्यकतां बहुशः प्रतिपादयति ।[२]

वह्निधूमयोः सम्बन्धनियमे प्रथमं प्रत्यक्षमेव प्रमाणम् । निरुपाधिकत्वनिश्चयश्च भूयोदर्शनेन यत्नतः अन्विष्यमाणस्यापि उपाधेस्तत्रादर्शनात् । अतो भूयोदर्शनम् अर्थवदित्येव प्राभाकराणां राद्धान्त इति ऋजुविमलपञ्चिकातः, प्रकरणपञ्चिकातश्च अवगम्यते ।[३] उपरितनो नन्दिकेश्वरसिद्धान्तस्तदुपज्ञ एवेति प्राचीनप्राभाकरग्रन्थपरिशीलनेन प्रतिभाति ।

प्राभाकरमतानुरोधेन नियमापरपर्यायायाः व्याप्तेः सम्बन्धत्वं नास्ति ।[४] तथैव तस्यास्तादृशसम्बन्धरूपतया अनुमानकारणता च नास्ति । नहि नाम स्वस्वामिभावादिव्यतिरिक्तो व्याप्तिर्नामापरः सम्बन्धः कश्चन वरीवर्ति । अतः कार्यकारणभावादिः सम्बन्ध एव कस्यचिद्व्यापकः कस्यचित्तु न व्यापक इति लोकानुभवः ।[५]

यस्य वा केनचन सम्बन्धेन व्याप्यता तस्यैव तं प्रति गमकता अङ्गीकार्या । यथा—धूमो हि वह्निकार्यतया वह्निसंयोगितया व्याप्त इति तं प्रति तस्य गमक-

---

१. तस्मात् कार्यकारणभावादय एव सम्बन्धा यस्य येन नियता अव्यभिचारिणः स हेतुरिति दर्शयितुं ज्ञातसम्बधनियमस्य इत्युक्तम् । धूमस्य कार्यस्य कारण-सम्बन्धो नियतः, अग्नेस्त्वनियतः । प्र० पं० २०२

२. अतो न भूयोदर्शनेन तत्त्वग्रहण उपयोगः । प्र० वि० पृ० ९९

३. ज्ञायते नायं तदुपाधिक इति एतच्चासकृद्दर्शनप्रभावादित्युक्तम् । बृहती पृ० ९३ प्रयत्नेनान्विष्यमाणे औपाधिकत्वानवगमात् । तच्चैतद् भूयो दर्शनायत्तमिति मन्वाना आचार्या भूयोदर्शनमादृतवन्तः । प्र० प० पृ० २०५

४. अनुगमननियमनव्याप्तिरूपास्तुसम्बन्धा एवायुक्ताः । क्रियागर्भत्वात् सम्बन्धस्य । अग्न्यादीनां धूमादीन् प्रति अनुगमननियमव्यापन क्रियासम्भवात् । (प्र० प० २०२)

५. बृहती पृ० ९९५

त्वम् ।[१] न तथा वह्नेः सर्वदा धूमसम्बन्धित्वं वर्तते इति सम्बन्धाव्याप्ततया न तस्य गमवत्वम्[२] ।

समीक्षा

व्याप्तिरितीदं पदं ऐदम्प्राथम्येन न्यायग्रन्थेषु न्यायवार्तिककारेण भारद्वाजोद्योतकरेण प्रायोजि । तत्प्राक्तनाभ्यां वात्स्यायनगौतमाभ्याम् इदं पदं न प्रयुक्तम् । अनेकबौद्धकथाप्रसङ्ग० व्यापृतेन, तत्सिद्धान्तखण्डनपण्डितेन च वार्तिककारेण तेभ्य एवेदं पदं परिगृहीतमस्मिन् अथ प्रयुक्तमिति तर्क्यते । श्लोकवार्तिके कुमारिलभट्टेन बृहत्यां प्रभाकरेण च व्याप्तिरिति पदं प्रयुक्तम् ।

वि-आप्तिः व्याप्तिः । अयं कश्चन विलक्षणस्सम्बन्धः । अयञ्च व्याप्यव्यापकयोर्मध्ये वर्तमान इत्युच्यते । यथा—"पर्वतो वह्निमान् धूमात्" इति सर्वप्रसिद्धे वाक्ये धूमवह्न्योः व्याप्यव्यापकभावः । सर्वत्र साध्यं व्यापकं साधनं च व्याप्यम् इति नियमः । अयमेव सम्बन्धो लिङ्गलिङ्गिसम्बन्धो गम्यगमकभावः, साध्यसाधनभावः, गमकगम्यभावः, साधनसाध्यभावः, अविनाभावनियमः इत्यादिपदैरुच्यते ।[३]

कणादेन प्रसिद्धिरिति, साङ्ख्यैर्योगैश्च प्रतिबन्ध इति, जयन्तभट्टेन साध्याविनाभावितेति, बहुलतया नव्यनैयायिकैः व्याप्तिरिति, जैनैः अन्यथानुपपत्तिः अथवा अन्यथानुपपन्नत्वमिति, प्रशस्तपादेन च अविनाभावेति चायमेव तत्तद्ग्रन्थेषु निर्दिष्टः सर्वेष्वप्येषु व्याप्तीतिपदमेव नव्यैः दार्शनिकैः अतिमात्रमाहतम् ।

उपरितनसम्बन्धबोधकतया अस्य पदस्य प्रयोगे प्रायो नैयायिकमतमेव भाट्टैः प्राभाकरैः अनुसृतमिव प्रतिभाति । भाट्टप्रस्थानमूलपुरुषेण कुमारिलभट्टेन, तदनुयायिभिः, प्रभाकरप्रस्थानप्रारम्भकेण प्रभाकरेण, तन्मार्गावलम्बिभिश्च व्याप्तिपदस्य प्रयुक्तत्वात् । व्याप्तिस्वरूपनिरूपणे तद्विभागे च नैयायिकमतं मात्रयापि नातिक्रमन्ति मीमांसका इति तत्तद्ग्रन्थदर्शनेनास्माभिरवगम्यते ।

व्याप्तिरियं भूयोदर्शनजन्येति यन्नैयायिकैरुपन्यस्तं तत्रापि नास्ति मीमांसकानामसम्मतिः । किन्तु प्राभाकरविजयकर्त्रा नन्दीश्वरेण सकृद्दर्शनगम्यैव व्याप्ति-

---

१. यः कश्चिद्येन यस्येह सम्बन्धो निरुपाधिकः ।
प्रत्यक्षादिप्रमासिद्धः स तस्य गमको मतः ॥ प्र० पृ. २०६

२. बृहती पृ० ९५

३. कृष्णमाचार्यः वि० कार्यकारणभावः,

रिति प्रत्यपादि। तत्तु प्राचीनैः प्रभाकरैः कुत्रापि नोक्तम्। परन्तु प्रकरणंपञ्चिकायां शालिकनाथपङ्क्तिषु [1]भूयोदर्शने अनास्था मनाक् सूचितेव प्रतिभाति।

सम्बन्धस्य क्रियागर्भत्वमभ्युपगच्छद्भिः प्राभाकरैः व्याप्तेः सम्बन्धत्वं नोरीकृतम्। नैयायिकैः भाट्टैश्च तस्याः सम्बन्धत्वं स्पष्टमुक्तम्। वस्तुतः प्राभाकरैरपि साधारणसम्बन्धरूपत्वमेव तस्याः प्रतिषिद्धम्, किन्तु विलक्षणसम्बन्धरूपता तेषामपि इष्टैवैति प्रतिभाति। (प्र० पं० २०६) सम्बन्धनियमे प्रथमं प्रत्यक्षमेव प्रमाणमिति यत् प्राभाकरैरङ्गीकृतं तन्नैयायिकेनाभ्युपगम्यते अनुभवानुरोधित्वात् इत्यलं सङ्क्षिप्तया व्याप्तिचर्चया।

व्याप्तिसप्तकसारप्रणयनस्य विचारः कैशोर एव मयि अङ्कुरितः। व्याप्तिसप्तकसारः तावन्न निर्णेतुं शक्यः यावद्व्याप्तिपञ्चकस्य सिंहव्याघ्रलक्षणसहितस्य आप्तगुरुपरम्परयाऽनुशीलनमध्ययनभावनाभ्यां न स्यादिति दृढमतिरहं वाराणस्यां स्वपितृचरणेभ्यः पं० प्र० श्री सुधाकरदीक्षितेभ्य एव व्याप्तिसप्तकं साधु अधीतवान्। अध्ययनावसरे श्रीबच्चाझाप्रणीतस्य तत्त्वालोकस्य व्युत्पत्तिनिकषरूपेण काश्यां विद्वन्निवहे प्रतिष्ठितस्य मननमपि मयाऽकारि। एवं गुरुकृपया व्याप्तिसप्तकसारं तावन्निर्णीय, उत्कटेयं तद्ग्रथनप्रवृत्तिरपि पद-वाक्य-प्रमाण-पारावारीणानां करालेऽस्मिन् कलिकाले लोकोपकारकाणां शास्त्राणां विशेषतः सर्वविद्याप्रकाशकस्य मूलस्तभभूतस्य नव्यन्यायशास्त्रस्य तद्विदाञ्च संरक्षणे सर्वथा तत्पराणाम् अनन्तश्रीविभूषितानां तुङ्गतटवासिनां दक्षिणाम्नायश्रीशारदापीठाधीश्वराणां जगद्गुरुशङ्कराचार्याणां श्रीभारतीतीर्थमहास्वामिनां सदसस्पतित्वे शृङ्गगिरौ समायोजिताया वाक्यार्थसदसि नव्य-न्यायशास्त्रे ग्रन्थनिबन्धनोपदेशेन समुदिता। अत्र श्रीचरणानामनुग्रहविशेषं विनतोऽहं संततं स्मरामि।

प्रमुखव्याख्यासन्दृब्धोऽयं ग्रन्थो वस्तुतः प्रेक्षावतां सौकर्याय कल्पितोऽस्ति। ग्रन्थस्यास्य प्रकाशनकार्ये राष्ट्रियसंस्कृतसंस्थानस्य तदधिकारिणाञ्च अमूल्यं साहाय्यं नाहं विस्मर्तुं प्रभवामि। एतदर्थम् अहमेतेषां हृदयेनाभारमावहामि। ग्रन्थनिबन्धननिपुणानाम् अग्रजानां डॉ० भास्करमिश्रमहोदयानां ग्रन्थकलेवरपरिष्करणे यन्निरुपमं साहाय्यं समासादितं तदर्थमहं श्रीमतां सहजं सौहार्दं स्वीकरोमि। संस्कृतग्रन्थानां प्रकाशने कुशलनां प्रथितयशस्कानां 'नागप्रकाशकानां', तावद्

१. प्र० प० पृ० २०५

ग्रन्थस्यास्य मुद्रणे समुत्साहं रुचिविशेषं च प्रदर्शयतां कृतज्ञतां विज्ञापयामि । समेषां सुहृदां यन्मयाऽत्र साहाय्यं प्राप्तं तदर्थमहं तेभ्यो हार्दिकीं कृतज्ञतां सधन्यवादं व्याहरामि ।

लेखनकर्मणि सन्दर्भग्रन्थसूचीनिर्माणादिसन्दर्भे च स्वपत्न्याः श्रीमत्याः प्रीत्या मया यः सहयोगः समवाप्तः स नितरां प्रशंसनीय आस्ते। मम शिष्येण श्रीभगवतीप्रसादरतूड़ीनामधेयेन सोत्साहं ग्रन्थसंशोधनादिकर्मणि विहितः सहयोगो नितरां श्लाघनीयः, एतदर्थमहम् एनं स्नेहसिक्तेनाशिषा संयोजयामि। पर्यवसाने सुधियः सज्जनान् स्मरामि पद्येनानेन—

स्यादेव मेऽलसतया मतिमान्द्यतो वा
दोषः क्वचित्क्वचिदथापि न कापि शङ्का ।
नैसर्गिकी खलु गुणीकरणप्रवीणा
शक्तिः सदा विजयते भुवि सज्जनानाम् ॥

विषयानुक्रमणिका

पूर्वो भागः

अनुमानं व्याप्तिश्च

प्रथमं प्रकरणम्

अनुमानस्वरूपविमर्शः

अनुमानस्वरूपम्

भारतीयदर्शनेषु चार्वाकमतिरिच्य[1] सर्वे दार्शनिकाः प्रत्यक्षमिवानुमानमपि स्वतन्त्रं प्रमाणमिति मन्वते । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति[2] गौतमोक्त्यनुसारमान्वीक्षिक्यामभ्युगतेषु चतुर्षुप्रमाणेष्वन्यतमं प्रमाणमनुमानमिति सुस्पष्टम् । अत एव नव्यन्यायप्रजापतिस्तत्रभवान् गङ्गेशोपाध्यायो लक्षणस्वरूपप्रामाण्यादिभिः[3]अनुमानचिन्तामणावनुमानं ज्ञापयितुं प्रवृत्तः "तत्करणमनुमानं तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते"[4] इत्यादि प्रतिपादयति । इतरभेदज्ञापको धर्मो लक्षणम्, लक्ष्यतावच्छेदकीभूतो धर्मश्च स्वरूपमिति शास्त्रकर्तृणां सङ्केतः[5]प्रकृते अनुमानस्येतरभेदज्ञापकं रूपमनुमितिकरणत्वमेवेति सर्वसम्मतं पक्षमुपरितनग्रन्थेन स्पष्टयन् गङ्गेशस्तस्य स्वरूपमधिकृत्य पूर्वोत्तरपक्षावपि स्फुटयति—"तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति" । परामृश्यमानलिङ्गत्वमनुमानस्वरूपमिति पूर्वः पक्षः, लिङ्गपरामर्शत्वमनुमानस्वरूपमिति सिद्धान्तः ।

---

१. देहातिरिक्त आत्मनि प्रमाणाभावात् । प्रत्यक्षैकप्रमाणवादितयानुमानादेरनङ्गीकारेण प्रामाण्याभावात् । सर्वद० सं०, पृ० ३.

२. न्यायसूत्रम् १/१/३,पृ० १८२

३. तत्र लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीये करणस्य क्रियाभेदभिन्नमूर्तिकतया क्रियालक्षणपूर्वकं तल्लक्षणमाह व्याप्तीत्यादिना । चि० दीधि० २,पृ० २४

४. तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानमनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते । चि० २,पृ० २४

५. लक्षणेति, लक्षणमितरभेदानुमापकरूपम्, स्वरूपं लक्षणग्रहोपयोगि अनुमितिकरणतावच्छेदकरूपं तच्च लिङ्गपरामर्शत्वम्, प्रामाण्यं प्रत्यक्षातिरिक्तं प्रमितिकरणत्वम्, आदिपदात् विभाजकरूपपरिग्रहः । चि० दी० गादाधरी २,पृ० २४

परामृश्यमानलिङ्गत्वमनुमानस्वरूपमिति पूर्वपक्षस्थापनम्

आपाततस्तु आपामरस्य लिङ्गत्वमेवानुमानस्वरूपमिति झटिति प्रतिभाति, परं पक्षे विद्यमानमपि साध्यनिरूपितव्याप्तिविशिष्टत्वेन लिङ्गं ज्ञानविषयं सद् अनुमितिं जनयितुं नालमिति स्फुटप्रतिपत्तिकतया साध्यनिरूपित-व्याप्ति-विशिष्टत्वेन ज्ञायमानलिङ्गत्वात्मकं परामृश्यमानलिङ्गत्वमेव अनुमान-स्वरूपमिति केचन व्याचक्षते। न चैवं ज्ञानभिन्नस्य परामृश्यमानलिङ्गस्याऽनुमितौ करणत्वेऽनुमितेः ज्ञानाकरणकज्ञानात्मक-प्रत्यक्षप्रमान्तर्भूततयाऽनुमानस्य पृथक् प्रामाण्यानुपपत्तिः, स्वातन्त्र्येण प्रमिति सत्ताया एव प्रमाणसत्तायां नियामकत्वादिति वाच्यम्, अनुमितिप्रमाया अनन्तरमनुमिनोमीत्येवानुव्यवसायो न तु प्रत्यक्षयामीति, तेन चानुमितौ प्रत्यक्षत्वविरुद्धानुमितित्व-जातिसिद्ध्या प्रत्यक्षप्रमायामनुमितेः अन्तर्भावासम्भवेनानुमानस्य पृथक् प्रामाण्यसिद्धेः यत्र स्थलविशेषे ज्ञानस्यैव हेतुत्वं तत्र जायमानाया अनुमितेः ज्ञानकरणकत्वेन प्रत्यक्षलक्षणानाक्रान्तायाः पृथगस्तित्वस्य जागरूकतया तत्करणस्य ज्ञानात्मकस्यानुमानस्य स्वतन्त्रप्रामाण्योपपत्तेः निष्प्रत्यूहत्वाच्च। नन्वेवमपि अनुमितित्वजातिमत्तया सिद्धायामनुमितौ ज्ञानभिन्नहेतुकायां ज्ञानाकरणकज्ञानत्वात्मकस्य[१] प्रत्यक्षलक्षणस्यातिव्याप्तिः दुर्निवारैवेति चेन्न। "ज्ञानाकरणकज्ञानवृत्ति अनुभवत्वव्याप्यचाक्षुषादिवृत्तिजातिमत्वम्।"[२] "ज्ञानकरणकत्वव्यभिचारि अनुभवत्वव्याप्यचाक्षुषादिवृत्तिजातिमत्त्वम्[३]" "ज्ञानत्वावच्छिन्नकरणकत्वाभाववज्ज्ञानवृत्यनुभवत्वव्याप्यचाक्षुषादिवृत्तिजातिमत्त्वमित्येवं"[४] वा प्रत्यक्षलक्षणस्वीकारेण तादृशजातेः प्रत्यक्षत्वस्यानुमितावसत्त्वेनातिव्याप्त्यसम्भवात्।

---

१. (क) ज्ञानाकरणकं ज्ञानमिति तु वयम्। चि० १, पृ० ५९५
(ख) अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। न्या० सि० मु० पृ० १७४

२. (क) ज्ञानेति। ज्ञानाकरणकज्ञानवृत्यनुभवत्वव्याप्यजातिमत्त्वमर्थः। तेन विशिष्टवैशिष्ट्यादिप्रत्यक्षे नाव्याप्तिः। चि० दी० जागदीशी २, पृ० ७१
(ख) ज्ञानाकरणकज्ञानत्वेति। तादृशज्ञानवृत्यनुभवत्वव्याप्यजातिमत्त्वेनेत्यर्थः। उक्तलक्षणे च चाक्षुषवृत्तित्वादिकं जातिविशेषणमुपगम्यानुमितेर्व्यावर्तनसम्भवादित्यस्वरसः केचिदित्यनेन सूचितः। चि० दी० गादाधरी २, पृ० १०७

३. ज्ञानकरणकत्वव्यभिचार्यनुभवत्वव्याप्यजातिमत्त्वमित्यर्थः, तेन श्रवणकरणकात्मसाक्षात्कारसङ्ग्रहः। चि० दी० दीधितिप्रसारिणी २, पृ० ३६

४. "ज्ञानाकरणकेति" ज्ञानत्वावच्छिन्नकरणकत्वाभाववज्ज्ञानत्वं, ज्ञानकरणकत्वव्यभिचार्यनुभवत्वव्याप्यजातिमत्त्वं वार्थः। चि० दी० प्रकाशः, २, पृ० ९३

लिङ्गपरामर्शत्वमनुमानस्वरूपमिति सिद्धान्तपक्षव्यवस्थापनम्

परं नेदं युक्तिसहम्, परामृश्यमानलिङ्गत्वमनुमानस्वरूपमिति वादिनोऽप्यनुमानलक्षणमनुमितिकरणत्वमेवाभिमतम्। इतरभेदानुमापकत्वमेव लक्षणत्वम्। प्रकृते हि वस्तुमात्रस्यैव तत्तत्साध्यविशेषानुमितौ लिङ्गत्वसम्भवेन परामृश्यमानलिङ्गत्वं निर्विवादम्, तथा च परामृश्यमानलिङ्गात्मकानुमानेतराप्रसिद्ध्या तद्भेदानुमापकत्वस्यानुमितिकरणत्वे दुरुपपादतया तस्यानुमानलक्षणत्वानुपपत्तेः। लिङ्गपरामर्शत्वस्यानुमानस्वरूपत्वे तु, वस्तुमात्रस्य परामर्शानात्मकतया तदितरप्रसिद्ध्या तद्भेदानुमापकत्वस्यानुमितिकरणत्वे सूपपादतया न भवत्यनुमितिकरणत्वस्यानुमानलक्षणत्वानुपपत्तिः "कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः"[१] पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्[२] इत्यादिदिशा न्यायवैशेषिकदर्शनेऽणुपरिमाणे कारणत्वाभावस्वीकारेण तत्र कारणत्वापरपर्यायलिङ्गत्वाभावस्य स्फुटतया परामृश्यमानलिङ्गेतरत्वं प्रसिद्धमिति तु न रम्यं वचः। परामृश्यमानलिङ्गं नानुमितिकरणमिति मतविशेषमादृत्यैव तद्ग्रन्थप्रसरेण, मतविशेषस्यास्य परीक्षणावसरे तदनुपयोगात्। अकारणत्वस्य समवाय्यसमवायिकारणत्वाभावपरत्वेन वा निमित्तकारणात्मकपरामृश्यमानलिङ्गेतरस्याप्रसिद्धेः जागरूकत्वाच्च। अत्र समाधानद्वये कथञ्चिदपरितुष्यतोऽप्यनुमितिकरणत्वरूपेतरभेदानुमापकहेतौ करणत्वे निरूपितत्वसम्बन्धेन विशेषणीभूतस्यानुमितिरित्यंशस्य वैयर्थ्यापत्तिः दुष्परिहरैव परामृश्यमानलिङ्गात्मकानुमानेतराणुपरिमाणादिभ्यः अकारणेभ्यो भिन्नेषु एव कारणत्वस्य सत्त्वात्। लिङ्गपरामर्शस्यानुमानस्वरूपत्वे तु नेयमापत्तिः सम्भवति, तदतिरिक्तेषु घटपटादिषु कारणत्वसत्त्वेन तन्मात्रस्य लिङ्गपरामर्शेतरभेदाव्याप्तत्वात्। किञ्च यदि परामृश्यमानलिङ्गस्यैवानुमानस्वरूपत्वमभ्युपगम्यते तर्हि अनागतेन भूतेन च हेतुनाऽनुमितिः न स्यात्[३] लिङ्गस्य तत्रासत्त्वात्। लिङ्गपरामर्शस्य तत्त्वे तु तस्य तत्र निराबाधेनानुमितिः सूपपादा।

---

१. (क) कारणत्वं चान्यत्रपारिमाण्डल्यादिभ्यः। प्रशस्त० सा० वै० प्र० पृ० ४७.
(ख) कार्यमात्रं प्रत्यकारणपारिमाण्डल्यादावेवानुमितिकारणेतरत्वस्य प्रसिद्धिसौलभ्यादाचार्यमतेऽपि तद्धेतुकानुमितौ परामर्शस्यैव कारणत्वादिति दिक्। चि० दी० जागदीशी २, पृ० ७१

२. पारिमाण्डल्यमणुपरिमाणम्, कारणत्वं तद्भिन्नानामित्यर्थः। अणुपरिमाणं न कस्यापि कारणम्। न्या० सि० मु०, कारिका. १५, पृ० ७८

३. (क) तदिदमन्तिमं प्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या चानुगृह्यमाणं लिङ्गपरामर्श-

लिङ्गपरामर्शत्वमेवानुमानस्वरूपमिति गङ्गेशोपाध्याया अपि मन्वते। ते हि प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थेन[१] प्रत्यक्षानन्तरमनुमाननिरूपणेऽनुमानत्वावच्छेदेन प्रत्यक्षोपजीवकत्वं सङ्गतिरिति स्पष्टमामनन्ति। प्रत्यक्षोपजीवकत्वं हि प्रत्यक्षकार्यत्वम्। तस्य हि परामृश्यमानलिङ्गत्वस्यानुमानस्वरूपत्वेऽनुमानत्वावच्छेदेन सङ्गतित्वमसम्भवदुक्तिकम् परामृश्यमानलिङ्गकोटौ प्रविष्टानां धूमादीनां जन्यानुमानानामुपादानगोचरलौकिकप्रत्यक्षजन्यत्वेन कथञ्चित् प्रत्यक्षकार्यत्वेऽपि नित्यानां तथाभूतानां सामान्यादीनां तदसम्भवात्। लिङ्गपरामर्शत्वस्यानुमानस्वरूपत्वे तु तत् सम्भवदुक्तिकं परामर्शस्य प्रत्यक्षकार्यत्वसम्भवात्। तस्मात् लिङ्गपरामर्शत्वमेवानुमानस्वरूपमिति रम्यः पन्थाः।

॥ इति प्रथमं प्रकरणम् ॥

रूपमनुमानं भवति। न्या० वा० १/१/५,पृ० २९२

(ख) वक्ष्यत इति, परामृश्यमानलिङ्गस्यानुमितिकरणत्वे अतीतानागतलिङ्गादनुमितिर्न स्यादिति भावः। चि० रहस्य २,पृ० १९

(ग) यद्यनुमितौ लिङ्गं करणं स्यात्, तदानागतेन लिङ्गेन विनष्टेन चानुमितिर्न स्यात् अनुमितिकरणस्य लिङ्गस्य तदानीमभावादिति। न्या० सि० मु० पृ० २१२

१. प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते। चि० २,पृ० ५

द्वितीयं प्रकरणम्

अनुमानं स्वतन्त्रं प्रमाणम्

अनुमान-प्रामाण्य-व्यवस्थापनम्

लिङ्गपरामर्शस्वरूपस्यास्य अनुमानस्य अनुमितिकरणमितिलक्षणलक्षितस्य कः उपयोगः इति प्रश्ने जगति विद्यमानं वैषम्यम् अदृष्टस्य धर्माधर्माख्यस्य स्वीकृतिमन्तरा नोपपादयितुं शक्यमिति प्रतिपादयितुमनसो दार्शनिका नैयायिक-वैशेषिकप्रमुखा अदृष्टविषयिणीमपि प्रमां स्वीकृत्य, तस्याश्च, अदृष्टस्य अतीन्द्रियतया प्रत्यक्षात्मकत्वासम्भवेन[1] अनुमित्यात्मकत्वमेवेति दृढमवधारयन्ति। एवमेवास्य जगतः सुव्यवस्था अशरीरिणो नित्यज्ञानेच्छाकृतिमतः ईश्वरस्य, स्वर्ग-नरकादेर्वा लोकविशेषस्य प्रमां विना अशक्यैवेति तस्यापि ईश्वर-स्वर्गादेः अतीन्द्रियतया प्रत्यक्षासम्भवेनानुमितिमेव मन्वते। तथा सत्यस्या अनुमित्यात्मिकायाः प्रमायाः केनचन करणेन नूनं भाव्यं, तच्च करणमनुमानमेवेति दिशास्त्यनुमानस्य नितरामुपयोग इति समादधते, स्वीकुर्वते च अनुमित्यात्मकप्रमाकरणतयानुमानस्य प्रमाकरणत्वरूपं प्रामाण्यम्।

अत्र चार्वाकाभिमतखण्डनम्

परमेतत् सर्वमसहमानाश्चार्वाका अनुमितेः प्रमात्वं नाङ्गीकुर्वते, अत एव तत्करणस्यास्यानुमानस्यापि प्रमाकरणत्वरूपं प्रामाण्यं नास्तीति ते प्रतिजानते। अत्रात्मनः प्रतिज्ञानुसारं तेऽनुमानस्याप्रामाण्यं कथं साधयन्तीति प्रश्नोऽवतरति। तेषां मते प्रत्यक्षातिरिक्तस्य प्रमाणान्तरस्याभावेन प्रत्यक्षप्रमाणेनैव तत् सिषाधयि-

---

१. धर्मः पुरुषगुणः। कर्तुः प्रियहितमोक्षहेतुः अतीन्द्रियोऽत्यन्तसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजः वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः। प्रशस्त०, गु० नि० धर्मप्रक०, पृ० ६५९-६६०

षितमिति तु न साधीयः, अलौकिकप्रत्यक्षस्य तन्मतेऽसिद्ध्या, लौकिकप्रत्यक्षेण च सर्ववादिसिद्धेन सिद्धे वस्तुनि कथमपि कस्याऽपि विमतेरभावात्, अनुमाने प्रामाण्याप्रामाण्यविमतिरेव न स्यात्, परं विमतिस्तत्र दृश्यते । अत एव तत्र प्रामाण्याप्रामाण्ययोः कस्यापि लौकिक-प्रत्यक्षं न भवतीति निर्विवादम्, कारणतासामान्यस्य अन्वयव्यतिरेकबलेनैव ज्ञातुं शक्यतया प्रमाकरणत्वरूपस्य प्रामाण्यस्य प्रामाण्याभावप्रतियोगिनः प्रत्यक्षायोग्यत्वात्, अभावप्रत्यक्षे[१] तत्प्रतियोगिनः प्रत्यक्षयोग्यत्वस्य तत्प्रतियोगितावच्छेदकधर्मस्य च प्रत्यक्षयोग्यत्वस्यावश्यमपेक्षणात् प्रत्यक्षं प्रति आश्रयप्रत्यक्षस्यापि कारणतया प्रामाण्याभावस्य आश्रयत्वेनाभिमतस्यानुमानस्य व्याप्तिज्ञानात्मकस्य तदाश्रयीभूतानन्तानन्तव्यक्तीनां भेदेनापरिमेयसङ्ख्याकस्य केनापि जनेन युगपत्प्रत्यक्षयितुमशक्यतया तद्वृत्तिप्रामाण्याभावस्य प्रत्यक्षासम्भवाच्च । अनुमानोपमानादिभिस्तत्साधनीयमित्यपि न विचारसहम् चार्वाकनये तेषां प्रमाणत्वासिद्ध्या[२] तैः अनुमानेऽप्रामाण्यनिश्चयासम्भवात् ।

अनुमानेऽप्रामाण्यसम्भावनापक्षे केन रूपेणानुमानस्य पक्षत्वमिति विचारः स्वरूपासिद्धिनिरासश्च

परमत्र चार्वाकः "अनुमाने नाहम् अप्रामाण्यं प्रमिणोमि, अपितु सम्भावयामि"[३]इति वदन्ननुमानं न प्रमाणम् प्रमितिकरणतावच्छेदकधर्मशून्यत्वात्, यन्नैवं तन्नैवं यथा घटपटादिः, इत्येवं व्यतिरेक्यनुमानेन तत्राप्रामाण्यं सम्भावयितुं शक्यमिति कदाचिद् वदेत्, तत्रापि अनुमानात्मकस्य पक्षस्याप्रसिद्ध्या कथमेवं व्यतिरे-

---

१. (क) संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यता अपेक्षिता । —मुक्तावली पृ० २०१
(ख) प्रतियोगिनो योग्यतेति, योग्यमात्रप्रतियोगिकत्वे सति योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थः। अत्र द्रव्यसामान्याभाववारणाय मात्रेति । गुरुत्ववद्घटात्यन्ताभाववारणाय विशेष्यदलम् । —दिनकरी पृ० २०१

२. अनुमानं न प्रमाणम् तद्धि व्याप्तिज्ञानसापेक्षम् । व्याप्तिश्च व्यभिचाररहितः सम्बन्धः । स न ज्ञातुं शक्यते ।— एवं भूयः सहचरितयोरपि मित्रयोर्मिथः व्यभिचारः स्त्रीसङ्गादौ दृश्यत एव तथा च व्याप्तिग्रहासम्भवादनुमानं न प्रमाणम् । एवमुपमानमपि न प्रमाणम् । महिष इव पुरुषो मातङ्गीव योषिदित्युपमानात् प्रमाज्ञानासम्भवात् । एवं शब्दोऽपि न प्रमाणम् । कस्यापि यथार्थवक्तुरभावात् । सर्वद० सं० दर्शनाङ्कुर० पृ० ३

३. नन्वभिहितमेव साधर्म्यदर्शनं सम्भावनां भावयति, सम्भावनैव च बहुशो व्यवहारहेतुरित्यत आह अनुमानमिति । चि० दी० २.पृ० १३४

क्यनुमानं सम्भावनास्पदमिति प्रत्यवस्थानं प्रत्यवतिष्ठते, नहि अत्र अनुमितिकरणत्वात्मना अनुमानं प्रसिद्धिं नेतुं शक्यं चार्वाकेण, तेनानुमितेः अनङ्गीकारेण तन्मते तत्करणत्वस्य अप्रसिद्धेः, परामृश्यमानलिङ्गमेवानुमानमिति मतमाश्रित्य 'परामृश्यमानलिङ्गत्वेन धूमत्वादिना अनुमानस्य पक्षत्वमिति पक्षस्तु न क्षोदक्षमः, धूमत्वादिना धूमादिषु प्रामाण्याभावस्य नैयायिकादिभिः स्वीकृततया सिद्धसाधनस्य दुर्वारत्वात्। "नैयायिकाभिमतस्य धूमादिविशेष्यक-व्याप्तिनिश्चयस्यैव तादृशनिश्चयत्वेन अनुमानत्वमङ्गीकृत्य तत्र अप्रामाण्यं साध्यते" इति कथनं तु न कमनीयम्, चार्वाकमते सर्वत्र हेतौ अयोग्योपाधिशङ्कया व्यभिचारसंशस्यैव जागरूकतया व्याप्तिनिश्चयत्वाप्रसिद्धेः।[१] व्यभिचारसंशयस्य व्याप्तिसंशयात्मकतया व्याप्तिसंशयत्वेनैव अनुमानस्य पक्षत्वमिति तु न रम्यम्, व्याप्तिसंशये प्रामाण्याभावस्य नैयायिकमतसिद्धतया सिद्धसाधनस्य दुर्निवारत्वादिति चेन्न, व्याप्तिज्ञानत्वेनैवानुमानस्य पक्षत्वस्वीकारे व्याप्तिनिश्चयात्मके तस्मिन् प्रामाण्याभावानभ्युपगमेन नैयायिक-नये सिद्धसाधनाप्रसरेण चार्वाकमते च व्याप्तिसंशयात्मकस्य तस्य प्रसिद्ध्या पक्षाप्रसिद्धेश्चाप्रसरेण लेशतोऽपि दोषशङ्काया अनवकाशात्। अत्र व्याप्तिज्ञानैकदेशे व्याप्तिसंशये नैयायिकनये प्रामाण्याभावस्य सिद्धतया सिद्धसाधनमिति तु नानुयोज्यम्, अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन साध्यसिद्धेः अप्रतिबन्धकत्वात्।[२]अथापि व्याप्तिज्ञानस्य स्वविषयकमानसप्रत्यक्षं प्रति करणतया तत्र प्रमाकरणत्वरूपं प्रामाण्यं चार्वाकमतसिद्धमिति बाधो दुर्निवार एवेति तु नाशङ्कनीयम्, चार्वाकमते सर्वस्यापि विशिष्टविषयकस्य प्रत्यक्षस्य अलीकतया व्याप्तिज्ञानविषयकमानसप्रत्यक्षस्यापि अलीकत्वेन प्रमात्वासिद्ध्या विषयविधया तत्करणे व्याप्तिज्ञाने प्रामाण्याभावस्यैव चार्वाकमतसिद्धत्वात्।

नन्वेवमपि अनुमानं न प्रमाणमित्येव प्रतिज्ञावाक्यं तद्घटकीभूतस्य अनुमानपदस्य व्याप्तिज्ञानपरत्वं लक्षणयैव अभ्युपेयमिति दोषस्तु दुर्निवार इति चेदस्तु प्रतिज्ञाघटकम् अनुमानपदम् अनुमितिकरणपरमेव पूर्वोपदर्शितदिशा पक्षाप्रसि-

---

१. अथानुमानं न प्रमाणम्, योग्योपाधीनां योग्यानुपलब्ध्या अभावनिश्चयेऽपि अयोग्योपाधिशङ्कया व्यभिचारसंशयात्। चि० २, पृ० ३८

२. परं तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितेर्दर्शनात्, पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका, पक्षतावच्छेदकसामानाधिकरण्येनाऽनुमितिं प्रति तु सिद्धिमात्रं विरोधि। न्या० सि० मु०, पृ० २३६

द्धिस्तु नैव सम्भवति, विशिष्टस्य सर्वस्याप्यर्थज्ञातस्य अलीकतया पदप्रतिपाद्यस्य पदार्थमात्रस्य अलीकत्वाद् अलीकस्यापि अनुमितिकरणत्वविशिष्टस्य अनुमानपदार्थत्वसम्भवेन पक्षत्वस्वीकारे बाधकाभावात् ।

विशिष्टस्य पदार्थमात्रस्य अलीकत्वमभ्युपगच्छतश्चार्वाकस्यायमाशयः—स्वलक्षणमात्रस्यैव वस्तुनः सत्यतया तदुपरि प्रतीयमानानां नामरूपजात्यादीनाम् अलीकतया सतः स्वलक्षणस्य वस्तुनः असतश्च जात्यादेः सम्बन्धस्य मिथ्यात्वं निर्विवादम् तेन च जात्यादिविशिष्टस्य वस्तुनो नास्ति वास्तविकं सत्त्वम्, तथापि स्वलक्षणेन लौकिकव्यवहारस्य दुर्घटतया अलीकमपि विशिष्टमादाय लौकिकव्यवहारः कथञ्चिदुह्यते तथैव प्रकृतेऽपि अनुमितिकरणत्वावच्छिन्नम् अलीकमपि पुरस्कृत्य प्रामाण्याभावानुमितिःसूपपादा इति ।

न चैवमपि व्याप्तिज्ञानत्वेन अनुमितिकरणत्वेन वा अनुमानस्य पक्षत्वम् अभ्युपेत्यापि तत्र प्रामाण्याभावसाधनं दुष्करम्, प्रमितिकरणतावच्छेदकरूपस्य व्याप्तिनिश्चयत्वस्य नैयायिकमतेन तत्र सिद्धतया स्वरूपासिद्धेःसत्वादिति वाच्यम्, योग्योपाधीनाम् अनुपलम्भेऽपि अयोग्योपाधिशङ्कया सर्वेष्वपि हेतुषु साध्यव्यभिचारित्वसंशयेन व्याप्तिनिश्चयत्वासम्भवात् । भूयःसहचारदर्शनस्य व्यभिचारसंशयप्रतिबन्धकतया व्याप्तिनिश्चयस्सम्भवतीति तु दुराशामात्रम्, शतशः सहचरितयोरपि पार्थिवत्वलौहलेख्यत्वयोः[१] हीरके व्यभिचारोपलम्भेन भूयः सहचारदर्शने व्यभिचारसंशयप्रतिबन्धकत्वस्य स्वीकर्तुमशक्यत्वात् ।

अनुमानाप्रामाण्ये पर्वते धूमदर्शनानन्तरं वह्न्यर्थिनः पर्वताभिमुखं प्रवृत्तिः कथमिति प्रश्नः तत्समाधानञ्च

अथापीदं चिन्तनीयम्-अनुपदोक्तदिशा अनुमाने प्रमितिजनकतावच्छेदकरूपशून्यत्वहेतुना यदि अप्रामाण्यं सिद्ध्यत्येव तर्हि पर्वते धूमदर्शनानन्तरं वह्न्यर्थिनः पर्वताभिमुखं जायमाना प्रवृत्तिः कथम् उपपद्येत, सर्वानुभवसिद्धेयं प्रवृत्तिः नापलपितुं योग्या, प्रवृत्तिरियं पर्वते वह्नेः ज्ञानं विना दुरुपपादा, प्रवृत्तिं प्रति इष्टसाधनताज्ञानस्य हेतुत्वात्[२] पर्वताभिमुखं प्रवर्तमानस्य वह्न्यर्थिनः पुरुषस्य वह्निप्राप्तिरेव

---

१. सेयं व्याप्तिर्न भूयोदर्शनगम्या—अपि च पार्थिवत्वलौहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात् । चि० २, पृ० १७०-१७१

२. चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा ।उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥ न्या० सि० मु० कारिका १५०,१५१, पृ० ५१०-५३६

इष्टम्,[१] इष्टस्यास्य साधनं पर्वताभिमुखं गमनं तदैव सम्भवति यदा पर्वतस्य वह्निमत्वं निर्धारितं स्यात्, परमेवं पर्वतस्य वह्निमत्वनिर्धारणम् अनुमानाप्रामाण्यवादिनः चार्वाकस्य मते कथं स्यात्? प्रत्यक्षमात्रस्य प्रामाण्यम् अङ्गीकरोति चार्वाकः, तदनुसारं प्रकृते "पर्वते वह्निमत्वनिर्धारणं प्रत्यक्षात्मकमेव अभ्युपेयताम्" इति तु चार्वाकः नैव वक्तुं प्रभवति, पर्वते विद्यमानेन वह्निना सार्धं तदानीं चक्षुस्सन्निकर्षाभावेन पर्वते वह्निप्रत्यक्षस्यासम्भवात्, स्मरणात्मकमेवास्तु तदिति वचः नितराम् उपेक्षणीयम्, स्मरणस्य स्वसमानविषयकानुभवजन्यसंस्काराधीनतया[२] "पर्वतो वह्निमान्" इति स्मरणपूर्वं वह्निमत्-पर्वतविषयक-संस्कारस्य जनको यः "पर्वतो वह्निमान्" इत्येवं विधः अनुभवस्तस्य तादृशस्मरणात् पूर्वम् अवश्यं स्वीकर्त्तव्यस्य तदानीम् अभावात्।

एवं पर्वते धूम-दर्शनानन्तरं "पर्वतो वह्निमान्" इति वाक्यप्रयोगोऽपि प्रामाणिकैः क्रियमाणो नोपेक्षितुं योग्यः सोऽपि अनुमानाऽप्रामाण्यवादिनः चार्वाकस्य नये कथम् उपपादानीयः? स्पष्टमिदम्—वाक्यप्रयोगो वाक्यार्थविषयकावबोधपूर्वक एव भवति। पर्वते धूमदर्शनान्तरं 'पर्वतो वह्निमान्' इत्येवं वाक्यप्रयोगो वाक्यार्थस्य वह्निमत्पर्वतस्य अवबोधं विना अशक्यः, वह्निमत्पर्वतावबोधश्च चार्वाकदिशा कीदृशः? प्रत्यक्षात्मकः स्मरणात्मको वा स नैव सम्भवति इति अनुपदमेव प्रदर्शितम्। तथा सति अनुमानाप्रामाण्यमभ्युपगच्छतः चार्वाकस्य नये वह्न्यर्थिनः पर्वते धूमदर्शनानन्तरं पर्वताभिमुखं प्रवृत्तिः "पर्वतो वहनिमान्" इत्येवं प्रामाणिकानां शब्दप्रयोगश्च[३] कथम् उपपद्येतामिति प्रश्नः असमाधेय एव तिष्ठति इति।

---

१. ननु लिङ्गज्ञानस्य पर्वतो वह्निमानित्याद्यनुमित्यजनकत्वे लिङ्गपरामर्शानन्तरं वह्न्यर्थिनः पर्वतगमनप्रवृत्त्यनुपपत्तिः। पर्वतादौ वह्न्यादिनिश्चयं विना तद्गमने वह्निप्राप्तिसाधनतावच्छेदकवह्निमद्देशगमनत्वनिश्चयायोगादिति। चि० दी० गादाधरी, पृ० १३४

२. (क) अनुभवस्य स्वसमानप्रकारकमात्रस्मृतिजनकत्वादित्याशङ्क्य प्रकारान्तरेण तादृशस्मरणमुपपादितं मिश्रैः। शक्ति० वा०, पृ० ५८

(ख) लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पट्वाभ्यासादरप्रत्ययजनिताच्च संस्काराद् दृष्टश्रुतानुभूतेष्वर्थेषु शेषानुव्यवसायेच्छानुस्मरणद्वेषहेतुरतीतविषया स्मृतिरिति। सर्वद० सं० गु० नि० निर्णयप्रक०, पृ० ६२५-६२६

३. (क) नन्वेवं वह्निसन्निकर्षपर्वतविशेष्यकवह्निप्रकारकसंस्काराद्यभावदशायामपि धूमदर्शनान्तरं पर्वतो वह्निमान् इत्यादि प्रयोगोऽनुभूयते स कथं स्यात्, तादृशशब्दप्रयोगं

अत्रैवं चार्वाकः उत्तरयति—महानसचत्वरादिषु नैकेषु स्थानेषु धूमेन सह वह्निं साक्षात्कृतवतः पुरुषस्य "यो यो धूमवान् स स वह्निमान्"[१] इत्येवं व्याप्तिधीर्जायते इयं व्याप्तिधीः धूमवत्वेन भासमानेषु सर्वेष्वपि पर्वतादिषु वह्निं विशेषणविधयावगाहते। अनया च धिया "यो यो धूमवान् स स वह्निमानि"ति संस्कारोऽपि उत्पद्यते अयञ्च स्वसमानाकारकस्मृतेः उत्पादं यावत् तिष्ठति,[२] अत एव एतादृशसंस्कारविशिष्टो मानवो यदा कदाऽपि पर्वतादौ वह्नेः प्रत्यक्षं कर्तुम् असमर्थः, तत्र धूमं साक्षात्करोति तदा तस्यायं संस्कारः उद्बुद्धो भवति फलतो धूमवत्त्वेन पर्वते वह्न्य-

---

प्रति पर्वतविशेष्यकवह्निप्रकारकबुद्धेर्हेतुत्वादित्यत आह, 'लोक' इति लोकानामित्यर्थः, धूमादीति, वह्नीन्द्रियसन्निकर्ष-पर्वतविशेष्यकवह्निप्रकारकसंस्काराद्यभावदशायामित्यादि, वह्न्यादिव्यवहारश्च पर्वतो वह्निमानित्यादिशब्दप्रयोगः।
—चि० रह०, पृ० २१

(ख) किञ्चानुमानमनङ्गीकृत्य परप्रत्यायनाय शब्दप्रयोगोप्यशक्यः। परवेदनप्रतिपत्तेरेव तदन्तरेणाशक्यत्वात्। न चेत् परप्रत्यायनाय नूनमौन्मत्यमाविष्करोति वक्तुरित्याह। अपि चेति। न्या० वा० ता० प०, अ० १, आ० १, प्र० २, सू० ५, पृ० ६५६-६५७

(ग) न हि य एव शब्दप्रयोक्ता तस्यैव स प्रत्यायकः। न चोपमानं व्युत्पन्नस्यैव व्युत्पादकं किन्त्वन्यस्येत्यर्थः। नापि परप्रत्यायनाय यदा शब्दमुपमानं वा प्रयुङ्क्ते तदा तत्र तयोः प्रामाण्यमित्याह। परेति। परप्रत्ययेऽपि धर्म्यसिद्धेः धर्मिणः प्रतीतावेव तत्प्रत्यायनाय शब्दादिःप्रयुज्यते न चानुमानं विना तत्सिद्धिरित्यर्थः। अथ चार्वाकमते देहस्यैवात्मतया प्रत्यक्षतः स्यादेव तत्सिद्धिः तत्राह। सिद्धावपीति। (सिद्धावपि—परस्याप्तत्वानिश्चयात्) वक्तुराप्तत्वासिद्धेस्तद्वाक्यमात्रान्न प्रामाण्यादिसिद्धिरित्यर्थः ततः प्रवृत्तिसंवादादिना सत्त्वं निश्चेयमुपजीव्यबाधान्नानुमानाप्रामाण्यसाधनं पदमासादयतीत्याह। तस्मादीति। तस्मादतीन्द्रियविधिनिषेधयोरनुमानमनङ्गीकृत्याशक्यत्वादशक्यापह्नवमनुमानमित्यर्थः। न्या० वा० ता० प० प्र० अ० १, आ० १, प्र० २, सू० ५ पृ० ६५५

१. धूमदर्शनाच्चोद्बुद्धसंस्कारो व्याप्तिं स्मरति "यो यो धूमवान् स सोऽग्निमान् यथा महानसम्" इति। त० भा० पृ० ११२

२. (क) नाप्यनुभवत्वेन तथात्वं संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसङ्गात् समानाकारस्यैव फलस्य नाशकत्वात्। चि० दी० पृ० ९४
(ख) संस्कारस्य फलनाश्यतया, स्वजन्यस्मृतिनाश्यतया प्रथमस्मरणेनैव पूर्वानुभवजन्यसंस्कारनाशे, सकृदनुभूतस्य स्मरणोत्तरमननुभूतस्य विषयस्यानुभवरूपकरणव्यापारासत्त्वेनास्मरणप्रसङ्गात् स्मरणान्तरानुपपत्तेरित्यर्थः। चि० दी० गा० पृ० ९७

वगाहिनी स्मृतिरपि तस्य उत्पद्यते । इयमेव स्मृतिः धूमाश्रयपर्वतादौ "वह्न्यर्थिनो गमनं, पर्वतो वह्निमानिति"प्रमाणिकानां वाक्यप्रयोगञ्च उपपादयितुमलमिति, नाभ्युपेयम् अनुमानस्य प्रामाण्यमिति ।

पर्वतो वह्निमानिति स्मृतिः न सम्भवतीति प्रश्नस्य चार्वाकमतेन समाधानम् विसदृशस्मृत्युपपादनञ्च

अथैवमपि वह्न्यर्थिनः पर्वताभिमुखं प्रवृत्तिः "पर्वतो वह्निमानि"ति ज्ञानमपेक्षते ज्ञानञ्चेदं "यो यो धूमवान् स स वह्निमान्"इत्येवं विधाभ्याम् अनुभवसंस्काराभ्यां नोत्पत्तुमर्हति, अनुभवसंस्कारयोः स्वसमानाकारस्मृतेः उत्पादन एव सामर्थ्यात्[1] इति तु प्रश्नो न क्षोदक्षमः । "यो यो धूमवान् स स वह्निमान्"इत्येवं संस्कारेणाऽपि पर्वतो धूमवान् इति ज्ञानात्मकोद्बोधकसहकृतेन "पर्वतो वह्निमान्" इत्येवं स्मृतेः सूपपादनात् । अत्रेदं तथ्यम्— यो यो धूमवान् स स वह्निमान् इत्येवं संस्कारो धूमवत्त्वेन भासमानेषु पर्वतादिषु सर्वेष्वपि धूमवत्सु वह्निमवभासयत्येव तेन हि संस्कारोऽयं यद्यपि पर्वतादिषु वह्निस्मृतिं धूमवत्त्वेनैवोत्पादयति, तथापि यदायं संस्कारः "पर्वतो धूमवान्" इत्येवं ज्ञानसहकारेण उद्बुद्धो भवति तदा "यो यो धूमवान् स स वह्निमान्" इत्येवं न भवति तस्याकारः किन्तु उद्बोधकज्ञानमहिम्ना "पर्वतो वह्निमान्" इत्येतादृशमेव आकारं गृह्णाति तेन च "पर्वतो वह्निमान्" इत्येवं स्मृतेः उत्पादे न किमपि बाधकं शङ्कितुमपि शक्यम् ।

अत्र "यो यो धूमवान् स स वह्निमान्" इति संस्कारो धूमवत्वेनैव पर्वतादौ वह्निं विषयीकरोति न तु पर्वतत्वेन, तेन हि तस्य "पर्वतो वह्निमान्" इत्येवं रूपेण पर्वतत्वेन वह्निविषयकतया उद्बोधः कथं स्यात् इति तु नानुयोज्यम्, "यो यो धूमवान् स स वह्निमान्" इत्येवम् अनुभवः "यद्धर्मावच्छिन्नो धूमवान् तद्धर्मावच्छिन्नो वह्निमान्" इत्येवं परः अत एव तज्जन्यः संस्कारो धूमाश्रयताया अवछेदकं पर्वतत्वं पुरस्कृत्यैव पर्वतादौ वह्निम् अवगाहमानो यदि "पर्वतो धूमवान्" इत्येवं विधं ज्ञानम् उद्बोधकविधया आसादयति तर्हि "पर्वतो वह्निमान्" इत्येवं रूपेण तस्य उद्बोधो निराकुलः, पर्वतो धूमवानिति धिया स्वरूपत एव पर्वतत्वस्य अवगाहनात्, धूमाश्रयताया अवच्छेदकत्वेन तदनवगाहनात् । तथा च उद्बोधकोऽयं धूमाश्रयतावच्छेदकत्वांशं संस्कारगतं नोद्बोधयति इति स्फुटं प्रतिपत्तेः ।

---

१. एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात् । अन्यथा नियमेन स्मृतेरुभयविशेष्यकत्वप्रसङ्गात्, समानप्रकारकत्वेनैव ज्ञानस्मरणयोःकार्यकारणभावाच्च तत्र विशिष्यैव कार्यकारणभावः । चि० दी० पृ० १०५

संस्कारः कस्मिंश्चिदंशे अनुद्बुद्धोऽपि अंशान्तरे उद्बुद्धः, अनुद्बुद्धांशविषयकम् उद्बुद्धांशविषयकं विसदृशमेव स्मरणं जनयतीति न केवलं चार्वाकस्याभिमतम् अपितु शब्दानुमानादीनां प्रामाण्यम् अभ्युपगच्छताम् अन्येषामपि दर्शनविदां मतमिति[१] दृष्टान्तेनानेन स्फुटं भवति। बुद्धिस्थः पदार्थ एव तत्पदेन बोध्यते इति सर्ववादिसम्प्रतिपन्नं, बुद्धिस्थो नाम बुद्धिविषयः, बुद्धिविषयता च पदार्थानां येन रूपेण तदेव रूपं बुद्धिविषयतावच्छेदकं, तथा च बुद्धिविषयतावच्छेदकत्वेन ज्ञानविषयीभूतैः घटत्वपटत्वादिधर्मैः विशिष्टेष्वेव अर्थेषु तत्पदशक्तिः स्वीक्रियते, अस्याः तत्पदशक्तेः ज्ञानम् "बुद्धिविषयतावच्छेदकावच्छिन्नः (बुद्धिविषयतावच्छेदकस्य आश्रयः) तत्पदशक्यः"[२] इत्येवं भवति। अनेन ज्ञानेन उत्पन्नः संस्कारो बुद्धिविषयतावच्छेदकत्वरूपेण घटत्वपटत्वादिभिः तत्तद्धर्मैः विशिष्टे अर्थे, तत्पदशक्तिं विषयीकरोति। यदा हि कश्चन पुरुषः तत्पदं श्रृणोति तदा तस्य यादृशधर्मविशिष्टार्थे बुद्धिविषयतावच्छेदकधर्मस्य ज्ञानं भवति अथवा यादृशधर्मविशिष्टार्थः तस्य बुद्धिस्थो भवति तत्पदस्य शक्तिं विषयीकुर्वाणः तादृशसंस्कारः तादृशधर्मविशिष्टार्थे एव उद्बुद्धो भवति, एवञ्च एतादृश-संस्कारमाध्यमेन तत्पदेन तादृशधर्मविशिष्टार्थस्यैव स्मरणमपि भवति। यथा—"गृहे पटः तमानय" इत्येवं वाक्यश्रवणसमनन्तरं श्रोतुः पटपदेन स्वरूपतः पटत्वविशिष्टः अर्थो बुद्धिस्थो भवति, अतः उपर्युक्तवाक्यघटकीभूततत्पदेन स्वरूपतो पटत्वविशिष्टार्थस्यैव स्मृतिः सम्भवति, यतः स्वरूपतो पटत्वविशिष्टं बुद्धिस्थं कुर्वता तत्पदज्ञानेन, तत्पदस्य शक्तिम् अवगाहमानः उक्तसंस्कारो बुद्धिविषयतावच्छेदकत्वांशे अनुद्बुद्धः सन् स्वरूपतो पटत्वविशिष्टे एव उद्बुद्धो[३] भविष्यति, तेन च "बुद्धिविषयतावच्छेदकाव-

---

१. स्मृतिप्रमोष—'स्मृतिप्रमोष का अर्थ है स्मृति होने के समय उसके कारण-भूत संस्कार के किसी विषय का प्रमोष हो जाना। इस प्रमोष के कारण ही अनेक बार पूर्वानुभव के समस्तविषयों का स्मरण न होकर कुछ ही विषयों का स्मरण होता है,—। त० भा० पृ० ३५७

२. एवञ्च बुद्धिविषयतावच्छेदकरूपावच्छिन्नस्तत्पदाद्बोद्धव्यः इत्याकारकस्य तत्पदं बुद्धिविषयतावच्छेदकरूपावच्छिन्नं बोधयत्वित्याकारकस्य वा सङ्केतस्य विषयताया अननुगतघटत्वपटत्वादिनिष्ठाया अप्यनुगतबुद्धिविषयतावच्छेदकत्वरूपावच्छिन्नतया शक्तेरैक्यम्। शक्तिवा०, पृ० ९१

३. केचित्तु बुद्धिविषयतावच्छेदकत्वेनानुगतधर्मेण सकलधर्मविषयकसंस्कारस्य सामान्यप्रत्यासत्यधीनानुभवजन्यस्य सत्त्वे प्रमुष्टबुद्धिविषयतावच्छेदकतांशं स्वरूपतश्चैत्रत्वादिप्रकारकशक्तिस्मरणं निराबाधमिति, तन्मूलकमेव स्वरूपतो पूर्वं

च्छिन्नः तत्पदशक्यः" इत्येवं स्मृतिः न भविष्यति प्रत्युत 'पटः तत्पदशक्यः' एवमेव स्मरणम् उत्पत्स्यते । यदि एवं स्मृत्युत्पत्तिः नाङ्गीक्रियते तर्हि तत्पदघटितवाक्येन स्वरूपतः पटत्वविशिष्टार्थस्य बोधो न भवेत्, फलतश्च तत्पदघटितवाक्यमधिकृत्य प्रवर्तमानो लोकव्यवहारः उच्छिद्येत ।

अतो यथा बुद्धिविषयतावच्छेदकावच्छिन्ने तत्पदस्य शक्तिज्ञानेन उत्पन्नः संस्कारविशेषः उद्बोधकद्वारा बुद्धिविषयतावच्छेदकत्वांशे अनुबुद्धः सन् स्वरूपतः पटत्वादावेव उद्बुद्धो भूत्वा स्वरूपतः पटत्वादिविशिष्टार्थे तत्पदशक्तेः अवगाहिकां स्मृतिं समुत्पाद्य तत्पदेन स्वरूपतः पटत्वादिविशिष्टस्य स्मरणोत्पत्तौ सहायको भवति, तथा धूमाश्रयतावच्छेदकं यत् पर्वतत्वं तद्विशिष्टविषयकः संस्कारो यदा "पर्वतो धूमवान्" इति ज्ञानेन उद्बुद्धो भवति तदा अस्योद्बोधकविशेषस्य महिम्ना धूमाश्रयतावच्छेदकत्वांशे अनुद्बुद्ध एव स्वरूपतः पर्वतत्वांशे उद्बुद्धः "पर्वतो वह्निमान्" इति स्मृतिं जनयति, अनयैव स्मृत्या अपेक्षितस्य सर्वस्यापि व्यवहारस्य उपपादयितुं शक्यतया 'पर्वतो वह्निमान्' इत्येवम् अनुमित्यात्मकस्य अनुभवस्य उत्पत्त्यभ्युगमो निष्प्रयोजनः ।

चार्वाकाभिमतस्मृतिपक्षस्य निरासः

धूमपरामर्शेन वह्नेः स्मृतिम् अभ्युपेत्य वह्न्यनुमितेः गतार्थत्वम् अभ्युपगच्छतां मतम् एवं निरस्यते स्मृतिं प्रति उद्बोधकविशेषस्य[1] कारणत्वाभ्युपगमः अनुचितः गौरवात् । अतः पर्वते धूमदर्शनं सामान्यरूपेणैव "यो यो धूमवान् स सोऽग्निमान्"

चैत्रत्वादिप्रकारकशाब्दज्ञानं भविष्यतीति किमनुपपन्नम् ? स्वरूपतस्तत्प्रकारकस्मरणे स्वरूपतस्तत्प्रकारकसंस्कारानुभवयोरनपेक्षणात् उद्बोधकवैचित्र्यादेव कदाचित् जातिमान् इत्याकारकं कदाचित् घट इत्याकारकं स्मरणमिति नियमोपपत्तेः, स्वरूपतो घटत्वादिप्रकारकानुभवजनितसंस्कारवतोऽपि जातित्वादिना घटत्वादिप्रकारकात् संस्कारात् कदाचित् स्वरूपतो घटत्वाद्यप्रकारकस्य जातिमानित्याकारकस्य स्मरणस्योदयेन स्वरूपतस्तत्प्रकारिकायां स्मृतौ तादृशसंस्कारानुभवयोर्विशिष्य हेतुत्वेऽप्युद्बोधकविशेषविरहस्य तादृशस्मृतिविरहप्रयोजकताया आवश्यकत्वात् तादृशहेतुताया अप्रामाणिकत्वात् । शक्तिवा० पृ० १०२-१०३

१. प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः। न्या० सू० ३/२/४१,पृ० २५०

इत्यस्य संस्कारस्य उद्बोधनद्वारा तथा विधामेव स्मृतिं जनयति, न तु विशेषरूपेण उक्तसंस्कारस्य उद्बोधनपूर्वकं विशिष्टां स्मृतिम् उत्पादयति। एवमेव तत्पदस्य ज्ञानमपि सामान्यरूपेणैव तत्पदस्य शक्तिम् अवगाहमानं "बुद्धिविषयतावच्छेदकावच्छिन्नः तत्पदशक्यः इत्येवं विधं संस्कारम् उद्बोध्य तादृशीमेव स्मृतिमपि उत्पादयति, तत्पदघटितवाक्येन स्वरूपतो घटत्वादिविशिष्टस्य स्मृतिः, स्वरूपतो घटत्वादिविशिष्टस्य शाब्दबोधश्च अतो भवति यतो बुद्धिविषयतावच्छेदकावच्छेदेन तत्पदशक्तिम् अवगाहमानेन ज्ञानेन "घटादिः बुद्धिविषयतावच्छेदकधर्मवान्" एतादृशज्ञानसहयोगेन[1] 'घटादिः तत्पदशक्यः' इत्येवं स्वरूपतो घटत्वादिविशिष्टेऽपि तत्पदस्य शक्तिज्ञानं भवति। एवञ्च अनेन ज्ञानेन उत्पन्नः संस्कारः कालान्तरे तत्पदज्ञानेन उद्बुद्धः सन् तादृशीं स्मृतिम् उत्पादयति। इयं 'घटादिः तत्पदशक्यः' इत्याकारिका शक्तिविषयिणी स्मृतिरेव घटत्वादिविशिष्टार्थस्मृतौ शाब्दबोधे च सहकारिणी भवति।

उक्तप्रकारेण धूमपरामर्शबलेन वह्निस्मृतेरभ्युपगमे एकोऽपरोऽपि बाधक आस्ते—यदि धूमपरामर्शेन "यो यो धूमवान् स सोऽग्निमान्" एतादृशज्ञानद्वारा उत्पन्नस्य संस्कारस्य विशेषरूपेण उद्बोधं स्वीकृत्य तेन वह्नेः स्मृत्युदयः स्वीकरिष्यते तर्हि हेत्वाभासा विलयतां गच्छेयुः।

---

१. स्वरूपतो घटत्वादिप्रकारकस्मरणाद्युपयोगी शक्तिग्रहः स्वरूपतो घटत्वादिप्रकारक एव, यदा स्वरूपतो यद्धर्मप्रकारकज्ञानसामग्री तदैव स्वरूपतः तद्धर्मप्रकारेण शक्तिं गृहीत्वा स्वरूपतस्तत्प्रकारेण स्मरत्यनन्तरमनुभवति च...। एवं सति कतिपयविषयेषु सर्वनामघटितवाक्यात् प्रयोज्यस्य प्रवृत्तिमुपलभमानः प्रवर्तकज्ञानविषयकतिपयविषये शक्तिं कल्पयन् बुद्धिविषयतावच्छेदकधर्मावच्छेदेन तत्पदशक्यत्वं सामान्यतोऽवधारयति। एवञ्च चैत्रोऽस्य बुद्धिविषयतावच्छेदकधर्मवानिति यदा तेन गृह्यते तदानीमस्य चैत्रः तत्पदवाच्यो नवेति सन्देहो नावतरितुमर्हति। तत्पदप्रयोजकबुद्धिप्रकारतया गृहीतघटत्वपटत्वादिविशिष्टे व्यवहारदर्शनात् तत्पदस्य शक्तिं गृहीत्वा, यद्यत्तत्पदं यादृशयादृशधर्मावच्छिन्नविषयकबुद्ध्या प्रयुज्यते तत्तत् तत्पदं तद्धर्मविशिष्टशक्तमिति सामान्यतो व्याप्तिमवधारयति, तदनन्तरं च प्रत्यक्षगृहीतचैत्रत्वादिविशिष्टविषयकबुद्धिप्रयोज्यत्वं प्रकरणादिना यत्र चैत्रपदे गृह्णाति तत्र पक्षे तादृशहेतुना चैत्रत्वविशिष्टवाचकत्वस्य प्रागसिद्धस्यापि पक्षधर्मताबलादनुमित्यात्मकनिश्चयेनावगाहनसम्भवात् न काप्यनुपपत्तिः। शक्तिवा०, पृ० ९८-१०१

तात्पर्यमिदम्—हेत्वाभासानामतो दोषत्वम् यतस्तद्विषयकज्ञानेन अनुमितेः व्याप्तिज्ञानस्य परामर्शस्य वा प्रतिबन्धो[1] भवति, परन्तु हेतु दर्शनेन प्रथमतो विद्यमानस्य, हेतुमत्वावच्छेदेन साध्यसंसर्गम् अवगाहमानस्य संस्कारस्य उद्बोधमभ्युपेत्य यदि पक्षे साध्यस्य स्मृतिः अभ्युपेयते तर्हि तस्यास्तत्कारणस्य वा हेत्वाभासविषयकज्ञानेन प्रतिबन्धासम्भवात् तेषां हेत्वाभासत्वमेव असम्भवग्रस्तं स्यात्, अतो हेतोः परामर्शेन पक्षे साध्यस्य स्मृतिं स्वीकृत्य अनुमितेः गतार्थत्वं नैव सम्भवति ।

अनुमितिः मानसप्रत्यक्षमिति चार्वाकमतोपन्यासः

न चैवं परामर्शाव्यवहितोत्तरं जायमानस्य बोधस्य संशये स्मृतौ वा अन्तर्भावासम्भवे तस्य अनुमितित्वमेव मन्तव्यम् । तथा सति तदनुरोधेन अस्याः अनुमित्यात्मिकायाः अतिरिक्तप्रमायाः करणतया अनुमानस्यापि अतिरिक्तप्रमाणस्य नूनमभ्युपेयतया, प्रत्यक्षमेवैकं प्रमाणं, नान्यत् किञ्चित् प्रमाणान्तरमिति[2] चार्वाकसि-

---

१. (क) अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्, यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम्, ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा हेत्वाभासत्वम् । चि० पृ० ७६३-७६४

(ख) अनुमितीति, अनुमितिप्रतिबन्धकयशार्थज्ञानविषयत्वमित्यर्थः, भवति च साध्याभाववान् पक्षः, साध्याभावव्याप्यवान् पक्ष इति ज्ञाने चानुमितिप्रतिबन्ध इति 'साध्याभाववत्पक्षरूपस्य बाधस्य' साध्याभावव्याप्यवत्पक्षरूपस्य सत्प्रतिपक्षस्य हेत्वाभासत्वम्—। न च साध्याभाववंदवृत्तिसाधनादिरूपव्यभिचारादावव्याप्तिस्तस्य व्याप्तिज्ञानाभावेनान्यथासिद्धतया अनुमित्यप्रतिबन्धकत्वादिति वाच्यम्, अनुमितिपदस्य साध्यव्याप्यहेतुमान् पक्षः साध्यवांश्चेति समूहालम्बनानुमितिपरत्वादिति, भावः । चि० रह०, पृ० ७६४

(ग) अनुमितिपदस्यानुमितिसामान्यपरत्वेऽसम्भवात् यत्किञ्चिदनुमितिपरत्वेऽतिप्रसङ्गात् प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकम्, तथा च व्यभिचारादावव्याप्तिः, वह्निर्धूमव्यभिचारीति ज्ञानाभावस्य पर्वतो धूमवानित्यनुमित्यजनकत्वात् लक्षणया तस्य तादृशानुमितिजनकज्ञानमात्रपरत्वे च बाधादावव्याप्तिः बाधादिज्ञानस्य परामर्शाप्रतिबन्धकत्वादतः अनुमितिपदमजहत्स्वार्थलक्षणया तदुभयपरतया व्याचष्टे तत्रेति । चि० दी० गा० पृ० १९-२१

(घ) अनुमितिपदं साध्यव्याप्यो हेतुःसाध्यवांश्च पक्ष इत्येतादृशसमूहालम्बनानुमितिपरम् । चि० दी० गा० सव्यभिचार प्र० पृ० ३१४

२. (क) अथानुमाने न प्रमाणम्—धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावना-

द्धान्तो व्याहन्यत इति वाच्यम्, बोधस्यास्य परिशेषन्यायेन[1] स्वीकृतेऽप्यनुमितित्वे तस्य मानसत्वव्याप्यत्वमभ्युपेत्य मानसप्रत्यक्ष एव अन्तर्भावसम्भवात्। सत्येवं परामर्शाव्यवहितोत्तरं जायमानस्यास्य बोधस्य "वह्निं साक्षात्करोमि" इत्येवमनुव्यवसायः[2]स्यात् परं तथा न भवति प्रत्युत "वह्निं न साक्षात्करोमि" इत्येवमेव विपरीतं सम्वेदनं प्रामाणिकानामिति शङ्कोद्भावनं नोचितम्, प्रत्यक्षयामि, साक्षात्करोमि, पश्यामीत्यादिभिः शब्दैस्तस्यैव वस्तुनः प्रत्यक्षम् अनुव्यवसीयते यद्वस्तु लौकिकप्रत्यक्षविषयं भवति, अत एव घटं साक्षात्करोमि, पटं साक्षात्करोमि इत्येवं लौकिकप्रत्यक्षविषयं घटपटादिकम् अधिकृत्यैव अनुव्यवसायः प्रामाणिकः। यच्च वस्तु लौकिकप्रत्यक्षविषयतां नाधिकुरुते तस्य प्रत्यक्षं प्रत्यक्षयामीत्येवं रूपेण नैवानुव्यवसीयते, अत एव अतीन्द्रियस्य गुरुत्वस्य[3]मानसप्रत्यक्षं भवतीति नैयायिकसिद्धान्ते "गुरुत्वं साक्षात्करोमि" इति अनुव्यवसायो न मन्यते प्रत्युत तद्वैपरीत्येन "गुरुत्वं न साक्षात्करोमि" इत्येव न्यायतात्पर्यविदां संवित्तिः। तथैव परामर्शाव्यवहितोत्तरं जायमानं मानसप्रत्यंक्षमधिकृत्य साक्षात्करोमि इत्यनुव्यवसायो नानुभूयते न साक्षात्करोमि इत्येव प्रामाणिकानां संवेदनं तर्हि तावता तस्य मानसप्रत्यक्षत्वं न निराकर्तुं शक्यम्, परामर्शाव्यवहितोत्तरं ज़ायमानस्यास्य बोधस्य मानसप्रत्यक्षत्वाभ्युपगम

मात्रात् संवादेन च प्रामाण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति, चि० पृ० २१-२२
(ख) उपसंहरति, इतीति, इति अतो हेतोः नाप्रत्यक्षमिति प्रत्यक्षातिरिक्तं न प्रमाणमित्यर्थः, चि० रह० पृ० २२

१. शेषवन्नाम परिशेषः, स च प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः, न्या० सू० भा० १/१/५ पृ० २९१

२. (क) अपि च धूमदर्शनानन्तरं जायमाने वह्न्यादिव्यवहारजनके ज्ञाने अनुमितित्वजातिविशेषस्यानुमिनोमीत्यबाधितानुव्यवसायसिद्धतया अपलापासम्भवः, अनुमितित्वरूपजातिविशेषस्य सिद्धत्वे तदवच्छिन्नं प्रति व्याप्तिज्ञानादेः करणत्वमप्यावश्यकम्। चि० रह० पृ० २६
(ख) अत्र चानुमितेर्ज्ञानाकरणकज्ञानत्वेऽपि न प्रत्यक्षप्रमित्यन्तर्भावः, अनुमिनोमि न साक्षात्करोमीत्यनुव्यवसायबलात् अनुमितौ प्रत्यक्षत्वविरुद्धानुमितित्वसिद्धेः। चि० दी० गा०, पृ० १३३

३. (क) गुरुत्वं जलभूम्योः पतनकर्मकारणम् अप्रत्यक्षं पतनकर्मानुमेयम्, संयोगप्रयत्नसंस्कारविरोधि। प्रशस्त० पृ० ६४०
(ख) गुरुत्वधर्माधर्मभावना ह्यतीन्द्रियाः। भावनेति वेगमात्रव्यवच्छेदाय। इन्द्रियमतीत्य वर्तन्त इत्यतीन्द्रियाः न केनचिदिन्द्रियेण गृह्यन्त इत्यर्थः। प्रशस्त० गु० कि० पृ० १६४

पक्षः प्रतिबध्यप्रतिबन्धकभावस्य लाघवानुरोधेनाऽपि साधीयान् प्रतिभाति। एकस्यैव विषयस्य अनुमितिसामग्र्याः, चाक्षुषादिप्रत्यक्षसामग्र्याश्च, युगपत् सन्निधौ चाक्षुषादिप्रत्यक्षमेव तस्य वस्तुनो भवतीति प्रामाणिकानुभवानुरोधेन समानविषयकानुमितिं प्रति समानविषयकचाक्षुषादिसामग्री प्रतिबन्धिकेति स्वतन्त्र-प्रतिबध्यप्रतिबन्धकभावकल्पनम्[1] अनिवार्यम्। अनुमितेः मानसप्रत्यक्षतायां स्वीकृतायां तु चाक्षुषादिप्रत्यक्षसामग्रीमपेक्ष्य मानसप्रत्यक्षसाग्र्या दुर्बलतया,[2] चाक्षुषादिप्रत्यक्षसामग्रीसमवधाने मानस-प्रत्यक्षस्य स्वत एवासम्भवात् स्वतन्त्रस्य प्रतिबध्यप्रतिबन्धकभावस्य कल्पनाप्रसङ्गो नावतरति।

अनुमितिः मानसप्रत्यक्षमिति चार्वाकमत-खण्डनम्

परमिदं चिन्तनीयम्—अनुमितेः मानसप्रत्यक्षत्वं स्वीकृत्य प्रमाणान्तरत्वप्रसङ्गवारणं न परीक्षाक्षमं हेतुपरामर्शाव्यवहितोत्तरं जायमानवह्निज्ञानस्य हेतुविषयकत्वमते,[3] साध्यविषयकज्ञानस्य मानसत्ववत् हेतुविषयकज्ञानस्यापि मानसत्वापत्तेः। यदि हि यथा अनुमानस्य प्रमाणान्तरत्वपक्षे अनुमितेः नियमेन लिङ्गविषयकत्वं स्वीकुर्वताम् उदयनाचार्याणां मते साध्यविषयकज्ञानस्य अनुमितित्ववत् लिङ्गविषयकज्ञानस्यापि अनुमितित्वम् इष्टं, तथैव अनुमितेः मानसप्रत्यक्षत्वाभ्युगमपक्षेऽपि साध्यविषयकज्ञानस्य मानसत्ववत् हेतुविषयक-ज्ञानस्यापि मानसत्वाङ्गीकारो युक्तियुक्त एवेति मन्यते, तदा हेतुपरामर्शाव्यवहितोत्तरं जायमानाया अनुमितेः मानसत्वपक्षे हेतोः मानसज्ञानविषयत्ववत्, हेतुपरामर्शसमकालं स्वातन्त्र्येण उप-

---

१. (क) प्रत्यक्षं प्रति आनुमानिको निश्चयः न प्रतिबन्धकः। किन्तु शाब्दबोधं प्रत्यानुमानिक-निश्चयः प्रतिबन्धकः इति सामान्यतो निर्णयः। दीधि० न्यायको० पृ० ५३३ प्रतिबन्धकत्वशब्दः।

(ख) अत्रेदं विज्ञेयं समाने विषये प्रत्यक्षानुमितिसामग्रयोर्मध्ये प्रत्यक्षसामग्री प्रबला। भिन्नविषये तु अनुमितिसामग्री प्रबला। समानविषये प्रत्यक्षशाब्दसामग्र्योर्मध्ये प्रत्यक्षसामग्री प्रबला। भिन्नविषये तु शाब्दसामग्री प्रबला। समानविषये अनुमितिशाब्दसामग्र्योर्मध्ये शाब्दसामग्री प्रबला। भिन्नविषये तु अनुमिति सामग्री प्रबला। त० प्र० ४ न्यायको० पृ० १००६ सामग्रीशब्दः।

२. मानसलौकिकप्रत्यक्षसामग्र्योर्मध्ये लौकिकप्रत्यक्षसामग्री प्रबला। मानससामग्री तु सर्वापेक्षया दुर्बला। परे तु यदा फलविषयिणीच्छास्ति, तदा तत्रत्या दुर्बलाऽपि सामग्री प्रबला भवतीति विज्ञेयम्। त० प्र० ४ न्यायको० पृ० १००६ सामग्रीशब्दः।

३. साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारानुमितिपरं वा। चि० दी०, पृ० २७

स्थितानां घटादिपदार्थानां साध्य- हेतु-पक्ष-भावानापन्नानां तदनन्तर्गतानां वा मानसप्रत्यक्षापत्तेः निरासासम्भवात् । न च परामर्शाव्यवहितोत्तरं जायमानस्य ज्ञानस्य मानसत्वं स्वीकुर्वताम् इदमाकूतम्—यस्य बोधकः परामर्शः सन्निहितस्तद्विषयकमेव मानसप्रत्यक्षं तदव्यवहितोत्तरकालं भवति । एवं सति साध्यबोधकपरामर्शसमकालं घटादिबोधकपरामर्शाभावेन साध्यविषयकमानसस्य घटादिविषयकमानसबोधत्वं नापादयितुं शक्यमिति, वाच्यम्, मानसविशेषं प्रति परामर्शस्य सत्यपि कारणत्वे सामान्यमानसं प्रति पदार्थोपस्थितिमात्रस्य कारणतया, परामर्शात्मककारणविशेषस्याभावेन घटविषयकमानसविशेषस्योत्पत्तिवारणेऽपि तदुपस्थितिरूपसामान्यकारणवशेन घटस्य मानससामान्योत्पादस्य वारयितुमशक्यत्वात् ।

मानसत्वव्याप्यसाध्यानुमितिजनकपरामर्शो घटादिमानससामान्यं प्रतिबध्नाति इति स्वीकृत्य, घटमानसोत्पादवारणप्रयासस्तु, घटपटमठादीनाम् अनन्तानन्तपदार्थानां मानससामान्यं प्रति, साध्यानुमितिजनकपरामर्शस्य प्रतिबन्धकत्वस्वीकारावश्यकतया, अनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनाप्रयुक्तगौरवदोषकवलितः अनादरणीय एव । किञ्च घटविषयकमानसं प्रति साध्यविषयकमानसात्मकानुमितिजनकपरामर्शस्य प्रतिबन्धकत्वाङ्गीकारे घटविषयकमानसं प्रति प्रतिबन्धकाभावविधया[1] तादृशपरामर्शाभावस्य कारणत्वम् अवश्यं कल्पनीयम् । तथा सति साध्यानुमापकपरामर्शस्य घटानुमापकपरामर्शस्य च युग-

---

१. (क) निमित्तकारणं तु साधारणासाधारणभेदेन द्विविधमप्यस्ति। तत्र साधारणनिमित्तकारणानि चाष्टविधानि— ईश्वरः , तज्ज्ञानेच्छाकृतयः, दिक्कालौ, अदृष्टम्, प्रागभावश्चेति। प्रतिबन्धकसंसर्गाभावस्तु कार्यमात्रं प्रति साधारणं निमित्तकारणमेव। स च प्राचीन–नैयायिकानां मते प्रागभावप्रध्वंसात्यन्ताभाव एतत्त्रयम् । मणिकारादीनां नव्यनैयायिकानां मते तु अत्यन्ताभाव एव इति विवेकः । दि० १ मङ्ग० पृ० ११, न्यायको० पृ० २२६

(ख) यथा वा नवीनानां मणिकारादीनां मते प्रतिबन्धकसंसर्गाभावोऽपि कार्यमात्रं प्रति कारणम् । स च प्रतिबन्धकात्यन्ताभावः । सि० च०

(ग) समाप्तिस्तु विघ्नरूपप्रतिबन्धकाभावे सति लोकावगतस्वकारणादेव । चि० पृ० ८२

(घ) विघ्नसंसर्गाभावश्च समाप्तिहेतुः । चि० पृ० ९५

(ङ) विघ्नध्वंसत्वेन तस्य न हेतुत्वम्, किन्तु विघ्नसंसर्गाभावत्वेन। तथैव प्रतिबन्धकाभावस्य हेतुत्वात्, तथा च नोक्तदोष इति भावः । चि० प्र० पृ० ९५-९६

(च) अपरे तु मङ्गलस्यारब्धनिर्वाहकत्वं विघ्नसंसर्गाभावद्वारा तथैव प्रतिबन्धकाभावस्य हेतुत्वात् । चि० पृ० ७२

पत्सन्निधाने साध्यविषयकानुमितिसमकालं घटविषयिण्या अपि अनुमितेः अवश्यं जायमानतया व्यतिरेकव्यभिचारोऽपि[१] दुर्निवारः, साध्यानुमापकपरामर्शाभावरूप-कारणस्यासत्वेऽपि घटमानसस्य जायमानत्वात् । घटादिमानसं प्रति घटाद्यनुमाप-कपरामर्शाभावविशिष्टसाध्यानुमापकपरामर्शस्य प्रतिबन्धकत्वमभ्युपेत्य व्यभिचारस्यास्य निरासप्रयासस्तु प्रतिबध्यप्रतिबन्धकभावशरीरस्य अतिविपुल-तया उपहासास्पद एव, अतः अनुमितेः मानसत्वव्याप्यत्वम् अनभ्युपगम्य, मानसमात्रं प्रति परामर्शस्य प्रतिबन्धकत्वकल्पनमेव ज्यायः ।

न चैवं सुखदुःखयोः मानसप्रत्यक्षात्मको भोगः[२]अनुमिति-सामग्री-समकालं न स्यात् मानसमात्रं प्रति परामर्शस्य प्रतिबन्धकत्वादिति वाच्यम्, सुखदुःखयोः सत्युदये तयोः मानसप्रत्यक्षमेव[३] भवति नान्यत् ज्ञानान्तरमिति आविद्वदङ्गनागोपालं प्रथिततया सुखदुःखान्यतरसाक्षात्कारात्मकभोगान्यज्ञानं प्रति सुखदुःखयोः प्रतिब-न्धकत्वकल्पनम् अनिवार्यम् तथा सति विजातीय-सुखदुःखाद्यभावविशिष्टानुमिति-सामग्र्या एव मानसप्रत्यक्षं प्रति प्रतिबन्धकत्वाभ्युपगमेन अनुमितिसामग्रीसमकालं सुखदुःखान्यतरसाक्षात्कारात्मकभोगानुपपत्तेः निराकरणसम्भवात् ।

किञ्च परामर्शाव्यवहितोत्तरं मानसप्रत्यक्षात्मिका अनुमितिः चार्वाकमते स्वप्नायितैव, व्यभिचारसंशयस्य सर्वत्रैव जागरूकतया विपरीत-कोटिभानप्रतिब-

---

१. (कार्यकारणभावभङ्गलक्षणो व्यभिचारः) कार्यसत्त्वे कारणाभावः तदर्थश्च कार्याव्यवहि-तपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नं यत्किञ्चिद्व्यक्त्यधिकरण-यावद्व्यक्तिषु कारणाभाववत्त्वम् । दि० गु०, न्यायको० व्यतिरेकव्यभिचारशब्दः, पृ० ८१८

२. (क) पारम्पर्येण च भोगसाधनत्वं घ्राणादीनाम्, साक्षान्मनस एव तत्साधनत्वात्, सुखदुःखसाक्षात्कारस्य भोगत्वात् । न्या० सू० भा० प० टी० पृ० ४१२
(ख) सुखदुःखान्यतरसाक्षात्कारो भोगः । त० भा० पृ० २२१

३. (क) सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । त० सं०, पृ० ४२
(ख) सुखाद्युपलब्धिः सुखादिसाक्षात्कारस्तस्य साधनं निमित्तबीजं मन इत्यर्थः । सि० चं० पृ० ४२
(ग) स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि । न्या० सू० भा०, पृ० ४३८
(घ) सुखदुःखयोरहं सुखी दुःखीति मानसोऽनुभवो नत्वहं जाने सन्देह्मि निश्चिनोमीत्याकारोऽनुभव इति । वै० सू० उ०, पृ० १३४

न्धकविशेषदर्शनासम्भवेन[१] तदभावाप्रकारकतत्प्रकारकनिश्चयात्मकमानसस्य[२] सुदूरपराहतत्वात्।

सम्भावनयैव प्रवृत्तिरिति चार्वाकमतोपपादनं तत्खण्डनञ्च

अत्र यदि चार्वाक एवं प्रत्यवतिष्ठते कुत्रचित् स्थाने धूमम् अवलोकयतः पुरुषस्य वह्न्यर्थं प्रवृत्तिः नहि धूमवति स्थाने वह्नेः अस्तित्वनिश्चयेनाऽपितु तस्यास्तित्वसम्भावनयैव[३], कतिपयेषु स्थानेषु धूमवह्न्योः युगपदवस्थितिं साक्षात्कुर्वतो जनस्य कुत्रचित् नूतने स्थाने धूमदर्शनेन वह्नेश्च अदर्शनेन भवतीयं बुद्धिः "अत्र वह्निः स्यादि"ति वह्निनिश्चायकस्य कस्यचन प्रमाणस्य तत्रासत्वात्। अतः उत्कटैकतरकोटिकसंशयात्मकसम्भावनयैव[४] धूमदर्शनोत्तरं वह्निमुपलब्धुं प्रवृत्तिरिति अभ्युपेयम्। परम् अत्रेदं विवेचनीयम् यदि हि धूमदर्शनानन्तरं वह्निसम्भावनयैव वह्न्यर्थिनः प्रवृत्तिः। सम्भावना चोत्कटैकतरकोटिकसंशयस्तर्हि विपरीतकोट्यंशे यत्रौत्कट्यं ततोऽपि प्रवृत्त्यापत्तिः दुर्निवारा। इमाम् आपतिं निरसितुं तत्प्रकारकज्ञाननिष्ठायां करणतायां तदभावाप्रकारकत्वप्रवशे तु तज्ज्ञानस्य सम्भावनानात्मकतया, सम्भावनातः प्रवृत्तिरिति मते कुठाराघातप्रसङ्गः। अमुं दोषं निवारयितुं तत्कोट्यंशे औत्कट्यरहिततदभावाप्रकारकान्यत्वस्य तत्कोटिकसम्भावनासाधारणस्य प्रवृत्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदकत्वमभ्युपेयते चेद् गौरवं[५] वज्रलेपायमानं जागर्त्येव अत्र यदि चार्वाकः "मम मते अनुगतधर्मस्य अलीकतया अनुगतकार्यका-

---

१. यद्यपि लिङ्गदर्शनेन स्मारितसाध्यस्य मानसनिश्चयोपगमेनाप्यनुमानस्याप्रामाण्यमायाति तथाऽपि सर्वत्र व्यभिचारसंशयसम्भवेन व्याप्तिनिश्चयासम्भवात् विपरीतकोटिभानविरोधिविशेषदर्शनस्य तन्मते सम्भवेन सोऽपि निश्चयस्तावन्न सम्भवतीत्याशयेन सम्भावनादरः। चि० दी० गादा०, पृ० १३५

२. तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः। का० १२९ न्या० सि० मु० पृ० ४७९

३. टि० ३, पृ० ६ अवलोकनीया।

४. एवं कोट्यंशे औत्कट्यरूपं सम्भावनात्वमपि विषयताविशेष इति ध्येयम्। गादाधरी, सत्प्रतिपक्षप्रकरणम्, पृ० ७१

५. न च यत्र संशये कोटिद्वयांशे तुल्यता विपरीतकोट्यंशे एवौत्कट्यं ततः प्रवृत्यादिवारणाय तदभावाप्रकारकत्वस्य तत्प्रकारकज्ञानकरणतायामवश्यं निवेशनीयतया कथं सम्भावनातः प्रवृत्यादिकार्यनिर्वाहः, तत्कोट्यंश औत्कट्यरहिततदभावप्रकारकान्यत्वस्य तत्कोटिसम्भावनासाधारणस्य कारणतावच्छेदकत्वे च गौरवमिति वाच्यम्, अगत्या गौरवस्यादोषत्वात्। चि० दी० गा० पृ० १०९

रणभावासम्भवेन, सर्वत्राव्यवहितपूर्वापरीभावापन्नतत्तद्व्यक्तिष्वेव कार्यकारणभावव्यवहारस्योपपादनात् तदभावाप्रकारकत्वादिनिवेशः प्रवृत्तिकारणकुक्षौ नास्त्येवेति प्रगल्भते, तदापि यस्य मते प्रामाण्यनिश्चयं विना प्रवृत्तिः न सम्भाव्यते तन्मते सम्भावनायाः संशयात्मिकाया नितरामप्रामाणिकतया तदुत्तरं वह्न्यर्थं वह्न्यर्थिनः प्रवृत्तिः दुरुपपादैव। संवादाभिमानेन[१] प्रामाण्यनिश्चयाभिमानमूलिका प्रवृत्तिः कथञ्चित् उपपद्येतापि तावताऽनुमानस्याप्रामाण्यं न साधयितुं शक्यम्।

अनुमानेऽप्रामाण्यं कथं साधनीयमिति पूर्वपक्षस्य चार्वाकमतेन समाधानम्

अनुमानं न प्रमाणम् इति चार्वाकः कथं साधयेत्? यदि हि साध्यव्यभिचारिणि कस्मिंश्चित् हेतौ अनुमानत्वेनाभिमते प्रामाण्यं निर्णीय तत्साधर्म्यस्य सर्वेष्वपि अनुमानेषूपलम्भबलेनानुमानमात्रस्याप्रामाण्यं साध्यते चेत् तत् कुशकाशावलम्बनमात्रम्, अप्रामाण्यसाधकस्य प्रकारस्यास्यानुमानानतिरिक्ततयानुमानमात्रस्याप्रामाण्यं[२] स्वीकुर्वतः चार्वाकस्य मतेऽनुमानविशेषस्यास्याऽनुमानेऽप्रामाण्यसाधनार्थं प्रामाणत्वस्वीकारासम्भवात्।

---

१. (क) सम्वादेन च प्रामाण्याभिमानात्। चि० पृ० १०८
(ख) सम्वादेन सम्वादाभिमानेन, सम्भावितस्यासतोऽनुगताकारस्य परमार्थसत्स्वलक्षणमात्रसाक्षिणाध्यक्षेणानुल्लेखादध्यक्षमूलकविकल्पोल्लिखितत्वाद्वा सम्वादः। चि० दी० पृ० १०८
(ग) निर्विकल्पकसमानविषयकत्वरूपसम्वादस्य सम्भावनायामसम्भावादाह सम्भावनाभिमानेनेति। चि० दी० जा० पृ० ७२
(घ) सम्वादः सम्भावनाया इति शेषः। तथा चाध्यक्षमूलकविकल्पोल्लिखितविषयत्वमेव सम्भावनानिष्ठसम्वादः स एव प्रामाण्याभिमानप्रयोजकतया मूलकृतोक्त इति भावः। चि० दी० गा० पृ० ११०
(ङ) वक्ष्यमाणयुक्त्या प्रमाणान्तरगृहीतग्राहित्वरूपसंवादस्य तन्मते सम्भावनायामसत्त्वेन सम्वादेन प्रामाण्याभिमानादित्यसङ्गतमतो व्याचष्टे सम्वादेनेति। चि० दी० गा० पृ० १०९

२. (क) अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात्। चि० पृ० २२
(ख) अथानुमानस्याप्रामाण्यं केन प्रकारेण साध्यते, किं प्रमाप्रयोजकतावच्छेदकरूपशून्यत्वलिङ्गकेनानुमानेन, किं वा अनुमानं न प्रमाणमिति शब्देन, तत्राद्ये आह अप्रमाणेति, अप्रमाणसाधर्म्येण अप्रमाणत्वव्याप्येन प्रमाजनकतावच्छेदकरूपशून्यत्वेन दृष्टसाधर्म्यस्य साधर्म्यदर्शनस्य अप्रमाणत्वव्याप्यदर्शनस्येति यावत्।

अत्र हि चार्वाकस्याऽयं समाधिः—"अनुमानं न प्रमाणम्" इत्यास्याऽनुमानेऽप्रामाण्यसम्भावनायामेव तात्पर्यम्, सम्भावना हि धर्मिणि यस्य सम्बन्धः अज्ञातस्तस्यागृहीतासंसर्गकस्यार्थविशेषस्य स्मृतिरूपा,[१] अथवोत्कटैकंतरकोटिकसंशयरूपा। अस्याः स्मृतित्वपक्षे साधर्म्यदर्शनम् उद्बोधकविधया कारणम्, संशयरूपत्वे च तत् साधारणधर्मदर्शनविधया कारणम् तथा सति अनुमाने साधर्म्यदर्शनेनाप्रामाण्यसम्भावना नहि अनुमानप्रमाणजन्या, येनाप्रमाणेनानुमानेन जायमानाया अस्याः सम्भावनाया अप्रामाण्यं प्रसज्येत। अनुमानं न प्रमाणम् इत्यस्य अनुमाने अप्रामाण्यसम्भावनापरतया अनुमानस्य अप्रमाण्यं सङ्कटाकुलं भवत्येव तदेव च इष्टम्। अनुमाने अप्रामाण्यनिश्चायकस्य कस्यचन प्रमाणस्य अभावेऽपि अप्रामाण्यसम्भावनामात्रेण अनुमानस्य अप्रमाणत्वव्यवहारः सूपपद्यते, सम्भावनामात्रेणापि लोके बहुधा व्यवहारोपलम्भात्।[२]

अनुमानाप्रामाण्ये पुरुषान्तरवर्ति संशयादीनां ज्ञानं कथमिति प्रश्नस्य समाधानम्

न चैवमनुमानस्याप्रामाण्येऽभ्युपगम्यमाने पुरुषान्तरगतस्य संशयस्य, विपर्ययस्य, जिज्ञासायाः सुखदुःखाद्यनुभवस्य वा ज्ञातुमशक्यतया तज्ज्ञापनार्थं शब्दप्रयोगे, तदपाकरणायापेक्षितानां साधनानां सम्पादने च मानवस्य प्रवृत्तिः न स्यादिति[३] वाच्यम्, पुरुषान्तरवर्तिनां संशयादीनां मास्तु प्रमा सम्भावना तु स्यादेव, सम्भावनयैव

चि० रह० पृ० २३

१. सम्भावना, पर्वते वह्न्यसंसर्गाग्रहो वह्नेः पर्वतस्य च ज्ञानम्। चि० रह० पृ० २२

२. सम्भावनैव परकीयसंशयादिविषयकसम्भावनैव व्यवहारहेतुः अनुमानं न प्रमाणमिति शब्दप्रयोगप्रयोजक इत्यर्थः। तथा च परकीयसन्देहविपर्ययज्ञानस्य तन्निवृत्तिसाधनतारूपेष्टसाधनताज्ञानसम्पादकतया तादृशशब्दप्रयोगप्रयोजकत्वोपपादनाय नानुमानप्रामाण्यमिति भावः। चि० दी० गा० पृ० १३७

३. (क) दृष्टप्रामाण्याप्रामाण्यविज्ञानव्यक्तिसाधर्म्येण हि कासांचिद्व्यक्तीनां प्रामाण्यमप्रामाण्यं वा विदधीत। दृष्टसाधर्म्यं चानुमानम् एवेति कथं तेनैव तस्याप्रामाण्यम्? अपि चानुमानमप्रमाणमिति वाक्यप्रयोगोऽज्ञं विप्रतिपन्नं सन्दिग्धं वा पुरुषं प्रत्यर्थवान्। न च परपुरुषवर्तिनो देहधर्मा अपि सन्देहाज्ञानविपर्यासा गौरत्वादिवत् प्रत्यक्षमीक्षन्ते। न च तद्वचनात् प्रतीयन्ते वचनस्यापि प्रत्यक्षादन्यस्याप्रामाण्योपगमात्। न्या० सू० वा० टी० पृ० ३०२-३०३

(ख) एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्। तयोश्च परकीययोरप्रत्यक्षत्वात्——। चि० पृ० १३३

च शब्दप्रयोगादेः उपपत्तिसम्भवेन नापेक्षितं किञ्चित् प्रमाणान्तरं सम्भावनोत्पत्तये। यदि अत्र कश्चन शङ्कते—दूरस्थपर्वतादिषु अग्नेः संशयात्मिका सम्भावना धूमदर्शनात् पूर्वमपि आस्ते, परं नहि तया सम्भावनया कश्चनापि वह्न्यर्थं पर्वताभिमुखं प्रवर्ततेऽतः सम्भावनायाः प्रवृतिं प्रति व्यभिचारितया कथं कारणत्वमिति तदापातरमणीयमात्रम्। धूमदर्शनात् पूर्वं पर्वतादिषु जायमानस्याग्निसंशयस्याग्न्यंशे उत्कटकोटिकत्वाभावेन नास्ति सम्भावनारूपत्वम्, अतस्तदुत्तरं वह्न्यर्थिनः प्रवृत्तिमनवलोक्य सम्भावनायाः प्रवृत्तिव्यभिचारित्वकल्पनाया दुराशामात्रत्वात् धूमदर्शनानन्तरं जायमानस्य वह्निसंशयस्य धूमदर्शनात् पूर्वं जायमानवह्निसंशये साम्यं स्वीकृत्य सम्भावनायां प्रवृत्तिव्यभिचारित्वोपपादनं तूपहासास्पदम्, धूमदर्शनात्मकविशेषधर्मदर्शनबलेन धूमदर्शनोत्तरं जायमानस्य वह्निसंशयस्य वह्न्यंशे उत्कटकोटिकतया[१] वह्निसम्भावनारूपत्वेन, धूमदर्शनपूर्वं जायमानवह्निसंशयात् वैषम्यस्य स्फुटत्वात्।

अनुमानं न प्रमाणमिति चार्वाकोक्तवाक्यं प्रमाणं न वेति शङ्का तन्निरासश्च

अत्र परगतसंशयविपर्ययादीनां सम्भावनामात्रेणैव शब्दप्रयोगोपपत्तावपि "अनुमानं न प्रमाणमि"ति चार्वाकाभिहितस्य वाक्यस्य चार्वाकमते प्रामाण्यं न वा, अस्ति चेत् प्रत्यक्षातिरिक्तं न प्रमाणम् इति चार्वाकप्रतिज्ञाव्याघातः, नास्ति चेत् तदापि अयमेव दोषस्तदवस्थः, वाक्येनानेन जायमानस्यानुमानेऽप्रमाणत्वग्रहस्य अप्रमात्वात्, अनुमानस्य प्रमाणत्वापत्तेः,[२] इति तु शङ्का नास्पदं लभते। "अनुमानं न

---

१. (क) टि० ४ पृ० २० अवलोकनीया।
(ख) आदिना सम्भावानादिपरिग्रहः। उत्कटैकतरकोटिकसंशयस्सम्भावना। औत्कट्यञ्च विषयताविशेषः। त० सं० नील० पृ० ३३०

२. (क) अनुमानमप्रमाणमितिवाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च। चि० पृ० १३३
(ख) अनुमानमप्रमाणमिति वाक्यस्याप्रामाण्योपगमेऽप्रामाण्यस्य भ्रमजनकत्वरूपतयाऽनुमानस्य प्रामाण्यापातात् अप्रामाण्याभाववति अप्रामाण्यप्रकारकत्वरूपस्य तज्जन्यज्ञानभ्रमत्वस्य विशेष्यांशे प्रामाण्यवत्त्वनिर्वाह्यत्वात् ——चि० दी० गा० पृ० १३७
(ग) प्रामाण्याप्रामाण्ययोरिति, प्रामाण्ये अप्रमाण्ये चेत्यर्थः, व्याघातात् प्रत्यक्षातिरिक्तस्य अप्रामाण्यव्याघातात् अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्ये हि आयातं प्रत्यक्षातिरिक्तस्य शब्दस्य साक्षादेव प्रामाण्यम्, अप्रामाण्ये च अप्रमाण्यं भ्रमजनकत्वमिति अनुमानेऽप्रामाण्यस्य भ्रम एव जननीयः, भ्रमत्वञ्च ज्ञानस्य

प्रमाणम्" इति वाक्यम् अप्रमाणमिति वस्तुस्थितिः, तेन हि अनेन वाक्येन जायमानः अनुमानाप्रामाण्यविषयको बोधोऽपि अप्रमात्मक इति नूनं स्वीक्रियते। परं तावताऽनुमानस्य प्रामाण्यं सेत्स्यतीति तु दुराशामात्रम्, अनुमानं न प्रमाणम् इति वाक्येन जायमानस्य बोधस्य विशिष्टविषयकज्ञानत्वेनैव चार्वाकनये भ्रमत्व- (अप्रमात्व) स्वीकारात्,[१] विशिष्टविषयकं ज्ञानं भ्रम इत्येव तन्मते भ्रमलक्षणाभ्युपगमात्। न चैवं शुक्तौ रजतत्वज्ञानस्य भ्रमत्वानुपपत्तिः। रजतत्वविशिष्टायाः शुक्तेः अप्रसिद्ध्या ज्ञानस्यास्य विशिष्टविषयकत्वाभावादिति वाच्यम्, असत्ख्यातिम् अभ्युपगच्छतो[२] लोकायतिकस्य मतेऽसत्याः अपि रजतत्वविशिष्टायाः शुक्तेः भानसम्भवात्। एवं च विशिष्टविषयकज्ञानमात्रस्य भ्रमत्वाभ्युपगमेन "अनुमानं न प्रमाणं" इति वाक्येन जायमानो बोधो भ्रमात्मको भ्रमजनकत्वाच्चास्य वाक्यस्य न प्रामाण्यापत्तिः। अनुमानं न प्रमाणम् इति वाक्येन जायमानस्य ज्ञानस्य विशिष्टविषयकत्वेनैव भ्रमतयाऽनुमानस्यापि न प्रामाण्यापत्तिः। अत एव अनुमानं न प्रमाणम् इति वाक्यस्य सत्यपि अप्रामाण्ये प्रत्यक्षातिरिक्तं न प्रमाणम् इति प्रतिज्ञा निराकुलैव तिष्ठति।

प्रामाण्यस्य स्वतो ग्राह्यत्वेन प्रत्यक्षप्रामाण्यं स्वतो नानुमानादिति चार्वाकपक्षस्थापनम्

न चैवमनुमानस्य प्रमाणत्वानभ्युपगमे प्रत्यक्षस्यापि प्रामाण्यं न सिद्ध्येत्, प्रत्यक्षं प्रमाणम् प्रमितिकरणतावच्छेदकधर्मवत्त्वात्, यत् न प्रमाणं तत् न प्रमितिकरणतावच्छेदकधर्मवत् यथा घटादिः इत्येवं प्रमितिकरणतावच्छेदकप्रत्यक्षत्वात्मकस्याश्रयतयैवानुमानद्वारा प्रत्यक्षे प्रमाण्यसाधनसम्भवादिति वाच्यम्, प्रामाण्यस्य स्वतोग्राह्यत्वेन[३] प्रत्यक्षे प्रामाण्यसाधनार्थमनुमाने प्रामाण्याभ्युपगमस्यानावश्यकत्वात्। अत्र प्रामाण्यस्य स्वतोग्राह्यत्वे ज्ञाने सर्वसम्मतस्य प्रामाण्यसंशयस्यानुपप-

---

विषयबाधाधीनमेवेत्यनुमानाप्रामाण्ये बाध एवेति भावः। चि० रह० पृ० २४

१. विशिष्टज्ञानस्य तु तन्मते असद्विषयकत्वेनाप्रमितित्वाच्च। चि० रह० पृ० २०

२. एवं च चार्वाकैरनुमित्यभ्युपगमेऽपि असतख्यातिस्वीकर्तॄणां तेषां मते अनुमितिकरणत्वावच्छिन्ने अप्रामाण्यसाधने नाश्रयज्ञानरूपदोष इति भावः। चि० दी० गा०, पृ० १३४

३. ननु प्रत्यक्षप्रमात्वं स्वेनैव गृह्यते इति स्वयमेव स्वप्रमात्वे प्रमाणमतो न तत्रानुमानापेक्षा। चि० रह० पृ० २५

त्तिरिति[१] तु शङ्का नावकाशं लभते, निर्विकल्पकसविकल्पकप्रत्यक्षयोः प्रामाण्यसंशयाऽसम्भवात् । स्वलक्षणविषयकत्वस्य अप्रमाण्यव्यावर्तकधर्मस्य निर्विकल्पके सत्त्वेन तत्राप्रामाण्यभानस्याशक्यतया प्रामाण्यसंशयस्य दूरापास्तत्वात् । ज्ञानस्य सामस्त्येन स्वस्वरूपग्राहकत्वं स्वभावः अत एव निर्विकल्पकप्रत्यक्षं स्वप्रकाशत्वस्वभावतया स्वपर्यवसितसदविषयकत्वात्मकतद्व्यक्तित्वं प्रामाण्यानतिरिक्तं स्वत एव ग्राहयति, तेन हि निर्विकल्पके[२]प्रामाण्यभानसम्भावनाया अपि अशक्यतया प्रामाण्यसंशयस्यासम्भवः ।

एवमेव सविकल्पकप्रत्यक्षेऽपि न प्रमाण्यसंशयः अवतरितुमर्हति तस्य विशिष्टविषयकत्वेनानुमानवत्[३] निश्चिताप्रामाण्यकत्वात् । निर्विकल्पके सन्मात्रविषयकत्व, स्वप्रकाशत्वप्रामाण्यावगाहित्वानां सिद्ध्येऽनुमानप्रमाणमेव[४] शरणीकरणीयमिति तु रिक्तं वचः एषां त्रयाणामपि धर्माणां स्वतोग्राह्यत्वेन तद्ग्रहणार्थमनुमानप्रमाणानपेक्षणात् । यदि हि एषां धर्माणां स्वरूपतः स्वतोग्राह्यत्वेऽपि सन्मात्रविषयकत्वादिरूपेण भानार्थमनुमानप्रमाणं नूनमादरणीयमिति उच्यते चेत् तदतिनिस्तरङ्गम् । सन्मात्रविषयकत्वादिरूपैः सन्मात्रविषयकत्वादिधर्माणाम् सम्भावनामात्रस्वीकारेण तैः रूपैस्तेषां प्रामाण्यानभ्युपगमात् । निर्विकल्पकं सन्मात्रविषयकमिति

---

१. (क)......स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः।चि० पृ० १३८
(ख) प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः। १३६ का० पृ० ४८५
(ग) अयं घट इत्यादिज्ञानानन्तरं तृतीयक्षणे इदं ज्ञानं प्रमा न वेति संशयो जायते भवन्मते तन्न स्यात् स्वेनैव स्वप्रमात्वस्य निश्चितत्वादितिभावः। चि० रह० पृ० २५

२. किन्तु पारमार्थिक व्यक्तिमात्रविषयकनिर्विकल्पकज्ञानमेव तन्मते प्रमा तेनैव स्वस्मिन् प्रामाण्यं स्वेन गृह्यते.। चि० रह० पृ० २५

३. अयं घट इत्यादिसविकल्पकज्ञानस्य हि तृतीयक्षणे प्रमात्वसंशयः तेन च तन्नयेऽपि न स्वस्मिन् प्रामाण्यं गृह्यते तस्यासन्मात्रविषयत्वेन प्रमात्वस्यैव तत्राभावात् । चि० रह० पृ० २५

४. वस्तुतस्तु अनुमानस्याप्रामाण्ये निर्विकल्पकज्ञानस्यैवासदविषयकत्वसविषयकत्वप्रामाण्यावगाहित्वसिद्धिः कथं स्यात् सद्विषयकत्वादिहेतुकानुमानेनैव असदविषयकत्वस्य, ज्ञानत्वहेतुकानुमानेनैव सविषयकत्वस्य, स्वतेराग्राह्यप्रामाण्यकत्वे सति ग्राह्यप्रामाण्यकत्वहेतुकानुमानेनैव प्रामाण्यावगाहित्वस्य सिद्धेः। न च तदपि स्वेनैव गृह्यते इति वाच्यम्। विषयानवस्थाभिया प्रामाण्यतद्घटकपदार्थाद्यतिरिक्तधर्मस्य स्वतोग्राह्यत्वानभ्युपगमात् । चि० रह० पृ० २५-२६

ज्ञानस्य सन्मात्रविषयकत्वेन निर्विकल्पकमवगाहमानस्य घटत्वविशिष्टघटावगाहकेन 'अयं घटः' इति ज्ञानेन तुल्यतया 'अयं घटः' इति विशिष्टज्ञानमिव सम्भावनामात्रत्वमेव, न तु प्रमात्मकत्वमिति सिद्धान्तात्। अतः सन्मात्रविषयकत्वादिना सन्मात्रविषयकत्वादिग्रहार्थमनुमाने प्रामाण्यं नापेक्ष्यत इति चार्वाकाभिमतम्।

अनुमानं प्रमाणमिति सिद्धान्तपक्षस्थापनम्

परं नेदं विचारसहम् अनुमानाप्रामाण्ये निर्विकल्पकज्ञाने सद्विषयकत्व- स्वविषयकत्वप्रामाण्यावगाहित्वानां सिद्धेरसम्भवात्।[1]असद्विषयकत्वसिद्धये, सद्विषयकत्वहेतुकानुमानातिरिक्तस्य, स्वविषयकत्वसिद्धये, ज्ञानत्वहेतुकानुमानातिरिक्तस्य, प्रामाण्यविषयकत्वसिद्धये च स्वेतराग्राह्यप्रामाण्यकत्वे सति ग्राह्यप्रामाण्यकत्वहेतुकानुमानातिरिक्तस्य प्रमाणस्य कल्पयितुमशक्यत्वात्।[2]न चेदं सर्वं स्वेनैव गृह्यते इति प्रलपनीयं विषयानवस्थाभिया प्रामाण्यतद्घटकपदार्थाद्यतिरिक्तस्य धर्मस्य स्वतो ग्राह्यत्वस्वीकारासम्भवात्।[3] धूमादिदर्शनानन्तरं जायमाने वह्न्यादिव्यवहारजनके ज्ञाने, अनुमितित्वजातिविशेषस्य, अनुमिनोमि इत्यबाधितानुव्यवसायसिद्धतयाऽपलापासम्भवेन तद्विशिष्टाया अनुमित्यात्मकप्रमाया अवश्यं स्वीकर्तव्यतया तत्करणत्वेन[4]सिद्धे अनुमाने प्रामाण्यस्य अवश्याभ्युपेयत्वाच्च।

अस्तु अनुमितित्वं जातिः, सिध्यतु नाम तद्विशिष्टं ज्ञानं, स्यान्नाम तत्करणम् अनुमानम् व्याप्तिज्ञानात्मकम्, परमिदम् अनुमित्यात्मकं ज्ञानं सविकल्पकात्मकमसन्मात्रविषयकमप्रमात्मकमेव, तेन च तत्करणमपि अनुमानात्मकमप्रमाणमेव[5]

---

१. ...निर्विकल्पकस्य सन्मात्रावलम्बनस्य स्वविषयत्वप्रामाण्यावगाहित्वानामनुमानाधीनसिद्धिकत्वात्। चि० दी०, पृ० १३८

२. टि० ३ पृ० २९ अवलोकनीया।

३. तदेव।

४. अपि च धूमदर्शनानन्तरं जायमाने वह्न्यादिव्यवहारजनके ज्ञाने अनुमितित्वजातिविशेषस्यानुमिनोमीत्यबाधितानुव्यवसायसिद्धतया अपलापासम्भवः अनुमितित्वरूपजातिविशेषस्य सिद्धत्वे तदवच्छिन्नं प्रति व्याप्तिज्ञानादेः करणत्वमप्यावश्यकम् अन्यथा तदवच्छिन्नोत्पत्तिनियमानुपपत्तेः। चि० रह० पृ० २६

५. न चास्तु अनुमितिरूपो ज्ञानविशेषः अस्तु च तत्र व्याप्तिज्ञानादेः करणत्वं तथापि तादृशज्ञानविशेषस्य सविकल्पकल्पकरूपत्वेनासन्मात्रविषयकतया प्रामात्वाभावान्न तत्करणस्य प्रमाणत्वमिति वाच्यम्। चि० रह० पृ० २६

मन्तव्यमिति तु चार्वाकस्य दुराग्रहमात्रम्, सविकल्पकज्ञानस्यासन्मात्रविषयकत्वासिद्ध्याऽनुमितिविषयीभूतानां पर्वतत्ववह्नित्वादीनां पारमार्थिकत्वस्य[1] दृढं निश्चयात्।

॥इति द्वितीयं प्रकरणम्॥

१. सविकल्पकज्ञानस्यासन्मात्रविषयकत्वाऽसिद्धेः, अनुमितिविषयीभूतानां पर्वतत्ववह्नित्वादीनां सर्वेषां पारमार्थिकत्वादित्येव दूषणं सारम्। चि० रह० पृ० २६

तृतीयं प्रकरणम्

व्याप्तिविमर्शः

व्याप्तेः सम्बन्धविशेषत्वोपपादनम्

अनुमानस्वरूपप्रमाण्ये निरूपिते । तत्र व्याप्तिज्ञानमेव अनुमानस्वरूपमिति स्फुटीकृतम् । अधुना व्याप्तिमधिकृत्य सामान्यं विवेचनं प्रस्तूयते ।' वि' उपसर्ग-पूर्वक आप्लृधातोः क्तिन् प्रत्यये कृते व्याप्तिरिति शब्दो निष्पद्यते,[१]स च तिलेषु तैलव्याप्तिः, अथवा तिलेषु तैलं व्याप्तम् इति प्रामाणिकव्यवहारानुरोधेन वस्तुवि-शेषस्य देशविशेषेण सह सम्बन्धविशेषं बोधयति । तेन तिलेषु तैलव्याप्तिरि-त्युक्त्या तिलस्य सर्वेष्वपि अवयवेषु तैलसम्बन्धविशेषः प्रतीयत इति सर्वापरोक्षम् । अत एव भगवान् वेदव्यासोऽपि प्रहलादचरितवर्णनप्रसङ्गे; सत्यं विधातुं निजभृत्यभाषितं,[२] व्याप्तिं च भूतेष्वखिलेषु चात्मनः इत्यादि श्लोकेन भगवतः चराचरात्मके समस्तेऽपि प्रपञ्चे सम्बन्धविशेषं बोधयितुमेव व्याप्तिशब्दं प्रयुङ्क्ते, वाक्यतात्पर्यविदो मीमांसकास्तु 'सम्बन्धनियमो[३]व्याप्तिः' इत्येवं व्याप्तिं निरूपयन्ति । युक्तमपि इदम् । लोके हि धूममवलोक्य वह्निमनुमिन्वन्ति, अनुमातार इति प्रथितम् । वह्न्यनुमितौ धूमदर्शनमेव कथमुपयोगीति प्रश्नस्य एकमात्रं समा-धानं दृश्यमानेषु देशेषु धूमवत्सु वह्निसम्बन्धनियम एव । वह्नेः अनुमापकोऽयं धूमो लिङ्गशब्देनाऽपि[४] उच्यते । लिङ्गशब्दार्थश्च लीनम्—अन्तर्हितम् अप्रत्यक्षम् अर्थं

---

१. स्त्री वि + आप् + क्तिन् ।वाचस्पत्यम्, पृ० ४९८८व्याप्तिशब्दः स्त्रियां क्तिन् ३/३/९४ इत्यनेन क्तिन् । पा० अष्टा०

२. श्रीमद्० भा० म० पु०, स्क० ७, अ० ८, श्लो० १८, पृ० ८१७

३. सम्बन्धनियमो व्याप्तिः । त० सि० र०, पृ० ५८

४. (क) बुभुत्सावतो द्वितीयात् लिङ्गदर्शनात् संस्कराभिव्यक्त्यनन्तरकालं स्मृतिः स्मृत्यन्तरं च पुनर्लिङ्गदर्शनमयं धूम इति । न्या० सू० भा० वा०, पृ० २९२

व्याप्तिबलेन[1] गमयति, बुद्धिविषयतां नयति यत् तत् लिङ्गमिति व्युत्पत्यनुसारं व्याप्तिबलेनार्थबोधकः पदार्थः। अत एव व्याप्तिबलेनार्थगमकं[2] लिङ्गमिति तर्कभाषायां केशवमिश्रः प्रतिपादयति। धूमो वह्नेः लिङ्गं कथमिति प्रश्नस्य स्फुटमिदं समाधानम्—यत्र धूमो जनिं लभते तत्र अवश्यं वह्निः तिष्ठति, अत एव धूमे वह्निना सह विद्यमानताया अवश्यं भावः सर्वानुभवसिद्धः। अयमेव अवश्यम्भावः साहचर्यनियमशब्देन उच्यते। साहचर्यनियम[3] एव व्याप्तिरिति न्यायवैशेषिकविदः असकृत् अभिदधति।

साहचर्यनियमशब्दार्थविचारः

साहचर्यनियम इत्यत्र पदद्वयं साहचर्यं नियमश्च, तत्र नियमपदं निपूर्वकयमधातोः भावे अप् प्रत्यये सति व्युत्पद्यते।[4] कृदभिहितो भावो द्रव्यवत् प्रकाशते[5] इति न्यायो वाक्यार्थव्युत्पत्तिविदामतिरोहितःअस्यार्थश्च कृता कृत्प्रत्ययेन बोध्यमानो भावो द्रव्यवत् प्रकाशत इति। द्रव्यवत् इत्यत्र सप्तम्यन्तात् वतिप्रत्ययो बोध्यः, द्रव्यपदञ्च स्वाश्रयपरम्। स्वपदेन च प्रसङ्गानुसारं भावो गृह्यते। तेन हि द्रव्यपदस्य भावाश्रयपरतया द्रव्यवत्पदं भावाश्रये विशेषणतया बोध्यमान इव इति तात्पर्यार्थमवगमयति। तथा च कृत्प्रत्ययेन बोध्यमानो भावः स्वाश्रयविशेषणतयाऽपि प्रकाशत इति न्यायस्यास्य फलितार्थः स्फुटो भवति। एवं सति प्रकृते नियमशब्दो भावप्रत्ययान्तो भावार्थस्याश्रयीभूते साहचर्ये स्वार्थस्य विशेषणतया बोधे पर्यवसितो नियमवत्साहचर्यं बोधयितुं प्रवर्तते, नियमवत् साहचर्यं नियतसाहचर्यमिति स्वत एव निर्गलति, तेन च साहचर्यनियमो नियमवत्साहचर्यपरः। नियमवत्साहचर्यन्नाम नियतसाहचर्यमितिदिशा नियतसाहचर्यं व्याप्तिरिति पर्यवस्यति। साहचर्य-

---

(ख) यथा धूमो अग्नेर्लिङ्गम्। त० भा० पृ० १०६

(ग) नियम्यम्, गमकम् लिङ्गम् साधनम्, हेतुरिति पर्यायाः। त० सि० र० पृ० ५८

१. व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम्। त० सं० सि०, पृ० ७३

२. तर्कभाषा, पृ० १०६

३. (क) यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। त० सं० पृ० ४९

(ख) यत्र धूमस्तत्राग्निः इति व्याप्तेरभिनयः। साहचर्यनियमः इति लक्षणम्। त० सं० दी० पृ० २५५

४. यमः समुपनिविषु ३/३/६३ पा० अष्टा० इत्यमेन अप्प्रत्ययः।

५. कृदभिहितो भावः द्रव्यवत् प्रकाशते इति न्यायात्। न्या० कु० प्र० का० १, पृ० ८

शब्दः सहचरशब्दात् भावार्थके 'ष्यञ्' विहिते सम्पद्यते, सहचरशब्दश्च सहचरतीति विग्रहे अच्प्रत्यये सति निष्पद्यते।[१]अत्र चरतीत्यस्य वर्तते इत्येवार्थः।[२]प्रसङ्गानुसारं हेतुना साध्यमनुमातुं प्रवृत्तः पुरुषो हेतुः साध्यसहचर इति पूर्वमवश्यमवधारयति। धूममवलोक्य वह्निमनुमिन्वतः पुरुषस्य नूनमियं दृढा मतिः—'वह्निना सह वर्तते धूम' इति। वह्निसहचरो धूम इत्येवास्यार्थः। अत्र सहशब्दार्थः अधिकरणम्।[३]तथा च वह्निना सह वर्तते धूम इत्यस्य वह्न्यधिकरणवृत्तिर्धूम इत्यर्थः स्फुटः। अत एव वह्न्यधिकरणवृत्तित्वं धूमे साहचर्यशब्देन बोध्यत इति व्युत्पत्तिसिद्धम्। साहचर्यं चेदं नियतमनियतञ्चेत्युभयथा सम्भवति। वह्निना सह वर्तमानत्वरूपं साहचर्यं धूमघटयोः समानं परं धूमे तत् नियतं, घटे चानियतम्। अत एव न कोऽपि घटेन वह्निमनुमिनोति, धूमेनैव सर्वोऽपि व्युत्पन्नो जनो वह्निमनुमातुं प्रवर्तते। एतेन हि वह्न्यधिकरणवृत्तित्वरूपं नियतं साहचर्यं धूमे विद्यमानं वह्निनिरूपितव्याप्तिशब्देन व्युत्पन्नैरभिधीयते तस्यैव च धूमेन वह्न्यनुमितौ प्रमुखं वैशिष्ट्यम्।

साहचर्यनियमग्रहस्यानुमितावुपयोगः

साहचर्ये वह्न्यधिकरणवृत्तित्वात्मके विशेषणं चेदं नियतत्वं व्यापकत्वात्मकमेव।[४]तेन नियतं साहचर्यमित्यस्य व्यापकं वह्न्यधिकरणवृत्तित्वमर्थः। वह्न्यधिकरणवृत्तित्वं चेदं धूमे एव प्रतिपाद्यते अतस्तत्र नियतपदेन बोध्यमानं व्यापकत्वं धूमनिरूपितमेव ग्राह्यम्। धूमनिरूपितव्यापकत्वं नाम, धूमनिष्ठाभावाप्रतियोगित्वम् 'जगद्व्यापको विष्णुः' इत्यत्र तथा दर्शनात्। 'जगद्व्यापको विष्णुः' इति प्रामाणिकः प्रयोगो जगन्निरूपितव्यापकत्वं विष्णौ प्रतिपादयितुमेव आद्रियते। अत्र जगन्निरूपितव्यापकत्वं जगन्निष्ठाभावाप्रतियोगित्वरूपमेव[५] स्वीकृत्य प्रयोगोऽयं

---

१. पु० स्त्री, सहंचरतीति। चर+अच्। श० क० द्रु० पृ० ३१३। (सहचरशब्दः)

२. चरतीत्यस्य वर्तत इत्यर्थः। त० सं० सु०, पृ० ६६,

३. सहशब्दार्थोऽधिकरणम्। त० सं० सु०, पृ० ६६

४. नियतसाहचर्यं व्याप्तिरित्यर्थः। नियतत्वं व्यापकत्वम्। साहचर्यं सामानाधिकरण्यम्। तथा च धूमनियतवह्निसामानाधिकरण्यम् व्याप्तिरित्यर्थः। त० सं० न्यायबो० पृ० ५०

५. व्यापकत्वं चाभावाप्रतियोगित्वं जगद्व्यापको विष्णुरित्युक्तौ जगन्निष्ठाभावाप्रतियोगी विष्णुरिति बोधात्। धूमनिरूपितव्यापकत्वं च धूमनिष्ठाभावाप्रतियोगित्वम्। त० सं० सु० पृ० ६६

याथार्थ्यं लभते। एवं सति प्रकृते धूमिष्ठाभावाप्रतियोगित्वस्य वह्न्यधिकरणवृत्तित्वे बोधनेन यत्र-यत्र धूमत्वं तत्र-तत्र वह्न्यधिकरणवृत्तित्वमिति निष्कर्षः सूपपाद्यो भवति, भवति च तेन धूमेऽवश्यं भाविनो वह्न्यधिकरणवृत्तित्वस्य स्फुटा प्रतिपत्तिः। फलतश्च नियतसाहचर्यरूपाया अस्या व्याप्तेः विशिष्टाद् धूमात् सामान्योऽपि जनो वह्निमनुमिनोति। अत एव अग्नेः लिङ्गं धूम इति हालिकोऽपि प्रतिपद्यते। अस्यैव लिङ्गस्य धूमस्य तृतीयं ज्ञानं परामर्श[1]इति व्यवह्रियमाणं व्याप्तिज्ञानस्य व्यापारविधया अनुमित्युदये नियमेनापेक्ष्यते। तृतीयस्यास्य लिङ्गज्ञानस्य परामर्शस्योदयं विना न सम्भवत्यनुमित्युदयः। महानसादौ वह्निसाहचर्यस्य धूमे दर्शनानन्तरं वह्निव्याप्यो धूम इत्येवं वह्निव्याप्यत्वेन रूपेण प्रथमं जायमानं धूमज्ञानं प्रथमलिङ्गज्ञानम्। तदनु पर्वतादौ यद्धूमज्ञानं तद् द्वितीयं लिङ्गज्ञानम्। अस्यैव द्वितीयस्य लिङ्गज्ञानस्य प्रथमलिङ्गज्ञानजन्यव्याप्तिविषयकसंस्कारोद्बोधकतया, धूमो वह्निव्याप्य इत्येवं व्याप्तिस्मरणपुरस्सरं वह्निव्याप्यधूमवान् पर्वत इत्याकारकं यज्ज्ञानं पर्वतेन सह वह्निव्याप्यधूमस्य सम्बन्धमवगाहते तदेव तृतीयं लिङ्गज्ञानं परामर्शात्मकम्।[2]चरमस्यास्य अनुमितिकारणस्य सति सन्निधाने बलवतो बाधकविशेषस्य कस्यचनाभावदशायामनुमितिरवश्यमुदेत्येव।

तृतीयलिङ्गज्ञानात्मकोऽयं परामर्शः प्रामुख्येन व्याप्तिं पक्षधर्मतां च विषयीकरोति।[3]पक्षधर्मताशब्दो हि पक्षेण सह हेतोस्तं सम्बन्धविशेषमवगमयति येन सम्ब-

---

१. टि० ४ पृ० १ अवलोकनीया।

२. (क) महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादिमं पक्षे यद्धूमज्ञानं तद् द्वितीयम्। अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयम्। इदमेव लिङ्गपरामर्श इत्युच्यते। त० सं० पृ० ७५

(ख) महानसे यद्धूमज्ञानं तत्प्रथमम्। पर्वतादौ पक्षे यद्धूमज्ञानं तद्द्वितीयम्। ततः पूर्वं गृहीतां धूमाग्न्योः व्याप्तिं स्मृत्वा यत्र धूमस्तत्राग्निः इति तत्रैव पर्वते पुनर्धूमं परामृशति अस्त्यत्र पर्वतेऽग्निनाव्याप्तो धूम इति तदिदं धूमज्ञानं तृतीयम्। त० भा०, पृ० १११

(ग) ते द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य तदिदं तत्पूर्वकं प्रत्यक्षमिति। कतरे द्वे प्रत्यक्षे? लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षं, लिङ्गदर्शनं च द्वितीयम्। न्या० सू० भा० वा० पृ० २९२

३. (क) व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमिति तु स्यात्। चि० दी० पृ० ५०

(ख) व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। त० सं० पृ० ६९

न्धेन हेतुः साध्यस्य व्याप्यो भवति। तृतीयमिदं लिङ्गज्ञानं यतो व्याप्तिविशिष्टस्य हेतोः पक्षेण सह वैशिष्ट्यग्राहकमत एव विशिष्टवैशिष्ट्यावगाहिज्ञानात्मकतया विशेषणतावच्छेदकप्रकारकज्ञानं विना नोत्पत्तुमर्हम्,[१] तेन चास्योत्पत्तेः पूर्वं हेतौ साध्यनिरूपितव्याप्तेः ज्ञानस्यावश्यमपेक्षणीयतया तर्करसिकाः सर्वप्रथमं व्याप्तिमेव विवेचयितुं प्रवर्तन्ते।

अनौपाधिकः सम्बन्धो व्याप्तिः

व्याप्तिश्चेयं नियतसाहचर्यात्मिका हेतौ साध्यस्य सम्बन्धविशेषपरेति साम्प्रतमेव सङ्क्षिप्य प्रदर्शितम्। परं कथमियं व्याप्तिः सुग्रहेति पृच्छायां वह्निमत्सु महानसादिषु वह्निधूमयोः यत् सहचारदर्शनं तदेव भूयो भूय आवृत्तं सत् धूमे विद्यमानं तं वह्निनिरूपितं सम्बन्धविशेषं ग्राहयति[२] यो व्याप्तिपदेन सङ्केत्यते। अत्रेदं तु न प्रष्टव्यम्—यदि हि हेतौ साध्यसहचारस्यासकृद्दर्शनमेव व्याप्त्यवधारणे बीजं तर्हि मित्रातनयत्वे श्यामत्वस्य व्याप्तिः कुतो न गृह्यते, बहुषु मित्रातनयेषु श्यामत्वदर्शनेन मित्रातनयत्वे श्यामत्वसहचारस्यासकृद्दर्शनादिति। नियतसाहचर्यं व्याप्तिरिति प्रागेव प्रादर्शि, इयमेव व्याप्तिः हेतौ साध्यस्य सम्बन्धविशेषात्मिका, अनुमितिजनने विषयविधया साधारणकारणतां भजत इत्यपि न्यरूपि। तत्र सम्बन्धविशेषात्मिकायां व्याप्तौ व्यापकत्वपर्यवसितं नियतत्वं विशेषणविधया प्रविष्टं सम्बन्धस्यास्य स्वाभाविकत्वं स्फुटयति। तेन हि स्वाभाविकः[३] सम्बन्धो व्याप्तिः इत्येव निर्धारणीयम्। तथा सति यद्यपि धूमे वह्निसहचारः यथा पुनः पुनः दृश्यते तथैव मित्रातनयत्वेऽपि श्यामत्वसहचारः पुनः पुनः ईक्ष्यते, परं श्यामत्वनिरूपितो यः सम्बन्धो मित्रातनयत्वे भूयोदर्शनेनानेन निर्धार्यते स न स्वाभाविकः किन्त्वौपा-

---

१. विशिष्टवैशिष्ट्यावगाहिमानान्तरं-विशिष्टवैशिष्ट्यबोधजनकं विशेषणतावच्छेदकीभूतव्याप्तिप्रकारकधूमत्वावच्छिन्नविशेष्यकज्ञानम्। उत्थाप्यते। जन्यते। तेन तादृशविशेषणतावच्छेदकप्रकारकज्ञानेन परामर्शो जन्यते इत्यर्थः। चि० दी० गा० पृ० २७

२. तथा हि प्रथमं तावत् महानसादौ भूयो भूयो धूमं पश्यन् वह्निं पश्यति, तेन भूयो दर्शनेनं धूमाग्न्योः स्वाभाविकं सम्बन्धमवधारयति यत्र धूमस्तत्राग्निः इति। त० भा० पृ० १०६

३. (क) स्वाभाविकश्च सम्बन्धो व्याप्तिः। त० भा० पृ० १०८
(ख) तस्माद् यो वा स वास्तु सम्बन्धः केवलं यस्यासौ स्वाभाविको नियतः, स एव गमको गम्यश्चेतरः सम्बन्धीति युज्यते। न्या० सू० वा० टी० पृ० ३०९

धिकः—उपाधिप्रयुक्तः, उपाधिश्चायं शाकादिकस्य श्यामवर्णस्याहारस्य परिपाक एव, उपाधिर्नाम प्रयोजकः।[१]

स्थितिरियम्—मित्रानाम्नी काचन स्त्री, तस्याः सन्ति दश पुत्रास्तेषु नवसु श्यामत्वं प्रत्यक्षमुपलभ्यते, परं तत् न मित्रातनयत्वप्रयुक्तम् तस्या दशमपुत्रे गौरत्वस्य सत्त्वात्। मित्रातनयत्वस्य श्यामत्वप्रयोजकत्वे दशमस्यापि मित्रातनयत्वाविशेषेण श्यामत्वमेव स्यात् परं तथा नास्ति। अतः अवश्यं तत् कारणान्तरप्रयोज्यमिति अभ्युपेयम्, तच्चान्यत् कारणं तस्य दशमपुत्रे नास्ति। किं तदन्यत्कारणमिति चेत् गर्भावस्थायां श्यामवर्णानां शाकादीनाम् आहारविशेषाणां भक्षणमेव। यदा हि मित्रा आपन्नसत्त्वा श्यामवर्णानां शाकादिपदार्थानामेव सेवनमकरोत् तदा तेषां पदार्थानां परिपाकमहिम्ना तस्याः शरीरे उत्पन्नेषु रक्तेषु श्यामत्वस्यैव उत्पत्या तैः रक्तैः यस्य यस्य शिशोः शरीरम् अस्तित्वम् अवाप स सर्वोऽपि शिशुः श्याम एव जातः। यदा हि सा अन्तर्वत्नी सती शाकादिकं नासेवत किन्तु पयः अन्यच्च पयस्यं नवनीतादिकम् उत्तमोत्तमं खाद्यं अगृह्णात् तदा सा यं शिशुं सुषुवे सः उत्तमस्य आहारविशेषस्य परिपाकप्रभावेण उत्पन्नैः गौरैः रक्तैः निर्मितं शरीरमासाद्य गौर एव अजायत। अत एव अस्य पूर्वम् उत्पन्नेषु सर्वेष्वपि तस्यास्तनयेषु विद्यमानं श्यामत्वं शाकपाकजन्यत्वरूपोपाधिप्रयुक्तं न तु मित्रातनयत्वप्रयुक्तमिति स्फुटप्रतिपत्तेः मित्रातनयत्वे श्यामत्वसहचारसम्बन्धः शाकपाकजन्यत्वरूपोपाधिप्रयुक्त औपाधिको न तु स्वाभाविक इति नूनमूरीकरणीयम्। तथा च मित्रातनयत्वे श्यामत्वसहचारस्य यद्भूयो दर्शनं तत् स्वाभाविकसम्बन्धरूपाया व्याप्तेः अवधारणे समर्थं सदपि ग्राह्यस्यास्य स्वाभाविकसम्बन्धस्य तयोर्मध्येऽविद्यमानतया न तत्

---

१. (क) मैत्रीतनयत्वश्यामत्वयोर्न स्वाभाविकः सम्बन्धः किन्त्वौपाधिक एव, शाकाद्यन्नपरिणामस्योपाधेर्विद्यमानत्वात्। तथाहि श्यामत्वे मैत्रीतनयत्वं न प्रयोजकं, किन्तु शाकाद्यन्नपरिणतिभेद एव प्रयोजकः, प्रयोजकश्चोपाधिः इत्युच्यते। त० भा०, पृ० १०८

(ख) अथ साध्यप्रयोजको धर्म उपाधिः।—दूषणोपयिकं हि प्रयोजकत्वमिह विवक्षितम्। तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति तदेव प्रयोजकम्, नत्वधिकं व्यर्थत्वात्। चि० पृ० २६५

(ग) न च श्यामादिषु मैत्रीतनयादीनां स्वाभाविकप्रतिबन्धसम्भवः, अन्नपानपरिणतिभेदस्योपाधेः श्यामताया मैत्रीतनयसम्बन्धं प्रति विद्यमानत्वेन मैत्रीतनयत्वस्य गमकत्वात्। न्या० सू० ता० टी० पृ० ३१०-३११

ग्राहयितुमलमिति श्यामत्वव्याप्तिः मित्रातनयत्वे नाभ्युपगम्यते प्रमाणतत्त्वविद्भिः वह्न्यधिकरणवृत्तित्वरूपस्य सहचारस्य धूमे भूयो भूयो दर्शनेन तत्र वह्निनिरूपिताया व्याप्तेः सुग्रहत्वे मुख्यो हेतुः धूमे विद्यमानस्य वह्निसम्बन्धस्य स्वाभाविकत्वमेव। धूमे विद्यमानो वह्निनिरूपितः सम्बन्धः स्वाभाविको नौपाधिक[१]इति वस्तुस्थितौ मूलम् उपाधिसम्भावनाविरह एव।

भवति उपाधिः द्विविधः प्रत्यक्षयोग्यः तदयोग्यश्च।[२] प्रत्यक्षायोग्यस्य उपाधेः कदाचिदपि अनुभवाभावेन तत् स्मरणस्याशक्यतया शङ्कैव न सम्भवति,[३]शङ्कनीयपदार्थस्मरणस्य शङ्कायाम् अवश्यमपेक्षणीयत्वात्। प्रत्यक्षायोग्यस्यापि उपाधेः अनुमित्यात्मकस्य शाब्दबोधात्मकस्य वा अनुभवस्य सम्भवेन स्मरणम् उपपादयितुं शक्यमिति तु अज्ञानविजृम्भितम्, प्रत्यक्षायोग्यस्य तस्य कुत्रापि हेतौ व्याप्तिग्रहा-

---

१. (क) तथा च उपाध्यभावग्रहणजनितसंस्कारसहकृतेन भूयोदर्शनजनितसंस्कारसहकृतेन साहचर्यग्राहिणा प्रत्यक्षेणैव धूमाग्न्योर्व्याप्तिरवधार्यते। तेन धूमाग्न्योः स्वाभाविक एव सम्बन्धो न त्वौपाधिकः। त० भा० पृ० १०८

(ख) धूमादीनां वह्न्यादिसम्बन्धः स्वाभाविकः, न तु वह्न्यादीनां धूमादिभिः, ते हि विनापि धूमादिभिरुपलभ्यन्ते। यदा त्वार्द्रेन्धनादिसम्बन्धमनुभवन्ति तदा धूमादिभिः संबद्ध्यन्ते। तस्माद्वह्न्यादीनामार्द्रेन्धनाद्युपाधिकृतः सम्बन्धो न स्वाभाविकः, ततो न नियतः स्वाभाविकस्तु धूमादीनां वह्न्यादिसम्बन्धः, तदुपाधेरनुपलभ्यमानत्वात्। —न्या० सू० वा० टी० पृ० ३०९

२. (क) सचायं द्विविधो निश्चितः सन्दिग्धश्च साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकतया निश्चितोपाधिः यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वम्। यत्र च साधनाव्यापकत्वसन्देहस्साध्यव्यापकत्वसन्देहो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशयाधायकतया सन्दिग्धोपाधिः यथा मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिजत्वम्। चि० पृ० ३१८-३२०

(ख) योग्योपाधीनां योग्यानुपलब्ध्या अभावनिश्चयेऽपि अयोग्योपाधिशङ्कया व्यभिचारसंशयात्। चि० पृ० ३८

(ग) व्यभिचारशङ्कापि दर्शनयोग्योपाधीनां योग्यानुपलम्भबाधादेव निरस्ता। अतीन्द्रियास्तु उपाधयः अन्यत्र प्रमाणपरिदृष्टाः शङ्किताऽपि यथा निवर्तन्ते, तथा वक्ष्यामः। न्या० सू० वा० टी० प० पृ० ३३२

३. टि० २ पृ० ९ अवलोकनीया।

(ख) स त्रिविधः साधारणधर्मधीजन्योऽसाधारणधर्मधीजन्यो विप्रतिपत्तिजन्यश्चेति। विशेषादर्शनं कोटिद्वयस्मरणं संशयमात्रे हेतुः। त० सं० सि० च० पृ० १०१

सम्भवेन, कस्मिंश्चित् पदे वा तन्निरूपितवृत्तिज्ञानासम्भवेन च तद्विषयकानुमितिशाब्दबोधयोः सम्भावनानास्पदत्वात्। प्रत्यक्षयोग्योऽपि कश्चनोपाधिस्तत्र न सम्भावयितुं शक्यस्तस्य तत्र अनुपलम्भात्। यत्र कुत्रापि प्रत्यक्षयोग्य उपाधिः अस्ति स तत्रावश्यम् उपलभ्यते, यथा वह्नौ धूमाधिकरणवृत्तित्वरूपसाहचर्यसम्बन्धे आर्द्रेन्धनसंयोगः, हिंसात्वे अधर्मसाधनत्वाधिकरणवृत्तित्वरूपसाहचर्यसम्बन्धे निषिद्धत्वम्। मित्रातनयत्वे, श्यामत्वाधिकरणवृत्तित्वरूपसाहचर्यसम्बन्धे शाकपाकजन्यत्वं च सर्वापरोक्षाणि।[1]

अत्रायं विवेकः—यथा धूमे, यत्र-यत्र धूमस्तत्र-तत्र वह्निः इत्येवं वह्निसहचारो भूयो भूयो दृश्यते तथैव महानसादिषु बहुषु वह्निमत्सु धूमदर्शनेन वह्नौ अपि यत्र-यत्र वह्निस्तत्र-तत्र धूम इत्येवं धूमसहचारो भूयो-भूयो दृश्यत एव, परं धूमे वह्निसहचारस्य भूयो दर्शनेन वह्निनिरूपिता अनौपाधिक-(स्वाभाविक) सम्बन्धरूपा व्याप्तिः गृह्यते। वह्नौ तु धूमस्य अनौपाधिक-(स्वाभाविक) सम्बन्धरूपा व्याप्तिः न गृह्यते, वह्नौ विद्यमानस्य तस्य धूमनिरूपितसम्बन्धस्य आर्द्रेन्धनसंयोगरूपोपाधिप्रयुक्तत्वेन स्वाभाविकसम्बन्धस्य अभावात्। धूमोत्पादो वह्निमात्रहेतुको न भवति, आर्द्रेन्धनसंयोगं विना तदुत्पादस्य अदर्शनात्, अत एव अयोगोलकादिभिः सत्यपि वह्निसम्बन्धे नोत्पद्यते तत्र धूमः। इमामेव स्थितिं प्रत्यक्षयतां सर्वेषामतिरोहितमिदम्—वह्नौ धूमाधिकरणवृत्तित्वात्मकः साहचर्यपदव्यपदेश्यः सम्बन्धो न स्वाभाविकः किन्तु आर्द्रेन्धनसंयोगरूपोपाधिप्रयुक्त इति।

एवमेव अस्माकं शास्त्राणि प्रायः करुणापराणि प्राणिमात्रस्य कल्याणकामनयैव प्रवृत्तानि हिंसां निषेधन्ति। लोकेऽपि प्राणिबधस्य नितरां क्रूरत्वं स्वतस्सिद्धमिति हिंसा अत्यन्तं घृणितं कर्म मन्यते। तदनुसारम् अधर्मसाधनत्वसाहचर्यस्य हिंसात्वे सत्यपि भूयोदर्शने अधर्मसाधनत्वनिरूपिता व्याप्तिः हिंसात्वे नावबुद्ध्यते प्रमाणिकैः, साहचर्यस्य निषिद्धत्वरूपोपाधिप्रयुक्तत्वेन तत्रापि ग्राह्यस्य स्वाभाविकसम्बन्धस्याभावात्। तात्पर्यमिदम्—कस्यांचिदपि हिंसायामधर्मसाधनत्वं न

---

१. न च धूमाग्न्योः सम्बन्धे कश्चिदुपाधिरस्ति, अस्ति चेदयोग्यो योग्यो वा अयोग्यस्य शङ्कितुमशक्यत्वात्, योग्यस्य चानुपलभ्यमानत्वात्। यत्रोपाधिरस्ति तत्रोपलभ्यते यथा, अग्नेर्धूमसम्बन्धे आर्द्रेन्धनसंयोगः। हिंसात्वस्य चाधर्मसाधनत्वेन सह सम्बन्धे निषिद्धत्वमुपाधिः, मैत्रीतनयत्वस्य च श्यामत्वेन सह सम्बन्धे शाकाद्यन्नपरिणतिभेदः।
—त० भा० पृ० १०८

हिंसात्वप्रयुक्तं, किन्तु मा हिंस्यात् सर्वा भूतानि, इत्यादिशास्त्रवचनैः हिंसाया निषेधेन निषिद्धत्वप्रयुक्तमेव[१]। अत एव 'अग्नीषोमीयं पशुमालभेत' 'यज्ञे वधोऽवधः' इत्यादिशास्त्रानुरोधेन विभिन्नासु श्रौतेष्टिषु विहिता हिंसा नाधर्मसाधनानि[२]मन्यन्ते। एतेन हि हिंसात्वे बहुत्र दृष्टस्य अधर्मसाधनत्वनिरूपितस्य साहचर्यसम्बन्धस्य प्रयोजको निषद्धत्वरूपोपाधिः शास्त्रत एव ज्ञायते।

मित्रातनयत्वेऽपि श्यामत्वसम्बन्ध औपाधिक एव। उपाधिश्च स शाकपाकजन्यत्वरूपो मित्राया वचनेनैव ज्ञायते। एवं यथा अग्नौ विद्यमाने धूमनिरूपितसाहचर्यसम्बन्धे, हिंसात्वे विद्यमानेऽधर्मसाधनत्वनिरूपितसाहचर्यसम्बन्धे, मित्रातनयत्वे च विद्यमाने श्यामत्वनिरूपिते साहचर्यसम्बन्धे, क्रमशः आर्द्रेन्धनसंयोग-निषिद्धत्व-शाकपाकजन्यत्वरूपा उपाधय उपलभ्यन्ते, तथा धूमे विद्यमानेऽग्निसाहचर्यरूपे सम्बन्धे यदि कश्चन प्रत्यक्षयोग्य उपाधिः स्यात् तर्हि नूनमुपलभ्येत यतो नोपलभ्यतेऽतो नास्ति तत्र कश्चनोपाधिरिति निष्कर्षो निराकुलः।

अत्रायं प्रश्नोऽपि प्रसज्यते—ननु किं तावत् उपाधित्वम्। न च साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम्, भवति च धूमवान् वह्नेः इत्यत्रार्द्रेन्धनसंयोगस्योपाधित्वं तस्य धूमरूपसाध्यव्यापकत्वात्, यत्र-यत्र धूमस्तत्र-तत्रार्द्रेन्धनसंयोग इति व्याप्तेः, साधनस्य वह्नेरव्यापकत्वात् वह्निमति तप्तायः पिण्डे आर्द्रेन्धनसंयोगाभावादिति वाच्यम्, साम्प्रतमेवोपदर्शितशाकपाकजन्यत्वरूपोपाधावव्याप्तेः, काककोकिलादौ व्यभिचारेण शाकपाकजन्यत्वस्य श्यामत्वरूपसाध्याव्यापकत्वात्।[३]

---

१. न हिंस्यात् सर्वा भूतानि इति सामान्यवाक्यतः पशुना यजेतेत्यादिविशेषवाक्यस्य बलीयस्त्वात्। अत एव हिंसात्वं नाधर्मसाधनत्वे प्रयोजकमपितु निषिद्धत्वमेवेत्यादिकमेव द्रष्टव्यम्। त० सं० सि० च० पृ० ८४-८५

२. (क) यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा। यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः। श्लो० ३९ पृ० २०१
(ख) अग्नीषोमीयं पशुमालभेतेति श्रुतम्। भा० दी० अ० २, पा० २ अधि० पृ० १७२
(ग) न तु अग्नीषोमीयं पशुमालभेत इति वाक्यप्राप्तं पशुयागम्। मी० परि० पृ० ३७

३. (क) तत्रोपाधिस्तु साधनाव्यापकत्वे सति साध्यव्यापकः। न्या० कु० पृ० ३५२
(ख) स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वं, नह्युद्भूतरूपवत्त्वं प्रत्यक्षत्वव्यापकम् आत्मनि गुणकर्मादौ च प्रत्यक्षे तदभावात्। नापि शाकपाकजत्वं श्यामत्वव्यापकं काककोकिलजलदजम्बूफलादौ श्यामे तदभावादिति। वै० सू० उ०, पृ० ९३

उच्यते, पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक[1]उपाधिरिति मन्तव्यम्। पर्यवसितं नाम[2]सिद्धं तेन सिद्धसाध्यव्यापकत्वघटितमुपाधिलक्षणमिति प्रत्येतव्यम्। सिद्धं च तदेव साध्यं यत् पक्षधर्मताबललभ्यम्[3]। पर्वतो धूमवान् वह्नेरित्यत्र पक्षः पर्वतः, तद्धर्मताबललभ्यं साध्यं पर्वतीयो धूमः, तद्व्यापकः आर्द्रेन्धन-संयोगः, अथ च साधनस्य वह्नेः अव्यापकश्चेति तत्र लक्षणसमन्वयः। स श्यामो मित्रातनयत्वादित्यत्र पक्षो मित्रातनयस्तद्धर्मताबललभ्यं साध्यं मित्रातनयीयं श्यामत्वं तस्य व्यापकं शाकपाकजन्यत्वम्, मित्रातनयीयश्यामत्वस्य काककोकिलादौ अभावेन व्यभिचाराभावादित्यलं सङ्क्षिप्तेन प्रसक्तप्रश्नसमाधानेन।

साम्प्रतं प्रकृतं प्रस्तूयते—उपरितनं तथ्यमाश्रित्याग्निनिरूपितसाहचर्यात्मके धूमनिष्ठे सम्बन्धे कश्चनोपाधिः यद्यभविष्यत् ततोऽद्रक्ष्यत इति तर्कस्य, उपाधेरदर्शनात् नास्त्येवोपाधिरित्युपाध्यनुपलम्भस्य च सहकारेण प्रत्यक्षप्रमाणमेव धूमनिष्ठे वह्निनिरूपितसाहचर्यात्मके सम्बन्धे उपाध्यभावमवगमयति[4]। तेन चावगमेन

---

१. (क) अथ पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। न्या० कु० प्र०, पृ० ३५९
(ख) पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वस्य तथा विवक्षितत्वात्। वै० सू० उ० पृ० ९३
(ग) पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः। चि० पृ० २७७

२. (क) यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं साध्यं पर्यवसितम्। न्या० कु० प्र० पृ० ३६२
(ख) तदेव। चि० पृ० २८४
(ग) पर्यवसितञ्च साध्यं यद्धर्मावच्छेदेनोपाधेर्व्यापकत्वमभग्नं तद्धर्मावच्छिन्नं प्रकृते बहिर्द्रव्यत्वावच्छेदेन प्रत्यक्षत्वस्योद्भूतरूपवत्त्वं व्यापकम्, अन्वयव्यतिरेकाभ्यां गृहीतं, औत्पत्तिकनरश्यामत्वावच्छिन्नं साध्यं प्रति चरकसुश्रुतादौ शाकपाकजत्वस्य व्यापकत्वावधारणात्। वै० सू० उ० पृ० ९३
(घ) मित्रातनयत्वेन साध्ये श्यामत्वे, साध्यशाकपाकजत्वस्य च वैद्यकावधृतः कार्यकारणभावः। न्या० कु० प्र०, पृ० ३६४
(ङ) मित्रातनयश्यामत्वे शाकपाकजत्वम्—अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारणतावगमेन। चि० पृ० ३०९

३. पर्यवसितं च साध्यं पक्षधर्मताबललभ्यम्। न्या० कु० प्र० पृ० ३५९

४. न चेह धूमस्याग्निसाहचर्ये कश्चिदुपाधिरस्ति, यद्यभविष्यत्ततोऽद्रक्ष्यत, ततो दर्शनाभावान्नास्ति इति तर्कसहकारिणानुपलम्भसनाथेन प्रत्यक्षेणैवोपाध्य-

उद्बुद्धः संस्कारो धूमेऽग्निसहचारस्य भूयोदर्शनेनोद्बुद्धश्च संस्कारः, यस्य पुरुषविशेषस्यात्मनि तिष्ठतस्तस्य धूमे वह्निसहचारग्राहकप्रत्यक्षबलेनैव तत्र विद्यमानायाः, वह्निनिरूपितव्याप्तेरवधारणं सुकरं भवति । सङ्क्षिप्तेनानेन विवेचनेन धूमनिष्ठः सम्बन्धः स्वाभाविको नौपाधिकः स्वाभाविकश्च सम्बन्ध एव व्याप्तिरिति निरवद्यं पर्यवस्यति ।

समविषमभेदेन व्याप्तेर्द्वैविध्यम्

नियतसाहचर्यात्मिका व्याप्तिरियं समविषमभेदेन द्विविधा, साध्यत्वहेतुत्वाभ्याम् अभिमतयोः घटकं प्रत्येकं परस्परं नियतसाहचर्यविशिष्टं सत् समव्याप्तमित्युच्यते तयोर्विद्यमाना च व्याप्तिः समव्याप्तिरिति व्यवह्रियते । यथा प्रमेयत्वाभिधेयत्वयोः, गन्धपृथ्वीत्वयोः, आत्मत्वज्ञानयोः, मनुष्यत्वविवेकयोः समव्याप्तिः स्फुटा, एषु सर्वेष्वपि परस्परं नियतसाहचर्यस्य स्पष्टत्वात् । अत एवैवं विधस्थले साध्यहेतुभावो न नियतः, अपितु विवक्षायत्तस्तेन हि समव्याप्तयोः एवं विधयोः मध्येऽनुमित्सानुरोधेन यस्य कस्यापि साध्यत्वेन हेतुत्वेनोपादानपुरस्सरम् अयमभिधेयः प्रमेयत्वात्, अयं प्रमेयः अभिधेयत्वादित्यादिरूपेणानुमानप्रयोगः कर्तुं शक्यः । विषमव्याप्तिकं स्थलं तु विसदृशमेव । तत्र साध्यहेतुभावस्य नैयत्यम् अनिवार्यम्, नहि वह्निमान् धूमादितिवत्, धूमवान् वह्नेरिति प्रयोगस्तत्र सम्भवति, धूमाधिकरणवृत्तित्वरूपसाहचर्यनैयत्यस्य वह्नावनुपलब्धेः । तेन हि विषमव्याप्तिः[१] तत्रैवाभ्युपगम्यते यत्र साध्यत्वहेतुत्वाभ्यामभिमतयोर्मध्ये केवलं साध्यनिरूपितं साहचर्यं नियतत्वविशिष्टं हेतावुपलभ्यते । हेतोः साध्यत्वेन विवक्षायां तु तत् साधनार्थं हेत्वन्तरमेव अन्वेष्टव्यं भवति ।

व्याप्त्यवधारणकारणविचारः

अथेयं व्याप्तिः कथमवधार्यत इति सङ्क्षेपेण विमृश्यते, साध्यहेत्वोः युगपत् सकृद्दर्शनं व्याप्त्यवधारकमिति[२] तु न ज्यायः, रासभवह्न्योरपि युगपत् सकृद्दर्शनसम्भवेन रासभेऽपि वह्निनिरूपितव्याप्त्यवधारणसम्भवात् । अस्तु नाम तयोर्भूयोदर्शनं व्याप्त्यवधारकं नहि यत्र-यत्र रासभस्तत्र-तत्र सर्वत्र विभावसुः दृश्यते येन

· भावोऽवधार्यते । त० भा० पृ० १०८

१. विषमव्याप्तस्तु नोपाधिपदवाच्यः । चि० पृ० १६८

२. तस्मात् परिशेषात् सकृद्दर्शनगम्या सा । चि० पृ० १७७

विभावसुनिरूपिता व्याप्तिः रासम्भेऽवधार्यत इति कथनमपि रमणीयम्, भूयस्त्वस्य त्रित्वचतुष्ट्वादिरूपत्वेनानेकतया तादृशभूयस्त्वघटित-भूयोदर्शनत्वेन व्याप्त्यवधारणं प्रति हेतुतायामनन्तकार्यकारणभावापत्तेः।[1]बहुत्वरूपम्, बहुत्वस्य त्रित्वघटिततया त्रित्वरूपमेव वा भूयस्त्वमभ्युपेत्यानन्तकार्यकारणभावापत्तिवारण-सम्भवेप्यन्वयव्यतिरेकव्यभिचारयोः जागरूकतया भूयो दर्शनस्य व्याप्त्यवधारकत्वं दुर्घटमेव।[2]भूयोदर्शनस्यान्वयव्यभिचारः पार्थिवत्वलौहलेख्यत्वयोः वह्निधूमयोश्च शतशः सहचारदर्शनेऽपि हीरकायोगोलकान्तर्भावेण व्यभिचारोपलब्ध्या स्फुट एव। व्यतिरेकव्यभिचारोऽपि सद्धेतुकस्थले साध्यहेत्वोः सकृत् सहचारदर्शनेऽपि व्याप्त्यवधारणस्य सर्वानुभवसिद्धतया निर्विवादः।

किञ्च भूयोदर्शनं निर्वक्तुमप्यशक्यम्, भूयस्सु स्थानेषु साध्यसाधनसहचार-दर्शनमेव भूयोदर्शनमिति तु न युक्तम्, एतद्व्यक्तिवृत्तियावद्गुणवान् एतद्व्यक्तिवृत्तियावत्कर्मवत्त्वात् इत्यादिस्थलेषु साध्यहेत्वोरनेकाधिकरणाप्रसिद्ध्या स्थानगतभूयस्त्वासम्भवेन निरुक्तभूयो दर्शनात्मककारणाप्रसिद्धेः व्याप्त्यनवधारणप्रसङ्गात्।[3]भूयसां साध्यसाधनानां सहचारदर्शनं भूयो दर्शनमित्यपि पक्षो न क्षोदक्षमः[4]प्रकृतस्थले साध्यहेत्वोः भूयस्त्वस्य सत्त्वेन व्याप्त्यवधारणोपपत्तावपि, द्रव्यं पृथ्वीत्वादित्यादौ तदनवधारणप्रसङ्गात्, साध्यहेत्वोः द्रव्यत्वपृथ्वीत्वयोः जात्यात्मनोः एकैकव्यक्तिततया भूयस्त्वासम्भवेन साध्यहेतुगतभूयस्त्वघटितस्यास्य भूयो दर्शनस्य नितरामप्रसिद्धेः।

वर्ततां नाम भूयांसि साध्यसाधनसहचारदर्शनानि भूयोदर्शनमिति निरुक्तिस्तु सर्वथा निरवकाशैव भूयासां दर्शनानां युगपत्समवधानासम्भवात्।[5]स्वजन्यसंस्कारसम्बन्धेन भूयसां दर्शनानां कारणत्वमित्युक्तावपि न निस्तारः, धूमवान् वह्ने-

---

१. (क) भूयस्त्वस्य त्रिचतुरादित्वेन अननुगमाच्च। चि० पृ० १७१
(ख) भूयस्त्वस्य त्रित्वचतुष्ट्वादिरूपत्वेनानेकतया तादृशभूयस्त्वघटितभूयोदर्शनत्वेन हेतुतायां अनन्तकार्यकारणभावापत्तिश्चेत्यपि बोध्यम्। त० सं० दी० नृसिं, प्र० पृ० २६१

२. अपि च पार्थिवत्वलौहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात्। चि० पृ० १७१

३. किञ्च सम्बन्धभूयोदर्शनं भूयस्सु स्थानेषु दर्शनं भूयसां वा दर्शनं भूयांसि वा दर्शनानि न तथा एकत्र रूपरसयोर्द्रव्यत्वघटत्वयोश्च व्याप्तिग्रहात्। चि० पृ० १७१

४. तदेव।

५. टि० २ पृ० ३९ अवलोकनीया

रित्यादिषु तप्तायः पिण्डान्तर्भावेण व्यभिचारग्रहकालेऽपि महानसचत्वारादिषु वह्नि-धूमयोः सामानाधिकरण्यविषयकानेकदर्शनात्मकभूयोदर्शनसम्भवेन व्याप्तिग्राह-कस्य भूयो दर्शनस्याक्षुण्णतया वह्नौ धूमनिरूपितव्याप्तिग्रहणप्रसङ्गात् ।

न चैवं व्याप्त्यवगमो भूयोदर्शनादिति प्रशस्तपादभाष्यविरोध इति[१] वाच्यम्, भाष्यस्यास्य भूयो दर्शनस्य व्याप्त्यवधारणं प्रति प्रयोजकत्वमात्रप्रदर्शनपरत्वमिति स्वीकृत्यापि विरोधस्यास्य परिहारसम्भवात् । भूयोदर्शनस्य व्याप्त्यवधारणं प्रति प्रयोजकत्वं तु क्वचिदुपाधिसंदेहाहितव्यभिचारशङ्काया विधूननद्वारोपपद्यत एव, तथाप्यस्य व्याप्त्यवधारणं प्रत्यन्यथासिद्धत्वस्य तदवस्थतया कारणत्वं तु नास्त्ये-वेति स्थितमेव । अतो व्यभिचाराग्रहस्य सहचारग्रहस्य[२] च व्याप्त्यवधारणं प्रति स्वातन्त्र्येण कारणत्वमभ्युपेयम्, तेन च व्याप्तिनिश्चयं प्रति व्यभिचारग्रहाभावः सहचारग्रहश्च कारणमित्येव कार्यकारणभावो निश्चेतव्यः ।

व्यभिचारग्रहाभावविशिष्टसहचारग्रहः कारणमित्येवं[३] विशिष्टे कारणत्वस्वी-कारस्तु न युक्तः, विशेष्यविशेषणभावे विनिगमकानुपलब्ध्या वैपरीत्यस्यापि सम्भवेन गुरुतरकार्यकारणभावद्वयाङ्गीकारापत्तेः । व्यभिचारग्रहाभावो नाम संशय-निश्चयसाधारणव्यभिचारज्ञानत्वावच्छिन्नप्रतियोगिताकाभावः, सहचारग्रहश्च हेतुविशेष्यकसाध्यसामानाधिकरण्यप्रकारकनिश्चयः । उभयस्यास्य व्याप्ति-निश्चये स्वातन्त्र्येण कारणत्वं मन्यते । व्यभिचारग्रहाभावस्यास्य व्याप्तिनिश्चयं प्रति प्रतिबन्धकाभावमुद्रया कारणत्वम्, व्यभिचारग्रहस्य व्याप्तिग्रहं प्रति ग्राह्या-भावावगाहित्वेन प्रतिबन्धकत्वस्य स्फुटत्वात् ।

अयमाशयः—व्याप्तिः यदि साध्याभाववदवृत्तित्वादिरूपा तदा व्यभिचारः साध्याभाववद्वृत्तित्वरूपो यदि हि प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ता-भावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणवृत्तिहेतुताव

---

१. (क) विधिस्तु यत्र धूमस्तत्राग्निरग्न्यभावे धूमोऽपि न भवतीति । प्र० श० भा०, पृ० ४९१
(ख) यथोक्तमपि लिङ्गमगृहीतव्याप्तिकस्य ग्रहणोऽपि वा विस्मृतव्याप्तिकस्य न गमकमत आह विधिस्त्विति । अविनाभावग्रहणप्रकारस्त्वित्यर्थः अनेन भूयोदर्शन-सहकृतान्वयव्यतिरेकावेव तद्ग्रहणोपाय इति सूचितम् । प्रशस्त० टि० पृ० १०२

२. व्यभिचारज्ञानविरहसहकृतेति । व्यभिचारज्ञानविरहस्य सहचारज्ञानस्य चेत्यर्थः । त० सं० दी० नृसिंह प्र०, पृ० २६१-२६२

३. अत्रोच्यते । व्यभिचारज्ञानविरहसहकृतसहचारदर्शनं व्याप्तिग्राहकम् । चि० पृ० १८७

च्छेदकरूपा तदा प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वं साध्यतावच्छेदके व्यभिचारः, तेन च व्याप्तिनिश्चयस्य व्यभिचाराभावनिश्चयात्मकतया व्यभिचाराभावो ग्राह्यः परं यदि हि व्याप्तिनिश्चयादर्वाग्व्यभिचारसंशयो निश्चयो वा स्यात् तदा ग्राह्यसंशयास्यापि प्रत्यक्षप्रतिबन्धकतायाः सकलतान्त्रिकसिद्धत्वेन व्यभिचारग्रहस्यास्य, व्याप्तिनिश्चयेन ग्राह्यो यो व्यभिचाराभावस्तदभावावगाहितया प्रतिबन्धकत्वेन तदभावस्य प्रतिबन्धकाभावविधया व्यभिचाराभावनिश्चयात्मकव्याप्तिनिश्चयं प्रति कारणत्वं निरपवादमेव।[1]सहचारग्रहश्चान्वयव्यतिरेकविधया व्याप्तिनिश्चयं[2] प्रति कारणम्, साध्यहेत्वोः सहचारनिश्चयसत्त्वे व्याप्तिनिश्चयसत्त्वम्, तयोः सहचारनिश्चयाभावे व्याप्तिनिश्चयाभाव इत्यन्वयव्यतिरेकसहचारस्योपलम्भात्। केचन सहचारनिश्चयस्य व्याप्तिनिश्चयं प्रति विशेषणज्ञानमर्यादया कारणत्वमभिप्रयन्ति, परं तथा सति व्याप्तिशरीरे व्यभिचारस्यापि निविष्टतया तज्ज्ञानस्यापि व्याप्तिनिश्चयं प्रति कारणत्वस्य वक्तव्यतापत्तिरतस्तदुपेक्षणीयमिति बहूनामभिमतम्।

नव्यास्तु सिद्धान्तव्याप्तिशरीरे साध्यसहचारस्य विशेषणविधया नियमेन निविष्टतया विशेषणज्ञानविधयैव तस्य व्याप्तिनिश्चयं प्रति हेतुत्वम्, अन्यविधहेतुताग्राहकत्वेन अभिमतस्य अन्वयव्यतिरेकादेः प्रकृते हेतुताग्राहकत्वे प्रमाणाभावात्। सत्यपि विशेषणत्वतुल्यत्वे व्यभिचारज्ञानादेः व्याप्तिनिश्चयं प्रति कारणत्वोक्त्यभावस्तु स्वतन्त्रेच्छस्य मुनेः नियोगपर्यनुयोगानर्हत्वन्यायेन[3] न दोषायेति वदन्ति।

नन्वेवं स्वयमेव भूयोदर्शनेन यत्र-यत्र धूमस्तत्र-तत्राग्निरिति महानसादौ[4]व्याप्तिं गृहीत्वा इति तर्कसङ्ग्रहेऽन्नम्भट्टस्य भूयो दर्शनस्य व्याप्तिनिश्चयं प्रति हेतुत्वकथनासङ्गतिरिति वाच्यम्, तर्कसङ्ग्रहस्यैव स्वकृतदीपिकाटीकायां व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात्[5]इति ग्रन्थेन भूयो

१. टि० १ क, ख पृ० १८ अवलोकनीया।
२. विधिस्तु यत्र धूमस्तत्राग्निरग्न्यभावे धूमोऽपि न भवतीत्येवं प्रसिद्धसमयस्यासन्दिग्धधूमदर्शनात् साहचर्यानुस्मरणात् तदनन्तरमग्न्यध्यवसायो भवतीति। प्रशस्त० भा० पृ० ४९१
३. स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वादिति। न्या० सि० मु० पृ० ५५
४. त० सं० पृ० ७२,
५. त० सं० दी० पृ० २६१-२६२

दर्शनस्य व्याप्त्यवधारणकारणत्वखण्डनपुरस्सरं व्यभिचारज्ञानाभावसहकृतसहचारनिश्चयस्य व्याप्त्यवधारणं प्रति कारणत्वप्रतिपादनेन तर्कसङ्ग्रहमूलस्थस्य भूयोदर्शनपदस्य व्यभिचारज्ञानविरहसहकृतसहचारज्ञाने लाक्षणिकत्वस्वीकारेण ग्रन्थासङ्गतिनिराससम्भवात् । व्यभिचारज्ञानविरहस्य व्याप्तिप्रत्यक्षे प्रतिबन्धकाभावमुद्रया कारणत्वस्वीकारे, व्यभिचारज्ञानस्य निर्णयत्वेन प्रतिबन्धकत्वं संशयत्वेन वेत्यनुयोगे निर्णयत्वेन तदिति कथनं न युक्तम्, व्यभिचारसंशयसत्वे व्याप्त्यवधारणापत्तेः । न च इष्टापत्तिः, ग्राह्यसंशयस्य प्रत्यक्षप्रतिबन्धकतायाः सकलदार्शनिकसम्प्रदायमतसिद्धत्वात् ।[1]नापि व्यभिचारसंशयत्वेन व्याप्तिनिश्चयप्रतिबन्धकत्वं व्यभिचारनिश्चयकाले व्याप्तिनिश्चयापत्तेरिति विकल्पप्रसरस्तु संशयनिश्चयसाधारणत्वेन व्यभिचारज्ञानस्य प्रतिबन्धकत्वमभ्युपेत्य निरसनीयः ।[2]

व्यभिचारज्ञानविरहावधारणप्रकारः

व्यभिचारज्ञानविरहो नाम व्यभिचारज्ञानत्वावच्छिन्नप्रतियोगिताकाभाव एव, स च व्याप्तिनिश्चयात् पूर्वं कथं निश्चेतव्य इति प्रश्नस्तु व्यभिचारज्ञानोत्पादकसामग्रीसमवधानस्थले स तर्कप्रयोज्य इति समाधानेन निरसनीयः ।

तथाहि वह्निसाध्यकधूमहेतुकस्थले धूमे वह्निनिरूपितव्याप्तिनिश्चयं प्रति तस्मिन् वह्निव्यभिचारित्वज्ञानाभावोऽवश्यमपेक्षितः, परं वह्निमतां धूमवतां च समेषां प्रदेशानां प्रत्यक्षासम्भवेन, धूमो वह्निव्यभिचारी नवेति व्यभिचार आशङ्कितुं शक्यते, स च 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यात्' इत्याकारककार्यकारणभावभङ्गप्रसङ्गलक्षणतर्केण[3]वह्निजन्यत्वाभावापाद्यककेन निवर्तते ; यद्यपि प्रतिबध्याभाव एव प्रतिबन्धकप्रयोज्यत्वस्य दृष्टत्वात्, व्यभिचारज्ञानं प्रति तर्कस्यास्य ग्राह्याभावाद्यनवगाहित्वेनाप्रतिबन्धकत्वाद् धूमविशेष्यकवह्न्यादिव्यभिचारज्ञानत्वावच्छिन्नाभावप्रयोजकत्वं तस्य कथमिति शङ्का जायते, परं सा कामनीज्ञानान्य-

---

१. न चेष्टापत्तिः ग्राह्यसंशयस्य प्रत्यक्षप्रतिबन्धकतायाः सकलतान्त्रिकसिद्धत्वात् । त० सं० दी० नृसिं० प्र०, पृ० २६२

२. ज्ञानं निश्चयः शङ्का च । सा च क्वचिदुपाधिसन्देहात् क्वचित् विशेषादर्शनसहितसाधारणधर्मदर्शनात् तद्विरहश्च क्वचित् विपक्षबाधकतर्कात् क्वचित् स्वतस्सिद्ध एव । चि० पृ० १८७

३. तर्कश्च सर्वशङ्कानिराकरणपटीयान् विजयत इति ।—न्या० सू० भा० वा० टी० प० पृ० ३३६

कार्यं प्रति कामनीजिज्ञासाया[१] इव व्यभिचारज्ञानेऽनिष्टप्रसञ्जनात्मकतर्कस्याप्यनुभवानुरोधेन मणिमन्त्रादिवत् प्रतिबन्धकत्वस्वीकारपुरस्सरं निरवकाशतां नेया। यत्र तु व्यभिचारज्ञानोत्पादकसामग्र्यभावस्तत्र व्यभिचारज्ञानत्वावच्छिन्नप्रतियोगिताकाभावः स्वसामग्रीविरहप्रयोज्य एव भवतीत्यवसेयम्।

ननु महानसे व्याप्तिनिश्चयसमकालं धूमसामान्ये व्याप्तिनिश्चये सत्येव पर्वते वह्न्यनुमितेः पूर्वं वह्निव्याप्यो धूम इति स्मरणं, वह्निव्याप्यधूमवान् पर्वत इति परामर्शश्च सम्भवतः, परं न सम्भवतीदम् महानसे व्याप्तिप्रत्यक्षवेलायां धूमान्तरस्यासन्निकर्षात्। तथा सति व्याप्तिनिश्चयात्मककार्यस्यैवाप्रसिद्ध्या, सम्प्रति भूयोदर्शनस्य कारणत्वखण्डनपुरस्सरं व्यभिचारज्ञानाभावसहचारज्ञानयोः कारणत्वप्रतिपादनं शशश्रृङ्गप्रत्यक्षकारणचिन्तनसदृशमित्याक्षेपस्तु, सामान्यलक्षणप्रत्यासत्या महानसे व्याप्तिप्रत्यक्षसमकालमेव सकलवह्निधूमज्ञानसम्भवेन[२] निरसनीयः।

सामान्यलक्षणाप्रत्यासत्तिश्च प्राचीनमते इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारताविशिष्टधूमत्ववह्नित्वाद्यात्मकसामान्यमेव। नवीनमते तु धूमत्ववह्नित्वादिरूपं यत् सामान्यं तद्विषयकज्ञानमित्यन्यत्र[३] विस्तरः।

---

१. (क) कामिनीज्ञानान्यज्ञानत्वावच्छिन्नं प्रति कामिनीजिज्ञासायाः प्रतिबन्धकतया तदभावस्य कार्यमात्रं प्रति कारणत्वेन।..... चि० दी० गा० ब० पृ० १७
(ख) तदन्यमात्रलिङ्गकानुमितीच्छा कामिनीजिज्ञासादिवत् पृथक् प्रतिबन्धिका। चि० दी० पृ० ७७

२. (क) व्याप्तिग्रहश्च सामान्यलक्षणाप्रत्यासत्या सकलधूमादिविषयकः, कथमन्यथा पर्वतीयधूमे व्याप्त्यग्रहे तस्मादनुमितिः, चि० पृ० २५३-२५४
(ख) व्याप्तिग्रहश्चेति महानसादौ जायमानो धूमत्वरूपेण सन्निकृष्टधूमे वह्नित्वरूपेण सन्निकृष्टवह्नेर्व्याप्तिसाक्षात्कारश्चेत्यर्थः। सामान्यलक्षणाप्रत्यासत्येति, धूमत्ववह्नित्वसामानाधिकरण्यत्वरूपसामान्यलक्षणाप्रत्यासत्येत्यर्थः, सकलधूमादिति, आदिपदात् सकलवह्निधूमवृत्तिसकलतत्सामानाधिकरण्यपरिग्रहः। चि० रह०, पृ० २५३

३. (क) सा च इन्द्रियसम्बद्धविशेषणता अतिरिक्तैव वा। चि० पृ० २५५
(ख) तथा च सामान्यं लक्षणं निरूपकं यस्या इति व्युत्पत्या चक्षुरादिजन्यज्ञानप्रकारीभूतधूमत्वादिसामान्यनिरूपिता धर्मिताख्यविशेषणतैव सामान्यलक्षणा, सा चाभावादिग्राहकचक्षुस्संयुक्तविशेषणतादिवद्विशेषणताप्रत्यासत्यन्तर्गतैव। चि० रह० पृ० २५४
(ग) अतिरिक्तैव वेति, संयोगादिलक्षणप्रत्यासत्तिघटकादतिरिक्तैव वेत्यर्थः तच्चातिरिक्तं धूमत्वादिरूपसामान्यप्रकारकज्ञानमात्रम्। चि० रह०, पृ० २५९

अनुमानात्मकव्याप्तिज्ञानस्य स्वार्थपरार्थभेदेन द्वैविध्यम्

व्याप्तिज्ञानात्मकं चेदमनुमानं स्वार्थपरार्थभेदेन द्विविधम् ।[१]तदेव हि स्वार्थानुमानम् येन साध्यानुमितिरनुमातुरेव भवति । तथाहि—यः पुरुषो महानसादिषु बहुषु स्थानेषु वह्न्यधिकरणवृत्तित्वरूपं सहचारं धूमेऽवलोक्य तत्र वह्निनिरूपितां व्याप्तिं निश्चिनोति, स एव कदाचित् पर्वतमुपगतः, तत्र च वह्निरस्ति नवेति सन्दिहानः, पर्वतवर्तिनीमविच्छिन्नमूलामभ्रंल्लिहां धूमलेखां पश्यति तेन च धूमे पूर्वं गृहीताया वह्निव्याप्तेः संस्कारस्तस्यात्मन्युद्बुद्धो भवति, ततश्च यत्र-यत्र धूमस्तत्र-तत्राग्निरिति[२] धूमे वह्निनिरूपितां व्याप्तिं सः स्मरत्यनन्तरं च वह्निव्याप्यत्वेन रूपेण पर्वते तस्य धूमदर्शनं जायते । दर्शनस्यास्य महिम्ना सः पर्वते वह्निमनुमिनोति, अनया दिशा साध्यानुमितिरियं तस्यैव पुरुषस्य जायते यस्य साध्यव्याप्तहेतुनिश्चयरूपं व्याप्तिनिश्चयात्मकमनुमानं पक्षे जातम् । अत एवेदमनुमानं स्वार्थानुमानम् स्वार्थं नाम स्वप्रतिपत्तिः ।[३]

यदा हि कश्चन पुरुषः स्वयं पर्वते धूमाद् वह्निमनुमाय पुरुषान्तरं तमेवानुमितं वह्निं पर्वते बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तदा तस्य पञ्चावयववाक्यस्य प्रयोगेण तस्मिन् पुरुषान्तरे यद् व्याप्तिनिश्चयात्मकमनुमानमुदेति तत् परार्थानुमानम् । यथाहि, पर्वतो वह्निमान्, धूमवत्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसम्, तथा चायम् (यथा महानसं वह्निव्याप्यधूमवत् तथैव पर्वतोऽपि वह्निव्याप्यधूमवान्), तस्मात्तथा (वह्निव्याप्यधूमवत्वात् पर्वतो वह्निमान्) इत्येवं विधेषु पञ्चवाक्येषु प्रयुक्तेषु सत्सु श्रोतुस्तेषां वाक्यानामर्थप्रतिपत्तिद्वारा वह्निव्याप्यो धूम इत्येवं व्याप्तिनिश्चयात्मको मानसबोधो[४] जायते । अयमेव बोधः परार्थानुमानमित्युच्यते ।

---

१. (क) तच्चानुमानं परार्थं न्यायसाध्यम् । चि० पृ० ५४०
(ख) स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति । चि० पृ० ८७

२. टि० १, पृ० १० अवलोकनीया ।

३. (क) स्वप्रयोजनं च स्वस्यानुमेयपदार्थप्रतिपत्तिः । त० सं० सि० चं० पृ० ७२
(ख) स्वार्थं स्वानुमिति हेतुः । त० सं० पृ०७२

४. (क) प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते । तेन च विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्थाप्यते तेन च चरमः परामर्श उत्पाद्यते । चि० पृ०

अनेन परार्थानुमानेन वह्निव्याप्यधूमवान् पर्वत इत्येवं मानसपरामर्शं पूर्वोक्त-वाक्यपञ्चकजन्यबोधमहिम्ना जायमानं द्वारीकृत्य श्रोतुर्वह्न्यनुमितिस्तथैवोत्पद्यते यथेमानि पञ्चवाक्यानि प्रयुञ्जानः पुरुष एतद् वाक्यपञ्चकप्रयोगादर्वागेव कदाचित् स्वव्युत्पत्तिबलेन पर्वते वह्निव्याप्यधूमस्य निश्चयात्मकज्ञानरूपं यत् स्वार्थानुमानं तत् स्वात्मन्युत्पाद्य पर्वते वह्निमनुमिनोति।

इदं परार्थानुमानं येषां पञ्चवाक्यानामर्थप्रतिपत्तिपुरस्सरं श्रोतुरात्मन्युदेति तस्यैव वाक्यपञ्चकस्य समूहो न्यायवैशेषिकदर्शनयोः न्यायशब्देन[1] व्यवह्रियते। अस्य समूहस्यैकैकं वाक्यं न्यायावयव[2] इत्युच्यते। तत्र प्रथमं वाक्यम् प्रतिज्ञा। अनेन पक्षे साध्यसम्बन्धो बोध्यते। द्वितीयं वाक्यम्, हेतुः। एतेन हेतौ साध्यज्ञापकता बोध्यते। तृतीयं वाक्यम्-उदाहरणम्। इदञ्च हेतौ साध्यनिरूपितव्याप्त्यवगमाय प्रयुज्यते। चतुर्थं वाक्यमुपनयनाम्नाव्यपदिश्यमानं पक्षे साध्यव्याप्यस्य हेतोः सम्बन्धं बोधयति। अयमेव सम्बन्धः पक्षधर्मताशब्देन न्यायवैशेषिकदर्शनविद्भिर्व्यपदिश्यते। पञ्चमं च वाक्यं निगमनमिति प्रसिद्धम्[3] व्याप्ये पक्षधर्मे च हेतावबाधितत्वासत्प्रतिपक्षितत्वयोः बोधनपुरस्सरं पक्षे साध्यसम्बन्धं ज्ञापयति।

॥ इति तृतीयं प्रकरणम् ॥

५४०-५४४
(ख) विशिष्टवैशिष्ट्यावगाहिमानान्तरम्। विशिष्टवैशिष्ट्यबोधात्मकपरामर्शजनकं मनः। उत्थाप्यते। स्वात्मकसहकारि सम्पन्नीक्रियते। तेन तथाविधेन मनसा, परामर्श उत्पाद्यते। चि० दी० गा० पृ० २५

१. अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः। उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम्। चि० दी० पृ० २८

२. (क) अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वमवयवत्वम्। चि० पृ० ४३
(ख) अवयवत्वं तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्। चि० दी० पृ० ४३

३. (क) तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि निरूप्यन्ते। चि० पृ० १
(ख) पर्वतो वह्निमानिति प्रतिज्ञा, धूमवत्त्वादिति हेतुः यो यो धूमवान् सोऽग्निमान् यथा महानसम् इत्युदाहरणम्, तथा चायमित्युपनयः तस्मात्तथेति निगमनम्। त० सं० पृ० ७४

उत्तरो भागः

व्याप्तिसप्तकविमर्शः

प्रथमं प्रकरणम्

साध्याभाववदवृत्तित्वमिति

प्रथमव्याप्तिविमर्शः

न्यायशास्त्रं साहचर्यनियमरूपा व्याप्तिश्च

साम्प्रतं न्यायदर्शनदिशा साहचर्यनियमरूपं व्याप्तिसप्तकमधिकृत्य यथामति विस्तृतं विशिष्टञ्च किञ्चित् प्रस्तूयते—

न्यायदर्शनमिदं न्यायस्य दर्शनम्। न्यायो नाम वात्स्यायनदिशा 'प्रमाणैः अर्थपरीक्षणम्।'[१] स च यद्यपि सर्वेष्वपि दर्शनेषु लभ्यते तथापि न्यायदर्शनमिति नाम्नाऽक्षपाददर्शनमेव व्यपदिश्यत इत्यत्र मुख्यं कारणं दर्शनेऽस्मिन् हेतुविद्या, तर्कशास्त्रम्, अनुमानशास्त्रम्, इत्यादिपदैः विशेषतो व्यवह्नियमाणे परार्थानुमानसम्पत्तयेऽवश्यमपेक्षणीयस्य तस्य न्यायस्यानितरसाधारणं विशेषचिन्तनम्, यो न्यायो वात्स्यायनदिशा परमन्याय इति शब्देनाभिधीयमान उपरितनन्यायमपेक्ष्योत्कर्षविशेषं भजते। न्यायशब्दश्चायं तं वाक्यसमूहमभिधत्ते यस्य प्रयोगपुरस्सरं पुरुषान्तरस्यानुमित्यात्मको बोधः कार्यते। अस्य पञ्चवाक्यसमूहात्मकस्योत्कृष्टस्य न्यायस्य तत्त्वनिर्णये नितरामपेक्षिततयाऽस्ति महत्त्वातिशयः। यथा च—

वात्स्यायनः—सोऽयं परमो न्याय इति। एतेन वादजल्पवितण्डाः प्रवर्तन्ते[२] नातोऽन्यथेति तदाश्रया च तत्त्वव्यवस्था इति।

---

१. कः पुनरयं न्यायः? प्रमाणैरर्थपरीक्षणम्। न्या० सू० भा०, पृ० ३

२. न्या० सू० भा०, पृ० ४

न्यायश्चायं साहचर्यनियममधिकृत्यैव प्रवर्तते़ऽतः साहचर्यनियममधिकृत्य सिद्धान्तभूतं सूक्ष्मं विवेचनं पूर्वोत्तरपक्षाभ्यां न्यायदर्शन एव पर्याप्तं लभ्यते तदेव सिद्धान्तभूतश्च । दर्शनान्तरेष्वपि प्रायः साहचर्यनियममधिकृत्य प्रवृत्ताः सर्वा अपि विचारपरम्परा न्यायदर्शनस्य साहचर्यनियमविचारप्रणालीं मूलतः स्वीकृत्यैव परिष्कारोन्मुखा दृश्यन्ते । अत एव न्यायदर्शनस्य साहचर्यनियमस्वरूपव्याप्ति सप्तकविषयको विचारः पर्याप्तं विकासमापन्नस्तत्त्वान्वेषिणां नितरां स्पृहणीयो बुद्धिवैशद्यस्यानितरसाधारणं सामर्थ्यमादधानश्च मया ग्रन्थस्यास्यान्तिमभागे सङ्गृह्यते ।

साहचर्यनियम एव व्याप्तिरिति प्रागेव प्रदर्शितम् । साहचर्यस्यान्वयव्यतिरेकभेदेन द्विविधतया यत्र-यत्र हेतुस्तत्र-तत्र साध्यं यत्र-यत्र साध्याभावस्तत्र-तत्र हेत्वभाव, इत्येवं द्विधा साहचर्यनिमयः स्वीक्रियते । परं द्विविधस्याप्यस्य साहचर्यनियमस्याऽसर्वज्ञदुर्ज्ञेयत्वं निर्विवादम् । यत्र साध्यहेतूनां नानाव्यक्तीनां विभिन्नेष्वधिकरणेषु विभिन्नेषु कालेषु विद्यमानानां साध्यहेतुभावस्तत्रानयोरन्वयतिरेकसह चारयोरल्पज्ञैः साक्षात्कर्तुमशक्यत्वात् । अतः साहचर्यनियमोऽयं हेतुनिष्ठः, साध्यनिरूपितव्यभिचाराभाव एव पर्यवस्यतीति दृढीकृत्य व्यभिचाराभाव एव व्याप्तिरिति प्रमाणतत्त्वविदः केचन निरूपयन्ति ।

व्यभिचाराभावो नामाऽव्यभिचरितत्वम्, तदिदं किमिति विशेषजिज्ञासायां यतोऽव्यभिचरितत्वमिदमुभयोरप्यन्वयव्यतिरेकसहचारयोः सङ्ग्राहकमतः द्विधापरिष्क्रियते ।

तत्राव्यभिचरितत्वस्य प्रथमः परिष्कारश्चतुर्विधः साध्याभाववदवृत्तित्वम्[१] साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्,[२] साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्[३] साध्यवदन्यावृत्तित्वमिति,[४] द्वितीयश्च एकविधः—सकलसाध्याभावन्निष्ठाभावप्रतियोगित्वमिति ।[५] एवं विधान्यव्यभिचरितत्वानि न भवन्त्यसर्वज्ञदुर्ज्ञेयानीति लक्षणव्याख्यानसमन्वयाभ्यामनुपदमेव स्फुटीभविष्यति ।

---

१. तद्धि न साध्याभाववदवृत्तित्वम् । चि० पृ० ४२

२. साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्, चि० पृ० ४२

३. साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्, चि० पृ० ४२-४४

४. सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् । चि० पृ० ४४

५. साध्यवदन्यावृत्तित्वं वा, चि० पृ० ४४

तत्रान्वयसहचारमुखेन परिष्कृतं प्रथममव्यभिचरितत्वं साध्याभाववदवृत्तित्वात्मकं साम्प्रतं सङ्क्षेपेण पर्यालोच्यते ।

साध्याभाववदवृत्तित्वमिति प्रथमव्याप्तिविवरणम्

साध्याभाववदवृत्तित्वमित्यत्र साध्याभाववतो न वृत्तिर्यत्रेति त्रिपदव्यधिकरणबहुव्रीहिसमासः, तेन च साध्याभाववदवृत्तिरिति निष्पद्यते । अनन्तरं साध्याभाववदवृत्तेः भावं बोधयितुं तद्धितीये त्वप्रत्यये सति साध्याभाववदवृत्तित्वमिति लक्षणवाक्यं व्युत्पन्नं भवति । अस्य लक्षणवाक्यस्य व्युत्पत्तयेऽनुपदं प्रदर्शितबहुव्रीहिसमासघटकं साध्याभाववत् पदं साध्याभावाधिकरणपरम्, साध्याभावोऽस्त्यस्मिन्नित्यर्थे तद्धितीयवतिप्रत्ययविधानात् । तदुत्तरं विद्यमानायाः षष्ठ्या निरूपितत्वमर्थः, तस्य च षष्ठीविभक्तेरुत्तरं विद्यमानवृत्तिपदार्थवृत्तितायां स्वरूपसम्बन्धेनान्वयः वृत्तितायाश्च बहुव्रीहिसमासघटकनञ्पदार्थेऽभावेऽन्वयः । एवं च साध्याभावाधिकरणनिरूपितवृत्तित्वाभाववानित्यर्थः, साध्याभाववदवृत्तिरिति समस्तस्य वाक्यस्य पर्यवस्यति । अनन्तरं च साध्याभाववदवृत्तिपदोत्तरं भावार्थकत्वप्रत्ययसत्त्वेन साध्याभावाधिकरणनिरूपितवृत्तित्वाभाववतो भावबोधनात् साध्याभावाधिकरणनिरूपितवृत्तित्वाभाववत्त्वं व्याप्तिः (अव्यभिचरितत्वम्) इति लक्षणवाक्यार्थ उपपद्यते । साध्याभावाधिकरणनिरूपितवृत्तित्वाभाववत्त्वं साध्याभावाधिकरणनिरूपितवृत्तित्वाभाव एवेति मन्तव्यम् । प्रकृतिजन्यबोधे प्रकारीभूतो[1] भाव इति व्युत्पत्तेः । एतेन हि साहचर्यनियमः साध्याभावाधिकरणनिरूपितवृत्तित्वाभावपरः इत्यभ्युपेयम् । एतादृशवृत्तित्वाभावश्च व्याप्तिपदेनाभिधीयमानो हेतौ तिष्ठति चेत् हेतुः साध्यनिरूपितव्याप्तिमान् साध्यव्याप्यो वाऽभिधीयते । तेन च साध्यव्याप्येन हेतुना व्यापकस्य साध्यस्यानुमितिः पक्षे सुकरेति स्पष्टम् । इयमेतादृशवृत्तित्वाभावरूपा व्याप्तिः नाऽसर्वज्ञदुर्ज्ञेया साध्याभावस्य यथाज्ञानं यत्र कुत्राप्येकस्मिन्नधिकरणे हेतोः वृत्तित्वे ज्ञाते तस्मिन् साध्यनिरूपिते साहचर्यनियमो नास्तीति निर्धारणस्य सुशकत्वात् । यदि हि साध्याभावस्य यावन्त्यधिकरणानि ज्ञायन्ते तत्र सर्वत्र हेतुः नास्तीत्यवधार्यते तदा तत्र साहचर्यनियमरूपाया व्याप्तेः सुग्रहत्वं निराकुलम् ।

१. प्रकृतिजन्यबोधे यः प्रकारः, स भाव इत्युच्यते । मी० न्या० प्र०, पृ० १२

वृत्तित्वसामान्याभावनिरूपणम्

इदानीं लक्षणमिदं साध्याभावाधिकरणनिरूपितवृत्तित्वाभावात्मकं सङ्क्षेपेण सरलदिशा यथामति निरूप्यते। एतल्लक्षणानुसारमभाव एव व्याप्तिः। कस्याऽभावो व्याप्तिरिति प्रश्ने वृत्तितायाः (आधेयतायाः) अभाव इत्युत्तरं, वृत्तिता हि नियमेनाधिकरणनिरूपितैव भवतीति वृत्तितेयमधिकरणनिरूपिता गृह्यते। अनन्तरं कस्याऽधिकरणमिति जिज्ञासायामभावस्याधिकरणमिति समाधानम्। अभावश्च कस्येति प्रतियोगिन आकाङ्क्षायां साध्यस्येति वक्तव्यतया साध्यस्य योऽभावस्तस्य यदधिकरणं तन्निरूपिता या वृत्तिता तस्याः वृत्तितायाः (आधेयतायाः) अभाव एव व्याप्तिरिति। एवं लक्षणार्थस्य स्पष्टतया साध्याभावाधिकरणनिरूपितवृत्तित्वप्रतियोगिकोऽभाव एव व्याप्तिरिति प्रतीयते।

परं सत्येवं पर्वतपक्षकधूमसाध्यकवह्निहेतुके पर्वतः, धूमवान्, वह्नेरित्यसद्धेतुकस्थले लक्षणस्यास्य भवत्यतिव्याप्तिः। स्थलमिदमसद्धेतुकमिति निर्विवादम्, संयोगेन वह्निमति अयोगोलके संयोगेन धूमस्याविद्यमानतया यत्र-यत्र वह्निस्तत्र-तत्र धूम इति साहचर्यनियमाभावात्। अतिव्याप्तिश्च लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमिति[1] दिशा यदिदं व्याप्तिलक्षणं सद्धेतुमात्रलक्ष्यकमलक्ष्येऽसद्धेतावपि समन्वेति तर्हि भवत्येवास्मिन्नतिव्याप्तिः। असद्धेतावस्मिन् वह्नौ कथं लक्षणस्यास्य समन्वयो भवति येनेदं लक्षणमतिव्याप्तिदोषग्रस्तमिति जिज्ञासायाः निवृत्तिप्रकारोऽयम्—

साध्याभावाधिकरणनिरूपितवृत्तित्वप्रतियोगिकोऽभावो व्याप्तिरिति लक्षणम्। इदञ्च साध्यनिरूपितव्याप्तिमतां सद्धेतूनां तटस्थलक्षणम्। तदेव हि तटस्थलक्षणं[2] यत् यावल्लक्ष्यकालानवस्थायि सद् व्यावर्तकं व्यवहारप्रयोजकं वा। तथा च व्याप्तिलक्षणमिदं स्वरूपं सद् व्यावर्तकमिति[3]स्वरूपलक्षणलक्षणानुसारं व्याप्तेः स्वरूपलक्षणं सदपि सद्धेतूनां तटस्थलक्षणमेव, असद्धेतुभ्यः सद्धेतूनां व्यावृत्तौ

---

१. (क) अलक्ष्यवृत्तित्वमतिव्याप्तिः। त० सं० दी० पृ० १९

(ख) अलक्ष्यवृत्तित्वमिति, लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वमित्यर्थः। लक्ष्यतावच्छेदकसमानाधिकरणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यमिति यावत्। त० सं० वि० गं०, पृ० १९-२०

२. तटस्थलक्षणं तु यावल्लक्ष्यकालमनवस्थायित्वे सति तद्व्यावर्तकं तदेव। वे० प० पृ० १५९

३. स्वरूपान्तर्गतत्वे सति व्यावर्तकं स्वरूपलक्षणम्। सर्व० सं०, पृ० ६६

सद्धेतुत्वव्यवहारे च व्याप्तेः प्रयोजकत्वात्। एवं सतीदं लक्षणं सद्धेतुषु सर्वेषु यदि समन्वेत्यसद्धेतुषु च सर्वेषु न समन्वेति तदाऽव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रय-शून्यतयोपादीयते[१], परं प्रकृते पर्वतो वह्निमानित्यादिषु सद्धेतुकस्थलेषु धूमादिषु, साध्यस्य वह्नेः योऽभावस्तस्याधिकरणं ह्रदः, तन्निरूपिता वृत्तिता (वह्न्यभावाधि-करणह्रदनिरूपिता वृत्तिता) मीनशैवालनौकादौ प्रसिद्धा तत्प्रतियोगिकस्य वह्न्यभा-वाधिकरणह्रदनिरूपितवृत्तित्वाभावस्य व्याप्तिरूपेणेष्टस्य सत्त्वेनाव्याप्त्यसम्भवौ तु निरस्तौ भवतः, परमनुपदं प्रदर्शिते धूमसाध्यकवह्निहेतुकस्थले साध्यो धूमः, तद-भावो धूमाभावः, तस्याधिकरणं ह्रदः, तन्निरूपिता वृत्तिता मीनादौ प्रसिद्धा, तत्प्रतियोगिकस्याभावस्य धूमाभावाधिकरणह्रदनिरूपितवृत्तित्वाभावात्मक-स्यासद्धेतौ वह्नौ विद्यमानतयाऽतिव्याप्तिरस्त्येव। इमामतिव्याप्तिं परिहर्तुं यदि साध्याभावाधिकरणनिरूपितवृत्तितात्वव्यापकप्रतियोगिताकोऽभावो व्याप्तिरिति-मन्यते तदा यद्यपि धूमाभावाधिकरणं यथा ह्रदस्तथैवायोगोलकमपि। तेन च धूमाभावाधिकरणनिरूपितवृत्तितात्वस्य अयोगोलकनिरूपितवाय्वादिनिष्ठवृ-त्तित्वेऽपि सत्वेन तत्र धूमाभावाधिकरणजलह्रदनिरूपितवृत्तित्वाभावीयप्रतियोगि-ताया असत्वादुक्ताभावमादाय नातिव्याप्तिः सम्भवति, तथापि धूमाभावाधिकरण-निरूपितवृत्तित्वजलत्वोभयत्वावच्छिन्नप्रतियोगिताकाभावस्य धूमाभावाधिकरण-निरुपितवृत्तितात्वव्यापकप्रतियोगिताकस्य 'एकसत्वेऽपि द्वयं[२]नास्तीति'ति दिशा सद्धेतौ वह्नौ जलत्वस्याऽसत्त्वेन विद्यमानतयाऽतिव्याप्तिस्तदवस्थैव। यदि हि साध्याभावाधिकरणनिरूपितवृत्तितात्वव्यापिका वृत्तित्वमात्रनिष्ठा या प्रतियोगिता तन्निरूपकोऽभावो व्याप्तिरिति लक्षणं निरुच्यते तेन च उभयाभावस्यास्य जलत्व-निष्ठप्रतियोगिताकस्य वृत्तित्वमात्रनिष्ठप्रतियोगिताकत्वाभावेन व्याप्तिस्वरूपाना-त्मकतया वह्नौ विद्यमानत्वेऽपि लक्षणेऽस्मिन् नातिव्याप्तिरिति स्वीक्रियते, तदापि धूमाभावाधिकरणह्रदनिरूपितवृत्तित्व, धूमाभावाधिकरणह्रदान्यनिरूपितवृत्तित्वो-भयाभावमादाय तत्रैव वह्नावतिव्याप्तेस्तादवस्थ्यं दुर्निवारम्, अभावस्यास्य, तादृश-वृत्तितात्वव्यापकवृत्तित्वमात्रनिष्ठप्रतियोगिताकस्य वह्नावेकसत्त्वेऽपि द्वयं नास्तीति दिशा धूमाभावाधिकरणह्रदान्यनिरूपितवृत्तित्वस्य वह्नौ सत्त्वेऽप्यक्षतत्वात्। अतः

---

१. एतद्दूषणत्रयरहितो धर्मो लक्षणम्। तं० सं० दी०, पृ० १२१

२. 'एकसत्त्वेऽपि द्वौ न स्तः' इति प्रतीत्या द्वित्वावच्छिन्नाभावः। त० सं० दी० पृ० ३९०

साध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्तादृशवृत्तित्वसामान्याभावरूपेणैव परिष्कार्यः। सामान्याभावश्च साध्याभावाधिकरणनिरूपितवृत्तित्वत्वावच्छिन्न-तादृशवृत्तित्वत्वातिरिक्तधर्मानवच्छिन्नप्रतियोगिताकाभावरूपो बोध्यस्तेन हि धूमाभावाधिकरणजलह्रदनिरूपितवृत्तित्वाभावो धूमसाध्यकवह्निहेतुकस्थले न व्याप्तिस्तस्य धूमाभावाधिकरणनिरूपितवृत्तित्वत्वातिरिक्तजलह्रदनिरूपितत्वा-वच्छिन्नप्रतियोगिताकत्वेन तादृशवृत्तित्वसामान्याभावानात्मकत्वात्। नाऽपि तादृशवृत्तित्वजलत्वोभयत्वाच्छिन्नाभावस्य तथात्वम् तस्यापि साध्याभावाधि-करणनिरूपितवृत्तित्वत्वातिरिक्ततादृशजलत्वत्वोभयत्वावच्छिन्नप्रतियोगिता-कत्वात्। एवम् धूमाभावाधिकरणह्रदनिरूपितवृत्तित्व-तादृशह्रदान्यनिरूपितवृत्ति-त्वोभया- भावस्यापि न व्याप्तित्वम् तस्यापि धूमाभावाधिकरणनिरूपितवृत्तित्वत्वा-तिरिक्तह्रदनिरूपितत्वह्रदान्यनिरूपितत्व-उभयत्वरूपधर्मत्रयावच्छिन्नप्रतियोगि-ताकत्वेन वृत्तित्वसामान्याभावानात्मकत्वात्। वृत्तित्वसामान्याभावस्य निष्कृष्टार्थ-स्त्वयम्—साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नप्रति-योगित्वसम्बन्धावच्छिन्ना या साध्यनिष्ठावच्छेदकता तद्भिन्नासत्यभावत्वनिष्ठाव-च्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिता, निरुक्तावच्छेदकताद्वयनिरूपिता याऽभावनिष्ठावच्छेदकता, तद्भिन्ना सत्यधिकरणत्वनिष्ठावच्छेदकता भिन्ना याऽवच्छेदकता तदनिरूपिता, निरूक्तावच्छेदकताद्वयनिरूपिता याऽधिकरणनि-ष्ठावच्छेदकता तद्भिन्ना सति या वृत्तित्वत्वनिष्ठावच्छेदकताभिन्नावच्छेदकता तदनिरूपिता, या निरुक्तावच्छेदकताद्वयनिरूपिता वृत्तित्वनिष्ठा प्रतियोगिता तन्नि-रूपकोऽभाव इति।

एतेन ह्रदवृत्तित्वविशिष्टो यो धूमाभावस्तदधिकरणनिरूपितवृत्तित्वाभावस्य वह्नौ सत्त्वेऽपि धूमसाध्यकवह्निहेतुकस्थले नातिव्याप्तिः। साध्यनिष्ठावच्छेदकता-भिन्नाभावत्वनिष्ठाऽवच्छेदकताभिन्न-ह्रदवृत्तित्वनिष्ठावच्छेदकतयाऽभावनिष्ठा ऽवच्छेदकताया निरूपितत्वेन, तादृशाभावाधिकरणनिरूपितवृत्तित्वाभावात्मक-स्याभावस्यास्य वृत्तित्वसामान्याभावरूपत्वानभ्युपगमात्। नाऽपि पर्वतो वह्निमान् धूमादित्यत्र सद्धेतुकस्थले साध्यस्य वह्नेः समवायादिना योऽभावस्तदधिकरणपर्व-तादिनिरूपितवृत्तित्वस्यैव धूमे सत्त्वेनाऽव्याप्तिः, एतदभावीय-वृत्तित्वनिष्ठप्रतियो-गितायाः परम्परया निरूपिका या साध्यनिष्ठावच्छेदकता तस्याः समवायसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नतया, साध्यतावच्छेदकसंयो-गसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धानवच्छिन्नत्वादभावस्यास्य तादृशवृत्तित्व-

सामान्याभावानभ्युगमात् । अत्र साध्यनिष्ठावच्छेदकतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नत्वानिवेशेऽसम्भवस्तु न सम्भावनास्पदः पयस्त्वविशिष्टप्रमेयवान् स्थूलपयस्त्वादित्यादौ हेत्वधिकरणे स्थूलपयसि समवायेन संयोगेन कालिकेन च पयस्त्वविशिष्टप्रमेयस्य (पयसः) सत्त्वस्य निर्विवादतया केनाऽपि सम्बन्धेन साध्याभावस्य वक्तुमशक्यत्वात् । तस्मिन् हेतुमति कालोपाधौ, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकः साध्याभावः स्वरूपेण वर्तत इति तु दुराशामात्रं महाकाले[1] एव कस्यापि जन्यवस्तुनः कालिक-सम्बन्धेन भावाभावाभ्युपगमात्। न वा संयोगेन महानसीयवह्न्यभावं वह्निजलोभयाभावं वाऽऽदाय तादृशाभावाधिकरणपर्वतादिनिरूपितवृत्तित्वस्यैव धूमे सत्त्वेनाऽसम्भवः । द्विविधस्याप्यस्याभावस्य क्रमशः साध्यतावच्छेदकवह्नित्वातिरिक्तेन महानसीयत्वेन, जलत्वोभयत्वाभ्यां चावच्छिन्ना या प्रतियोगिता तादृशप्रतियोगित्वसम्बन्धावच्छिन्नसाध्यनिष्ठावच्छेदकतया परम्परया निरूपितवृत्तित्व- निष्ठप्रतियोगिताकत्वं स्पष्टम्, तथा च साध्यतावच्छेदकवह्नित्वमात्रावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नसाध्यनिष्ठावच्छेदकतया परम्परया निरूपितवृत्तित्वनिष्ठप्रतियोगिताकत्वाभावेनास्याभावस्य तादृशवृत्तित्वसामान्याभावत्वाभावात् । साध्यतावच्छेदकत्वस्य धर्मसंसर्गसाधारणतया साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नत्वमेव वृत्तित्वसामान्याभावीयसाध्यनिष्ठावच्छेदकतायां विवक्ष्यतां किं तादृशसंसर्गत्वेन तादृशसंसर्गावच्छिन्नत्वस्य तादृशधर्मत्वेन तादृशधर्मावच्छिन्नत्वस्य च प्रतियोगिताविशेषणत्वेनेत्याक्षेपस्त्वात्मनि पक्षे समवायेन कालिकवतः साध्यतायामात्मत्वहेतौ कालिकेन समवायवतोऽभावाधिकरणात्मनिरूपितवृत्तित्वस्यैव सत्त्वेनाव्याप्त्यापत्तेर्नावकाशं लभते ।

एतावता प्रपञ्चेन साध्यातावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावस्यैव वृत्तित्वसामान्याभावेऽस्मिन् प्रवेशेन साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावो व्याप्तिरिति साम्प्रतं स्थिरं भवति ।

---

१. (क) सर्वाधारः कालः । त० सं० दी० पृ० १८६
(ख) सकलपदार्थनिष्ठकालिकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावत्त्वम् महाकाललक्षणमित्यर्थः । त० सं० दी० नृसिंहप्रका० पृ० १८७

वृत्तितावच्छेदकसम्बन्धविचारः

न च संयोगेन वह्निसाध्यके संयोगेन धूमहेतुके पर्वतो वह्निमान् धूमादिति स्थल एव साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यतावच्छेदकवह्नित्वावच्छिन्न वह्निनिष्ठप्रतियोगिताको यो वह्न्यभावस्तदधिकरणं धूमावयवो ह्रदश्च, तत्रोभयत्रापि क्रमशः समवायेन कालिकसम्बन्धेन च धूमस्य वृत्तितया तत्र च संयोगसम्बन्धावच्छिन्नसाध्यतावच्छेदवह्नित्वावच्छिन्नवह्निष्ठप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावस्याभावेनाऽव्याप्तिरिति मन्तव्यम्, तादृशसाध्याभावाधिकरणनिरूपितवृत्तिताया हेतुतावच्छेदकसम्बन्धेनैव[1] विवक्षणीयतया साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावाधिकरणनिरूपिता या हेतुतावच्छेदकसम्बन्धावच्छिन्ना वृत्तिता तस्या अभावो व्याप्तिरिति स्वीकारेण प्रकृतस्थले तादृशसाध्याभावाधिकरणत्वेन गृहीते धूमावयवे ह्रदे च हेतुतावच्छेदकसंयोगसम्बन्धेन धूमस्यावृत्तितया तत्र साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यतावच्छेदकवह्नित्वावच्छिन्नसाध्यवह्निनिष्ठप्रतियोगिताकाभावाधिकरणधूमावयवजलह्रदनिरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्ना या तृणमीनादिनिष्ठा वृत्तिता तस्या अभावस्याक्षतत्वात् ।

अत्र तादृशसाध्याभावाधिकरणनिरूपितवृत्तितायां यत्किञ्चित्सम्बन्धावच्छिन्नत्वमेव निवेश्यताम् तेन च वह्न्यभावाधिकरणधूमावयवजलह्रदनिरूपितयत्किञ्चित्संयोगसम्बन्धावच्छिना या तृणमीनादिनिष्ठवृत्तिता तस्या अभावस्य धूमे सत्त्वेनाव्यात्यभावात् साध्याभावाधिकरणनिरूपितवृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवशो गौरवग्रस्त इति तु रिक्तं वचः, धूमवान् वह्नेरित्यादौ धूमाभावाधिकरणायोगोलकनिरूपितयत्किञ्चित्समवायसम्बन्धावच्छिन्ना या तद्गतगुणादिनिष्ठवृत्तिता तस्या अभावस्यायोगोलकानवयविनि वह्नौ सत्त्वेनातिव्याप्तेर्दुरुद्धरत्वात्, हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वस्य तादृशवृत्तितायां निवेशे तु वह्नेः संयोगेनैव हेतुतया धूमाभावाधिकरणायोगोलकनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वस्यैव वह्नौ सत्त्वेन नातिव्याप्तिशङ्काप्रसरः । अस्तु तर्हि, तादृशवृत्तितायां संयोगसम्बन्धावच्छिन्नत्वमेव विवक्ष्यताम् तावतैव धूमे सद्धेतौ वह्न्यभावाधिकरण-निरूपितसंयोगसम्बन्धावच्छिन्नवृत्तिताया असम्भवदुक्ति-

१. येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यावृत्तित्वं बोध्यं, तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्बन्धेन सत्त्वेऽपि न क्षतिः। न्या० सि० मु० पृ० २१९

तकया नाव्याप्तिर्नाप्यसद्धेतौ वह्नावतिव्याप्तिः, धूमाभावाधिकरणायोगोलकनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वस्यैव तत्र सत्त्वादिति तु व्युत्पत्तिलेशविलसितमात्रम्, संयोगसम्बन्धावच्छिन्नवह्न्यभावसाध्यके समवायेन धूमहेतुकस्थले वह्निरूपो यः साध्याभावस्तदधिकरणपर्वतनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वस्यैव धूमे सत्त्वेनाव्याप्तेः, गन्धवान् रूपादित्यादौ गन्धाभावाधिकरणजलनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावस्यैव रूपे सत्त्वेनातिव्याप्तेश्च वज्रलेपायमानत्वात्। तादृशवृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशे तु नेमे व्याप्त्यतिव्याप्ती प्रसरं लभेते, साध्याभाववह्न्यधिकरणपर्वतनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाभावस्य धूमे, साध्याभावगन्धाभावाधिकरणजलनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वस्यैव च रूपे सत्त्वात्। वृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वाप्रवेशे सर्वत्रैव लक्ष्यभूते सद्धेतौ साध्याभावाधिकरणनिरूपितकालिकादिसम्बन्धावच्छिन्नवृत्तित्वस्यैव सत्त्वेनासम्भव एव स्यादिति तु नोह्यम्, आत्मभेदसाध्यकघटत्वहेतुकस्थले साध्याभावो ह्यात्मभेदाभाव आत्मत्वरूपस्तदधिकरण आत्मनि केनापि सम्बन्धेन घटत्वस्याविद्यमानतया लक्षणसमन्वयसम्भवात्।

साध्याभावाधिकरणं केन सम्बन्धेन विवक्षणीयमिति प्रश्ने पूर्वपक्षोपन्यासः

इदानीं यावद् विवेचितदिशा साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभावो व्याप्तिरिति लक्षणं पर्यवसन्नम्। अथापि साध्यतावच्छेदकावच्छिन्न-साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्याधिकरणं केन सम्बन्धेन ग्राह्यमिति प्रश्नो जागर्ति। सम्बन्धविशेषानुक्तौ पर्वतो वह्निमान् धूमादित्यत्रैव साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्न-साध्यतावच्छेदवह्नित्वावच्छिन्न-साध्यवह्निनिष्ठप्रतियोगिताको यः संयोगेन वह्निर्नास्तीति प्रतीतिसाक्षिकः संयोगेन वह्न्यभावस्तस्य कालिकसम्बन्धेनाधिकरणमेव पर्वतः, तन्निरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तित्वस्यैव धूमे विद्यमानतयाऽव्याप्तिप्रसङ्गात्। न च क्रियाकालोपाधिर्न[१] तु जन्यमात्रमिति मतमधिकृत्य पर्वतस्य क्रियात्वाभावेन

---

१. उपाधिश्च स्वजन्यविभागप्रागभावावच्छिन्ना क्रिया। स्वपदेन रविक्रिया तज्जन्यो यो विभागो रविपूर्वदेशयोस्तस्य प्रागभावस्तादृशक्रियोत्पत्तिकाले तिष्ठति तदवच्छिन्ना सैव क्रिया इयमेवोपाधिरित्युच्यते। तर्कसङ्ग्रहः सि० चं० पृ० २७

कालोपाधित्वाभावान्न कालिकेन वह्न्यभावाधिकरणत्वमिति नाव्याप्तिरिति वाच्यम् । अयं गुणत्ववान् ज्ञानत्वादित्यत्रेदन्त्वेन ज्ञानपक्षके, समवायेन गुणत्वसाध्यके, समवायेन ज्ञानत्वरूपसद्धेतुकस्थले समवायसम्बन्धावच्छिन्नगुणत्वत्वावच्छिन्न-गुणत्वनिष्ठप्रतियोगिताकस्य समवायेन गुणत्वाभावस्य विषयितासम्बन्धेनाधिकरणं गुणत्वाभावविषयकं ज्ञानमादाय तन्निरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वस्यैव ज्ञानत्वहेतौ सत्त्वेनाव्याप्तेः, विषयितासम्बन्धस्य वृत्यनियामकतया तेन सम्बन्धेनाधिकरणाप्रसिद्धेः गुणत्ववान् ज्ञानत्वादित्यादौ नाव्याप्तिसम्भावनेति कथनं तु न सम्यक् लक्षणकुक्षिप्रविष्टस्याधिकरणपदस्य सम्बन्धिमात्रपरत्वस्वीकारात्, अधिकरणपरत्वमेव तस्येत्याग्रहे तु घटः सत्तावान् जातेरित्यत्र समवायेन सत्तासाध्यके समवायेन जातिहेतुके स्थले साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्न-साध्यतावच्छेदकसत्तात्वाच्छिन्न सत्तानिष्ठप्रतियोगिताकोऽभावः समवायेन सत्ताभावस्तस्य 'स्वाभाववद्वृत्तित्वसम्बन्धेनाधिकरणं गुणः—स्वं सत्ताभावः, स्वाभावः सत्ताभावाभावः सत्तारूपः, तद्वद् द्रव्यम् तन्निरूपितवृत्तित्वस्य गुणे सत्त्वात्—तन्निरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वस्यैव जातौ सद्धेतौ विद्यमानत्वेनाव्याप्तेर्दुर्वारत्वात् । विषयितासम्बन्धवत् स्वाभाववद्वृत्तित्वसम्बन्धस्यापि वृत्यनियामकतया तेनसम्बन्धेन सत्ताभावाधिकरणत्वं गुणे न सम्भवतीति प्रत्यवस्थानं, सम्बन्धस्यास्य वृत्तित्वघटितस्य इह हेतौ, उपाधिः इत्यादिप्रतीत्या[१]वृत्तिनियामकत्वस्वीकारेण निरवकाशम् ।

अत्रेदं बोध्यम्—इह हेतौ उपाधिः[२]इति प्रतीतिः हेतावुपाधेर्वृत्तित्वं प्रत्याययति । एतेनोपाधिनिष्ठवृत्तिता-(आधेयता) निरूपिताधिकरणता हेतौ प्रतीयते । अत्रोपाधौ हेतुनिरूपिता वृत्तिता केन सम्बन्धेनेति जिज्ञासायां स्वाभाववद्वृत्तित्वसम्बन्धेनेति समाधानम् । अयमेव सम्बन्धः अव्याप्यत्वव्यभिचारित्वशब्दाभ्यामपि व्यपदिश्यते । सम्बन्धेनानेन हेतावुपाधेर्वृत्तिता कथमिति चेदित्थम्—स्वाभाववद्वृत्तित्वं सम्बन्धः, कस्य सम्बन्धः ? उपाधेः अनेन सम्बन्धेन उपाधिः कुत्र तिष्ठति, हेतौ । अत्र यस्य सम्बन्धः स एव स्वपदेन ग्राह्यः । तथा च पर्वतो धूमवान् वह्नेरित्यसद्धेतु-

---

१. व्याप्यत्वासिद्धिं लक्षयति । सोपाधिक इति । व्यभिचारितासम्बन्धेन उपाधिविशिष्ट इत्यर्थः । तर्क० सं० पृ० ६०

२. अस्तितावदिह हेतावुपाधिर्नेह हेतावुपाधिरिति प्रतीतिर्व्यवहारश्च ।चि० दी० पृ० ११५

कस्थले वह्निः सोपाधिक उच्यते, सोपाधिक इत्यस्योपाधिविशिष्ट[१] इत्येवार्थः। उपाधिविशिष्टत्वं हि उपाधिनिष्ठवृत्तितानिरूपिताधिकरणतावत्वम्। प्रकृते उपाधिश्चार्द्रेन्धनसंयोगः। अयं वह्नौ हेतौ स्वाभाववद्वृत्तित्वसम्बन्धेन वर्तते। स्वशब्देनार्द्रेन्धनसंयोगरूपोपाधिः ग्राह्यस्तदभाव आर्द्रेन्धनसंयोगाभावस्तद्वदयोगोलकम्, तन्निरूपितवृत्तित्वं वह्नौ, सम्बन्धसत्ताहि सम्बन्धिसत्तां नियमयतीति तथ्यमनुरुध्यार्द्रेन्धनसंयोगाभाववदयोगोलकवृत्तित्वरूपसम्बन्धस्य वह्नौ सत्तया सम्बन्धिनः (सम्बन्धप्रतियोगिनः) आर्द्रेन्धनसंयोगस्य वह्नौ सत्त्वं निर्विवादम्। तेन च स्वाभाववद्वृत्तित्वसम्बन्धेनार्द्रेन्धनसंयोगरूपोपाधिर्वह्नौ विद्यत इति प्रामाणिका अभ्युपयन्ति। अत एव 'इह हेतौ उपाधिः' इति तेषां व्यवहारः। हेतावित्यत्र सप्तमी वृत्तित्वरूपमेवार्थं बोधयति। प्रकृत्यर्थो हेतुश्च निरूपितत्वसम्बन्धेन वृत्तितायामन्वेति। वृत्तिता च स्वरूपेणोपाधावन्वेति। 'इह' शब्दः प्रकृतार्थकस्तेन च प्रकृतहेतुनिरूपितवृत्तितावानुपाधिरित्यर्थोऽनया प्रतीत्या हृदयङ्गमो भवति।

तथासत्येतत् प्रतीत्यनुसारं हेतुनिरूपितवृत्तित्वं स्वाभाववद्वृत्तित्वसम्बन्धेन प्रामाणिकानां सम्मतमिति स्पष्टम्। अतः 'इह हेतौ उपाधिः' इति प्रतीत्यनुरोधेन स्वाभाववद्वृत्तित्वसम्बन्धस्य वृत्तित्वघटितस्य वृत्तिनियामकतया तेन सम्बन्धेन सत्ताभावाधिकरणगुणनिरूपितवृत्तित्वस्यैव जातौ स्फुटप्रतिपत्तेः सत्तावान् जातेरित्यत्राव्याप्तिरस्त्येवेति। इमामव्याप्तिं परिहर्तुं साध्याभावस्याधिकरणं स्वरूपसम्बन्धेन विवक्षणीयम्, तथा सति गुणत्ववान् ज्ञानत्वात्, सत्तावान् जातेरित्यादौ नाव्याप्तिप्रसङ्गः साध्याभावाधिकरणम् इत्यस्य साध्याभावनिष्ठाधेयतानिरूपिताधिकरणतावान् इत्यर्थः। साध्याभावस्याधिकरणं स्वरूपसम्बन्धेन विवक्षणीयमित्यस्य साध्याभावनिष्ठाधेयता स्वरूपसम्बन्धावच्छिन्ना ग्राह्येति तात्पर्यम्, तेन च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्न-साध्यनिष्ठप्रतियोगिताकाभावनिष्ठा स्वरूपसम्बन्धावच्छिन्ना याऽधेयता, तन्निरूपिता याऽधिकरणता तदवन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्ना या वृत्तिता तस्या अभावो व्याप्तिरिति लक्षणं पर्यवस्यति। एवञ्च साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यतावच्छेदकवह्नित्वावच्छिन्न-वह्निनिष्ठप्रतियोगिताकोऽभावः संयोगेन वह्न्यभावस्तन्निष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणता ह्रदेऽत-

१. व्याप्यत्वासिद्धिं लक्षयति। सोपाधिक इति। व्यभिचारितासम्बन्धेन उपाधिविशिष्ट इत्यर्थः। तर्क० सं०, पृ० ६०

स्तादृशाधिकरणतावान् ह्रदः संयोगेन तत्र वह्नेरविद्यमानतया संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकात्यन्ताभावस्य स्वरूपेण तत्र सत्त्वे विवादाभावात्। तेन हि तादृशह्रदनिरूपित-हेतुतावच्छेदसंयोगसम्बन्धावच्छिन्नमीनशैवलनौकादिनिष्ठवृत्तिताया अभावस्य धूमेनऽपायेन यथा पर्वतो वह्निमानित्यत्र लक्षणं समन्वितं भवति, तथैव गुणत्वान् ज्ञानत्वात्, सत्तावान् जातेरित्यादिस्थलेष्वपि लक्षणसमन्वयेन नाव्याप्तिसम्भवः। अनयोः स्थलयोः लक्षणसमन्वयश्चैवम्—साध्यतावच्छेदकगुणत्वत्व, सत्तात्वावच्छिन्न, साध्यतावच्छेनकसमवायसम्बन्धावच्छिन्न गुणत्वं-सत्तानिष्ठप्रतियोगिताकोऽभावः समवायेन गुणत्वाभावः, समवायेनसत्ताभावश्च, तन्निष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणता क्रमशो द्रव्ये सामान्ये च, तद्वद् द्रव्यं सामान्यं च, तयोः समवायेन गुणत्वस्य, सत्तायाश्चसत्त्वेन स्वरूपेण तदभाववत्वस्याक्षतत्वात्, तन्निरूपितहेतुतावच्छेकसमवायसम्बन्धावच्छिन्नवृत्तित्वाभावो ज्ञानत्वे जातौ च सुलभ इति। ननु गुणत्ववान् ज्ञानत्वादित्यत्र समवायसम्बन्धावच्छिन्न-गुणत्वत्वावच्छिन्नगुणत्वनिष्ठप्रतियोगिताकाभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्द्रव्यनिष्ठहेतुतावच्छेदकसमवायसम्बन्धावाच्छिन्नवृत्तिता द्रव्यत्वे प्रसिद्धा। तस्याश्चाभावो ज्ञानत्वे सद्धेतौ विद्यत इति ज्ञानत्वे लक्षणसमन्वयः सुकरः, परं सत्तावान् जातेरित्यत्र समवायसम्बन्धावच्छिन्नसत्तात्वावच्छिन्नसत्तानिष्ठप्रतियोगिताकाभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावत् सामान्यादिरेव। तन्निरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तिताऽप्रसिद्धा, सामान्यादिषु समवायसम्बन्धेन कस्याप्यसत्त्वात्। तथा च तादृशवृत्तित्वप्रतियोगिकाभावोऽप्यप्रसिद्धः, अभावप्रसिद्धेः प्रतियोगिप्रसिद्ध्यधीनत्वात्[१]। एवं च सद्धेतुभूतायां जातौ लक्षणसमन्वयः कथमिति चेत् साध्याभावाधिकरणनिरूपितवृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वं न वक्तव्यम्। अथ च तादृशसाध्याभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तिताया हेतौ केवलं स्वरूपेणाभावमनुक्त्वा हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपसम्बन्धेनाभावो विवक्षणीयस्तेन च लक्षणाकार एवं सम्पद्यते—साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्न-साध्यनिष्ठप्रतियोगिताका-

---

१. प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकस्तद्विशिष्टज्ञानस्याभावधीहेतुत्वात्। अनु० चि० पृ० २५०

भावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निरूपितवृत्तिता-त्वावच्छिन्ना या हेतुतावच्छेदकसम्बन्धावच्छिन्नाऽधेयताप्रतियोगिकस्वरूप-सम्बन्धावच्छिन्ना प्रतियोगिता तन्निरूपकोऽभाव इति तथा सति सत्तांवान्जातेरित्यत्र साध्यंतावाच्छेदकसत्तात्वावच्छिन्न-साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्न-साध्यसत्तानिष्ठप्रतियोगिताकाभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिता-धिकरणतावत् समान्यादिनिरूपिता या सामान्यत्वादौ विद्यमाना वृत्तिता सा तत्र तादृशसाध्याभावाधिकरणसामान्यादिनिरूपितवृत्तिताप्रतियोगिकस्वरूपसम्बन्धेन तिष्ठति न तु हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेयताप्रतियोगि-कस्वरूपसम्बन्धेन सामान्यादिनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तिताया अप्रसि-द्धतया सम्बन्धस्यास्य तादृशवृत्तिताव्यधिकरणत्वात्। एवं च स्थलेऽस्मिन् तादृ-शसत्ताभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावत् सामा-न्यादिनिरूपितायाः सामान्यत्वादौ प्रसिद्धाया वृत्तिताया हेतुतावच्छेदकसमवायस-म्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपसम्बन्धेन जातावभावेन लक्षणसमन्वयात् नाव्याप्तिसम्भवः।

न चैवं समवायेन द्रव्यत्वसाध्यके समवायेन गुणकर्मान्यत्वविशिष्टसत्ताहेतुके द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्राव्याप्तिः, साध्यतावच्छेदकसमवायसम्ब-न्धावच्छिन्नसाध्यतावच्छेदकद्रव्यत्वत्वावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगिताको यः समवायेन द्रव्यत्वाभावस्तन्निष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरण-तावद्गुणादिनिरूपितवृत्तिता शुद्धसत्तायां विद्यमाना विशिष्टं शुद्धान्नातिरिच्यत[1] इति न्यायेन विशिष्टसत्तायामप्यस्त्येव। अत एव गुणनिरूपितां विशिष्टसत्तानिष्ठा-माधेयतामवगाहमाना 'गुणे गुणकर्मान्यत्वविशिष्टसत्तेतिप्रतीतिः[2] सर्वसम्मता। तथा सति तादृशद्रव्यत्वाभावात्मकस्य साध्याभावस्याधिकरणे गुणादौ हेतुभूताया विशिष्टसत्ताया वृत्तितया, तस्यां हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तिता-प्रतियोगिकस्वरूपसम्बन्धेन द्रव्यत्वाभावाधिकरणगुणादिनिरूपितसमवाय-सम्बन्धावच्छिन्नवृत्तिताया एव सत्त्वेन, हेतुतावच्छेदकसमावायसम्बन्धावच्छिन्ना-धेयताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्न, तादृशसाध्याभावाधिकरणनिरूपितवृ-

---

१. अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात्। न्या० सि० मु० पृ २१९

२. गुणे गुणकर्मान्यत्वविशिष्टसत्तेति प्रतीतेः सर्वसिद्धत्वात्।

त्तितात्वावच्छिन्नप्रतियोगिताकाभावस्यासत्त्वादिति वाच्यम्। तादृशसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावीयवृत्तित्वनिष्ठप्रतियोगितावच्छेदकत्वेन स्वीकृतो यः सम्बन्धो हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपात्मकस्तद्घटकीभूतायामाधेयतायां हेतुतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणतानिरूपितत्वस्य निवेशात्। अयमाशयः—द्रव्यत्वसाध्यके विशिष्टसत्तात्वेन विशिष्टसत्तात्मकसद्धेतौ द्रव्यत्वाभावाधिकरणगुणादिनिरुपितसमवायसम्बन्धावच्छिन्नाधेयता (वृत्तिता) विशेष्यवृत्तेः[१]विशिष्टानुयोगिकाभावानभ्युपगमेन सद्धेतुभूतायां विशिष्टसत्तायां यद्यप्यस्ति, परं सा सत्तात्वावच्छिन्नाधेयतानिरूपितगुणादिनिष्ठाधिकरणतानिरूपिता, न तु हेतुतावच्छेदकीभूतगुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपितद्रव्यनिष्ठाधिकरणतानिरूपिता, गुणे गुणकर्मान्यत्वविशिष्टसत्तायाः सत्तात्वैनैव विद्यमानतया विशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपिताधिकरणाताया गुणेऽसत्त्वस्य सर्वसम्मतत्वात्। अत एव गुणो गुणकर्मान्यत्वविशिष्टसत्तावान् इति प्रतीतेर्भ्रमत्वं विशिष्टसत्तावद्द्रव्यमिति प्रतीतेः प्रमात्वं च सर्वैः स्वीक्रियते। गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपिताधिकरणताया द्रव्य एव सत्त्वात्। एवञ्च विशिष्टसत्तात्वावाछिन्नाधेयतानिरूपिताधिकरणताया द्रव्य एव वृत्तितया तादृशद्रव्यनिष्ठाधिकरणतानिरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेयतायाश्च विशिष्टसत्तात्वेन विशिष्टसत्तायामेव सत्त्वेन, तादृशाधेयताप्रतियोगिकस्वरूपसम्बन्धो विशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपित, द्रव्यनिष्ठाधिकरणतानिरूपित, हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नविशिष्टसत्तात्वावच्छिन्नवृत्तिताया एव भवितुमर्हति, तादृशद्रव्यत्वाभावात्मको यः साध्याभावस्तदधिकरणगुणनिरूपितवृत्तितायास्तु व्यधिकरणोऽयं सम्बन्धः। एवं सति प्रकृतस्थले साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्नसाध्यतावच्छेदकद्रव्यत्वत्वावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगिताकाऽभावनिष्ठस्वरूपसम्बन्धावच्छिनाधेयतानिरूपितगुणादिनिष्ठाधिकरणतावन्निरूपितवृत्तितायाः हेतुतावच्छेदकविशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपितद्रव्यनिष्ठाधिकरणतानिरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेयता- (विशिष्टसत्तात्वाच्छिन्नाधेयता) प्रतियोगिकस्वरूपसम्बन्धेनाभावस्य व्यधिकरण-

---

१. विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावोऽप्रामाणिकः। चि० दी० गा०, पृ० ३५६

सम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वेन केवलान्वयितया सर्वत्र सत्त्वेन विशिष्ट-सत्तायां सद्धेतौ सत्त्वं निराकुलमिति ।

वस्तुतस्तु हेतुतावच्छेदसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपसम्बन्धेनैव तादृशवृत्तिताया अभावो व्याप्तिरित्येव स्वीकर्तव्यम् । सम्बन्धघटकीभूतायामाधे-यतायां हेतुतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणतानिरूपितत्वमनुपादे-यम् । विशिष्टसत्ताया द्रव्यत्वव्याप्यत्वं च विशिष्टसत्तात्वावच्छिन्नाधेयता-निरूपिताधिकरणतासम्बन्धेनैवाभ्युपेयम् । एवं सति विशिष्टसत्तात्वेन विशिष्ट-सत्तात्मकानुपदोक्तसद्धेतुकस्थले द्रव्यत्वत्वावच्छिन्नसमवायसम्बन्धावच्छिन्न-द्रव्यत्वनिष्ठप्रतियोगिताकाभावनिष्ठस्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिताधि-करणतावद्गुणादिनिरूपितवृत्तिताया हेतुतावच्छेदकविशिष्टसत्तात्वावच्छिन्नाधेय-तानिरूपितद्रव्यनिष्ठाधिकरणतासम्बन्धावच्छिन्नविशिष्टसत्तानिष्ठाधेयताप्रतियो-गिकः स्वरूपसमबन्धो व्यधिकरणः सम्बन्धः तादृशगुणादिनिरूपितसत्तात्वादिना-सत्तानिष्ठवृत्तिताया हेतुतावच्छेदकतादृशाधिकरणतात्मकसम्बन्धावच्छिन्नविशि-ष्टसत्तात्वे विशिष्टसत्तानिष्ठवृत्तितायाः (आधेयतायाः) च परस्परं नितरां भिन्न-त्वात् । तथा च प्रकृतो यो हेतुतावच्छेदकः सम्बन्धो, विशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपिताधिकरणतात्मकस्तदवच्छिन्नप्रतियोगिता-कतादृशसाध्याभावाधि- करणगुणादिनिरूपितवृत्तित्वाभावस्य व्यधिकरण-सम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वेन केवलान्वयितया[१] सर्वत्र सत्त्वेन हेतुभूतायां विशिष्टसत्तायामपि विद्यमान- तया द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्र नाव्याप्तिसम्भवः ।

नन्वक्लृप्तसंसर्गस्यास्य विशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपिताधिकरण-तात्मकस्य हेतुतावच्छेदकत्वकल्पनापेक्षया क्लृप्तस्य समवायस्यैव तथात्वं कल्प-नीयम् तेन च हेतुतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणतानिरूपितत्वस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतायां विशेषणत्वानुपगमे द्रव्यं विशिष्टसत्त्वा-दित्यादावव्याप्तेस्तादवस्थ्यमिति चेत् न द्रव्यं विशिष्टसत्त्वादित्यत्र समवायस्य हेतुतावच्छेदकसंसर्गत्वमभ्युपेत्य हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेय-तायां निरुक्तनिरूपितत्वान्तविशेषणत्वोपादाने धूमत्वालोकत्वादिहेतुतावच्छेदक-

---

१. संयोगसम्बन्धावच्छिन्नप्रतियोगिताकस्य गोत्वाद्यभावस्य केवलान्वयितया । चि० दी० गा०, पृ०५३०

धर्मभेदेन एकसाध्यकस्थलेऽपि व्याप्तिज्ञाननिष्ठानुमितिनिरूपितकारणताया अनेकतया तन्निरूपितकार्यतायामप्यनेकत्वस्य दुर्निवारतयाऽनुमितिव्याप्तिज्ञानयोः कार्यत्वकारणत्वयोरानन्त्यापत्तेः ।

सिद्धान्तपक्षे प्रथमकल्पोपन्यासः

अथापि यत्र गुणमिदन्त्वेन पक्षीकृत्य गुणत्वहेतुना गुण-कर्मान्यत्वविशिष्टसत्ताया अभावः साध्यते तत्र अयं गुणकर्मान्यत्वविशिष्टसत्त्वाभाववान्, गुणत्वादिति स्थले साध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नगुणकर्मान्यत्वविशिष्टसत्त्वाभावत्वावच्छिन्नगुणकर्मान्यत्वविशिष्टसत्ताभावनिष्ठप्रतियोगिताकोऽभावो गुणकर्मान्यत्वविशिष्टसत्ताभावाभावो गुणकर्मान्यत्वविशिष्टसत्तारूपः प्रकृते साध्याभावस्तस्य च स्वरूपसम्बन्धेनाधिकरणाप्रसिद्ध्याऽव्याप्तिः । एवमेव पटो, घटत्वात्यन्ताभाववान्, पटत्वादित्यत्रापि साध्याभावस्य घटत्वाभावाभावस्य घटत्वरूपस्य स्वरूपसम्बन्धेनाधिकरणाप्रसिद्ध्याऽव्याप्तिः ।

अत्र स्थलद्वयेऽत्यन्ताभावाभावस्य लाघवात् प्रतियोगिस्वरूपत्वं[1] स्वीकृत्य यथाऽव्याप्तिस्तथैव पटो घटान्योन्याभाववान्, पटत्वादित्यत्रान्योन्याभावाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वस्वीकारेणाव्याप्तिर्दुर्निवारा[2] । तथाहि घटान्योन्याभावः प्रकृते साध्यते साध्यतावच्छेदकसम्बन्धश्च स्वरूप एव । तथा सति साध्यतावच्छेदक-घटान्योन्याभावत्वावच्छिन्नसाध्यतावच्छेदक-स्वरूपसम्बन्धावच्छिन्नघटान्योन्याभावनिष्ठप्रतियोगिताकोऽभावो घटान्योन्याभावाभावः । अन्योन्याभावाभावश्चान्योन्याभावप्रतियोगितावच्छेदकसमनियतो भवत्येव । घटान्योन्याभावस्य प्रतियोगी घटः प्रतियोगिता घटे प्रतियोगितावच्छेदकं घटत्वं, तच्च घट एव तिष्ठति, तत्रैव च घटान्योन्याभावाभावोऽपि, घटो न इत्याकारकस्य घटान्योन्याभावस्य घटभेदशब्देन व्यवह्रियमाणस्य घटातिरिक्त एव प्रसिद्धतया तदभावस्य घट एव सत्त्वात् । एतेन हि घटान्योन्याभावाभावस्य घटत्वरूपतया प्रकृतस्थले घटान्योन्याभावसाध्यके घटत्वमेव साध्याभावः जातिरूपस्य तस्य स्वरूपसम्बन्धेनाधिकरणाप्रसिद्ध्या तन्निरूपितवृत्तित्वाभावस्याप्यप्रसिद्ध्या प्रकृतस्थलीयपटत्वात्मकसद्धेतौ तादृशवृत्तित्वाभावस्यानुपपत्तेरिति कथनं त्वत्यन्ताभावाभाव-

---

१. अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव । चि० पृ० १३५०

२. अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधरणो धर्म इति । चि० पृ० १३५०

स्यान्योन्याऽभावाभावस्य चातिरिक्तत्वेनाभावात्मकसप्तमपदार्थस्वरूपतया स्वरूपसम्बन्धेन साध्याभावाधिकरणप्रसिद्धेर्नावकाशं लभते ।

यदि ह्यभावाभावस्यातिरिक्तत्वाभ्युगमे केवलान्वयिग्रन्थे[१] गङ्गेशोपाध्यायानामत्यन्ताभावाभावस्य प्रतियोगिस्वरूपत्वव्यवस्थापनमन्योन्याभावात्यन्ताभावस्य प्रतियोगितावच्छेकस्वरूपत्वव्यवस्थापनम्, सिद्धान्तलक्षणे[२] रघुनाथशिरोमणीनां दीधितिकाराणां भावाभावसाधारणमभावत्वनिर्वचनं च व्याकुप्येतेति मन्यते तदा साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणमभ्युपेयम्, तेन हि साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावत्वावच्छिन्ना या साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नाऽऽधेयता तन्निरूपिताधिकरणतावन्निरूपितवृत्तित्वत्वावच्छिन्ना या हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्ना प्रतियोगिता तन्निरूपकोऽभावो व्याप्तिरिति लक्षणं निर्वाच्यम् । पर्वतो वह्निमान् धूमादित्यादिप्रसिद्धस्थलेषु तादृशसाध्याभावः संयोगेन वह्न्यभावस्तस्याधिकरणं साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धेनैव ग्राह्यम् । साध्यो वह्निस्तन्निरूपिता प्रतियोगिता कुत्रास्तीति प्रश्नः, अभावनिरूपितैव प्रतियोगिताप्रकृते एष्टव्येति वस्तुस्थितिमनुरुध्य साध्यस्याभावात्मकत्वमुपपाद्यैव समाधेयः । अतोऽभावाभावस्य प्रतियोगिस्वरूपत्वमिति लाधवमूलकसिद्धान्तं पुरस्कृत्य संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावात्मकस्य साध्याभावस्य स्वरूपेणाभावो ग्राह्यः । स च वह्न्यभावाभावो वह्न्यात्मकसाध्यरूपस्तन्निरूपिता प्रतियोगिता संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभाव इति स्थितम् । तस्य च स्वरूपेणैवाभावो वह्न्यात्मकसाध्यरूपो भवतीति प्रतियोगितावच्छेदकसम्बन्धः स्वरूप एवेत्यपि स्फुटम् । तथा च प्रकृतस्थले वह्न्यात्मकसाध्यनिरूपितवह्न्यभावनिष्ठप्रतियोगितावच्छेदकः सम्बन्धः स्वरूप एव । तत्सम्बन्धावच्छिन्नतादृशवह्न्यभावनिष्ठाधेयतानिरूपिताधिकरणता ह्रदादौ । तन्निरूपितमीनशैवालादि- निष्ठाया वृत्तिताया हेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपसम्बन्धेनाभावस्य धूमे सद्धेतौ सत्त्वेन लक्षणसमन्वयः सुकरः ।

---

१. अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव । चि० पृ० १३५०

२. अभावत्वञ्चेदमिह नास्ति, इदमिदं न भवतीति प्रतीतिनियामको भावाभावसाधारणः स्वरूपसम्बन्धविशेषः । चि० दी० पृ० ३७१

अनुपदं प्रदर्शितेषु त्रिषु स्थलेषु नेदं लक्षणमव्याप्तम् । तथाहि—विशिष्टसत्ताभावसाध्यके गुणत्वहेतुकस्थले तादृशसाध्याभावस्य विशिष्टासत्तात्मकस्य साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धेनैवाधिकरणस्य विवक्षणीयतया, साध्यो विशिष्टसत्ताभावस्तन्निरूपिता प्रतियोगिता विशिष्टसत्तायाम् तस्याः समवायसम्बन्धावच्छिन्नप्रतियोगिताकाभाव एव साध्यस्वरूप इति, साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धः समवाय एव। तेन सम्बन्धेन विशिष्टसत्तारूपस्य साध्याभावस्याधिकरणं द्रव्यमेव । तन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तिताया गुणत्वे सद्धेतावसम्भवेन तत्र विशिष्टसत्तात्मकसाध्याभावाधिकरणद्रव्यनिरूपितवृत्तिताया हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपसम्बन्धेनाभावस्य सुतरां स्पष्टत्वात् ।

एवं घटत्वात्यन्ताभावसाध्यके पटत्वहेतुके द्वितीयस्थलेऽपि साध्यो घटत्वाभावस्तस्य स्वरूपेणाभावो घटत्वात्मकः साध्याभावस्तस्याधिकरणं साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धेनैव वक्तव्यमितिदिशा प्रकृते साध्यस्य घटत्वाभावस्य प्रतियोगिताया घटत्वे सत्त्वेन तदवच्छेदकः सम्बन्धः समवाय एव, समवायेनैव घटत्वाभावस्य साध्यस्वरूपत्वात् तथा च साध्याभावस्य घटत्वस्य समवायेनाधिकरणं घटस्तत्र च प्रकृते हेतुत्वेनाभिप्रेतस्य पटत्वस्य समवायेनावृत्तितया साध्याभावाधिकरणघटनिरूपितवृत्तिताया हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपसम्बन्धेनाभावस्य पटत्वे सद्धेतौ स्वतस्सिद्धत्वान्नास्य लक्षणस्याव्याप्तिः ।

नापि तृतीयस्थले घटभेदसाध्यके लक्षणस्यास्याव्याप्तिः सम्भवति, साध्याभावस्य घटभेदाभावस्य प्राक्प्रदर्शितपथा घटत्वरूपतया तदधिकरणं साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन घटत्वमेव साध्यस्य घटभेदरूपतया भेदस्य च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वनैयत्येन[1] घटभेदात्मकसाध्यनिरूपित- प्रतियोगितावच्छेदकसम्बन्धत्वस्य तादात्म्य एव सत्त्वात्, तादात्म्यसम्बन्धस्य चाऽभेदपर्यवसन्नस्य स्वस्य स्वस्मिन्नेव न्यायवैशेषिकमतसिद्धतया साध्याभावस्य घटत्वस्य तादात्म्येन घटत्व एव विद्यमानताया निश्चयाच्च । एवञ्च घटत्वात्मकस्य साध्याभावस्याधिकरणं यद् घटत्वं तन्निरूपितवृत्तिताया हेतुतावच्छेदकसमवायस-

---

१. तादात्म्यसम्बन्धावच्छिन्नाभावश्चान्योन्याभाव एव नत्वत्यन्ताभाव इत्यर्थः। चि० दी० गा० पृ० ३४७

म्बन्धावच्छिन्नवृत्तिताप्रतियोगिकः स्वरूपसम्बन्धः घटत्वनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तिताया अप्रसिद्धतया व्यधिकरणः सम्बन्धस्तेन तदभावस्य केवलान्वयिनः सर्वत्र सत्त्वेन पटत्वे सद्धेतावपि वृत्तित्वस्य निराकुलत्वात् ।

न चैवं घटभेदसाध्यकस्थले यथा पटत्वं सद्धेतुस्तथैव घटत्वत्वमपि सद्धेतुस्तथा च तत्राव्याप्तिः दुर्निवारा साध्याभावस्य घटत्वस्य साध्यघटभेदनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेनाधिकरणे घटत्वे घटत्वत्वस्य वृत्तित्वादिति शङ्क्यम्, साध्याभावाधिकरणतानियामकसम्बन्धघटकप्रतियोगिताया अत्यन्ताभावत्वनिरूपितत्वेन विशेषणीयत्वात् । अत्यन्ताभावत्वनिरूपितत्वं च तादात्म्यसम्बन्धानवच्छिन्नत्वमेव । तथा च साध्यनिरूपिततादात्म्यसम्बन्धानवच्छिन्नप्रतियोगितावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वस्य वक्तव्यतया साध्याभावस्य—घटत्वस्य तादात्म्यसम्बन्धेन अधिकरणं प्रकृते नोपादातुं शक्यं, तस्याऽन्योन्याभावत्वनिरूपितप्रतियोगितावच्छेदकसम्बन्धतया तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगितावच्छेदकसम्बन्धत्वेन ग्रहणासम्भवात्, तर्हि प्रकृते साध्यनिरूपिततादात्म्यसम्बन्धानवच्छिन्नप्रतियोगितावच्छेदकः कः सम्बन्धो येन साध्याभावस्य घटत्वस्याधिकरणमादाय लक्षणं समन्वीयादिति चेत्—समवाय एवेति बोध्यम्. तथाहि—साध्यस्य घटभेदस्य प्रतियोगिता यथा घटे तथैव घटत्वेऽपि घटे विद्यमाना प्रतियोगिता तादात्म्यसम्बन्धावच्छिन्ना, परं घटत्वे विद्यमाना सा तादात्म्यातिरिक्तसमवायसम्बन्धावच्छिन्नतया तादात्म्यसम्बन्धानवच्छिन्नेति निर्विवादम् । घटभेदस्य प्रतियोगिता घटत्वे न सम्भवतीति नानुयोज्यम्, समवायसम्बन्धेन घटत्वात्यन्ताभावस्य घटभेदस्य च समनियततया, समनियताभावानामैक्यमिति[१] मतमाश्रित्य घटभेदप्रतियोगिताया घटत्वे स्वीकारे बाधकाभावात् । यदि हि समनियताभावानामैक्यं नाभ्युपगम्यते तदापि घटभेदस्य घटभेदात्यन्ताभावाभावस्य चैक्यं द्वितीयाभावस्य प्रतियोगिरूपतयैष्टव्यमेव । तेन च घटभेदाभावस्य घटभेदप्रतियोगितावच्छेदकीभूतघटत्वरूपत्वमिति पूर्वप्रदर्शिततया तस्य समवायेन घटभेदप्रतियोगित्वे विवादस्य निरवकाशत्वात् । एवं सति घटभेदात्मकं यत् साध्यं तन्निरूपिता तादात्म्यसम्बन्धानवच्छिन्ना या घटत्वनिष्ठ-

---

१. घटादिभेदस्य घटत्वाद्यत्यन्ताभावसमनियतत्वेन तदभिन्नतया घटत्वादौ तदीयसंसर्गावच्छिन्नप्रतियोगितासत्त्वात्तेनैव तदभावप्रत्यायनात् । चि० दी० गा० पृ ३७३

प्रतियोगिता तदवच्छेदकसमवायसम्बन्धेन साध्याभावस्य घटत्वस्याधिकरणे घटे सद्धेतोः पटत्वस्य घटत्वत्वस्य वाऽवृत्तितया लक्षणसमन्वयः सुकर इति बोध्यम् ।

न चात्यन्ताभावाभावस्य प्रतियोगिरूपत्वेऽपि घटभेदात्यन्ताभावत्वावच्छिन्न-प्रतियोगिताकात्यन्ताभावस्य न घटभेदात्मकप्रतियोगिस्वरूपत्वं किन्तु घटभेदीया या घटनिष्ठा प्रतियोगिता तस्या अवच्छेदकीभूतं यद्घटत्वं तदत्यन्ताभावस्वरूप-त्वमेवेति सिद्धान्त इति वाच्यम् । यादृशानुभवबलेनात्यन्ताभावाभावस्य प्रतियोगि-स्वरूपत्वं सिद्ध्यति तादृशस्यैवानुभवस्य बलेन भेदात्यन्ताभावाभावस्यापि प्रतियोगिस्वरूपत्वसिद्धेः ।

तथाहि—यत्र भूतले यदा घटत्वविशिष्टो घटो बुद्ध्यते तदा तत्रैव घटत्ववि-शिष्टस्य घटस्य योऽत्यन्ताभावस्तस्य ग्रहो न भवति, परं घटत्वविशिष्टो यो घटस्तस्य योऽत्यन्ताभावस्तस्य योऽभावो घटात्यन्ताभावाभावरूपस्तस्य व्यवहारो भवति, अत एव घटत्वविशिष्टस्य घटस्य घटत्वविशिष्टो यो घटस्तदत्यन्ताभावाभावस्य चैक्यमवश्यं स्वीकार्यम् । एवमेव यत्र भूतले घटभेदवैशिष्ट्यं ज्ञायते तत्र घटभेदा-त्यन्ताभावस्य ज्ञानं तु नैव जायते परं घटभेदात्यन्ताभावाभावस्य ज्ञानं जायत एव, तेन घटभेदग्रहकाले घटभेदाभावाभावव्यवहारस्य सर्वानुभवसिद्धतया, घटभेदात्य-न्ताभावाभावस्य घटभेदस्वरूपत्वं निराकुलमेवेति, भेदातिरिक्तस्थले यथा घटात्य-न्ताभावाभावादेः प्रतियोगिस्वरूपत्वं तथैवं भेदस्थलेऽपि तदत्यन्ताभावाभावस्य प्रतियोगिस्वरूपत्वस्वीकारे न किञ्चिद्बाधकम् ।

अत्र घटभेदात्यन्ताभावग्रहप्रतिबन्धकत्वं घटभेदे न घटभेदत्वेन किन्तु घटभे-दात्यन्ताभावाभावत्वेनैव तेन घटभेदवति प्रदेशे घटभेदात्यन्ताभावाग्रहस्य घटभेदा-त्यन्ताभावाभावव्यवहारस्य च सत्यप्युपलब्धौ घटभेदस्य घटभेदत्वेन घटभेदात्यन्ताभावाभावस्वरूपत्वं न सेत्स्यतीति यदि कश्चिद् ब्रूयात् तर्हि स एव प्रष्टव्यः—घटभेदस्य घटत्वात्यन्ताभावस्वरूपत्वं मन्यते घटभेदात्यन्ताभावाभाव-स्वरूपत्वं च नानुमन्यत इत्यत्र का वाचोयुक्तिः ? सामनैयत्वं लाघवं वोभयत्र समानमेव, अतो घटभेदो घटत्वात्यन्ताभावस्वरूपो न घटभेदात्यन्ताभावाभावस्व-रूप इत्यत्र विनिगमनायाः (एकत्र पक्षपातिन्या युक्तेः) अभावेन घटभेदस्य घटभेदा-त्यन्ताभावाभावस्वरूपत्वसिद्धिः निष्प्रत्यूहैव । अत्रार्थे उदयनाचार्योऽपि "अभावविरहात्मत्वं[1] वस्तुनः प्रतियोगिता" इति प्रतियोगित्वं लक्षयन् प्रमाणम् ।

---

१. न्या० कु० कारि० पृ० ३२९

प्रतियोगिता केति शिष्यः पृच्छति, समाधानं चाऽभावविरहात्मत्वमिति । वस्तुनिष्ठं प्रतियोगित्वं किमिति प्रष्टुराशयः, अभावविरहस्वरूपत्वं तदिति समाधातुराशयः । अभावविरहस्वरूपत्वं नाम अभावात्यन्ताभावरूपत्वमेव अत्यन्ताभावाभावत्वमिति यावत् । एतेन हि 'तदत्यन्ताभावाभावत्वम्' प्रतियोगिसामान्यलक्षणमित्युदयनाचार्याणामाशयः । अमुमाशयमनुरुध्य तदत्यन्ताभावाभावत्वं तन्निष्ठप्रतियोगिताया लक्षणमिति पर्यवस्यति । लक्षणञ्चेदं पुरस्कृत्य घटभेदात्यन्ताभावीयघटभेदनिष्ठप्रतियोगितायाः घटभेदात्यन्ताभावाभावत्वमेव लक्षणं वक्तव्यं तच्च घटभेदस्य घटभेदात्यन्ताभावाभावानात्मकत्वे न सम्भवतीत्युदयनाचार्योक्तं प्रतियोगित्वलक्षणं घटभेदात्यन्ताभावीयघटभेदनिष्ठप्रतियोगितायां भवत्यव्याप्तमतिव्याप्तं च भवति घटभेदात्यन्ताभावीयप्रतियोगितालक्षणानाक्रान्ते घटत्वात्यन्ताभावे घटभेदीयप्रतियोगित्वलक्षणानाक्रान्ते घटभेदाभावत्वरूपे घटत्वे च ।

अत्र घटभेदात्यन्ताभावीयप्रतियोगित्वलक्षणस्य घटभेदात्यन्ताभावाभावत्वस्य घटभेदात्मकलक्ष्यमात्रे विरहेणासम्भवस्यैव वक्तव्यतयाऽव्याप्त्युद्भावनमयुक्तमिति शङ्का, अभावाभावत्वरूपाभावप्रतियोगित्वसामान्यलक्षण एवाव्याप्तेरभिधानमिति स्वीकृत्य निरसनीया । यदि हि स्वीकारोऽयं घटत्वात्यन्ताभावे घटत्वे च क्रमशो घटत्वात्यन्ताभावाभावाभावस्वरूपे, घटत्वात्यन्ताभावाभावस्वरूपे चाऽतिव्याप्त्युद्भावनानौचित्येनोपेक्ष्य इति मन्यते तदैकमात्रलक्ष्यकलक्षणस्थले लक्ष्यतावच्छेदकसामानाधिकरण्येन लक्षणासत्त्वस्यैवाव्याप्तिपदार्थतयाऽसम्भवपदार्थतया च प्रकृतेऽव्याप्त्यभिधानमर्थतोऽसम्भवाभिधानपरमेवेत्यवबुद्ध्यैकमात्रलक्ष्यकलक्षणासम्भवस्याव्याप्तिसामनैयत्येनाव्याप्तिप्रदर्शनमसम्भवप्रदर्शनस्यापि सूचकमिति वा विभाव्य शङ्केयमपाकरणीया ।

अधुना घटभेदात्यन्ताभावाभावस्य, अत्यन्ताभावाभावस्य प्रतियोगिस्वरूपत्ववद् घटभेदस्वरूपत्वमस्त्येवेति साधितम् । तेन च घटभेदप्रतियोगित्वं घटभेदाभावात्मके घटत्वेऽपि विद्यत इति स्फुटीभवति । तदनु साध्यीयाऽत्यन्ताभावत्वनिरूपितघटत्वनिष्ठप्रतियोगिताया अवच्छेदकसम्बन्धत्वस्य समवायेऽक्षुण्णतया तेन सम्बन्धेन साध्याभावस्य घटत्वस्याधिकरणं घटमादाय घटभेदसाध्यके पटत्वहेतुकस्थले घटत्वत्वहेतुकस्थले च लक्षणसमन्वयसौलभ्येन नाऽव्याप्तिसम्भावनेति निर्णीतम् । परमनया दिशा घटत्वत्वेन रूपेण घटत्वस्य योऽत्यन्ताभावो घटत्वन्नास्तीति प्रतीतिसिद्धस्तस्यापि घटभेदस्वरूपत्वमापद्यत इति केषाञ्चिदनुयोगस्तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्यैव तत्

स्वरूपत्वमिति पथा घटभेदात्यन्ताभावत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाव एव घटभेद स्वरूप इत्यभ्युपगमेन निरसनीयः। अभ्युपगमश्चायं किञ्चिद्विशेष्यकघटभेदत्वावच्छिन्नघटभेदनिष्ठप्रकारताकनिश्चयदशायामेव घटभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रतियोगिताकाभावप्रकारकघटभेदाभावाभाववानित्याकारकशब्दाभिलापरूपव्यवहारानुरोधेन मन्यत इति ध्येयम्। समनियताभावैक्यवादिनां यज्ञपत्युपाध्यायानां मते तु धर्मिभेदधर्मात्यन्ताभावयोस्तुल्यदेशवृत्तिकतया सामनैयत्यस्य स्फुटत्वेन घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्य घटभेदसमनियतस्य घटभेदस्वरूपत्वमिष्टमेवेत्यनुयोगोऽयं निरवकाश एव।

न चात्यन्ताभावत्वनिरूपितसाध्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावधिकरणत्वविवक्षायां यत्र समवायेन प्रमेयः साध्यते ज्ञानत्वञ्च हेतुस्तत्र सद्धेतुकस्थले साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्नसाध्यतावच्छेदकप्रमेयत्वावच्छिन्नप्रमेयनिष्ठप्रतियोगिताको यः साध्याभावः समवायेन प्रमेयन्नास्तीति प्रतीतिसिद्धः समवायेन प्रमेयाभावात्मकस्तस्यात्यन्ताभावत्वनिरूपितसाध्यीयप्रतियोगितावच्छेदकसम्बन्धेनैवाधिकरणं ग्राह्यम्, तथा च समवायसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रमेयनिष्ठप्रतियोगिताकस्य समवायेन प्रमेयाभावात्मकस्य साध्याभावस्य कालिकेन योऽभावः स स्वतन्त्र एकोऽभावः समवायसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावात्मकस्तादृशप्रमेयाभावाभावरूपः। अयञ्च वस्तुमात्रस्यैव प्रमेयतया यत्किञ्चित्प्रमेयात्मकसाध्यरूपः। अस्य च प्रतियोगितायाः कालिकसम्बन्धावच्छिन्नत्वं स्फुटम्, समवायेन प्रमेयाभावात्मकस्य साध्याभावस्य कालिकसम्बन्धेनैव प्रकृतेऽभावग्रहणात्। एवं सति यत्किञ्चित्साध्यत्वे समवायेन प्रमेयाभावस्य कालिकेनाभावमादाय तदीयप्रतियोगितावच्छेदकसम्बन्धस्य कालिकस्य साध्यीयप्रतियोगितावच्छेदकसम्बन्धत्वं सूपपन्नम्, अतः सम्बन्धेनानेन साध्याभावस्य समवायेन प्रमेयाभावात्मकस्याधिकरणं नित्येषु कालिकायोगाद् जन्यमात्रान्तर्गतं जन्यज्ञानमपि, तन्निरूपितहेतुतावच्छेदकज्ञानत्वत्वावच्छिन्नाधेयतानिरूपिताधिकरणतानिरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपसम्बन्धेन वृत्तित्वस्यैव ज्ञानत्वहेतौ सत्त्वेनाव्याप्तिरिति वाच्यम्, साध्यतावच्छेदकसंसर्गेण वृत्तिमत्त्वस्य साध्यीयत्वघटकीभूतसाध्ये विशेषणात्।

अयमाशयः—साध्याभावाधिकरणत्वं साध्यीयप्रतियोगितावच्छेदकसम्बन्धेनैव विवक्ष्यते परं सम्बन्धस्यास्य कुक्षौ प्रविष्टे साध्यीयत्वे, साध्यं साध्यतावच्छेदकसम्बन्धेन वृत्तिमदेवोपादेयम् । एवञ्च साध्यतावच्छेदकसम्बन्धेन वृत्तिमद् यत् साध्यन्तदीयप्रतियोगितावच्छेदकसम्वन्धेन निरुक्तसाध्याभावाधिकरणत्वस्यैष्टव्यतया प्रकृतस्थले समवायेन प्रमेयाभावात्मकस्य साध्याभावस्य कालिकेन योऽभावः स यद्यपि साध्यान्तर्गतोऽस्ति, परमभावरूपोऽयं साध्यतावच्छेदकसमवायसम्बन्धेन न कुत्रापि तिष्ठत्यभावस्य समवायसम्बन्धानङ्गीकारात्, अतोऽयं समवायेन प्रमेयाभावस्य कालिकेनाभावो यत्किञ्चित् साध्यरूपेण न ग्रहीतुं शक्यः, अपितु समवायेन प्रमेयाभावस्य स्वरूपेण योऽभावः स एव साध्यात्मना ग्राह्यः स्वरूपसम्बन्धेन गृहीतस्य तृतीयाभावस्य प्रतियोगिरूपत्वं लाघवानुरोधेन युक्तिसिद्धमिति दिशा तस्य प्रमेयात्मकप्रतियोगिरूपत्वेन साध्यसामान्यरूपस्य साध्यतावच्छेदकसमवायसम्बन्धेन वृत्तिमत्त्वात्, एतन्निरूपितप्रतियोगितावच्छेदकसम्बन्धश्च स्वरूप एव, समवायेन प्रमेयाभावस्य स्वरूपेणैव गृहीतस्याभावस्य साध्यात्मकप्रमेयरूपत्वात् ।

तथा च साध्यतावच्छेदकसम्बन्धेन वृत्तिमत्साध्यीयप्रतियोगितावच्छेदकसम्बन्धत्वं स्वरूपसम्बन्धस्यैव नान्यस्य कालिकादेः, तेन हि समवायेन प्रमेयाभावात्मकसाध्याभावाधिकरणत्वं सामान्यादेरेव न तु ज्ञानस्य सामान्यादिषु समवायेन कस्यापि वृत्तिताया अनभ्युपगमात् । तथा सति तादृशसामान्यादिनिरूपितवृत्तितायाः, हेतुतावच्छेदकज्ञानत्वत्वावच्छिन्नाधेयतानिरूपितज्ञाननिष्ठाधिकरणतानिरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपसम्बन्धस्य व्यधिकरणसम्बन्धतया सम्बन्धेनानेन हेतौ ज्ञानत्वे तस्या अभावः स्फुट इति ।

अथैवमपि विषयितासम्बन्धेन प्रमेयसाध्यकस्थले समवायेन ज्ञानत्वे सद्धेतावव्याप्तिदुर्वारा, विषयितासम्बन्धेन प्रमेयप्रतियोगिकस्य प्रमेयाभावस्य प्रकृते साध्याभावतया तस्य कालिकेन योऽभावः सः एकः स्वतन्त्रोऽभावः, प्रमेयात्मकयत्किञ्चित्साध्यस्वरूपश्च, अस्य च साध्यतावच्छेदकविषयितासम्बन्धेन स्वविषयकज्ञानादिषु सविषयकेषु वृत्तिमत्वमपि स्पष्टम् । एवञ्च साध्यतावच्छेदकविषयितासम्बन्धेन वृत्तिमद्यत्किञ्चित्साध्यरूपेणामुमभावं विषयित्वसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नप्रमेयनिष्ठप्रतियोगिताकाभावत्वावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताकं सङ्गृह्य तदीयप्रतियोगितावच्छेदककालिकसम्बन्धेन विषयितया

प्रमेयाभावात्मकस्य साध्याभावस्य यदधिकरणं जन्यान्तर्गतं जन्यज्ञानम् तन्निरूपितवृत्तिताया एव निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेन ज्ञानत्वहेतौ सत्त्वादिति प्रश्नः अवतरति चेत्, साध्याभावाधिकरणताया नियामकसम्बन्धदिशि साध्ये साध्यतावच्छेदकसम्बन्धेन वृत्तिमत्त्वविशेषणमपहाय, प्रतियोगितायां साध्यसामान्यनिरूपितत्वं विवक्षणीयम् तेन च यत्किञ्चित्साध्यनिरूपितप्रतियोगिताया अनुपादेयतया समवायेन प्रमेयः साध्यताम् विषयितया वा, निरुक्तसाध्याभावस्य कालिकेनाभावात्मकं प्रमेयत्वेन यत्किञ्चित्साध्यान्तर्गतं साध्यत्वेनाङ्गीकृत्य तदीयप्रतियोगितावच्छेदकेन कालिकसम्बन्धेन निरुक्तसाध्याभावस्याधिकरणं ग्रहीतुमशक्यं सम्बन्धस्यास्य यत्किञ्चित्साध्यनिरूपितप्रतियोगितावच्छेदकत्वेन साध्यसामान्यनिरूपितप्रतियोगितानवच्छेदकत्वात् । अपितु समवायेन विषयितया वा प्रमेयाभावात्मको यः साध्याभावस्तस्य स्वरूपेण योऽभावस्तस्यानुपदोक्तदिशा प्रमेयात्मकप्रतियोगिस्वरूपत्वेन साध्यात्मकप्रमेयसामान्यस्वरूपतया तदीयप्रतियोगितावच्छेदकको यः स्वरूपसम्बन्धः स एव साध्यसामान्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धरूपेण प्रकृते स्वीकार्यस्तेन च निरुक्तसाध्याभावाधिकरणं ज्ञानत्वस्य हेतोः समवायेनाधिकरणं ज्ञानं कदापि न भविष्यति ज्ञाने समवायेन विषयितया च प्रमेयस्य विद्यमानत्वात् । समवायेन प्रमेयो द्रव्यगुणकर्मस्वेव तिष्ठतीति समवायेन प्रमेयाभावस्य स्वरूपेणाधिकरणं तदतिरिक्तं सामान्यादिकम् । विषयितया प्रमेयस्य च सविषयकेषु ज्ञानेच्छाकृतिद्वेषेष्वेव सत्त्वेन विषयितया[१] प्रमेयाभावस्य स्वरूपेणाधिकरणं सविषयकज्ञानेच्छाकृतिद्वेषान् विहाय सर्वं भविष्यति । तथा सति निरुक्तसाध्याभावाधिकरणं यथायोग्यं यत्किञ्चिद् गृह्यतां परं तन्निरूपितवृत्तिताया निरुक्तवृत्तित्वीयस्वरूपसम्बन्धस्य व्यधिकरणतया तेन सम्बन्धेन तस्या अभावस्य ज्ञानत्वहेतौ सत्त्वेन नायं प्रश्नः स्थितिं लभते ।

अत्र प्रतियोगितायां साध्यसामान्यीयत्वं किमिति जिज्ञासा यावत्साध्यनिरूपितत्वं तदिति स्वीकृत्य नोपशमनीया एकव्यक्तिसाध्यकेषु तद्रूपवान् तद्रसादित्यादिस्थलेषु यावत्साध्याप्रसिद्ध्याव्याप्तेः, यावत्वस्यापेक्षाबुद्धिविशेषविषयत्वरूपस्यापेक्षाबुद्धिव्यक्तीनां भेदेन भिन्नतया गौरवाच्च । किन्तु स्वानिरूपकसाध्यकभिन्नत्वरूपं तदिति स्वीकृत्यैवोपशमनीया। एवं सति स्वानिरूपकसाध्यकं यत् तद्भिन्नत्वं प्रतियोगितायामिष्टमिति स्पष्टम् । स्वानिरूपकसाध्यकमित्यत्र त्रिपद-

---

१. विषयितासम्बन्धेन रूपत्वावच्छिन्नस्य ज्ञानादेः। चि० दी० जा० पृ० २०७

व्यधिकरणो बहुव्रीहिः। स्वस्यानिरूपकं साध्यं यस्य तत् स्वानिरूपकसाध्यकमिति विग्रहः। स्वपदघटितेषु बहुव्रीहिसमासेष्वेवं विधेषु स्वपदबोध्यस्यैवान्यपदार्थत्वं फलतीति प्रकृते स्वपदबोध्यं प्रतियोगित्वमेवान्यपदार्थस्तेन हि स्वं प्रतियोगित्वं तस्यानिरूपकं साध्यं यस्य स्वस्य एवं भूतं यद्यत् स्वं तावद्भेदकूटवत्वं यत्र प्रतियोगितायां सैव प्रतियोगिता साध्यसामान्यीयत्वेनोपादेया, तदवच्छेदकसम्बन्धश्च साध्याभावाधिकरणताया नियामक इति पर्यवस्यति। पर्वतो वह्निमान् धूमादित्यादिषु प्रसिद्धेषु स्थलेषु संयोगेन वह्न्यभावात्मके साध्याभावे, संयोगेन वह्न्यभावस्य स्वरूपेण योऽभावः प्रतियोगिस्वरूपत्वेन साध्यात्मकवह्निस्वरूपस्तस्य प्रतियोगिता विद्यते, इयं साध्यसामान्यीयप्रतियोगितापदेन गृह्यते, अस्यां स्वानिरूपकसाध्यकभिन्नत्वस्य सत्त्वात्।

अत्र स्वपदेन इयं साध्यसामान्यनिरूपिताप्रतियोगिता ग्रहीतुमशक्या तस्याः साध्यात्मकसकलवह्निनिरूपितत्वेन तदनिरूपकस्य साध्यस्याप्रसिद्धेः। किन्तु घटाद्यभावीयघटादिनिष्ठैव प्रतियोगिता स्वपदेन ग्राह्या तदनिरूपकत्वस्य वह्न्यात्मके साध्ये स्फुटत्वात् तस्या अनिरूपकं वह्न्यात्मकं साध्यं यस्य स्वस्य एवं भूतं यद्यत् स्वं तत् तद् वह्न्यभावनिष्ठां प्रतियोगितां परित्यज्य जगति विद्यमानं सर्वं प्रतियोगित्वं प्रातिस्विकरूपेण भविष्यति, तावद्भेदकूटः तत्प्रतियोगिता न, तत् प्रतियोगिता न इत्येवं रूपेण बहूनां भेदानां समूहः तद्वत्त्वं वह्न्यभावनिष्ठायां वह्निनिरूपितप्रतियोगितायामेव नान्यत्र। तथा च स्वं यत् घटाद्यभावनिष्ठं घटादिप्रतियोगित्वं तस्याऽनिरूपकं वह्न्यात्मकं साध्यं यस्य स्वस्य घटाद्यभावादिनिष्ठतत्तत्प्रतियोगित्वादेः एवं भूतं यद्यत् स्वं घटाद्यभावादिनिष्ठं तत्तत्प्रतियोगित्वं तावद्भेदकूटवत्त्वं वह्न्यभावात्मकसाध्याभावनिष्ठप्रतियोगितायां विद्यमानं साध्यसामान्यीयत्वमिति स्फुटम्। अतः साध्यसामान्यीयप्रतियोगितां संयोगेन वह्न्यभावे विद्यमानां सङ्गृह्य तदवच्छेदकस्वरूपसम्बन्धेन साध्याभावस्य संयोगेन वह्न्यभावस्याधिकरणं ह्रदादिकमादाय लक्षणसमन्वयः सुकरः।

प्रमेयसाध्यके ज्ञानत्वहेतुके प्रस्तुतस्थले च समवायेन विषयितया वा प्रमेयाभावात्मकस्य साध्याभावस्य कालिकेनाभावात्मकयत्किञ्चित्प्रमेयात्मकसाध्यनिरूपिता प्रतियोगिता स्वानिरूपकसाध्यिकैव, समवायेन विषयितया वा प्रमेयाभावस्य कालिकेन योऽभावस्तदात्मकप्रमेयातिरिक्तघटपटादिप्रमेयाणां प्रमेयत्वेन साध्यकोटौ प्रविष्टानां तदनिरूपकत्वात्। अतः तस्याः साध्यसामान्यीयत्वेन

ग्रहणासम्भवान्निरुक्तप्रमेयाभावात्मकसाध्याभावस्य स्वरूपेण योऽभावः सकलप्रमेयरूपस्तदीयप्रतियोगितामादायैव लक्षणं पूर्वप्रदर्शितदिशा समन्वेतव्यम्। इयं च प्रतियोगिता स्वानिरूपकसाध्यकभिन्नत्वेन साध्यसामान्यीया विद्यत एव, अस्याः सकलप्रमेयनिरूपितत्वेन स्वानिरूपकसाध्यकमित्यत्र स्वपदेन ग्रहणासम्भवात्।

साध्यसामान्यीयत्वस्येदं निर्वचनं स्वत्वघटितत्वेन अननुगतमिति प्रश्नस्तु प्रतियोगितायां साध्यतावच्छेदकविशिष्टत्वमेव साध्यसामान्यीयत्वं साध्यतावच्छेदकवैशिष्ट्यञ्च स्वसमानाधिकरणभेदप्रतियोगितानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नावच्छेदकत्वाभाववत्वसम्बन्धेनेति साध्यसामान्यीयत्वपरिष्कारेण समाधेयः। इदञ्चानुगतं साध्यसामान्यीयत्वं यत्किञ्चित्साध्यनिरूपितप्रतियोगितायामसम्भवम्, तत्र स्वसमानाधिकरणभेदप्रतियोगितानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नावच्छेदकत्वाभाववत्वसम्बन्धेन साध्यतावच्छेदकवैशिष्ट्यस्यासत्त्वात्।

तथा हि अत्र प्रमेयसाध्यकस्थले समवायेन विषयितया वा प्रमेयाभावस्य कालिकेनाभावात्मकयत्किञ्चित्साध्यनिरूपिता समवायेन विषयितया वा प्रमेयाभावे विद्यमाना प्रतियोगिता न साध्यतावच्छेदकप्रमेयत्वविशिष्टा, साध्यतावच्छेदकं यत् प्रमेयत्वं तस्याऽधिकरणं यथा समवायविषयित्वान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावत्वावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावात्मको यः कश्चन प्रमेयस्तथैव घटपटाद्यात्मकप्रमेयोऽपि तत्र निरूपकत्वसम्बन्धेन, समवायेन विषयितया वा प्रमेयाभावस्य कालिकेनाभावात्मकप्रमेयनिरूपिता प्रतियोगिता नास्त्येव, अस्या निरूपकत्वस्य समवायेन विषयितया वा प्रमेयाभावस्य कालिकेनाभावात्मकप्रमेय एव सत्त्वात्। एवञ्च घटाद्यात्मकप्रमेये निरूपकत्वसम्बन्धेन, समवायविषयित्वान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावत्वावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावीयप्रतियोगितावान्नेति भेदस्य सत्त्वेन तादृशाभावात्मकयत्किञ्चित्प्रमेयनिरूपितप्रतियोगितायां साध्यतावच्छेदकप्रमेयत्वाधिकरणघटादिवृत्तिभेदीयप्रतियोगितानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नावच्छेदकत्वस्यैव सत्त्वात्।

अत्र साध्यतावच्छेदकाधिकरणवृत्तित्वं भेद उद्देश्यतावच्छेदकावच्छेदेन विधेयभाननियममङ्गीकृत्य सर्वेष्वपि साध्यतावच्छेदकाधिकरणेषु वृत्तित्वरूपं बोद्धव्यम्, तथा च साध्यतावच्छेदकाधिकरणत्वव्यापको यो भेदस्तादृशभेदीयप्रतियोगितानिरूपित-निरूपकत्वसम्बन्धावच्छिन्नावच्छेदकत्वाभाववत्त्व-सम्बन्धेन

साध्यतावच्छेदकविशिष्टप्रतियोगिता साध्यसामान्यीयेति प्रकृते निर्धारणीयम्, तेन साध्यतावच्छेदकप्रमेयत्वाधिकरणं निरुक्तप्रमेयाभावात्मकसाध्याभावस्य कालिकेनाभावात्मकं यत्किञ्चित् प्रमेयमादाय तत्र निरूपकत्वसम्बन्धेन तादृशयत्किञ्चित्साध्यनिरूपितप्रतियोगितावान्नेति भेदस्यासत्त्वेन, तस्यां यत्किञ्चित्साध्यनिरूपितप्रतियोगितायामपि साध्यतावच्छेदकप्रमेयत्वाधिकरणवृत्तिभेदीयप्रतियोगितानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नावच्छेदकत्वाभावस्य सत्त्वेन निरुक्तसम्बन्धेन साध्यतावच्छेदकवैशिष्ट्यस्याक्षततया साध्यसामान्यीयत्वमस्त्येव, तेन च तदवच्छेदककालिकसम्बन्धेन साध्याभावाधिकरणं जन्यज्ञानमादायाऽव्याप्तिस्तदवस्थैवेति केषाञ्चिदाक्षेपो निरस्तो भवति।

एतावता विवेचनेन साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन[१] साध्याभावाधिकरणं विवक्षणीयमिति स्पष्ट्यते। परमथाप्येकस्मिन् स्थलविशेषेऽव्याप्तिर्दुरुद्धरा। तच्च स्थलमिदम्—कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगिताकाभाववान्[२] आत्मत्वादिति। अत्रैतादृशविशेष्यत्वप्रतियोगिकोऽभावः स्वरूपेण साध्यते। आत्मत्वं च समवायेन हेतुः। आत्मत्वप्रकारिका प्रमा 'अयमात्मा' 'आत्मा' इत्याकारिका वा। एतादृशप्रमाविशेष्यता स्वरूपसम्बन्धेन आत्मन्येव, तथा चात्मत्वप्रकारकप्रमाविशेष्यतायाः स्वरूपसम्बन्धेनाभावस्यात्मन्यसम्भवेन तस्यास्तेन सम्बन्धेनाभावस्तत्र साध्यते चेन्नेदमात्मत्वहेतुकस्थलं सद्धेतुकस्थलं भविष्यत्यतः कालिकसम्बन्धेनात्मत्वप्रकारकप्रमाविशेष्यताया अभावः स्वरूपेण प्रकृते साध्यते। नित्येषु कालिकायोगादात्मत्वप्रकारकप्रमाविशेष्यता कालिकसम्बन्धेनात्मनि न तिष्ठत्यपितु यस्मिन् काले अयमात्मा इत्याकारिका प्रमा जायते तस्मिन् काले विद्यमानेष्वनित्येषु पदार्थेष्वियं कालिकेन तिष्ठति। एवञ्चात्मत्वप्रकारकप्रमाविशेष्यतायाः कालिकेनाभावस्यात्मत्वनियततया यत्र-यत्र समवायेनात्मत्वं तत्र-तत्र स्वरूपेण कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगिताकाभाव इति साहचर्यनिय-

---

१. साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरणत्वं वक्तव्यम्। व्या० पञ्च० पृ० १०

२. कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य विशेषणताविशेषेण साध्यत्वे आत्मत्वहेतावव्याप्त्यापत्तेः। व्या० पञ्च० पृ० १६

मस्याक्षुण्णतया, यद्यात्मानमिदन्त्वेन पक्षीकृत्य तत्र कालिकसम्बन्धावच्छिन्ना यात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठा प्रतियोगिता तादृशप्रतियोगिताकाभावः समवायेन आत्मत्वं हेतूकृत्य साध्यते, तर्हीदं सद्धेतुकस्थलमिति निर्विवादम् ।

अत्र अव्याप्त्युद्भावनप्रकारश्चायम्—साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्य साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनाधिकरणं ग्राह्यमित्यनुपदमेव निर्णीतम् । तदनुसारं कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगिताकाभावस्य स्वरूपेणाभाव एव प्रकृते साध्याभावः स चात्मत्वप्रकारकप्रमाविशेष्यत्वरूपः । अस्य साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनाधिकरणं किमिति चिन्तायां साध्यसामान्यीयप्रतियोगिता कुत्र तदवच्छेदकसम्बन्धश्च क इति प्राक् निश्चेतव्यम् ।

प्रकृते साध्यसामान्यं कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगिताकाभाव एव । तन्निरूपिता प्रतियोगिता तादृशाभावस्य योऽभावस्तस्य पुनर्योऽभावस्तस्य तृतीयाभावस्य साध्यसामान्यस्वरूपत्वमुपपा द्वितीयाभावे स्वीकर्तुं शक्या । तथा च कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रम विशेष्यत्वनिष्ठप्रतियोगिताकाभावस्य साध्यत्वेनेष्टस्य कालिकेनाभावो गृह्य चेदयं कालिकसम्बन्धावच्छिन्नप्रतियोगिताको द्वितीयोऽभावोऽतिरिक्त एव अस् स्वरूपसम्बन्धेन गृहीतस्तृतीयोऽभावः प्रथमाभावात्मकप्रतियोगिरूपो भविष्या प्रथमाभावश्च कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतिये गिताकाभाव एव । स एव च साध्यःतथा चात्र साध्यस्वरूपस्यास्य तृतीयाभावस द्वितीयाभावे विद्यमाना प्रतियोगिता साध्यसामान्यीयेति निश्चितम् । द्वितीयाभाव स्यास्य स्वरूपेणैवाभावः प्रथमाभावात्मकप्रतियोगिरूपो भवतीति दिशा द्वितीय भावे विद्यमानायाः साध्यसामान्यीयप्रतियोगिताया अवच्छेदकः सम्बन्धश्च स्वरू एवेत्यपि सुनिश्चितम् । एवं सति साध्यसामान्यीयप्रतियोगितावच्छेदकस्वरूपस म्बन्धेन साध्याभावाधिकरणमात्मैव तन्निरूपितवृत्तिताया एव निरुक्तवृत्तित्वीर स्वरूपसम्बन्धेनात्मत्वहेतौ सत्तयाऽव्याप्तिरिति ।

इयञ्चाऽव्याप्तिः साध्यसामान्यीयप्रतियोगितायां साध्यतावच्छेदकसम्बन्धाव च्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभाववृत्तित्वविशेषणेन वारणीया । तथाहि—प्रस्तुतस्थलेऽनुपदमव्याप्तिप्रदर्शनदिशा यदि कालिकसम्ब न्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगिताकाभावस्य साध्यत्वेना-

भीप्सितस्य कालिकेनाभावमादाय तस्य च स्वरूपेणाभावस्य साध्यसामान्यात्मकस्यात्र द्वितीयाभावे कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगिताकाभावस्य कालिकेनाभावे विद्यमाना प्रतियोगिता गृह्यते तर्हीयं तृतीयाभावस्य साध्यसामान्यात्मकस्य द्वितीयाभावे विद्यमाना प्रतियोगिता साध्यसामान्यीया यद्यप्यस्ति, परं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिनसाध्यनिष्ठप्रतियोगिताकाभाववृत्तिर्नास्ति, प्रकृते साध्यतावच्छेदकसम्बन्धत्वस्य स्वरूपसम्बन्ध एव सत्त्वाद् द्वितीयाभावस्य चास्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकत्वात्। अतः साध्यत्वेनेष्टस्य प्रथमाभावस्य तादृशविशेष्यत्वप्रतियोगिकाभावस्य द्वितीयोऽभावः स्वरूपसम्बन्धेनैव ग्राह्यः, अयञ्च स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको द्वितीयोऽभावः साध्यतावच्छेदकतादृशविशेष्यत्वप्रतियोगिकाभावत्वावच्छिन्नसाध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकतया निरुक्तसाध्याभावरूपः। अस्मिंश्चास्य यस्तृतीयाभावस्तस्य प्रतियोगिता सूपपाद्या भविष्यति, परमियं प्रतियोगिता द्वितीयाभावात्मके साध्याभावे विद्यमाना साध्यसामान्यनिरूपितैवापेक्षिता, तेन हि द्वितीयाभावस्याभावस्तथा ग्राह्यो येन सः साध्यसामान्यरूपः स्यात्। तदर्थं तादृशविशेष्यत्वाभावात्मकस्य साध्यस्य स्वरूपेण योऽभावः साम्प्रतं गृहीतस्तस्यात्मत्वप्रकारकप्रमाविशेष्यतारूपप्रतियोगिस्वरूपतया कालिकेनैव गृहीतस्तदभावस्तृतीयाभावात्मकः कालिकसम्बन्धावच्छिन्ना यात्मत्वप्रकारकप्रमाविशेष्यतानिष्ठा प्रतियोगिता तादृशप्रतियोगिताकाभावात्मकसाध्यरूपो भविष्यति नान्यथा, एवं ह्यगत्या द्वितीयाभावस्य कालिकेनैवाभावो ग्राह्यस्तस्य च तृतीयाभावस्य साध्यसामान्यात्मनः द्वितीयाभावे या प्रतियोगिता सा साध्यसामान्यनिरूपिता सती निरुक्तसाध्याभाववृत्तिरपि भविष्यति। अस्याः प्रतियोगिताया अवच्छेदकः सम्बन्धः कालिक एव द्वितीयाभावस्यात्मत्वप्रकारकप्रमाविशेष्यत्वरूपस्य कालिकेनैवाभावस्य साध्यसामान्यात्मकत्वात्। एवं स्थिते निरुक्तसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन कालिकेन, निरुक्तसाध्याभावस्यात्मत्वप्रकारकप्रमाविशेष्यतारूपस्य अधिकरणमनित्यं यद् घटपटादिकं तन्निरूपितवृत्तिताया, हेतुतावच्छेदकात्मत्वत्वावच्छिन्नात्मत्वनिष्ठाधेयतानिरूपिताधिकरणतानिरूपित, हेतुतावच्छेदकसमवायसम्बन्धा-

वच्छिन्नवृत्तिताप्रतियोगिकस्वरूपसम्बन्धस्य व्यधिकरणसम्बन्धतया तेन तस्या अभावस्यात्मत्वे सद्धेतौ सत्त्वेन नाव्याप्तिः सम्भावयितुं शक्यत इति।

न चैवमपि यत्र तादात्म्येन घटः साध्यते तत्र एतत्वादिसद्धेतुकस्थले तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य घटभेदात्मकस्य, साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनाधिकरणमुपादेयं, तच्च न सम्भवति, घटभेदात्मकें साध्याभावे घटभेदाभावस्य घटत्वरूपतया घटत्वस्य प्रतियोगिता विद्यते न तु साध्यसामान्यात्मनो घटस्येति वाच्यम्, अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकस्वरूपत्ववत् प्रतियोगिस्वरूपत्वस्याप्यभ्युपगमेन[१] दोषस्यास्य वारणसम्भवात्। साध्याभावस्य घटभेदस्य योऽभावस्तस्य घटत्वसरूपत्ववत् घटस्वरूपत्वस्यापि स्वीकारेण साध्यसामान्यात्मकघटनिरूपितप्रतियोगितायाः साध्याभावात्मकघटभेदे वृत्तित्वस्य निष्प्रत्यूहत्वात्।

अत्र भेदाभावस्य प्रतियोगिस्वरूपत्वाभ्युपगमे घटान्योन्याभाववान् घटत्वत्वादित्वादिस्थलेषु साध्याभावो घटभेदाभावो घटस्वरूपोऽपि। तथा च घटमेव साध्याभावरूपेणादाय तत्र विद्यमानाया घटभेदात्मकसाध्यसामान्यनिरूपितायाः प्रतियोगिताया अवच्छेदकेन तादात्म्यसम्बन्धेन साध्याभावस्याधिकरणं ग्रहीतुं शक्यम्। एवं सति भेदाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वस्याप्यभ्युपगमेन प्रकृते साध्याभावस्याधिकरणं यदा गृह्यते तदा घटभेदात्मकसाध्यस्य योऽभावस्तस्य, प्रतियोगितावच्छेदकघटत्वस्वरूपत्वं स्वीकृत्य घटत्वमेव साध्याभावपदेन संग्राह्यम् तेन हि तस्य तादात्म्येनाधिकरणं घटत्वमेव तन्निरूपितवृत्तित्वस्यैव निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेन सद्धेतौ घटत्वत्वे सत्त्वेनाऽव्याप्तिरिति कथनं तु न ज्यायः, साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगिताया अत्यन्ताभावत्वनिरूपितत्वेन[२] पूर्वमेव विशेषणीयतयाऽव्याप्तेरस्याः शङ्कितुमप्यशक्यत्वात्, घटात्मकसाध्याभावे विद्यमानाया घटभेदात्मकसाध्यसामान्यनिरूपितप्रतियोगितायास्तादात्म्यसम्बन्धावच्छिन्नत्वेनात्यन्ताभावत्वनिरूपितत्वाभावात्।[३] तादात्म्यसम्बन्धानव-

---

१. प्रतियोगितावच्छेदकवत् प्रतियोग्यप्यन्योन्याभावाभावः। व्या० पञ्च० पृ० १७

२. इत्यञ्चात्यन्ताभावत्वनिरूपितत्वेनाऽपि। साध्यसामान्यीयप्रतियोगिता विशेषणीया। व्या० पञ्च० पृ० १७

३. भेदभिन्नाभावत्वं संसर्गाभावत्वम्, सदातनत्वविशिष्टं च तदेवात्यन्ताभावत्वम्, भेदत्वं तु संसर्गविधया तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वम्। चि० दी० जा० पृ० १७७

च्छिन्नत्वमेव प्रतियोगितायामत्यन्ताभावत्वनिरूपितत्वमिति पूर्वमेव स्फुटं प्रतिपादनाच्च ।

न चैवं घटान्योन्याभावसाध्यके कपालत्वहेतुके सद्धेतुकस्थले साध्याभावो घटभेदाभावः स च घटात्मकप्रतियोगिस्वरूपो घटत्वात्मकप्रतियोगितावच्छेदकस्वरूपश्च । उभयत्र साध्यसामान्यनिरूपितप्रतियागिताप्यस्ति, घटभेदघटत्वाभावयोः समनियततया घटभेदस्य घट इव घटत्वेऽपि प्रतियोगितासत्त्वस्य सम्मतत्वात्, परमनयोः प्रतियोगितयोर्मध्ये घटे विद्यमाना प्रतियोगिता साध्याभाववृत्तिरप्यत्यन्ताभावत्वनिरूपिता नास्ति तादात्म्यसम्बन्धावच्छिन्नत्वत्वात्, किन्तु घटत्ववृत्तिरेव साऽत्यन्ताभावत्वनिरूपिता तस्याः समवायसम्बन्धावच्छिन्नत्वात् । एवञ्च प्रस्तुतस्थलेऽत्यन्ताभावत्वनिरूपितसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितारूपेण घटत्ववृत्तिरेव प्रतियोगिता ग्रहीतुं योग्या तदनु तदवच्छेदकसमवायसम्बन्धेन साध्याभावस्याधिकरणग्रहणकाले साध्याभावरूपेण घट एव ग्राह्यस्तस्य घटात्मकस्य साध्याभावस्य समवायेनाधिकरणं कपालस्तन्निरूपितवृत्तित्वस्यैव निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेन कपालत्वहेतौ सत्त्वादव्याप्तिरिति वाच्यम् । यत् साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदको यः सम्बन्धस्तेन सम्बन्धेन तत्स्वरूपसाध्याभावाधिकरणनिरूपितवृत्तित्वस्य निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेनाभावस्य हेतौ विवक्षणात् तथा च लक्षणे साध्याभावाधिकरणकोटौ साध्याभावाधिकरणतानियामकसम्बन्धकोटौ च प्रविष्टेन साध्याभावपदेन एक एव साध्याभावो ग्राह्य इति पर्यवस्यति । एवं सत्यत्र कपालत्वहेतुके घटभेदसाध्यके स्थले साध्याभावाधिकरणतानियामकसम्बन्धदिशि साध्याभावपदेन घटत्वमेव ग्रहीतुं शक्यम्, तत्र विद्यमानाया एव घटभेदात्मकसाध्यसामान्यनिरूपितप्रतियोगिताया अत्यन्ताभावत्वनिरूपितत्वात् । अनन्तरं तादृशघटत्वात्मकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसमवायसम्बन्धेन घटत्वात्मकसाध्याभावस्यैवाधिकरणं ग्राह्यम्, तच्च घट एव न तु कपालम्, तन्निरूपितवृत्तिताया निरुक्तवृत्तित्वीयस्वरूपसम्बन्धस्य व्यधिकरणसम्बन्धतया तेन सम्बन्धेन तदभावः कपालत्वहेतावक्षत एवेति नाव्याप्तिः सम्भवति ।

अथैवं साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितायामत्यन्ताभावत्वनिरूपितत्वविशेषणं व्यर्थं, घटत्वत्वहेतुना घटभेदस्य साध्यतायां लक्षणे बारद्वयं प्रविष्टेन साध्याभावपदेनैकस्यैव साध्याभावस्य ग्रहीतुं शक्यतया साध्याभावाधिकरणतानियामकसम्बन्धदिशि साध्याभावपदेन घटे गृहीते तद्वृत्तिसाध्यसामान्यीयप्रतियो-

गितावच्छेदकसम्बन्धेन तादात्म्येन घटात्मकसाध्याभावस्यैवाधिकरणग्रहणात् साध्याभावाधिकरणं घट एव भविष्यति, तन्निरूपितवृत्तिताया निरूक्तवृत्तित्वीयस्वरूपसम्बन्धेनाभावो घटत्वत्वेऽक्षत एव। एवमेव यदि हि साध्याभावाधिकरणतानियामकसम्बन्धदिशि प्रविष्टेन साध्याभावपदेन घटत्वं गृह्यते, तदाऽपि तद्वृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धत्वस्य समवाय एव सत्त्वेन तेन सम्बन्धेन घटत्वात्मकसाध्याभावस्यैवाधिकरणग्रहणनियमानुसारं घटत्वस्य समवायेनाऽप्यधिकरणं घट एव भविष्यति, तन्निरूपितवृत्तिताया निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेनाभावो घटत्वत्वहेतौ विद्यत एवेत्यव्याप्तेरसम्भवादिति तु न चोद्यम्, अत्यन्ताभावत्वनिरूपितत्वविशेषणोपादानादेवाऽशयस्यास्य लाभसम्भवात्।

लक्षणानुगमस्त्वेवम्—'साध्यसामान्यीयप्रतियोगिताविशिष्ट, साध्याभावत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणताश्रयनिरूपितवृत्तिताया निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेनाभावो व्याप्तिः। प्रतियोगितावैशिष्ट्यञ्च साध्याभावत्वावच्छिन्ननिरूपकतायां, स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वसामानाधिकरण्योभयसम्बन्धेनेति। घटभिन्नं कपालत्वादित्यत्र साध्यसामान्यीयप्रतियोगितापदेन यथाकामं समवायसम्बन्धावच्छिन्ना घटत्वनिष्ठा, तादात्म्यसम्बन्धावच्छिन्ना घटनिष्ठा वा प्रतियोगिता गृह्यताम्, उभयथापि नाव्याप्तिसम्भवः। तथा हि, साध्यसामान्यीयप्रतियोगितापदेन घटत्वनिष्ठायाः समवायसम्बन्धावच्छिन्नायाः प्रतियोगितायाः सङ्ग्रहे, तदवच्छेदकसमवायसम्बन्धावच्छिन्नत्व, तत् सामानाधिकरण्योभयसम्बन्धेन तादृशप्रतियोगिताविशिष्टनिरूपकता घटत्व एव, तन्निरूपिताधिकरणताया घट एव सत्त्वात्, तदाश्रयनिरूपितवृत्तिताया निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेन व्यधिकरणेनाभावस्य कपालत्वहेतावक्षतत्वात्।

यदि हि साध्यसामान्यीयप्रतियोगितापदेन घटनिष्ठा प्रतियोगितोपादीयते तदापि तादृशप्रतियोगितावैशिष्ट्यस्य तदवच्छेदकतादात्म्यसम्बन्धावच्छिन्नत्वतत्सामानाधिकरण्योभयसम्बन्धेन घटनिष्ठायां तादात्म्यसम्बन्धावच्छिन्ननिरूपकतायामेव सम्भवेन तन्निरूपिताधिकरणताया घट एव विद्यमानतया, तदाश्रयघटनिरूपितवृत्तिताया निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेन व्यधिकरणेन कपालत्वहेतावभावस्य स्पष्टत्वात्।

घटान्योन्याभाववान् घटत्वत्वादित्यत्रापि साध्यसामान्यीयप्रतियोगितापदेन घटनिष्ठायां प्रतियोगितायां गृहीतायां तादृशप्रतियोगितावैशिष्ट्यस्य तदवच्छेदक-

सम्बन्धावच्छिन्नत्व-तत्सामानाधिकरण्यैतदुभयसम्बन्धेन तादात्म्यसम्बन्धावच्छिन्नघटत्वावच्छिन्ननिरूपकतायामेव सम्भवेन तन्निरूपिताधिकरणता घट एव स्वीकर्तुं शक्यते, तदाश्रयघटनिरूपितवृत्तिताया घटत्वत्वेऽभावसत्वान्नाव्याप्तिः।

एवमेव साध्यसामान्यीयप्रतियोगितापदेन समवायसम्बन्धावच्छिन्नाया घटत्वनिष्ठायाः प्रतियोगिताया उपादानेऽपि तद्वैशिष्ट्यं निरुक्तोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नायां घटत्वत्वावच्छिन्नायां घटत्वनिष्ठनिरूपकतायामेव सम्भवति। तन्निरूपिताधिकरणतायाश्च घट एव सत्त्वेन तदाश्रयघटनिरूपितवृत्तित्वाभावस्य घटत्वत्वेऽक्षततया नाव्याप्त्यवकाश इति बोध्यम्।

अत्र साध्यसामान्यीयप्रतियोगितावैशिष्ट्यस्य साध्याभावत्वावच्छिन्ननिरूपकतायां स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धमात्रेण स्वीकारे घटभेदसाध्यककपालत्वहेतौ नाव्याप्तिः वारयितुं शक्यते। साध्यसामान्यीयप्रतियोगितापदेन घटत्वनिष्ठायाः समवायसम्बन्धावच्छिन्नप्रतियोगिताया उपादातुं शक्यतया तद्विशिष्टसाध्याभावत्वावच्छिन्ननिरूपकतापदेन घटनिष्ठा कपालनिरूपिता समवायसम्बन्धावच्छिन्ना निरूपकताऽपि ग्रहीतुं शक्यते तन्निरूपितकपालनिष्ठाधिकरणताश्रयकपालनिरूपितवृत्तित्वस्यैव कपालत्वहेतौ सत्त्वात्। स्वसामानाधिकरण्यसम्बन्धेनाऽपि साध्यसामान्यीयप्रतियोगितावैशिष्ट्यविवक्षणे तु, साध्यसामान्यीयघटत्वनिष्ठसमवायसम्बन्धावच्छिन्नप्रतियोगिताधिकरणघटत्ववृत्तित्वस्य घटनिष्ठायां समवायसम्बन्धावच्छिन्ननिरूपकतायामसम्भवेनागत्या समवायसम्बन्धावच्छिन्नाया घटत्वत्वावच्छिन्नाया घटत्वनिष्ठाया निरूपकताया एव निरुक्तोभयसम्बन्धेन विशिष्टाया ग्राह्यतया तन्निरूपिताधिकरणताश्रयघटनिरूपितवृत्तित्वाभावस्य कपालत्वहेतौ सत्त्वेनाव्याप्त्युद्धारः सुलभः।

स्वसामानाधिकरण्यसम्बन्धेनैव निरुक्तप्रतियोगितावैशिष्ट्यस्य साध्याभावत्वावच्छिन्ननिरूपकतायां विवक्षणे तु घटभिन्नं कपालत्वादित्यत्र साध्यसामान्यीयघटनिष्ठप्रतियोगिताविशिष्टसाध्याभावत्वावच्छिन्ननिरूपकतापदेन समवायसम्बन्धावच्छिन्नां कपालनिष्ठाधिकरणतानिरूपितघटत्वावच्छिन्नां घटनिष्ठां निरूपकतां सङ्गृह्य तन्निरूपिताधिकरणताश्रयकपालनिरूपितवृत्तित्वस्यैव कपालत्वहेतौ सत्वेनाव्याप्तिर्दुरुद्धरैव स्यात्। स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्यापि निरुक्तप्रतियोगितावैशिष्ट्यनियामकत्वाभ्युपगमे तु साध्यसामान्यीयघटनिष्ठप्रतियोगि-

तासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नघटनिष्ठनिरूपकतायां सत्त्वेऽपि तस्यां साध्यसामान्यीयघटनिष्ठप्रतियोगितावच्छेदकतादात्म्यसम्बन्धानवच्छिन्नत्वस्यैव सत्त्वेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन निरुक्तप्रतियोगितावैशिष्ट्याभावादव्याप्तिवारणं सुशकमिति ध्येयम् ।

सिद्धान्तपक्षे द्वितीयकल्पोपन्यासः

एतावता साध्याभावाधिकरणं साध्याभाववृत्तिसाध्यसामान्यीयात्यन्ताभावत्वनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन विवक्षणीयमिति निर्धार्यते, घटभेदसाध्यकपटत्वहेतुकस्थले च घटभेदाभावाभावस्य घटभेदरूपत्वं स्वीकृत्य तत्प्रतियोगित्वं साध्याभावात्मकघटभेदाभावस्वरूपे घटत्व उपपाद्य चाऽव्याप्तिर्वार्यते, परं यो घटभेदाभावाभावं घटत्वात्यन्ताभावरूपमेव[1] मनुते तन्नये स्थलेऽस्मिन्नव्याप्तिवारणं दुःशकम् । तथाहि—अयं घटभेदाभावाभावस्य घटत्वात्यन्ताभावस्वरूपत्ववादी साध्यसामान्यस्य घटभेदस्य प्रतियोगितां घट एव स्वीकरोति । भेदाभावस्य प्रतियोगिस्वरूपत्वमपीति पूर्वप्रदर्शितदिशा घटस्यास्य घटभेदाभावात्मकतया साध्याभावस्वरूपत्वमपि । एवञ्च घटात्मकसाध्याभाववृत्तिघटभेदात्मकसाध्यसामान्यनिरूपिता प्रतियोगिता घटे तु सुलभा भवति, परं सेयं भेदीया प्रतियोगिता घटनिष्ठा यतस्तादात्म्यसम्बन्धावच्छिन्नाऽतोऽत्यन्ताभावत्वनिरूपिता नास्ति, तेन हि साध्याभावाधिकरणत्वनियामकानुपदोक्तसम्बन्धदिशि प्रविष्टप्रतियोगितापदेन नेयं प्रतियोगिता ग्रहीतुं शक्या । तथा चात्यन्ताभावत्वनिरूपितप्रतियोगित्वाप्रसिद्ध्याव्याप्तिः स्फुटैव । भेदाभावः प्रतियोगिवत् प्रतियोगितावच्छेदकस्वरूपोऽपीति मतमादृत्य भेदाभावात्मकसाध्याभावे घटत्वे त्वस्य मते घटत्वात्यन्ताभावस्यैव प्रतियोगिता विद्यते न तु घटभेदस्य साध्यस्य । एवं सति भेदाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वं स्वीकृत्याप्येतन्मतेऽत्यन्ताभावत्वनिरूपिता प्रतियोगिता तु घटत्वात्मकसाध्याभाववृत्तिनी भवति प्रसिद्धा, परं तस्या घटत्वात्यन्ताभावेनैव निरूपिततया घटभेदात्मकसाध्यसामान्यनिरूपितप्रतियोगित्वाप्रसिद्ध्या पुनरप्यव्याप्तिस्तदवस्थैव । अतः साध्याभावाधिकरणं साध्यताव-

---

१. अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वेन घटभेदस्य घटभेदात्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावरूपतया—नचान्यत्रात्यन्ताभावाभावस्य प्रतियोगिरूपत्वेऽपि घटादिभेदात्यन्ताभावत्वावच्छिन्नाभावो न घटादिभेदस्वरूपः किन्तु तत्प्रतियोगितावच्छेदकीभूतघटत्वात्यन्ताभावस्वरूप एवेति सिद्धान्त इति वाच्यम् । व्या० पञ्च० पृ० १३-१४

च्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववृत्ति यत् साध्यसामान्यीयमत्यन्ताभावत्वनिरूपितं प्रतियोगित्वम्, यच्च तादृशसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकत्वम्, एतदन्यतरावच्छेदकसम्बन्धेन[१] विवक्षणीयम् तथा सति घटभेदसाध्यके पटत्वे सद्धेतौ घटभेदाभावाभावस्य घटभेदस्वरूपत्वानभ्युपगन्तृमते साध्याभावे घटत्वे साध्यसामान्यीयप्रतियोगित्वविरहेऽपि, साध्यसामान्यीयप्रतियोगितावच्छेदकत्वस्याक्षततया तदवच्छेदकसमवायसम्बन्धेन साध्याभावस्य घटत्वस्याधिकरणे घटे पटत्वस्य निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेनावृत्तेर्नाव्याप्तिः। अत्र भेदद्वयावच्छिन्नप्रतियोगिताकभेदरूपस्यान्यतरत्वस्य लक्षणकुक्षौ प्रवेशेन गौरवमित्याक्षेपस्तु, फलमुखगौरवस्यादोषत्वमन्यतरत्वस्याखण्डोपाधित्वं[२] वा स्वीकृत्य निरसनीयः।

साध्याभावाधिकरणपरिष्कारः

नचैवमपि गुणकर्मान्यत्वविशिष्टसत्त्वाभाववान् गुणत्वादिति पूर्वप्रदर्शितस्थलेऽव्याप्तिस्तदवस्थैव। साध्याभावो विशिष्टसत्ताभावाभावो यथा विशिष्टसत्तारूपस्तथैव विशिष्टस्य शुद्धानतिरेकात् सत्तारूपोऽपि तस्य साध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नसाध्यतावच्छेदकगुणकर्मान्यत्वविशिष्टसत्त्वाभावत्वावच्छिन्नप्रतियोगिताकविशिष्टसत्तासत्तान्यतरवृत्तिसाध्यसामान्यीयात्यन्ताभावत्वनिरूपितप्रतियोगितावच्छेदकसमवायसम्बन्धेनाधिकरणं गुणोऽपि तन्निरूपितवृत्तित्वस्यैव निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेन सद्धेतौ गुणत्वे सत्त्वादिति वाच्यम्, लक्षणकुक्षौ साध्याभावाधिकरणमित्यत्र साध्याभावनिष्ठत्वेनाधेयता प्रवेशमुपेक्ष्य साध्याभावत्वावच्छिन्नत्वेनैवाधेयताप्रवेशस्येष्टत्वात्। तथा च प्रकृते साध्याभावत्वस्य गुणकर्मान्यत्ववैशिष्ट्यसत्तात्वोभयरूपतया निरुक्तसाध्याभाववृत्तिसाध्यसामा-

---

१. यद्वा साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभावृत्तिसाध्यसामान्यीयप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं विवक्षणीयम्। व्या० पञ्च० पृ० १८

२. जातिभिन्नधर्ममात्रमुपाधिर्विवक्षितः परन्तु विशेषत उपाधिर्द्विविधः। सखण्डोपाधिरखण्डोपाधिश्च। सखण्डोपाधिस्तु बहुपदार्थघटितो धर्मः स च धर्मः क्लृप्तपदार्थान्तर्भूतः, यथा मङ्गलानुमाने उक्तशिष्टत्वादिकम्, वक्ष्यमाणभावत्वाभावत्वशरीरत्वेन्द्रियत्वविषयत्वकारणत्वाकाशत्वकालत्वदिक्त्वादयश्च। अखण्डोपाधिश्चानिर्वचनीयो धर्मः स चातिरिक्तधर्म एवेति। तर्क० सं० सि० चं० पृ० ७

न्यीयप्रतियोगितावच्छेदकसमवायसम्बन्धावच्छिन्नसाध्याभावत्वावच्छिन्नाधेयता-पदेन गुणकर्मान्यत्ववैशिष्ट्यसत्तात्वावच्छिन्नाधेयताया एव ग्रहीतुं शक्यतया, तन्निरूपिताया अधिकरणतायाश्च द्रव्य एव सम्भवेन तदाश्रयनिरूपितवृत्तित्वस्य निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेन गुणत्वेऽभावान्नाव्याप्त्यवकाश इति बोध्यम् ।

नन्वेवमपि समवायेन कपिसंयोगसाध्यके एतद्वृक्षत्वहेतावव्याप्तिः साध्यस्य कपिसंयोगस्याव्याप्यवृत्तितया[१] तदभावस्याप्येतद्वृक्षत्वाधिकरणैतद्वृक्षे निरुक्त-सम्बन्धेन स्वरूपेण मूलावच्छेदेन विद्यमानतया तन्निरूपितवृत्तित्वस्यैव निरुक्तवृ-त्तित्वीयस्वरूपसम्बन्धेनैतद्वृक्षत्वहेतौ सत्त्वादिति तु न कमनीयम्, निरुक्त-साध्याभावत्वावच्छिन्न-निरुक्तसंसर्गावच्छिन्ननिरूपकतानिरूपिताधिकरणतायां निरवच्छिन्नत्वस्य निवेशनीयत्वात् ।

प्रस्तुतस्थले शाखायां[२]वृक्षः कपिसंयोगी न तु मूल इति यथार्थप्रतीत्यनुरोधेन कपिसंयोगाभावस्याधिकरणता वृक्षे मूलदेशावच्छेदेनैवेति वस्तुस्थितिमनुरुध्य

---

१. अव्याप्यवृत्तित्वं नाम 'स्वात्यन्ताभावसामानाधिकरण्यम् (त० दी० पृ०) (मूलमाथुरी गादाधरी)। अस्यानुगमश्च स्वप्रतियोगित्वस्वसामानाधिकरण्यैतदुभयसम्बन्धेना-भाववत्त्वम् । (नीलकण्ठी पृ०)। यथा हि एकस्मिन्नेव वृक्षे विद्यमानकपि-संयोगतदभावयोरव्याप्यवृत्तित्वम् । कपिसंयोगस्याव्याप्यवृत्तित्वमुपपादयितुमिष्टं चेत् तस्मिन् स्वप्रतियोगित्व स्वसामानाधिकरण्यैतदुभय- सम्बन्धेनाभावविशिष्टत्वं प्रतिपादनीयम्, अभावश्चाव्याप्यवृत्तित्वेनेष्टस्य कपिसंयोगस्यैव ग्राह्यः अभावान्तरवैशिष्ट्यस्य निरुक्तोभयसम्बन्धेन कपिसंयोगे सम्भवात् । तथा च कपिसंयोगाभावप्रतियोगित्वस्य कपिसंयोगाभावसामानाधिकरण्यस्य च कपिसंयोगे विद्यमानतया स्वप्रतियोगित्वस्वसामानाधिकरण्यैतदुभयसम्बन्धेन कपिसंयोगा-भाववैशिष्ट्यस्य कपिसंयोगे सत्त्वाद्भवति तस्याव्याप्यवृत्तित्वम् । एवं कपिसंयोगा-भावोऽप्यव्याप्यवृत्तिस्तस्मिन् कपिसंयोगाभावाभावात्मककपिसंयोगप्रतियोगित्वस्य तत्सामानाधिकरण्यस्य च सत्त्वेन कपिसंयोगाभावाभावात्मककपिसंयोग-वैशिष्ट्यस्याक्षतत्वात् । वस्तुतोऽग्रे वृक्षः कपिसंयोगी न तु मूल इति प्रामाणिकप्रतीत्यनुरोधेन वृक्षात्मकैकस्मिन्नधिकरणेऽग्रमूलात्मकतत्तत्प्रदेशविशेषा-वच्छेदेन कपिसंयोगतदभावयोः विद्यमानत्वं स्फुटम्, अत एवानयोः कपिसंयोगतदभावयोरेकस्मिन्नेवाधिकरणे तत्तद्देशावच्छिन्नवृत्तिकत्वादव्याप्यवृत्तित्वं स्वीक्रियते ।

२. संयोगस्य शाखाद्यवच्छेदेन वृत्तेर्वृक्षत्वावच्छेदेन तत्सामान्याभाववृत्तावपि अविरोधात् ।
—चि० दी० पृ० ९२

कपिसंयोगाभावत्वावच्छिन्नाधेयतानिरूपिताधिकरणता वृक्षनिष्ठा मूलदेशावच्छिन्नतया निरवच्छिन्नत्वाभावेन ग्रहीतुमशक्याऽतो गुणकर्मादिनिष्ठैव सा ग्राह्या, तस्या निरवच्छिन्नत्वे विवादाभावात्, नहि गुणादिषु कपिसंयोगाभावो, गुणादिषु गुणानङ्गीकारादिति न्यायेन विद्यमानः, किञ्चिदवच्छिन्नवृत्तिः। तथा च तदाश्रयगुणादिनिरूपितवृत्तित्वस्य निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेनाभाव एतद्लक्षत्वे सद्धेतौ सूपपन्न इति।

न चैवं सति स्वरूपेण कपिसंयोगाभावसाध्यके समवायेन सत्त्वहेतौ साध्याभावस्य कपिसंयोगाभावाभावस्य कपिसंयोगरूपस्य नियमेन सावच्छिन्नवृत्तिकतया निरुक्तसमवायसम्बन्धावच्छिन्नकपिसंयोगत्वावच्छिन्ननिरूपकतानिरूपितनिरवच्छिन्नाधिकरणताया अप्रसिद्ध्याऽव्याप्तिरिति शङ्क्यम्, स्थलेऽस्मिन् केवलान्वयिसाध्यके[1] लक्षणस्यास्याऽव्याप्तेरिष्टत्वात्।

---

१. न्यायदर्शने प्रमेयत्व, अभिधेयत्व, ज्ञेयत्वादीनां, कपिसंयोगतदभावगगनाभावादीनां च केवलान्वयित्वं स्वीक्रियते। केवलान्वयिशब्दार्थस्तु केवलम् अन्वयः—सत्त्वं यस्यास्ति स केवलान्वयीति। अन्वय इत्यनेन व्यतिरेको व्यावर्त्यते। व्यतिरेकाश्चात्यन्ताभावः। तथा च यस्य पदार्थस्याभावो न सम्भवति प्रत्युत सर्वत्र भावत्वम्—अस्तित्वं विद्यमात्वं वोपलभ्यते स एव केवलान्वयी। प्रमेयत्वाभिधेयत्वादयः सर्वत्रैव विद्यन्तेऽतः एषामत्यन्ताभावोऽप्रसिद्धस्तेन केवलान्वयिन इमे। एवं सत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति केवलान्वयिनो लक्षणं वक्तुं शक्यम्, इदञ्च केवलान्यित्वेनाभिमतेषु प्रमेयत्वादिष्वक्षतमेव। परं गगनाभावस्य केवलान्वयित्वं कथमिति प्रश्नोऽवतरति गगनाभावाभावस्य गगनस्वरूपस्य प्रसिध्या तत्प्रतियोगित्वस्यैव गगनाभावे सत्त्वात्।
यदि ह्यत्यन्ताभावाप्रतियोगित्वमिति केवलान्वयिनोलक्षणेऽत्यन्ताभावस्य वृत्तिमत्वमेष्टव्यं तेन च वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति लक्षणं विवक्ष्यते, तर्हि गगनाभावाभावस्य गगनात्मकस्यावृत्तितया तत् प्रतियोगित्वस्य गगनाभावे सत्त्वेऽपि वृत्तिमन्तो ये अत्यन्ताभावा घटाभावादयस्तदप्रतियोगित्वस्य गगनाभावे सत्त्वेन तस्य केवलान्वयित्वं निराकुलमिति मन्यते चेत्, तदाऽपि कपिसंयोग, कपिसंयोगाभावादीनां केवलान्वयित्वं कथमिति प्रश्नः प्रतिभटो भवति तयोरभावस्य वृत्तिमत्त्वेन तत्प्रतियोगित्वस्यैव तयोः सत्त्वात्। अतः केवलान्वयिलक्षणघटकात्यन्ताभावे निरवच्छिन्नवृत्तिमत्त्वमभिप्रेतव्यम्, लक्षणं च निरवच्छिन्नवृत्तिमदत्यन्ताभावाप्रतियोगित्वं निर्वक्तव्यम्।
तथा सति संयोगतदभावयोरभावस्य संयोगाभावसंयोगरूपस्य सावच्छिन्नवृत्तिकतया

अथापीदं चिन्तनीयम्—कपिसंयोगिभिन्नं गुणत्वादित्यत्र साध्याभावस्य कपिसंयोगिभेदाभावस्य निरवच्छिन्नाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिः। अस्यापि स्थलस्य केवलान्वयिसाध्यकतया पूर्ववदेवात्राप्यव्याप्तिरिष्टैवेति। नाङ्गीकर्तुं शक्यम्, अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये[1] स्थलस्यास्य केवलान्वयिसाध्यकत्वाभावात्। एवं सत्यव्याप्तिरियं कथं निरसनीया इति।

अत्रायं विवेकः—ये ह्यन्योन्याभावस्य व्याप्यवृत्तित्वनिमयमभ्युगच्छन्ति तेऽन्योन्याभावात्यन्ताभावस्य प्रतियोगितावच्छेदकस्वरूपत्वं स्वीकृत्याव्याप्यवृत्तिमतो योऽन्योन्याभावस्तदत्यन्ताभावस्य व्याप्यवृत्तित्वमतिरिक्तत्वञ्च स्वीकृत्यैवेमामव्याप्तिं परिहरन्ति। तेषां मते प्रकृतस्थले कपिसंयोगिभेदः साध्यते। स च नियमेन व्याप्यवृत्तितया गुणादिष्वेवास्ति। अयञ्च कपिसंयोगिभेदो व्याप्यवृत्तिर्यः कपिसंयोगस्तद्वतोऽन्योन्याभावात्मकः, तेन चास्य योऽत्यन्ताभावः प्रकृते साध्याभावरूपः स व्याप्यवृत्तिरतिरिक्तश्चाभाव एव न तु भेदीयप्रतियोगितावच्छेदककपिसंयोगरूपः। तेन च साध्याभावस्यास्य कपिसंयोगिभेदाभावस्य व्याप्यवृत्तेर्निरवच्छिन्नाधिकरणताया द्रव्य एव प्रसिद्ध्या नाव्याप्तिसम्भवः।

अव्याप्यवृत्तिमतोऽन्योन्याभावस्य योऽभावस्तस्य न प्रतियोगितावच्छेदकस्वरूपत्वं किन्त्वतिरिक्तत्वं व्याप्यवृत्तित्वं[2] चेति सिद्धान्तस्तु कपिसंयोगविशिष्टं वृक्षमधिकृत्य मूलावच्छिन्नो वृक्षः कपिसंयोगिभेदाभाववानिति प्रमात्मकप्रतीतिबलेनैव स्वीक्रियते। अन्यथा भेदस्य व्याप्यवृत्तित्वस्वीकारपक्षे कपिसंयोगविशिष्टे वृक्षे कपिसंयोगिभेदस्यासत्त्वेन तदभावस्य तत्र विद्यमानस्य प्रतियोगितावच्छेदकस्वरूपत्वे मूलावच्छेदेन कपिसंयोगस्य तत्र वृक्षेऽसत्तया प्रतीतेरस्या भ्रमत्वं ब्रह्मणापि निराकर्तुमशक्यम्।

तत्प्रतियोगित्वस्य तयोः सत्त्वेऽपि, निरवच्छिन्नवृत्तिमद्घटात्यन्ताभावादीनामप्रतियोगित्वस्य तयोर्विद्यमानत्वेन केवलान्वयित्वं निरुपद्रुतमिति वस्तुस्थितिः।

१. अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये तस्य केवलान्वय्यनन्तर्गतत्वात्।
—व्या० पञ्च० पृ० २०

२. अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये अन्योन्याभावान्तरात्यन्ताभावस्य प्रतियोगितावच्छेदकस्वरूपत्वेऽपि अव्याप्यवृत्तिमदन्योन्याभावाभावस्य व्याप्यवृत्तिस्वरूपस्यातिरिक्तस्याभ्युपगमात्। व्या० पञ्च० पृ० २०

एतावता प्रपञ्चेन 'साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभाववृत्तिसाध्यसामान्यीयात्यन्ताभा त्रत्वनिरूपितप्रतियोगित्व-तदवच्छेदकत्वैतदन्यतरावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावत्वावच्छिन्नाधेयतानिरूपितनिरवच्छिन्नाधिकरणतावन्निरूपितवृत्तित्वनिष्ठहेतुतावच्छेदका-वच्छिन्नाधिकरणतानिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावो व्याप्तिरिति लक्षणं परिष्कृतं भवति।

हेतौ हेतुतावच्छेदकसम्बन्धेन साध्याधिकरणवृत्तित्वविशेषणस्य प्रयोजनम्

एवं लक्षणपरिष्कारे सत्यपि गगनं हेतूकृत्य संयोगेन वह्नेः साध्यतायामतिव्याप्तिः, साध्याभावस्य वह्न्यभावस्याधिकरणे गगनस्य हेतोरवृत्तिमतोऽवृत्तित्वस्य स्फुटत्वात् अत्र हेतुत्वेनाभिमतं गगनं व्याप्तिलक्षणस्य लक्ष्यमेव तेनात्र लक्षणस्यास्यातिव्याप्त्युद्भावनं भ्रमविलसितमात्रमिति तु रिक्तं वचः, गगनमसद्धेतुरिति प्रामाणिकव्यवहारस्य जागरूकत्वात्। व्याप्तिलक्षणलक्ष्यस्याप्यस्य गगनस्यावृत्तितया पक्षधर्मत्वाभावादेवासद्धेतुत्वव्यवहार इति समाधानं तु न परीक्षाक्षमम्। भवदुक्तदिशा गगने वह्निनिरूपितव्याप्तेः स्वीकारे गगनं व्याप्तिभ्रमेणैव वह्न्यमुमितिं जनयतीति प्रामाणिकव्यवहारो निर्मूलस्याद्व्याप्त्यभाववति व्याप्तिप्रकारकग्रहस्यैव व्याप्तिभ्रमत्वात्।

गगने व्याप्तिभ्रमोऽस्तु व्याप्तिलक्षणलक्ष्यत्वञ्चास्याऽस्तु इति तु नाभ्युपगन्तुं शक्यम्। तथासति वह्निहेतुना धूमसाध्यतास्थले वह्नौ व्याप्तिभ्रमे सत्यपि व्याप्तिलक्षणलक्ष्यत्वापातात्, तेन गगनस्य व्याप्तिलक्षणलक्ष्यत्वं नास्त्येवेति वस्तुस्थितेस्तत्र व्याप्तिलक्षणस्यातिव्याप्तिरस्त्येव। अतो व्याप्तिलक्षणे हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्वमपि हेतुविशेषणतया विवक्षणीयम्। एतेन हि स एव हेतुः व्याप्तिलक्षणलक्ष्यो यस्मिन् हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्वे[१] सति साध्याभावाधिकरणनिरूपितवृत्तित्वाभावः स्यात्। इदञ्च वह्न्यादेः साध्यतायां धूमादिषु सद्धेतुषु सुलभम्, तेषु हेतुतावच्छेदसंयोगादिसम्बन्धेन सम्बन्धित्वस्य, वह्न्यभावाधिकरणह्रदादिनिरूपितवृत्तित्वाभावस्य च व्यक्तत्वात्। वह्निसाधने गगनं तु

---

१. हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्वे सतीत्यनेनापि विशेषणाद्वह्निमान्गगनादित्यादौ नातिव्याप्तिः। व्या० पञ्च पृ० २४

वह्न्यभावाधिकरणनिरूपितवृत्तित्वाभावविशिष्टं सदप्यवृत्तितया, हेतुतावच्छेदकसमवायादिसम्बन्धेन यतो न कुत्रापि तिष्ठत्यतस्तदन्तर्भावेण नेदं लक्षणमतिव्याप्तमिति विभावनीयम् ।

परमेवं सत्यपि घटो न घटपटोभयम् (घटपटोभयत्वावच्छिन्नप्रतियोगिताकभेदवान् घटः) घटत्वाभाववान् न घटत्वतदभाववदुभयम् (घटत्वतदभाववदुभयत्वावच्छिन्नप्रतियोगिताकभेदवान् घटत्वाभाववान्) इति प्रतीत्यनुरोधेनोभयघटकप्रत्येकं[१] पर्याप्तोभयत्वं न तिष्ठतीति सिद्धान्तस्वीकारपक्षे, घटत्ववान् घटत्वतदभाववदुभयत्वादित्यत्र साध्याभाव घटत्वाभावाधिकरणपटनिरूपितवृत्तिताया हेतुतावच्छेदकपर्याप्तिसम्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपसम्बन्धेनाभावस्यैव तादृशोभयत्वहेतौ सत्त्वादतिव्याप्तिरिति प्रश्नस्तु हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्वे सतीति विशेषणमपहाय, हेतुतावच्छेदकसम्बन्धेन साध्याधिकरणवृत्तित्वेन हेतुं विशिष्य समाधेयः । घटत्वतदभाववदुभयत्वरूपस्य हेतोः हेतुतावच्छेदकपर्याप्तिसम्बन्धेन तादृशोभयस्मिन् सम्बन्धित्वेऽपि साध्यस्य घटत्वस्य समवायेनाधिकरणे घटे वृत्तित्वस्य स्फुटत्वात् ।

न चात्र साध्यस्य घटत्वस्य समवायेन घट एव विद्यमानतया तदभावस्य घटत्वतदभाववदुभयत्वाधिकरणे वृत्तितया तन्निरूपितवृत्तित्वस्यैव हेतुतावच्छेदकपर्याप्तिसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपसम्बन्धेन घटत्वतदभाववदुभयत्वहेतौ सत्त्वेन नातिव्याप्तिः सम्भवति कथं तन्निरासप्रयास इति वाच्यम् । व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशभेदानभ्युपगमेन यथा घटत्वतदभाववदुभयस्मिन् घटभेदो न स्वीक्रियते, तथैव व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशवृत्तिधर्मात्यन्ताभावानभ्युपगमेन घटत्वात्यन्ताभावोऽपि घटत्वतदभाववदुभयस्मिन् न स्वीक्रियते तथा सति साध्यस्य घटत्वस्य योऽभावस्तस्याधिकरणं पटादिरेव न तु घटत्वतदभाववदुभयम्, तन्निरूपितवृत्तिताया निरुक्तवृत्तित्वीयस्वरूपसम्बन्धेनाभावस्यैव तादृशोभयत्वहेतौ सत्त्वेन प्रसक्ताया अतिव्याप्तेर्निरासप्रयासः समुचित एव ।

अथैवं व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशवृत्तिधर्मात्यन्ताभावानभ्युपगमे व्यासज्यवृत्तिधर्मावच्छेदेनैकदेशवृत्तिधर्मस्तिष्ठतीति स्वीकर्त्तव्यम्, तथा च

---

१. घटो न घटपटोभयमितिवद् घटत्वाभाववान् न घटत्वतदभाववदुभयमित्यपि प्रतीतिरिति चेन्न । व्या० पञ्च०, पृ० २५

घटत्वतदभाववदुभयत्वावच्छेदेन तादृगुभयस्मिन् घटत्वस्यावश्यं स्वीकर्त्तव्यतया घटत्ववान्, घटत्वतदभाववदुभयत्वादितिस्थलं सद्धेतुकस्थलमेवेति केषाञ्चिदुक्तिर्नावकाशं लभते। उभयात्मकसमूहघटकैकस्मिन् देशे समवायेन पर्याप्तस्य घटत्वपटत्वादेरव्यासज्यवृत्तितया तत्प्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वस्योभयत्वादौ सर्वथाऽसम्भवेनैकदेशवृत्तिधर्मो घटत्वादिर्घटत्वतदभाववदुभयस्मिन्नस्तीति स्वीकर्तुमशक्यत्वात्। न चैवं घटत्वतदभाववदुभयस्मिन् घटत्वाभाव एव वर्तत इति साध्याभावात्मकघटत्वाभावाधिकरणनिरूपितवृत्तित्वस्यैव घटत्वतदभाववदुभयत्वे सत्त्वेन नातिव्याप्तिः सम्भवतीति वाच्यम्, घटत्वाभावस्यापि घटत्वादिवदव्यासज्यवृत्तितया तत्प्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वस्योभयत्वादावसम्भवेन घटत्वाभावस्यापि घटत्वतदभाववदुभयस्मिन् सत्त्वायोगात्। अत एव व्याज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशवृत्तिधर्मात्यन्ताभावो न स्वीक्रियत इत्यनुपदमेवावोचाम।

एतेन ह्युभयत्वपर्याप्त्यधिकरण उभयस्मिन्नेकदेशपर्याप्तधर्मो घटत्वादिरस्तीति यथा न मन्यते, तथैव तदभावोऽस्तीत्यपि न मन्तव्यम्। अत एव प्रकृतस्थले घटत्वाभावाधिकरणं पटादिरेव तन्निरूपितपर्याप्तेर्हेतुत्वेनाभिमत उभयत्वेऽसत्त्वेनातिव्याप्त्युद्भावनम्, हेतौ हेतुतावच्छेदकसम्बन्धेन साध्यसमानाधिकरणत्वविशेषणदानेन तन्निरासश्च साधु सङ्गच्छेते[1]।

---

१. अत्र प्रसङ्गानुसारमयं विवको युक्तः प्रतीयते—उभयशब्दो समूहविशेषपर एव। घटत्वतदभाववदुभयमित्युक्त्या घटत्ववतस्तदभाववतः पटादेश्च समूह एव गृह्यते। तथा च घटत्वतभाववदुभयमित्युक्त्या यदि घटपटात्मकसमूहो गृह्यते तर्हि समूहस्यास्यैकदेशो घटोऽन्यदेशश्च पटः। घटे समवायेन घटत्वमस्ति, पटे च समवायेन पटत्वमस्ति। घटपटोभयात्मकसमूहे तु घटत्वमपि नास्ति पटत्वमपि नास्ति, समूहस्यास्य घटात्मकत्वेन पटात्मकत्वेन वा प्रतीत्यभावात्। एतावता समूहे घटत्वाभावोऽस्ति, पटत्वाभावोऽस्तीत्यपि न वक्तुं शक्यम् समूहस्यास्य घटपटोभयात्मकतया तत्र घटभेदस्य पटभेदस्य स्वीकर्तुमशक्यतया घटत्वपटत्वयोरभावस्यापि स्वीकर्तुमशक्यत्वात्। तर्हि समूहस्यास्य घटपटघटिततया तस्मिन् घटदेशावच्छेदेन घटत्वं, पटदेशावच्छेदेन पटत्वम्, पटदेशावच्छेदेन घटत्वाभावो घटदेशावच्छेदेन पटत्वाभावश्च वर्तते। समूहे पर्याप्त्या विद्यमानं यदुभयत्वं तदवच्छेदेन तु न स्तौ घटत्वपटत्वे नापि तदभावावित्येव स्वीकर्त्तव्यम्। उभयत्वावच्छेदेन घटत्वादेस्तदभावादेश्च स्वीकारे घटत्वतदभावादीनामुभयस्मिन् पर्याप्त्या वृत्तिमत्त्वं स्वीकरणीयं स्यात् तच्च न सम्भवति घटत्वतदभावादीनां प्रत्येकं पर्याप्तेः घटत्ववान् घटः,

अत्र केवलान्वयिग्रन्थस्य दीधितिरपि[1] प्रमाणम्, तत्र रघुनाथशिरोमणिरपि हेतुं वृत्तिमत्वेन साध्याधिकरणनिरूपितवृत्तिमत्वेन वा विशिनष्टि, नो चेदिदं वह्निमद्गगनादित्यत्र, घटत्ववान् घटत्वतदभाववदुभयत्वादित्यत्र चातिव्याप्तिः प्रागुक्तदिशा दुर्निवारा स्यादेवेति बोध्यम् ।

एतेन साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभाववृत्यत्यन्ताभावत्वनिरूपितसाध्यसामान्यीयप्रतियोगित्वतदवच्छेदकत्वैतदन्यतरावच्छेदकंसम्बन्धावच्छिन्न, साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावत्वावच्छिन्नाधेयतानिरूपितनिरवच्छिन्नाधिकरणतानिरूपितवृत्तितात्वावच्छिन्नहेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतानिरुपितहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्त्वे सति हेतुतावच्छेदकसम्बन्धेन साध्याधिकरणवृत्तित्वं हेतौ व्याप्तिरिति व्याप्तिलक्षणं पर्यवसन्नम् ।

इदं वह्निमद्गगनादित्यत्रातिव्याप्तिवारणाय लक्षणान्तरानुसरणम्

केचन इदं वह्निमद् गगनादित्यत्र प्रसक्तामतिव्याप्तिं वारयितुं प्रकारान्तरमनुसरन्ति । तेषामयमाशयः—साध्याभावाधिकरणनिरूपितवृत्तित्वाभावरूपं यत् प्रथमं लक्षणं तदनुसारं हेतौ साध्याभावाधिकरणनिरूपितवृत्तित्वाभावो विवक्ष्यते । तथा सति गगनस्यावृत्तितया तत्र साध्याभावाधिकरणनिरूपितवृत्तित्वाभावो विद्यत

घटत्वाभाववान् पटः इत्यादिप्रतीत्यनुरोधेन सर्वानुमतत्वात् ।
अत्रैकस्मिन्नेव घटपटात्मकसमूहे घटदेशावच्छेदेन घटत्वस्य, पटदेशावच्छेदेन घटत्वाभावस्य च स्वीकारे घटत्वतदभावादीनामव्याप्यवृत्तित्वं तु सोढव्यमेव । यथा एकस्मिन्नेव वृक्षे संयोगसंयोगाभावयोः प्रतीत्यनुरोधेन तयोर्द्रव्येऽव्याप्यवृत्तित्वं स्वीक्रियते न तु गुणकर्मणोस्तत्साधकप्रतीत्यभावात्, तथैवैकस्मिन् घटपटोभयात्मके समूहे घटे घटत्वं पटे च तदभाव इति प्रमात्मकप्रतीत्यनुरोधेन समूहे तत्तद्देशावच्छेदेन विद्यमानयोर्भावाभावयोरव्याप्यवृत्तित्वस्य तदतिरिक्तस्थले च व्याप्यवृत्तित्वस्य गत्यन्तरविरहेणावश्याभ्युपेयत्वात् । वस्तुतस्तु एकस्मिन्नवयविन्यवयवात्मकविभिन्नदेशावच्छेदेन भावाभावयोर्विद्यमानतायामेव तयोरव्याप्यवृत्तित्वस्वीकारेणोभयात्मकसमूहस्य त्ववयवित्वाभावेन तदैकदेशावच्छेदेन विद्यमानयोर्भावाभावयोरव्याप्यवृत्तित्वोपपादनं निर्युक्तिकमेवेति प्रतीमः ।

१. निविशतां वा तत्र साध्यसामानाधिकरण्यं वृत्तित्वं वा । चि० दी० गा० पृ० १३६२

एवेत्यतिव्याप्तिर्दुर्निवारा। अतो हेतौ साध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्थाने, हेत्वधिकरणतायां साध्याभावाधिकरणनिरूपितवृत्तित्वाभावो वक्तव्यः। तेन हि गगनाधिकरणताया अप्रसिद्ध्यैव गगने नातिव्याप्तिः सम्भवति। अतो यत्साध्याभावाधिकरणनिरूपितवृत्तित्वाभावो यद्धेत्वधिकरणतायामस्ति तद्धेतौ तत्साध्यनिरूपिता व्याप्तिः स्वीकर्त्तव्येति।

परमेवं सत्यपि धूमवान् वह्नेरित्यत्रातिव्याप्तिः प्रसज्यते यत्साध्यपदेन धूमस्योपादेयतया तदभावाधिकरणायोगोलकनिरूपितवृत्तित्वाभावस्य पर्वतनिष्ठवह्न्यधिकरणतायां सत्त्वात्। अतो यद्धेत्वधिकरणतासामान्ये, यत्साध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्तद्धेतौ तत् साध्यनिरूपिता व्याप्तिरिति स्वीकर्त्तव्यम्। तथा सति प्रकृते हेतुत्वेनाभिमतवह्न्यधिकरणतासामान्यान्तर्गतायोगोलकनिष्ठवह्न्यधिकरणतायां धूमाभावाधिकरणनिरूपितवृत्तित्वस्यैव सत्त्वेन नातिव्याप्त्यवसरः।

अत्र सामान्यपदं यावत्त्वविशिष्टानां हेत्वधिकरणतानां बोधकमित्युक्तौ तु न निस्तारः। अधिकरणभेदेनाधिकरणताया भेदात् यावद्धेत्वधिकरणतानां सर्वत्रैवाभावसम्भवेन धूमाभावाधिकरणायोगोलकनिरूपितवृत्तित्वाभावस्य यावद्वह्न्यधिकरणतास्वक्षततयाऽतिव्याप्तेस्तादवस्थ्यात्। तद्रूपवान् तद्रसादित्यादौ तद्रसाधिकरणतायां यावत्वाप्रसिद्ध्याऽव्याप्तेश्च। अतोऽत्र सामान्यपदं व्यापकत्वबोधे पर्यवसितम्। एवं यद्धेत्वधिकरणतात्वव्यापको यत्साध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्तद्धेतौ तत्साध्यनिरूपिता व्याप्तिरित्यत्रैव लक्षणं पर्यवसीयते। तेन च यद्धेतुपदेन वह्नेरुपादाने तदधिकरणतात्वव्यापकत्वस्य धूमाभावाधिकरणनिरूपितवृत्तित्वाभावेऽसत्वात्, धूमवान् वह्नेरित्यत्र नातिव्याप्तिरिति सर्वमनवद्यम्।

लक्षणस्यास्य परिष्कारः

अत्र यद्हेत्वधिकरणतापदेन हेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणता ग्राह्या। साध्याभावाधिकरण इत्यत्र साध्याभावपदेन साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावो ग्राह्यः[१], तादृशाभावत्वावच्छिन्ननिरुक्तसम्बन्धावच्छिन्नाधेयतानिरू-

१. साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्या-

पितनिरवच्छिन्नाधिकरणताश्रयनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वसामान्याभावो निरुक्तहेत्वधिकरणतायां विवक्षितः ।

एवञ्च केचित्तु मते इदं लक्षणं बोध्यम्—यद्धर्मावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतात्वव्यापको निरुक्तसाध्याभावाधिकरणताश्रयनिरूपितत्वरूपसम्बन्धावच्छिन्नवृत्तित्वाभावस्तद्धर्मवत्त्वमिति । यद्धर्मपदेन हेतुतावच्छेदकधर्ममादाय तद्वत्त्वस्य हेतौ सत्त्वेन तत्र साध्यनिरूपितव्याप्तिः सूपपन्ना भवति । अत्र तत्तत्सम्बन्धविशेषादिनिवेशप्रयोजनं पूर्वप्रर्शितदिशाऽवसेयम् ।

अत्रारुचिबीजम्

परमिदं लक्षणं, साध्याभावाधिकरणनिरूपितवृत्तित्वाभाव इति व्याप्तिलक्षणस्य यथाश्रुतस्य प्रतिपाद्या या हेतौ साध्यनिरूपिता व्याप्तिस्तस्या असङ्ग्राहकतया नाद्रियते । व्याप्येनैव व्यापकस्यानुमितिर्भवतीति लोकप्रसिद्धतया हेतावेव साध्यनिरूपिता व्याप्तिरिष्टा, न तु हेत्वधिकरणतायाम् । हेत्वधिकरणतायां साध्यनिरूपितव्याप्तेः सत्त्वेऽपि न कोऽपि हेत्वधिकरणतां हेतूकृत्य साध्यं साधयति गौरवात् । हेतुं परित्यज्य तदधिकरणतापर्यन्तमनुधावनस्य बुद्धिमान्द्यद्योतकत्वाच्च । अतः केचित्तुमतं हेत्वधिकरणतायां व्याप्यत्वोपपादनपुरस्सरं हेतौ व्याप्यत्वोपपादकतया कल्पनागौरवरूपदोषभयेनोपेक्ष्यत इति प्रतिभाति ।

इदं वह्निमद्गगनादित्यत्रातिव्याप्तिवारणायान्यस्य तृतीयलक्षणस्योपस्थापनम्

अन्ये तु[१] मतावलम्बिनः केचन इदं वह्निमद्गगनादित्यत्रातिव्याप्तिवारणार्थं हेत्वधिकरणवृत्तिनिरवच्छिन्नाधिकरणतायां साध्याभावाधिकरणतात्वस्याभावमुपपाद्य हेतौ साध्यनिरूपितां व्याप्तिमुपपादयन्ति । तेन हि केचित्तुमतमपेक्ष्यात्र विशेष्यविशेषणभावे वैपरीत्यं स्पष्टं तच्चेदम्—केचित्तुमते साध्याभावाधिकरणतायास्तादृशवृत्तित्वाभावरूपविशेषणकोटिप्रविष्टतया विशेषणत्वं हेत्वधिकरणतायाश्च विशेष्यत्वम् । अत्र तु साध्याभावाधिकरणताया विशेष्यकोटिप्रविष्टाया विशेष्यत्वम्, हेत्वधिकरणतायाश्च तादृशवृत्तित्वाभावरूपविशेषणकोटिप्रविष्टाया विशेषणत्वमिति । तेन चैषां मते यद्धर्मावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधे-

भाववृत्तिसाध्यसामान्यीयात्यन्ताभावत्वनिरूपितप्रतियोगित्वतदवच्छेदकत्वैतदन्यतरावच्छेदकसम्बन्धावच्छिन्नेत्यभिप्रायः ।

१. व्या० पञ्च० पृ० २७

यता-निरूपिताधिकरणताश्रयवृत्तिनिरवच्छिन्नाधिकरणतायाम्, साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकाभावत्वावच्छिन्ननिरुक्तसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतात्वस्याभावस्तद्धर्मवत्त्वं व्याप्तिरिति व्याप्तिस्वरूपं निर्धार्यते ।

तथा सति केचित्तुमतमिवात्रापि मते गगनत्वावच्छिन्नाधेयताया एवाप्रसिद्ध्या गगनहेतौ नातिव्याप्तिः । केचित्तुमतमपेक्ष्य मतेऽस्मिन् विशेषस्त्वयम्—कपिसंयोगाभाववान् सत्त्वादित्येवं विधेषु केवलान्वयिसाध्यकस्थलेषु—केचित्तुमते निरवच्छिन्नसाध्याभावाधिकरणताया अप्रसिद्ध्या पूर्वव्याख्यातनिरवच्छिन्नसाध्याभावाधिकरणताघटितलक्षणवदव्याप्तिरिष्टैव । अन्ये तु मतानुसारं तु व्याप्तिलक्षणसमन्वयादत्राव्याप्तिर्निरवकाशैव ।

लक्षणसमन्वयश्चैवम्—हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नयद्धर्मसत्तात्वावच्छिन्नाधेयतानिरूपिताधिकरणताश्रयतया गृहीतेषु सर्वेष्वपि द्रव्यगुणकर्मसु विद्यमाना निरवच्छिन्नाधिकरणता द्रव्यत्वगुणत्वकर्मत्वाद्यधिकरणताः प्रसिद्धाः, न तु कपिसंयोगात्मकसाध्याभावाधिकरणता प्रसिद्ध्यति । तथा च द्रव्यत्वगुणत्वादीनां निरवच्छिन्नाधिकरणतासु कपिसंयोगात्मकसाध्याभावाधिकरणतात्वस्याविद्यमानतया सत्तात्वरूपतद्धर्मवत्त्वं कपिसंयोगाभावसाध्यकस्थले सत्तात्मकसद्धेतावक्षतमिति ।

एवमेव कपिसंयोगिभिन्नं गुणत्वादिति स्थलस्य भेदस्याव्याप्यवृत्तित्वं स्वीकृत्य केवलान्वयिसाध्यकत्वं स्वीक्रियताम् व्याप्यवृत्तित्वं[1] वाङ्गीकृत्य केवलान्वयिसाध्यकत्वं मा स्वीक्रियतामुभयथाप्येतल्लक्षणसमन्वयस्य सुलभतया नात्राव्याप्तिपादप्रसरः । तथाहि—स्थलेऽस्मिन् कपिसंयोगिभेदः साध्यते गुणत्वञ्च हेतुः, अतो हेत्वधिकरणतापदेन यद्धर्मगुणत्वत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणता लभ्यते, तदाश्रयो गुण एव तन्निरुपितनिरवच्छिन्नाधिकरणतापदेन साध्याभावाधिकरणता कथमपि न लब्धुं शक्या, साध्याभावः प्रकृते कपिसंयोगिभेदाभावात्मकोऽतिरिक्तः स्यात्, कपिसंयोगरूपो वा तदधिकरणताया एव गुणे सम्भवात् । एवं सति हेत्वधिकरणताश्रयगुणवृत्तिनिरवच्छिन्नाधिकरणतापदेन गुणत्वसत्ताद्यधिकरणताया एव ग्राह्यतया तन्निरूपितवृत्तित्वाभावः प्रकृते

---

१. व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्वं नत्ववच्छिन्नवृत्तिकान्यत्वम् । चि० दी० गा० पृ० १७८

साध्याभावाधिकरणतात्वे सुलभः, तेन च पूर्वं यद्धर्मपदेनोपात्तस्य हेतुतावच्छेदकगुणत्वत्वस्य गुणत्वे सद्धेतौ सत्त्वात् लक्षणसमन्वयः सुलभ इति । अन्ये तु कल्पपरित्यागबीजं तु केचित्तुमतवदेवोह्यम् ।

॥इति प्रथमव्याप्तिविमर्शः ॥

द्वितीयं प्रकरणम्

साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमिति

द्वितीयव्याप्तिविमर्शः

इदानीं द्वितीयमव्यभिचरितत्वं साध्यवद्भिन्नसाध्याभावदवृत्तित्वरूपमन्वयसहचारनियमपर्यवसन्नं विविच्यते—

साध्यवद्भिन्नेति विशेषणं कुत्र कथमिति प्राच्यमतेन विचारः

लक्षणेऽस्मिन् साध्याभाववदवृत्तित्वमिति भागस्य व्याख्यानं पूर्ववदेवावसेयम्। तदनुसारं साध्याभावाधिकरणनिरूपितवृत्तित्वाभावे एवायं भागः पर्यवसन्नो भवतीति स्पष्टमेव। साध्यवद्भिन्नेति पदं लक्षणेऽस्मिन्नधिकं निविष्टं कुत्र कथमन्वेतीति जिज्ञासायां प्राञ्च एवं वदन्ति—साध्याभावाधिकरणार्थकं यत्साध्याभाववत्पदं लक्षणकोटौ निविष्टं तेन सह साध्यवद्भिन्नपदस्य[1] कर्मधारयसमासोऽभ्युपेयः। तथा च साध्यवद्भिन्नश्चासौ साध्याभाववांश्च साध्यवद्भिन्नसाध्याभाववांस्तन्निरूपितवृत्तित्वाभाव इति लक्षणार्थो निर्वाच्यः। एवं सति साध्यवद्भिन्नं यत् साध्याभावाधिकरणं तन्निरूपितवृत्तित्वाभावो हेतौ व्याप्तिरिति लक्षणस्वरूपं निरुक्तं भवति। साध्याभावाधिकरणेऽभेदेन साध्यवद्भिन्नस्य विशेषणादव्याप्यवृत्तिसाध्यकस्थलेष्वव्याप्तिवारणं सुशकम्, अन्यथा संयोगी द्रव्यत्वात्, कपिसंयोग्येतद्वृक्षत्वादित्यादिस्थलेषु साध्यत्वेनेष्टस्य संयोगस्याव्याप्यवृत्तितया तदभावाधिकरणं हेत्वधिकरणं वृक्षादिकं द्रव्यमादाय तन्निरूपितवृत्तित्वस्यैव द्रव्यत्वादौ सद्धेतौ

---

१. (क) साध्वद्भिन्नो यः साध्याभाववान् तदवृत्तित्वमित्यर्थः। व्या० पञ्च० पृ० २८
(ख) साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारये। चि० दी० गा० पृ० ११४

सत्त्वेन पूर्वलक्षणमव्याप्तं भवत्येव। यद्यपि साध्याभावाधिकरणतायां निरवच्छिन्नत्वनिवेशेनैवं विधेषु स्थलेष्वव्याप्तिवारणं विधेयमिति पूर्वलक्षणव्याख्यानावसरे स्फुटीकृतं तथापि मूललक्षणशरीरे निरवच्छिन्नत्वबोधकपदस्याप्रविष्टतया यथाश्रुतं लक्षणमव्याप्यवृत्तिसाध्यकस्थलेषु पूर्वप्रदर्शितदिशाऽव्याप्तं भवत्येवेत्यरुचिं पुरस्कृत्य द्वितीयमिदं व्याप्तिलक्षणं साध्याभावाधिकरणेऽभेदेन साध्यवद्भिन्नस्य विशेषणत्वमङ्गीकृत्य प्रस्तूयते। नेदं लक्षणमव्याप्यवृत्तिसाध्यकस्थले[1] भवत्यव्याप्तं, साध्यस्याव्याप्यवृत्तेः संयोगादेरभावस्याधिकरणं यद्यप्यस्ति हेत्वधिकरणं वृक्षादिद्रव्यम् परं तस्य संयोगविशिष्टत्वेन संयोगवान्नेति साध्यवद्भेदानधिकरणतयाऽभेदेन साध्यवद्भिन्नविशिष्टत्वं नास्त्यतोऽभेदेन साध्यवद्भिन्नविशिष्टं साध्याभावाधिकरणं हेत्वधिकरणं वृक्षादिद्रव्यमात्रमतिरच्य गुणादिरेव ग्रहीतुं शक्यं संयोगाभावाधिकरणे तस्मिन् संयोगवान्नेति भेदस्य सत्त्वेनाभेदेन संयोगवद्भिन्नविशिष्टे तस्मिन्गुणादौ एतद्वृक्षत्वद्रव्यत्वादिसद्धेतूनामवृत्तित्वात्।

अत्रारुचिमुपपाद्य नव्यमतोपस्थापनम्

परमत्रेदं चिन्तनीयम्—लक्षणस्येतरभेदानुमतिः[2] प्रयोजनमिति सर्वसम्मतम्, इदञ्च कर्मधारयसमासघटितं साध्यवद्भिन्नसाध्याभाववदवृत्तित्वात्मकं व्याप्तिलक्षणं व्याप्तौ स्वेतरभेदानुमितिं यदि जनयति तर्हीतरभेदानुमितिरूपप्रयोजनसाधकतया ग्राह्यं स्यात्, तदेव न सम्भवति। तथाहि—अनेन लक्षणेनेतरभेदानुमितयेऽनुमानप्रयोग एवं विधेयः—व्याप्तिः स्वेरतभिन्ना, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वादिति। तथा सति[3] साध्यवद्भिन्नसाध्याभाववदवृत्तित्वस्य व्याप्तिलक्षणस्यैव हेतुत्वे व्याप्यस्यैव हेतुत्वमिति दिशाऽयं लक्षणात्मको हेतुः व्याप्तीतरभेदात्मकसाध्यस्य व्याप्य इति नूनमभ्युपेयम्, अथ चास्य व्याप्यत्वं साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्वेनैव स्वीकर्त्तव्यमिति तादृशावृत्तित्वत्वं साध्यनिरूपितव्याप्यतावच्छेदकमित्यप्यङ्गीकर्त्तव्यम्, येन रूपेण व्याप्यता तदेव व्याप्यतावच्छेदकमिति सिद्धान्तात्।

---

१. साध्याभाववद्वृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह साध्यवद्भिन्नेति। चि० दी० पृ० ११३

२. ननु लक्षणस्य किं प्रयोजनमिति चेत्तदितरभेदानुमितिरिति विद्धि।
—तर्क सं० सि० च० पृ० १३

३. अत्र स्वरूपेणेतरभेदः साध्यः तादात्म्येन तादृशवृत्तित्वाभावश्च हेतुः।

परं नेदं तादृशावृत्तित्वत्वं व्याप्यतावच्छेदकतयाभ्युपगन्तुं शक्यम्, साध्यवद्भिन्नावृत्तित्वत्वमपेक्ष्य साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्वात्मकस्यास्य गुरुत्वात्। गुरुत्वञ्च व्यर्थविशेषणघटितत्वमेव अत्र व्यर्थविशेषणं[1]साध्याभाववदिति। तत् परित्यज्य साध्यवद्भिन्नावृत्तित्वमित्येतावन्मात्रं हेतूकृत्य व्याप्तौ स्वेतरभेदसाधने व्यभिचाराभावात्। अत एवेतरभेदात्मकसाध्यनिरूपितव्यभिचारावारकं यद्विशेषणं साध्याभाववदिति तद्घटितो यो समुदायः साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमिति तस्येतरभेदसाधने हेतुत्वाभ्युपगमे साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्वमेव व्याप्यतावच्छेदकं स्यात् तच्च न युक्तं, व्यर्थविशेषणघटितसमुदायवृत्तिधर्मस्य व्याप्यतानवच्छेदकत्वात्।

व्यर्थविशेषणघटितत्वं हि स्वसमानाधिकरणत्वे सति प्रकृतसाध्यव्याप्यतावच्छेदकत्वे सति, स्वावच्छिनाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपं तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतानवच्छेदकत्वम्। यथाहि—पर्वते वह्निसाधने धूमत्वमपेक्ष्य नीलधूमत्वस्य व्यर्थविशेषणघटितस्य व्याप्यतानवच्छेदकतया[2] तेन रूपेण नीलधूमत्वस्य व्याप्यत्वासिद्धस्य सद्धेतुत्वं नास्तीति सिद्धान्तानुसारं नीलधूमत्वं व्यर्थविशेषणघटितं स्वीक्रियते। अतः साम्प्रतं व्यर्थविशेषणघटितत्वस्य यः परिष्कारो निर्दिष्टस्तत्रत्यस्वपदेन नीलधूमत्वमादेयम्, तत्समानाधिकरणत्वमथ च प्रकृते साध्यस्य वह्नेः व्याप्यतावच्छेदकञ्च यद्धूमत्वं तन्नीलधूमत्वावच्छिन्नाविषयिणी या धूम इति धूमत्वावच्छिन्नविषयिणी प्रतीतिः तद्विषयतावच्छेदकमपि, तेन च नीलधूमत्वसमानाधिकरणत्वे सति प्रकृतसाध्यवह्निव्याप्यतावच्छेदकत्वे सति नीलधूमत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्रूपं धूमत्वं तदवच्छिन्नाविषयकप्रतीतिर्घटपटादिविषयिणी प्रतीतिर्न तु धूमविषयिणी नीलधूम इति प्रतीतिः, तादृशप्रतीतिविषयतानवच्छेदकत्वस्य नीलधूमत्वे सत्त्वेन तस्य व्यर्थविशेषणघटितत्वमुपपन्नं भवति।

---

१. तथा सति तद्घटकीभूतस्य अभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्तद्वृत्तित्वस्यैव लक्षणत्वसम्भवात् साध्याभाववत्त्वांशस्य वैयर्थ्यमतः सप्तमीतत्पुरुषसमासं व्याचष्टे।
चि० दी० गा० पृ० ११४

२. यत्तु हेतुतावच्छेदकस्य व्याप्यतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिः, नीलधूमत्वादेश्च तथात्वं समानाधिकरणसम्भवदवच्छेदकान्तरमपेक्ष्य गुरुत्वादिति।
चि० दी० पृ० १८५५

एवमेव प्रस्तुतप्रसङ्गे साध्यवद्भिन्नसाध्याभाववदवृत्तित्वत्वमित्यस्य व्यर्थविशेषणघटितत्वं बोध्यम्। तच्चेत्थम्—स्वपदेन साध्यवद्भिन्नसाध्याभावदवृत्तित्वत्वमादाय तत्समानाधिकरणं प्रकृतसाध्य—व्याप्तीतरभेदव्याप्यतावच्छेदकं च साध्यवद्भिन्नावृत्तित्वत्वं तद्धि साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाविषयकप्रतीतेः साध्यवद्भिन्नावृत्तित्वमित्यस्या विषयताया अवच्छेदकमपि, तदवच्छिन्नाविषयकप्रतीतिर्न साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमिति प्रतीतिरपितु घटादिविषयिण्येव प्रतीतिस्तद्विषयतानवच्छेदकत्वस्य साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वत्वे सत्त्वात्[१] व्यर्थविशेषणघटितत्वं स्पष्टमिति।

---

१. अत्रेदं विचारणीयम् साध्याभाववत्पदघटितमिदं लक्षणं साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वाभावरूपम्। साध्याभाववत्पदाघटितञ्चेदं साध्यवद्भिन्नवृत्तित्वाभावरूपम्। एवञ्च साध्याभाववत्पदघटितेन लक्षणेन यो वृत्तित्वाभावो व्याप्तिस्वरूपत्वेन स्वीक्रियते तस्याखण्डाभावात्मकतया तद्घटकस्य साध्याभाववदित्यस्य सार्थक्यं कथन्न सम्भवति। साध्याभाववदित्यनेन घटितो वृत्तित्वाभावो न तादृशवृत्तित्वप्रतियोगिकाभावरूपो व्याप्तिलक्षणत्वेनाङ्गीकर्तुं शक्यः। साध्यवद्भिन्नसाध्याभावाधिकरणहृदनिरूपितवृत्तित्वादिविशेषस्याभावमादाय धूमादिसाध्यकवह्न्यादिव्यभिचारिण्यतिव्याप्तेर्जागरूकत्वात्। अपितु तादृशवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावरूपो वृत्तित्वसामान्याभाव एव व्याप्तिलक्षणतयैष्टव्यः। तथा सति साध्यवद्भिन्ननिष्ठाभेदसम्बन्धावच्छिन्नावच्छेदकताभिन्ना सती साध्याभावनिष्ठस्वरूपसम्बन्धावच्छिन्नावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका, अथ चेदृशावच्छेदकताद्वयनिरूपिता याऽधिकरणनिष्ठावच्छेदकता तन्निरूपिता या वृत्तितात्वाच्छिन्ना प्रतियोगिता तन्निरूपकोऽभाव एव व्याप्तिरिति पर्यवस्यति। एवं साध्याभाववत्पदाघटितस्य साध्यवद्भिन्नवृत्तित्वमित्यस्यापि वृत्तित्वसामान्याभाव एव पर्यवसिततया, साध्यवद्भिन्ननिष्ठाभेदसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपिका, अथचैतदवच्छेदकतानिरूपिता याऽधिकरणनिष्ठावच्छेदकता तन्निरूपिता या वृत्तितात्वावच्छिन्ना प्रतियोगिता तन्निरूपकोऽभाव इति व्याप्तिलक्षणं पर्यवसन्नं भवति। तेन च प्रतियोगितावच्छेदककुक्षौ साध्याभावप्रवेशाप्रवेशाभ्यामनयोर्वृत्तित्वाभावयोः परस्परं भेदात् साध्यवद्भिन्ननिरूपितवृत्तित्वाभावेन साध्यवद्भिन्नसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्याघटिततया वैयर्थ्यासम्भवादिति चेन्न। कर्मधारयपक्षे साध्यवद्भिन्ननिष्ठावच्छेदकताभिन्ना सती साध्याभावनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिता, अथ च साध्यवद्भिन्नमात्रनिष्ठावच्छेदकता निरूपिता याऽधिकरणनिष्ठावच्छेदकता, इत्येवं क्रमेण वृत्तितावत्त्वाच्छिन्नप्रतियोगिता-

अतो गुरुभूतस्यास्य लक्षणस्य व्याप्तीतरभेदानुमितिरूपप्रयोजनासाधकतया व्याप्तिलक्षणत्वाभावः स्फुटः तेन कर्मधारयसमासघटितं प्राच्यमतसिद्धं व्याप्तिलक्षणव्याख्यानमुपेक्ष्य नव्यानामेव रघुनाथशिरोणीनां मतं पुरस्करणीयम् । तदनुसारं साध्यवद्भिन्ने साध्याभावः साध्यवद्भिन्नसाध्याभाव इत्येवं सप्तमीतत्पुरुषसमासं साध्यवद्भिन्नसाध्याभावपदयोः स्वीकृत्य मतुप्प्रत्ययो विधेयः । तेन च साध्यवद्भिन्नसाध्याभाववदिति निष्पन्नं भवति । तस्यार्थश्च साध्यवद्भिन्ने यः[1] साध्याभावस्तदधिकरणमिति । अनन्तरं तादृशाधिकरणनिरूपितवृत्तित्वाभाव एव व्याप्तिरिति व्याप्तिलक्षणं निरुक्तं भवति ।

तथा च संयोगी द्रव्यत्वादित्यादौ साध्याभावस्य संयोगाभावस्याधिकरणं द्रव्यं गुणादिश्च परं द्रव्यं न साध्यवद्भिन्नं तत्र साध्यस्य संयोगस्य सत्त्वेन साध्यवद्भेदस्यासत्त्वादपितु गुणादिरेव साध्यवद्भिन्नः, गुणे गुणानङ्गीकारेण तत्र संयोगस्याऽसत्त्वात् । एवं सति साध्यवद्भिन्ने यः साध्याभावस्तस्यैव लक्षणेऽस्मिन् ग्रहणाद् गुणवृत्तिरेव संयोगाभावः ग्रहीतुं शक्यः । स एव संयोगाभावो द्रव्येप्यस्तीति न वक्तुं शक्यते, अधिकरणभेदेनाभावभेदं स्वीकृत्यैव लक्षणस्यास्य प्रणयनात् । एतेन हि साध्यवद्भिन्नवृत्तिसाध्याभावपदेन गृहीतस्य गुणवृत्तिसंयोगाभावस्याधिकरणं गुण एव न तु द्रव्यम्, तन्निरूपितवृत्तित्वाभावस्य च द्रव्यत्वे सत्त्वेन नाऽव्याप्तिसम्भवः ।

काऽभावस्यैव व्याप्तिलक्षणत्वं स्वीकरणीयम् । साध्याभावनिष्ठामवच्छेदकतामधिकृत्य न्यूनवारकपर्याप्तिर्न निवेश्या, अभेदेन साध्यवद्भिन्नविशिष्टेऽधिकरणे स्वरूपेण साध्याभावस्य नियमेन सत्त्वेन तस्मिन् साध्याभावस्य स्वरूपेण विशेषणत्वस्याव्यावर्तकतया निष्प्रयोजनत्वात् । एवञ्च साध्याभाववतः प्रवेशेऽप्रवेशे च यौ वृत्तित्वाभावौ व्याप्तिलक्षणात्मना पर्यवस्यतः तद्घटकीभूताधिकरणनिष्ठायामवच्छेदकतायां साध्याभावनिष्ठाऽवच्छेदकतानिरूपकत्वस्याविवक्षिततया तयोर्भेदो नोपपादयितुं शक्यः। एतेन हि साध्यवद्भिन्ननिरूपितवृत्तित्वाभावत्वरूपधर्मान्तरघटितत्वस्य साध्यवद्भिन्नसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावत्वे सम्भवेन वैयर्थ्यापत्तेः स्फुटत्वात् ।

१. सप्तमीतत्पुरुषं व्याचष्टे साध्यवद्भिन्न इति। तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वद्वृत्तित्वमर्थः। चि० दी० गा० पृ० ११४

साध्याभाववत्पदवैयर्थ्यशङ्कानिरासः

न चैवमपि साध्याभाववत् पदं व्यर्थम्, साध्यवद्भिन्नावृत्तित्वमिति लक्षणेनैव संयोगी द्रव्यत्वादित्यादौ साध्यवद्भिन्नत्वेन गुणादेरेव ग्रहणसम्भवः तेन च तन्निरूपितवृत्तित्वाभावस्य द्रव्यत्वादौ सत्त्वेनाऽव्याप्तिवारणसम्भवादिति वाच्यम्। तत्पुरुषसमासघटितेऽस्मिन् लक्षणे साध्यवद्भिन्नावृत्तित्वत्वस्याघटकतया साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमिति लक्षणस्य[1] वैयर्थ्यासम्भवात्।

---

१. तत्पुरुषसमासघटितेऽस्मिन् लक्षणे साध्यवद्भिन्नः आधेयतासम्बन्धेन साध्याभावे विशेषणम्। साध्याभावश्च स्वरूपसम्बन्धेनाधिकरणे विशेषणम्, तच्च निरूपितत्वसम्बन्धेन वृत्तितायाम्। तादृशवृत्तितात्वावच्छिन्नप्रतियोगिताकाभाव एव व्याप्तिलक्षणम्, अभावश्चायं पूर्वप्रदर्शितपथा वृत्तित्वसामान्याभावात्मक एव व्याप्ति लक्षणत्वेन स्वीकरणीयः। तेन च वृत्तित्व- (आधेयत्व) सम्बन्धावच्छिन्न-साध्यवद्भिन्ननिष्ठावच्छेदकताभिन्ना सती साध्याभावत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका, अथचेदृशावच्छेदकताद्वयनिरूपिता या साध्याभावनिष्ठावच्छेदकता तद्भिन्ना सती अधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका, अथ चेदृशावच्छेदकताद्वयनिरूपिता याऽधिकरणनिष्ठावच्छेदकता तादृशावच्छेदकतानिरूपिता या वृत्तितात्वावच्छिन्ना प्रतियोगिता तन्निरूपकोऽभाव व्याप्तिरिति वक्तव्यम्।

साध्याभाववत्पदाघटितं तु साध्यवद्भिन्नावृत्तित्वमिति लक्षणमनुपदं यथा विवृतं तथा साध्यवद्भिन्ननिष्ठाऽभेदसम्बन्धावच्छिन्नाऽवच्छेदकताभिन्नावच्छेदकत्वानिरूपिका, अथ चैतदवच्छेदकतानिरुपिता याऽधिकरणनिष्ठाऽवच्छेदकता तन्निरूपिता या वृत्तितात्वावच्छिन्ना प्रतियोगिता तन्निरूपकोऽभाव इत्येवं रूपेण वृत्तित्वसामान्याभावात्मना पर्यवसितं भवति।

अस्याभावद्वयस्य घटितघटकभावः कथमपि न सम्भवति। प्रथमे व्याप्तिलक्षणात्मकेऽभावे साध्यवद्भिन्नं साध्याभावे विशेषणम्, साध्याभावश्चाधिकरणे विशेषणं सत् परम्पराऽभावप्रतियोगिनि वृत्तित्वेऽन्वेति। द्वितीयेऽस्मिन्नभावे तु व्याप्तिलक्षणात्मके साध्यवद्भिन्नं साक्षादेवाऽधिकरणेऽन्वितं सत् तादृशवृत्तित्वाभावप्रतियोगिनि वृत्तित्वेऽन्वेति अत एव साध्यवद्भिन्ननिरूपित-वृत्तित्वाभावत्वस्य साध्यवद्भिन्नसाध्याभावाधिकरणनिरूपित- वृत्तित्वाभावत्वकुक्षौ प्रवेशसम्भावनाऽपि सुदूरपराहता तेन हि यद्यपि साध्यवद्भिन्ननिरूपितवृत्तित्वाभावत्वम्, साध्यवद्भिन्नसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावत्वसमानाधिकरण-मस्ति,प्रकृतसाध्यव्याप्यतावच्छेदकं लघुभूतधर्मान्तरञ्चास्ति, परं तदवच्छिन्नाविषयिणी या साध्यवद्भिन्नसाध्याभावाऽधिकरणनिरूपितवृत्तित्वाभावत्वावच्छिन्नविषयिणी

एतल्लक्षणाघटकमपि साध्यवद्भिन्नावृत्तित्वमिति व्याप्तिलक्षणं यद्यव्याप्त्यादिदोषग्रस्तं नास्ति तर्हीदमेव लक्षणमस्तु किमनेन साध्याभाववत्पदघटितेन लक्षणेनेति तु रिक्तं वचः, लक्षणान्तरस्य[१] तस्यापि स्वीकारे बाधकाभावात्। अन्येनान्यस्यान्यथाकर्तुमशक्यतयेदं लक्षणद्वयं परस्परं व्यावृत्तं पृथक् पृथगस्तु व्याप्तिलक्षणं तावता न कापि क्षतिः सम्भवति। अत एवेदं द्वितीयं लक्षणं स्वीकृत्यापि पञ्चमं लक्षणं साध्यवद्भिन्नावृत्तित्वमित्येवमस्य द्वितीयलक्षणस्याघटकं पृथग्व्याप्तिलक्षणरूपेण स्वीकृतमस्त्येवेति ध्येयम्।

साध्याभावपदसार्थक्यविचारः

अथापि साध्यवद्भिन्ने वृत्तिर्यस्तदधिकरणनिरूपितवृत्तित्वाभाव एव व्याप्तिलक्षणमस्तु साध्याभावपदप्रवेशेन किमिति तु नानुयोज्यम्, पर्वतो वह्निमान् धूमादित्यादिसद्धेतुकस्थलेष्वेव वह्निमद्भिन्नह्रदादिनिरूपितवृत्तितावद्यद्द्रव्यत्वादि तदधिकरणपर्वतादिनिरूपितवृत्तित्वस्यैव धूमादौ सत्त्वेनाऽसम्भवदोषस्य लक्षणेऽस्मिन् वज्रलेपायमानत्वात्।

ननु साध्यवद्भिन्नवृत्तिर्यस्तस्य साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन, साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेन वाऽधिकरणविवक्षणात् तस्य च प्रकृते स्वरूपसम्बन्ध एव पर्यवसानाद्द्रव्यत्वमादाय नासम्भव इति चेन्न; साध्यवद्भिन्नवृत्तियत्पदेन प्रमेयत्वमादाय स्वरूपेण तदधिकरणप्रसिद्ध्या तदादायासम्भवसङ्गतेः।

साध्यपदप्रवेश-प्रयोजनम्

अस्तु तर्हि साध्यवद्भिन्न वृत्तिर्योऽभावस्तद्वदवृत्तित्वमित्येव व्याप्तिलक्षणम्, अभावे साध्यस्य विशेषणविधया प्रवेशेन किं प्रयोजनमिति तु गगनरोमन्थायितम्। साध्यवद्भिन्ने विद्यमानस्य द्रव्यत्वादेः द्रव्यत्वाभावाभावरूपतया पुनरपि ग्रहणेनासम्भवदोषस्य तादवस्थ्यात्। नन्वधिकरणभेदेनाभावभेदं स्वीकृत्य यदि

प्रतीतिस्तदविषयतावच्छेदकत्वस्यैव साध्यवद्भिन्नसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावत्वे सत्त्वेन तदनवच्छेदकत्वाभावादस्य साध्यवद्भिन्नसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावत्वस्य साध्यवद्भिन्ननिरूपितवृत्तित्वाभावत्वरूपधर्मान्तरघटितत्वाभावः स्पष्टस्तेनास्य व्यर्थविशेषणघटितत्वं शङ्कितुमप्यशक्यम्।

१. तस्याऽपि लक्षणान्तरत्वात्। व्या पञ्च० पृ० ३०

साध्यो वह्निः तद्वद्भिन्नो जलह्रदस्तद्वृत्यभाव इत्युक्त्या द्रव्यत्वाभावाभावात्मकं द्रव्यत्वं गृहीतम् तर्हि तदधिकरणं जलह्रदो न तु पर्वतः, पर्वतह्रदरूपाऽधिकरणभेदेन द्रव्यत्वाऽभावाऽभावात्मकद्रव्यत्वस्य भेदात् । एवं सति वह्निमत्पर्वतादिभिन्नह्रदादिवृत्तिद्रव्यत्वाभावाभावात्मकद्रव्यत्वाधिकरणताया ह्रद एव सत्त्वेन तन्निरूपितवृत्तित्वाभावस्य धूमेऽक्षततया नासम्भवसम्भव इति चेन्मैवं भाषिष्ठाः, भावरूपाभावस्याऽधिकरणभेदेन भेदाऽनभ्युपगमेन द्रव्यत्वाभावाभावात्मकस्य द्रव्यत्वस्याधिकरणभेदेन भेदस्यैतल्लक्षणकर्त्तृमते सिद्धतया द्रव्यत्वाधिकरणं यथा ह्रदस्तथैव पर्वतोऽपि तन्निरूपितवृत्तित्वस्यैव धूमे सत्त्वेन प्रसक्तस्यासम्भवस्य वारणायाऽभावकोटौ साध्यस्य विशेषणविधयाऽवश्यं प्रवेशनीयवात्[1] ।

---

१. अत्र लक्षणे साध्यवद्भेदो नाम साध्यनिष्ठावच्छेदताकप्रतियोगिताकभेदः, साध्यनिष्ठावच्छेदकतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमिष्टमत एव, समवायेन संयोगस्य साध्यतायां समवायेन द्रव्यत्वहेतौ कालिकेन संयोगवान्नेति भेदमादाय तद्वति गगनादौ वर्तमानस्य साध्याभावस्य संयोगाभावस्याऽधिकरणे गगने द्रव्यत्वस्य हेतोः वृत्तित्वेऽपि नाव्याप्तिः प्रसरति, कालिकेन संयोगवान्नेति भेदीयप्रतियोगितावच्छेदकतायाः साध्यनिष्ठायाः साध्यतावच्छेदकसमवाय- सम्बन्धानवच्छिन्नत्वात् । एवं साध्यवद्भेदीयसाध्यनिष्ठप्रतियोगितावच्छेदकता साध्यतावच्छेदकावच्छिन्नैवाऽभिप्रेता तेन ह्यत्रैव स्थले वृक्षवृत्तित्वविशिष्टो यः संयोगः समवायेन तद्वतो भेदस्य गगनेऽक्षततया तत्र विद्यमानं संयोगाभावं पुनरप्यादाय तदधिकरणगगननिरूपितवृत्तित्वस्य द्रव्यत्वेऽनपायेऽपि नाव्याप्तितादवस्थ्यम्, साध्यतावच्छेदकसंयोगत्वातिरिक्तवृक्षवृत्तित्ववैशिष्ट्येन वृक्षवृत्तित्वविशिष्टसंयोगवान्नेति भेदीयप्रतियोगितावच्छेदकतायाः साध्यनिष्ठाया अवच्छिन्नत्वात् ।

साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठाऽवच्छेदकताकप्रतियोगिताकभेदवत्त्वम्, तादृशभेदवद्वृत्तित्वम्, तादृशभेदवद्वृत्तिर्यः साध्याभावस्तदधिकरणत्वं च साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनैष्टव्यम् । अन्यथा साध्यवद्भेदवत्त्वस्य स्वरूपसम्बन्धेन विवक्षणे घटत्वाभाववान् पटत्वादित्यत्र घटत्वाभाववद्भेदस्य घटत्वात्मकस्य स्वरूपेणाधिकरणाप्रसिद्ध्याऽव्याप्तिःस्यादेव, साध्यवद्भेदवत्त्वं सम्बन्धसामान्येन विवक्ष्यतां तेन च प्रकृते साध्यवद्भेदस्य घटत्वस्य समवायेनाधिकरणप्रसिद्ध्या नाव्याप्तिरिति न परीक्षाकोटिमाटीकते, संयोगी द्रव्यत्वादित्यत्र संयोगवद्भेदस्य कालिकेनाधिकरणे महाकाले संयोगाभावस्य साध्याभावस्य विद्यमानतया तदधिकरणमहाकालनिरूपितवृत्तित्वस्यैव द्रव्यत्वे सद्धेतौ सत्त्वेनाऽव्याप्तेर्वज्रलेपायमानत्वात् । साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्यवद्भेदवत्त्वस्य

घटाकाशसंयोगघटत्वान्यतराभावसाध्यकसद्धेतुकस्थलेऽव्याप्त्युपपादनम्, तन्निरासश्च

अथ भावरूपाऽभावस्याधिकरणभेदेन भेदो मास्तु अस्तु च तथा साध्यपदप्रवेशस्य सार्थक्यम्, परं नेदं लक्षणमव्याप्तिदोषान्मुच्यते। तथाहि गगनत्वं हेतूकृत्य यदि घटाकाशसंयोगघटत्वान्यतरप्रतियोगिकोऽभावः साध्यते तर्हि गगने यथा घटत्वाभावो नियमेनास्ति तथैव घटानधिकरणदेशावच्छेदेन घटाकाशसंयोगाभावस्याप्यवश्यं सत्तया स्थलस्यास्य सद्धेतुकत्वं निरापदं तथापि प्रकृते लक्षणसमन्वयो दुष्करः, साध्यते हि घटाकाशसंयोगघटत्वान्यतरत्वावच्छिन्नप्रतियोगिताकाभावः, साध्यवान् तादृशान्यतराभाववान् स च घटं परित्यज्य सर्वोऽपि संसारः तद्भिन्नो घट एव तत्र वर्तमानसाध्याभावपदेन तादृशान्यतराभावाभावो घटाकाशसंयोगघटत्वान्यतररूपः सुलभः, तयोर्मध्ये घटाकाशसंयोगरूपं साध्याभावं परिगृह्य तस्य चाधिकरणभेदेन भेदानभ्युपगमात्, तदधिकरणताया गगनेऽक्षततया तन्निरूपितवृत्तित्वस्यैव गगनत्वे सद्धेतौ स्पष्टत्वात्।

विवक्षायां तु नात्र स्थलद्वयेऽव्याप्तिपादौ प्रसरतः यथायथं स्थलद्वये तादृशसम्बन्धस्य समवायात्मकत्वात् स्वरूपात्मकत्वाच्च।

एवं साध्यवद्भेदवद्वृत्तित्वस्य, साध्यवद्भेदवद्वृत्तिसाध्याभावाधिकरणत्वस्य च स्वरूपेण विवक्षायां घटत्वात्यन्ताभाववान् पटत्वादित्यत्राव्याप्तिः पुनरपि प्रसरेदेव, घटत्वाभाववानित्येवं यः साध्यवद्भेदः घटत्वरूपः समवायेन तद्वति घटे साध्याभावस्य घटत्वस्य स्वरूपेण वृत्तित्वाप्रसिद्धेः। सम्बन्धसामान्येन तद्विवक्षायां तु साध्यवद्भेदाधिकरणे घटे साध्याभावस्य घटत्वस्य समवायेन वृत्तित्वप्रसिद्ध्याऽत्राव्याप्त्यसम्भवेऽपि द्रव्यत्वाभाववान् गुणत्वादित्यत्र द्रव्यत्वाभाववद्भेदाधिकरणे जन्यद्रव्यादौ कालिकेन वर्त्तमानं साध्याभावं द्रव्यत्वाभावाभावं द्रव्यत्वात्मकमुपादाय कालिकेन तदधिकरणतया जन्यगुणस्य ग्राह्यतया तत्र च गुणत्वस्य सद्धेतोः सत्त्वेनाव्याप्तिः दुष्परिहरा। निरुक्तदिशा साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन तथा विवक्षणे तु प्रकृते साध्यवद्भिन्नपदेन द्रव्यत्वाभाववद्भिन्नस्य जन्यद्रव्यस्य सुग्रहत्वेऽपि तत्र निरुक्तसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन समवायेन वृत्तिमतः साध्याभावस्य द्रव्यत्वाभावाभावस्य द्रव्यत्वात्मकस्य तादृशसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन समवायेनैवाधिकरणताया ग्राह्यत्वनियमेन तदधिकरणं न जन्यगुणः किन्तु द्रव्यमेव सम्भवति, तन्निरूपितवृत्तित्वाभावस्य गुणत्वे सद्धेतावनपायेन सर्वं सुस्थमिति दिक्।

अत्र घटाकाशसंयोगाभावमात्रसाध्यकं स्थलं नोपात्तं घटाकाशसंयोगाभावस्य घटानधिकरणदेशावच्छेदेन गगने, घटे च तत्तदवयवावच्छेदेन विद्यमानतया केवलान्वयित्वं सर्ववादिसम्प्रतिपन्नमतः केवलान्वयिसाध्यकेऽस्मिन् स्थले द्वितीयस्याप्यस्य लक्षणस्याव्याप्तेरिष्टत्वात्। नाऽपि घटत्वाभावमात्रसाध्यकस्थलमुपन्यस्तम्, तत्राव्याप्तेरसम्भवादिति ध्येयम्।

यच्च एतद्दोषपरिजिहीर्षया साध्यवद्भिन्नवृत्तित्वविशिष्टो यः साध्याभावस्तदधिकरणनिरूपितवृत्तित्वाभावस्यैव व्याप्तित्वमिति जोघुष्य साध्याभावे साध्यवद्भिन्नवृत्तित्ववैशिष्ट्यं विशेषणन्तेन च प्रकृते साध्यवद्भिन्नत्वस्य घट एव सत्त्वेन साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभावपदेन घटवृत्तिघटाकाशसंयोगस्यैव ग्रहीतुं शक्यतया तत्र च गगनत्वस्य सद्धेतोरसत्त्वेन नाव्याप्तिः सम्भवतीति मन्यते तदत्यल्पम्। साध्यवद्भिन्नवृत्तित्वविशिष्टो यस्तदधिकरणनिरूपितवृत्तित्वाभावस्यैव साध्याभावपदाघटितस्य व्याप्तिलक्षणत्वेऽपि पर्वतो वह्निमान् धूमादित्यादौ वह्निमद्भिन्नजलह्रदादिवृत्तित्वविशिष्टस्य यस्य कस्यापि द्रव्यत्वादेरधिकरणं विशिष्टाधिकरणत्ववैलक्षण्यस्य स्पष्टतया जलह्रदादिरेव तत्र च सद्धेतुः धूमो नास्त्येव। तथा च पूर्वप्रदर्शितासम्भवानवकाशेन लक्षणघटकसाध्याभावपदनैरर्थक्यस्य ब्रह्मणापि वारयितुमशक्यत्वादित चेत् अत्रायं विवेकः—द्वितीयमिदं लक्षणमभावाभावस्यातिरिक्तत्वमधिकरणभेदेन चाभावभेदमभ्युपेत्यैव प्रवृत्तम्। तेन हि प्रस्तुतस्थले घटाकाशसंयोगघटत्वान्यतराभाववद्भिन्ने घटे विद्यमानः साध्याभावो घटाकाशसंयोगघटत्वान्यतराभावाभावः स्वतन्त्र एकोऽभाव एव, अयञ्च यथा घटे विद्यते तथैव गगनेऽपि, परं घटगगनरूपाधिकरणभेदेन भिन्नः स घटे प्रतियोगिव्यधिकरणो गगने च प्रतियोगिसमानाधिकरणस्तेन हि घटे विद्यमानोऽयं साध्याभावो गगने नास्ति, अस्यां स्थितौ साध्यवद्भिन्नघटवृत्तिघटाकाशसंयोगघटत्वान्यतराभावाभावात्मकस्य साध्याभावस्य प्रतियोगिव्यधिकरणस्य तादृशान्यतराभावात्मकप्रतियोगिमति गगने शशश्रृङ्गायमानतया नाव्याप्तिः सम्भवतीति।

परमिदं न परीक्षाक्षममभावाभावस्यातिरिक्तत्वमतेन एतल्लक्षणप्रणयनमिति स्वीकारे साध्याभाव इत्यत्र साध्यपदस्य निष्प्रयोजनकत्वतादवस्थ्यात्। तथाहि साध्यवद्भिन्ने वृत्तिर्य इत्येवमादि लक्षणं तु न युक्तं तादृशद्रव्यत्वादिकमादायासम्भवापत्तेः, तादृशाभाव इत्युक्तौ द्रव्यत्वाभावाभावमादाय पुनरप्यसम्भवसम्भवेनाभावविशेषणतया साध्यपदमवश्यं प्रवेश्यमिति पूर्वं प्रादर्शि परं साम्प्रतं

तदनपेक्षितमेव । साध्यवद्भिन्ने वृत्तिर्योऽभाव इत्येतावन्मात्रमुच्यतां तादृशाभावरूपेण द्रव्यत्वाभावाभावश्च गृह्यतां तथापि नो हानिः, अभावत्वेनाभावप्रतियोगिकस्याभावस्यातिरिक्तत्वेन द्रव्यत्वाभावाभावस्याप्यभावत्वेनाभावप्रतियोगिकतयाऽतिरिक्तत्वमधिकरणभेदेन भिन्नत्वं च निर्विवादम्, तथा सति पर्वतो वह्निमान्धूमादिति स्थले वह्निमद्भिन्नह्रदवृत्तिद्रव्यत्वाभावाभावस्य, पर्वतवृत्तिद्रव्यत्वाभावाभावाद् भिन्नस्य द्रव्यत्वानात्मकस्याधिकरणताया ह्रद एव सत्त्वेन तन्निरूपितवृत्तित्वाभावस्य धूमेऽक्षतत्वादिति केषाञ्चनाक्षेपः कुशकाशावलम्बनमात्रमाशयानवबोधात् । नह्यधिकरणभेदेन सर्वस्याप्यभावस्य भिन्नत्वमूरीक्रियते, किन्तु यत्र स्वप्रतियोग्यधिकरणवृत्तित्व-स्वप्रतियोग्यधिकरणावृत्तित्वस्वरूपयोः परस्परं विरुद्धयोः [१]धर्मयोरारोपस्तत्रैवाभावेऽधिकरणभेदेन भेदाभ्युपगमः । एवं सति द्रव्यत्वाभावाभावघटाभावादिष्वनयोर्विरुद्धयोर्धर्मयोरारोपासम्भवेनाधिकरणभेदन भेदो नास्त्येव, फलतो वह्निमान् धूमादित्यादौ द्रव्यत्वाभावाभावं घटाभावं वाऽदाय तस्याधिकरणभेदेन भिन्नत्वाभावेन तदधिकरणतायाः साध्यवति पर्वतादौ सत्त्वमक्षुण्णमेव तन्निरूपितवृत्तित्वस्यैव धूमादौ सद्धेतौ सत्त्वेनासम्भवो दुर्निवार्यस्तेनाभावे प्रतियोगिविधया साध्यस्य विशेषणत्वविवक्षया लक्षणे प्रविष्टं साध्यपदं सप्रयोजनकमेव । घटकाशसंयोगघटत्वान्यतराभावसाध्यकस्थलेऽव्याप्तिश्च न प्रसज्यते, तत्र साध्याभावस्य घटाकाशसंयोगघटत्वान्यतराभावाभावस्य घटान्तर्भावेण प्रतियोग्यधिकरणावृत्तेर्गगनान्तर्भावेण प्रतियोग्यधिकरणवृत्तेश्चाधिकरणभेदेन भेदस्य स्पष्टतया साध्यवद्भिन्ने घटे वर्त्तमानस्य तस्य घट एव सत्त्वेन तन्निरूपितवृत्तित्वाभावस्य गगनत्वे सद्धेतौ निष्प्रत्यूहत्वात् ।

वस्तुतस्तु अभावाभावः प्रतियोगिस्वरूपोऽतिरिक्तो वेति चिन्ता लाघवमनुरुद्ध्यैव प्रवर्तते । अभावाभावस्यातिरिक्तत्वाभ्युपगमे तदभावाभावादिपरम्परायां प्रविष्टानामनन्ताभावानामप्यतिरिक्तत्वस्य प्रसह्याभ्युगन्तव्यतयाऽनन्ताभावकल्पनाप्रयुक्तगौरवं सोढव्यं भवत्यत एवाभावाभावास्य प्रतियोगिस्वरूपत्वं स्वीक्रियते प्रतियोगिनश्च क्लृप्ततया तत्रैवाभावाभावस्यान्तर्भावेङ्गीकृते लाघवं स्पष्टम् ।

इदमेव तथ्यं पुरस्कृत्य यत्र प्रतियोग्यप्यननुगतस्तत्राभावाभावस्य प्रतियोगिस्वरूपत्वाभ्युपगमेऽपि गौरवं तदवस्थम्, किञ्च ध्वंसप्रागभावयोरधिकरणे-

---

१. यत्र प्रतियोगिसमानाधिकरणत्वप्रतियोगिव्यधिकरणत्वलक्षणविरुद्धधर्माध्यासस्तत्रैवाधिकरणभेदेनाभावभेदाभ्युपगमो न तु सर्वत्र । व्या० पञ्च० पृ० ३३

नात्यन्ताभाव[1] इति प्राचां मतेऽत्यन्ताभावविरोधित्वं यथा प्रतियोगिनस्तथैव तत्प्रागभावध्वंसयोरपीत्यभावप्रतियोगित्वं प्रतियोगितत्प्रागभावतद्ध्वंसेषु त्रिषु[2] स्वीक्रियते, तेन ह्यत्यन्ताभावस्य त्रितयप्रतियोगिकतया नित्यप्रतियोगिकाभावाभावस्य प्रतियोगिस्वरूपत्वाभ्युपगमे महद्गौरवमतिस्फुटमतः भक्षितेऽपि लशुने न व्याधिशान्तिरिति न्यायेनाभावाभावस्य स्वस्वरूप एवावस्थानं वरम् किमिति प्रतियोगिस्वरूपत्वस्वीकारेणेति रम्यः पन्थाः ।

एवं सति नहि सर्वेऽप्यभावाभावा अतिरिक्ता अपितु घटत्वघटाकाशसंयोगान्यतराभावाभावादय एव, एवं विधस्याभावस्य प्रतियोगिस्वरूपत्वाभ्युपगमे संयोगात्मकप्रतियोगिनस्तत्तत्सम्बन्धिभेदेनाननुगततया प्राचां मते तद्ध्वंसतत्प्रागभावयोरपि तत्प्रतियोगितयाऽननुगमरूपदोषस्य जागरूकत्वात् ।

तथा च घटाकाशसंयोगघटत्वान्यतराभावाभावस्य साध्याभावस्य साध्यवद्भिन्ने घटे वर्तमानस्याधिकरणं घटो न तु गगनम् तन्निरूपितवृत्तित्वाभावस्य गगनत्वे सद्धेतौ सत्त्वेन नेदं द्वितीयं लक्षणमव्याप्तम् । द्रव्यत्वाभावाभावादेस्तु द्रव्यत्वात्मकप्रतियोगिरूपत्वाङ्गीकार एव ज्यायान् द्रव्यत्वस्य प्रतियोगिनो जात्यात्मकस्यैकत्वेन तस्य तद्रूपत्वाङ्गीकारे लाघवस्य स्पष्टत्वात् । तेन हि द्वितीयेऽस्मिन् लक्षणे साध्यवद्भिन्नवृत्तिसाध्याभावघटकसाध्यपदप्रवेशाभावे द्रव्यत्वाभावाभावमादाय द्रव्यत्वस्वरूपस्य तस्य भावरूपाभावस्याधिकरणभेदेन[3] भेदाभावादित्यनुपदं प्रदर्शितदिशा पर्वतोऽप्यधिकरणं तन्निरूपितवृत्तित्वस्यैव धूमे सद्धेतौ सत्त्वेन लक्षणस्यास्यासम्भवदोषग्रस्ततया तद्वारणार्थं साध्यपदसार्थक्यमपि सूपपादम् ।

॥इति द्वितीयव्याप्तिविमर्शः ॥

---

१. (क) प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वात् । चि० दी० पृ० ३२३
(ख) ध्वंसवत्त्वेनात्यंन्ताभावानधिकरणत्वात् इति प्राचामनुमतम् ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमादृत्य । चि० दी० गा० पृ० ३२६

२. यत्तु प्राचीनमते रूपादिसामान्याभावस्य रूपतद्ध्वंसतत्प्रागभावैतत्त्रितयप्रतियोगिकतया । चि० दी० गा० पृ० २३२

३. भावरूपाभावस्य चाधिकरणभेदेन भेदाभावात् । व्या० पञ्च० पृ० ३१

तृतीयं प्रकरणम्

साध्यवत्प्रतियोगिकान्योन्याभावासामानाधि-करण्यमिति

तृतीयव्याप्तिविमर्शः

एतल्लक्षणावतरणबीजम्

अथ तृतीयमव्यभिचरितत्वं व्याख्यातुमुपक्रम्यते तच्च 'साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यमिति विज्ञेयम्। साध्याभावाधिकरणनिरूपितवृत्तित्वाभावरूपं प्रथमं लक्षणं यथाश्रुतरीत्या व्याप्यवृत्तिसाध्यकसद्धेतुकस्थले कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन कपिसंयोगाभाववत्येतद्वृक्षे सद्धेतोरेतद्वृक्षत्वस्य विद्यमानत्वेन भवत्यव्याप्तम्, अतः साध्यवद्भिन्नवृत्तित्वेन साध्याभावं विशिष्य साध्यवद्भिन्नवृत्तिसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावो व्याप्तिरिति द्वितीयं व्याप्तिलक्षणमुपन्यस्तम्, अथ च यद्यपि कपिसंयोगाभावो मूलावच्छेदेन वृक्षेऽस्ति परं तस्य साध्यवति वृक्ष एव सत्त्वेन साध्यवद्भिन्नवृत्तिसाध्याभावपदेन ग्रहीतुमनर्हतया गुणवृत्तिरेव स ग्राह्यस्तदधिकरणगुणनिरूपितवृत्तित्वाभावस्यैतद्वृक्षत्वे सद्धेतौ सत्त्वेन नाव्याप्तेरवकाश इति स्वीक्रियते। परमयमव्याप्तिवारणप्रयासोऽधिकरणभेदेनाभावभेदाभ्युपगमपक्ष एव मन्तुमर्हः, अन्यथा साध्यवद्भिन्ने गुणादौ विद्यमानात् संयोगाभावात् साध्यवति वृक्षे विद्यमानस्य मूलावच्छेदेन संयोगाभावस्यानतिरिक्तत्वेऽव्याप्तिस्तदवस्थैव तिष्ठति। अस्यां स्थितौ योऽधिकरणभेदेनाभावभेदं न मनुते तस्य मतेनाऽपि व्याप्तेर्निर्दुष्टं लक्षणमवश्यं निर्वाच्यमिति मनसि कृत्येदं तृतीयं लक्षणं निरूपयन्ति तार्किकास्तच्च साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यमिति।

लक्षणविवरणं समन्वयप्रकारश्च

लक्षणस्यास्य विवरणमेवम्—साध्यवान् प्रतियोगी यस्यासौ साध्यवत्प्रतियोगिकः, साध्यवत्प्रतियोगिकश्चाऽसावन्योन्याभावः साध्यवत्प्रतियोगिकान्योभावस्तदसामानाधिकरण्यम्—तदधिकरणवृत्तित्वाभाव इति।

एवं च साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणनिरूपितवृत्तित्वाभावो हेतौ विद्यमानो हेतुनिष्ठा व्याप्तिरिति पर्यवसन्नं भवति। पर्वतो वह्निमान् धूमादित्यादौ सद्धेतुकस्थले साध्यो वह्निस्तद्वत्प्रतियोगिकोऽन्योन्याभावो वह्निमान्नेत्यन्योन्याभावस्तस्याधिकरणं ह्रदादिरेव तन्निरूपितवृत्तित्वाभावस्य धूमे सत्त्वेन व्याप्तिलक्षणं समन्वेति। धूमवान् वह्नेरित्यसद्धेतुकस्थले तु धूमस्य साध्यतया तद्वत्प्रतियोगिकस्यान्योन्याभावस्य धूमवान्नेत्याकारकस्याधिकरणे तप्तायःपिण्डे हेतुत्वेनाभिमतस्य वह्नेः सत्त्वेन नेदं लक्षणमतिव्याप्तम्।

अव्याप्यवृत्तिसाध्यकस्थले कपिसंयोग्येतद्वृक्षत्वादित्यत्र तु साध्यो यः कपिसंयोगस्तद्वत्प्रतियोगिकोऽन्योन्याभावः कपिसंयोगवान्नेत्याकारकस्तस्याधिकरणं गुणादिर्नत्वेतद्वृक्षोऽन्योन्याभावस्याव्याप्यवृत्तित्वनियमेन कपिसंयोगवति वृक्षे मूलावच्छेदेन तस्य वृत्तित्वानभ्युपगमात्। एवं च गुणादिनिरूपितवृत्तित्वाभावस्यैवैतद्वृक्षत्वे सत्वान्नाऽव्याप्तिप्रसङ्गः।

लक्षणघटाकान्योन्याभावस्य परिष्कारस्तत्सार्थक्यविचारश्च

अत्र संयोगेन वह्न्यादिसाध्यके सद्धेतौ धूमादावसम्भवः,साध्यवत् प्रतियोगिकान्योन्याभावपदेन वह्निमद्घटोभयन्नेत्याकारकस्य वह्निमद्घटोभयप्रतियोगिकस्यान्योन्याभावस्यापि[1] ग्रहीतुं शक्यतया तस्य च केवलान्वयित्वेन साध्यवति

---

१. वह्निमद्घटोभयन्नेत्येवं विधस्योभयप्रतियोगिकस्यान्योन्याभावस्य प्रतियोगिता, वह्निमतः घटस्य च यः समूहस्तत्रास्ति, समूहस्य च समूहघटकप्रत्येकानतिरिक्ततया समूहघटके प्रत्येकं वह्निमति घटे च प्रतियोगिता विद्यत इति स्वतः सिद्धम्, तेन प्रतियोगितावच्छेदकं वह्निमत्वं घटत्वम्, अथ च वह्निमतो घटस्य च प्रतियोगिविधयोभयत्वेन भानादुभयत्वमपि। एवं सत्यन्योन्याभावस्यास्य प्रतियोगितावच्छेदकत्वं त्रिषु वह्निघटत्वोभयत्वेषु स्वीक्रियते उभयत्वं च व्यासज्यवृत्तिधर्मः। व्यासज्यवृत्तित्वं नाम एकत्वानवच्छिन्नानुयोगिताकपर्याप्ति-प्रतियोगित्वम्। तच्चोभयत्वेऽक्षतं पर्याप्तिसम्बन्धेनोभयत्वं यत्र तिष्ठति तत्रोभयत्वप्रतियोगिकपर्याप्त्यनुयोगिता विद्यते, पर्याप्ति-सम्बन्धेनोभयत्वं चोभयस्मिन्नेव तिष्ठति नैकत्रेति

पर्वतादावपि सत्त्वं निरुपद्रुतम्, तत्र च सद्धेतोः धूमादेः वृतित्वादिति केषाञ्चनाक्षेपस्तु लक्षणघटकान्योन्याभावं स्वप्रतियोगिताश्रयवृत्तित्वेन विशिष्य निरसनीयः। वह्निमद्घटोभयन्नेत्याकारकस्यान्योन्याभावस्य स्वप्रतियोगिताश्रयवह्निमति पर्वतादौ विद्यमानतया लक्षणाघटकत्वं स्पष्टम्।

अनुगमस्तु, अन्योन्याभावस्य प्रतियोगिताविशिष्टान्यत्वेन विधेयः प्रतियोगितावैशिष्ट्यं च स्वनिरूपितत्व-स्वसामानाधिकरण्योभयसम्बन्धेन।

न चैवमन्योन्यपदं व्यर्थं साध्यवत्प्रतियोगिकात्यन्ताभावस्य प्रतियोगितासमानाधिकरणत्वेन लक्षणाघटकतयाऽसम्भवानवकाशादिति वाच्यम्, अन्योन्याभावत्वनिरूपिता या प्रतियोगिता तद्विशिष्टान्यत्वस्य लाभायान्योन्यपदस्य सार्थक्यसम्भवात्, अन्यथा धर्मिभेदधर्मात्यन्ताभावयोरैक्येन वह्न्यत्यन्ताभावस्य वह्निमद्भेदात्मकतया वह्निमान्नेत्येवम्विधस्य साध्यवत्प्रतियोगिकस्यान्योन्याभावस्यापि वह्निप्रतियोगिकत्वं निराकुलमतो वह्निनिष्ठप्रतियोगिताविशिष्टत्वस्यैव वह्निमान्नेत्याकारकान्योन्याभावे सत्त्वेनासम्भवो दुर्निवारः, अन्योन्याभावत्वनिरूपितत्वस्य प्रतियोगिताविशेषणत्वे तु वह्निनिष्ठायाः प्रतियोगिताया अत्यन्ताभावत्वनिरूपितत्वेन ग्रहणमसम्भवि, तेन च वह्निमन्निष्ठाया एव तस्या ग्रहणेन तदसामानाधिकरण्यस्य वह्निमान्नेत्याकारकान्योभावेऽक्षततया भवति सर्वं समञ्जसमिति ध्येयम्।

अथापि कैश्चिदेवमाक्षिप्यते—प्रवेश्यतामन्योन्यपदम्। परमभावाधिकरणकस्याभावस्याधिकरणस्वरूपत्वेन[1], पर्वतो वह्निमान् धूमादित्यत्र साध्यवत्प्रतियोगिको योऽन्योन्याभावो वह्निमान्नेत्याकारकस्तस्मिन् विद्यमानो यो घटाभावभेदः

वस्तुस्थितिमनुरुध्यास्या अनुयोगिताया एकत्वानवच्छिन्नत्वं स्फुटम्। अस्यां स्थितौ अस्या एकत्वानवच्छिन्नाथा अनुयोगितायाः पर्याप्तिसम्बन्धमुखेन निरूपकत्वं यस्यां प्रतियोगितायां तस्या आश्रयत्वमुभयत्व-त्रित्वादिरूपे धर्मविशेष एव। अत एवैवं विधस्य धर्मविशेषस्य व्यासज्यवृत्तित्वमभ्युपेयते। एतादृशधर्मावच्छिन्नप्रतियोगिताकोऽन्योन्याभावश्च सर्वत्र विद्यमानः केवलान्वयी भवति, उभयात्मकस्य त्रयात्मकस्य वा कस्यचनैकस्य वस्तुनोऽप्रसिद्धतयोभयादि- प्रतियोगिकस्यान्योन्याभावस्य सर्वत्रैव सत्त्वात्।

१. अभावमात्राधिकरणक इव अभावप्रतियोगिकोऽपि विशिष्टाभावाद्यनात्मकोऽभावः अधिकरणभिन्नो नेष्यते लाघवात्। चि॰ दी॰ जा॰ पृ॰ १५९

सोऽपि साध्यवत्प्रतियोगिकान्योन्याभावस्वरूपः। तथा च वह्निमान्नेत्यन्योन्याभावस्यान्योन्याभावत्वनिरूपिता प्रतियोगिता यथा वह्निमति तथा घटाभावेऽपीति स्फुटम्, तेन चान्योन्याभावत्वनिरूपितप्रतियोगितापदेन घटाभावनिष्ठायाः प्रतियोगिताया अपि सुग्रहतया तद्वैशिष्ट्यस्यैव निरूक्तोभयसम्बन्धेन वह्निमान्नेत्यन्योन्याभावे सत्त्वात् पुनरप्यसम्भव इति। परमिदं मोहविलसितमात्रम्, अभावाधिकरणकस्याभावस्याधिकरणस्वरूपत्वमनभ्युपगम्यैवैतल्लक्षणप्रणयनात्। वस्तुतस्तु यथाऽभावत्वमखण्डोपाधिस्तथैवान्योन्याभावत्वमपि, तथासत्यभावत्वप्रवेशमपेक्ष्यान्योन्याभावत्वप्रवेशे गौरवस्यासम्भववदुक्तिकतयाऽन्योन्यपदवैयर्थ्यशङ्कानवकाशैवेति निष्कण्टको मार्गः।

अन्योन्याभावस्याधिकरणतानियामकसम्बन्धविमर्शः

नन्वन्योन्याभावघटितमिदं लक्षणं साध्यवत उभयत्वादिव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताको योऽन्योन्याभावस्तदधिकरणे सद्धेतोर्वर्तमानतयाऽसम्भवदोषग्रस्तमिति प्रागुपदर्शितम्, परं नेदं सम्भवति साध्यवत्प्रतियोगिकस्यान्योन्याभावस्याधिकरणं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन वक्तव्यम्, न तु स्वरूपसम्बन्धेन, घटत्वाभाववान् पटत्वादित्याद्यभावसाध्यकसद्धेतुकस्थले साध्यवत्प्रतियोगाकान्योन्याभावस्य घटत्वाभाववान्नेत्याकारकस्य घटत्वस्वरूपस्य स्वरूपसम्बन्धेनाधिकरणाप्रसिद्ध्याऽव्याप्तेरिति द्वितीयलक्षणे स्पष्टत्वात्।

तथासति प्रकृतेऽपि घटत्वाभावादेः साध्यतायां तादृशसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धस्तु यथायथं समवायादिरेव तेन च सम्बन्धेन निरुक्तस्य व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य साध्यवतोऽन्योन्याभावस्य घटत्वाभाववद्वह्न्येतदुभयन्नेत्येवंविधस्यातिरिक्तस्याधिकरणाप्रसिद्ध्या लक्षणाघटकत्वं स्फुटं, फलतो घटत्वाभाववान्नेत्येवं विधस्य व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य साध्यवतोऽन्योन्याभावस्यैव ग्रहणसम्भवात् तस्य च घटत्वस्वरूपतया निरुक्तसाध्यसामान्यीयप्रतियोगितावच्छेदकसमवायसम्बन्धेन तदधिकरणे घटे हेतोः पटत्वादेरवृत्तितया लक्षणसमन्वयसौकर्यादिति चेत् न अभावाभावस्यातिरिक्तत्वमतमादृत्य स्वरूपसम्बन्धेन साध्यवद्भेदाधिकरणविवक्षयाऽसम्भवसम्भवात्।

लक्षणघटकोऽन्योन्याभावः साध्यवत्प्रतियोगिताकोऽभिप्रेतो न तु साध्यनिष्ठावच्छेदकताकप्रतियोगिताक इति विचारः

पुनरपीदं विमृश्यताम्—अन्योन्याभावे स्वप्रतियोगिताश्रयावृत्तित्वविशेषणमस्तु तथापि यत् साध्यमनेकाधिकरणकं तत्स्थलीयसद्धेतावव्याप्तिः स्यादेव । यथा पर्वतो वह्निमान् धूमादिति प्रसिद्धस्थलमेवाऽदीयताम् । अत्र साध्यस्य वह्नेः पर्वतमहानसादीनि नैकान्यधिकरणानि तत्र साध्यंवत्पदेनैकस्य साध्यवतः पर्वतस्य महानसस्य चत्वरादेर्वा सुग्रहतया साध्यवत्प्रतियोगिकान्योन्याभावपदेन पर्वतो न महासन्नेत्येवं विधा अप्यन्योन्याभावा ग्रहीतुं शक्याः । एषां च स्वप्रतियोगिताश्रयपर्वतादाववृत्तित्वं सुलभं तेन च पर्वतो नेत्येवं विधस्यान्योन्याभावस्याधिकरणे महानसादौ सद्धेतोः धूमस्य वृत्तित्वादव्याप्तिः स्फुटेति ।

यदि चान्योन्याभावः साध्यनिष्ठावच्छेदकताकप्रतियोगिताकत्वेन विशिष्यते तेन च पर्वतो नेत्येवंविधानामन्योन्याभावानां पर्वतत्वादिनिष्ठावच्छेदकताकप्रतियोगिताकानामग्राह्यतया नाव्यप्तिरिति मन्यते तदा स्वप्रतियोगिताश्रयावृत्तित्वविशेषणस्य वैयर्थ्यम्, व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य साध्यवतोऽन्योन्याभावस्य प्रतियोगितायाः साध्यनिष्ठावच्छेदकताभिन्नघटत्वोभयत्वादिनिष्ठावच्छेदकताकत्वेन लक्षणाघटकत्वात् । मास्तु स्वप्रतियोगिताश्रयावृत्तित्वं विशेषणम्, अन्योन्याभावे साध्यनिष्ठावच्छेदकताकप्रतियोगिताकत्वविशेषणेनैव सर्वसामञ्जस्यादिति कथनेनाऽपि न निस्तारस्तथा सति साध्यवदन्यावृत्तित्वमिति पञ्चमेन व्याप्तिलक्षणेन पौनरुक्त्यस्य[1] दुरुपह्नवत्वात् । परमिदं न कमनीयम्, यथा पूर्वपक्षीयव्याप्तिलक्षणानि केवलान्वयिस्थलान्तर्भावेणाव्याप्तानि तथा तृतीयलक्षणस्य नानाधिकरणकसाध्यकस्थलान्तर्भावेणाव्याप्तत्वस्यापि इष्टत्वात् ।

एतावता साध्यवत्प्रतियोगिकोऽन्योन्याभाव एतल्लक्षणघटको न तु साध्यवत्वावच्छिन्नप्रतियोगिताक इत्यङ्गीकारे, तृतीयमिदं लक्षणं केवलान्वयिसाध्यकस्थले साध्यवतस्तत्तद्व्यक्तेरन्योन्याभावस्य घटो न पटो नेत्यादिकस्य प्रसिद्धतया कथमव्याप्तं भवेदिति प्रत्यवस्थानं तु धूलिप्रक्षेपमात्रपर्यवसितम्, साध्यवत्प्रतियोगिकान्योन्याभावाप्रसिद्धिप्रयुक्ताव्याप्तेः केवलान्वयिसाध्यक-

१. साध्यवत्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणे तु पञ्चमेन सह पौनरुक्त्यमिति चेन्न । व्या० पञ्च० पृ० ३५

स्थले निरवकाशत्वेऽपि तादृशान्योन्याभावाधिकरणनिरूपितवृत्तित्वस्यैव केवलान्वयिनि सद्धेतौ सत्त्वेनाव्याप्तेः वज्रलेपायमानत्वात्।

पञ्चमेन सह लक्षणस्यास्य पौनरुक्त्यशङ्कानिरासः

अत्र कश्चित् यद्येवं ब्रूयात्—पूर्वपक्षीयव्याप्तिलक्षणखण्डनावसरे 'केवलान्वयिन्यभावादिति' वदन् गङ्गेशोपाध्यायः पञ्चानामपि पूर्वपक्षीयव्याप्तिलक्षणानां केवलान्वयिन्येवाव्याप्तिरिति, सर्वं वाक्यं सावधारणमिति न्यायेन सूचयति, तेन च तृतीयमिदं लक्षणं नानाधिकरणकसाध्यकस्थलेऽप्यव्याप्तमित्यभ्युपगमोऽसङ्गत इति लक्षणेऽस्मिन् साध्यवत्प्रतियोगिकान्योन्याभावपदेन साध्यतावच्छेकंतापर्याप्त्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्याभाव एव विवक्ष्यताम्, वार्यताञ्च लक्षणस्यास्य नानाधिकरणकसाध्यकस्थलेऽव्यापकत्वम्, तेन च पञ्चमेन व्याप्तिलक्षणेन सहाऽस्य पौनरुक्त्यं दुर्निवारमिति तत्तु न साधीयः। तृतीयलक्षणाकारः'साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यमिति, अत्राधिकरणत्वेनाधिकरणस्य प्रवेशः स्पष्टः। पञ्चमलक्षणस्याकारस्तु 'साध्यवदन्याऽवृत्तित्वम्' अत्राधिकरणपदस्याश्रवणेनाधिकरणत्वेनाधिकरणस्य प्रेवशो नास्त्यपितु प्रकृतलक्षणघटकान्यपदस्य भिन्नपरतया, भिन्नपदस्य च भेदवदर्थकत्वेन, भेदश्चान्योन्याभाव एवेति वस्तुस्थितिमनुरुद्ध्यान्योन्याभाववत्वेन तस्य प्रवेशः तथा सति यद्यपि तृतीयपञ्चमलक्षणयोः साध्यवत्प्रतियोगिकान्योन्याभावस्याधिकरणं तु प्रविष्टं परं तत् तृतीयलक्षणे साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणत्वेन प्रविष्टम्, पञ्चमलक्षणे तु तादृशान्योन्याभाववत्वेनातोऽधिकरणत्वप्रवेशाऽप्रेवशाभ्यां[1] तृतीयपञ्चमलक्षणयोः भेदस्य स्पष्टत्वात् पौनरुक्त्यशङ्कालेशाऽनवकाशात्।

ननु स्वसमानाधिकरणप्रकृतसाध्यव्याप्यतावच्छेदकधर्मान्तरघटितधर्मवतो वैयर्थ्यं सर्ववादिसम्प्रतिपन्नम्। प्रकृते स्वं—साध्यवत्वावच्छिन्नप्रतियोगिताकान्योन्याभावाधिकरणनिरूपितवृत्तित्वाभावात्मकतृतीयलक्षणगतो धर्मस्तादृशाभावत्वम्, तत्समानाधिकरणं प्रकृतसाध्यीभूतव्याप्तीतरभेदव्याप्यतावच्छेदकं धर्मान्तरं साध्यवत्वावच्छिन्नप्रतियोगिताकान्योन्याभाववद्वृत्तित्वाभावत्वम्, तद्घटितत्वस्यैव साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावाधिकरणनिरूपितवृत्तित्वाभावत्वे सत्त्वेन, तादृशधर्मवतस्तृतीयस्यास्य लक्षणस्य वैयर्थ्यमपल-

१. इत्यधिकरणत्वप्रवेशाप्रवेशाभ्यामेव भेदात्। व्या० पञ्च पृ० ३६

पितुमशक्यमिति चेन्न, तृतीयलक्षणत्वेन पञ्चमलक्षणत्वेन चाभिप्रेतस्याऽभावद्वयस्य परस्परं भिन्नस्य घटकघटितभावानुपपत्तेः।

अयमाशयः—तृतीयलक्षणत्वेनाभिमतो योऽभावस्तन्निरूपितवृत्तित्वनिष्ठप्रतियोगितायां परम्परयाधिकरणत्वमप्यवच्छेदकं तेन च साध्यवत्त्वावच्छिन्नप्रतियोगिकताकान्योन्याभावनिष्ठा याऽवच्छेदकता तद्भिन्नासंत्यधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिता निरुक्तावच्छेदकताद्वयनिरूपिता याऽधिकरणनिष्ठावच्छेदकता तद्भिन्ना सती वृत्तितात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिता निरुक्तावच्छेदकताद्वयनिरूपिता या वृत्तित्वनिष्ठा प्रतियोगिता तादृशप्रतियोगिताकाऽभावरूपेण परिष्कृतः तादृशवृत्तित्वसामान्याभाव एव तृतीयलक्षणत्वेनेष्टः।

पञ्चमलक्षणत्वेनाभिमतोऽभावस्तु स्वनिरूपकवृत्तित्वनिष्ठप्रतियोगितानिरूपितपरम्परीयाऽवच्छेदककोटावधिकरणत्वस्याप्रवेशात् साध्यवत्वावच्छिन्नप्रतियोगिताकान्योन्याभावनिष्ठा याऽवच्छेदकता तद्धिभन्ना सती वत्त्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिता निरुक्तावच्छेदकताद्वयनिरूपिता या 'वत्' निष्ठावच्छेदकता तद्भिन्नासती वृत्तितात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिता निरुक्तावच्छेदकताद्वयनिरूपिता या वृत्तित्वनिष्ठा प्रतियोगिता तादृशप्रतियोगिंताकवृत्तित्वसामान्याभावरूपेण परिष्कृतो बोध्यः।

तथा च तृतीयलक्षणत्वेनाभिमतस्य वृत्तित्वसामान्याभावस्याधिकरणत्वनिष्ठपरम्परीयावच्छेकतानिरूपितवृत्तित्वनिष्ठप्रतियोगिताकत्वेन, पञ्चमलक्षणत्वेनाभिप्रेतस्य वृत्तित्वसामान्याभावस्य चाऽधिकरणत्वं विहाय वत्त्वनिष्ठपरम्परीयाऽवच्छेदकतानिरूपितवृत्तित्वनिष्ठप्रतियोगिताकत्वेन सुतरामनयोः परस्परं भेदः। वत्त्वमधिकरणत्वञ्चैकमिति तु नाकलनीयम्, वत्त्वस्य संसर्गपर्यवसितत्वेनाधिकरणतायामखण्डोपाधिरूपायां तदतिरिक्तत्वस्यातिस्पष्टत्वादिति दिक्।

अत्रेदं तत्त्वम्—तृतीयमिदं लक्षणं यदि साध्यवत्प्रतियोगिकान्योन्याभावघटितमभ्युपेयते तदा साध्याधिकरणीभूतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य घटो न, पटोनेत्येवं विधस्य केवलान्वयिसाध्यकस्थलेऽपि प्रसिद्ध्या तत्र साध्याभावाप्रसिद्धिनिबन्धनाऽव्याप्तिर्न सम्भवतीति साम्प्रतमेव स्पष्टीकृतम्। तेन हि पञ्चापि व्याप्तिलक्षणानि केवलान्वयिन्यव्याप्तानीत्याशयपरा—'केवलान्वयि-

न्यभावादिति'[१] गङ्गेशोपाध्यायस्योक्तिः तृतीयलक्षणान्तर्भावेण साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणनिरूपितवृत्तित्वस्यैव[२] सद्धेतौ सत्त्वेन सङ्गमनीया, तदतिरिक्तेषु चतुर्षु लक्षणेषु च साध्याभावाप्रसिद्धिनिबन्धनाऽव्याप्तिरित्येवं व्याख्यायोपपादनीया। साध्यवत्वावच्छिन्नप्रतियोगिताकान्योन्याभावघटितमेवेदं तृतीयं लक्षणमिति स्वीकारे तु नायं क्लेशः सोढव्यो भवति, पञ्चस्वपि व्याप्तिलक्षणेषु साध्याभावाप्रसिद्धिनिबन्धनाया एवाव्याप्तेः केवलान्वयिसाध्यकस्थलेषु सूपपाद्यत्वात्। तेन च साध्यवत्वाच्छिन्नप्रतियोगिताकान्योन्याभावघटितमेवेदं लक्षणं ज्यायः, नानाधिकरणसाध्यकस्थले व्याप्तेरप्रसरसात्, केवलान्वयिसाध्यकस्थले च लक्षणचतुष्टयस्येवास्यापि लक्षणस्य साध्याभावाप्रसिद्धिनिबन्धनाया एवाव्याप्तेः समर्थनसम्भवाच्चेत्यास्तां विस्तरेण।

॥इति तृतीयव्याप्तिविमर्शः॥

---

१. चि॰ पृ॰ ११३

२. तत्राऽपि तादृशान्योन्याभावस्य प्रसिद्धत्वेऽपि तद्वति हेतोर्वृत्तेरेवाऽव्याप्तेर्दुर्वारत्वात्। व्या॰ पञ्च॰ पृ॰. ३५

चतुर्थं प्रकरणम्

सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वमिति

चतुर्थव्याप्तिविमर्शः

लक्षणांवतरणं तत्समन्वयश्च

साम्प्रतं चतुर्थमव्यभिचरितत्वं विविच्यते तच्च 'सकलसाध्याभावन्निष्ठाभावप्रतियोगित्वम्' । इदं हि व्यतिरेकव्याप्तेर्लक्षणम् । अन्वयव्याप्तेरिव व्यतिरेकव्याप्तेरपि ग्रहस्यानुमितावुपयोगित्वेन व्यतिरेकव्याप्तिनिरूपणस्यापि प्रसङ्गप्राप्ततया चतुर्थमिदं लक्षणं नितरामुपयोगीति स्पष्टम् । लक्षणेऽस्मिन् साकल्यं[१] साध्याभाववति विशेषणम् ।

तथा च सकलञ्च तत् साध्याभववत् सकलसाध्याभाववत्, तन्निष्ठो योऽभावस्तादृशाभावप्रतियोगित्वं हेतौ विद्यमानं व्यतिरेकव्याप्तिः । एतेन हि यावन्ति साध्याभावाधिकरणानि तेषु विद्यमानो योऽभावस्तत्प्रतियोगित्वं हेतौ व्यातिरिति लक्षणं पर्यवसितं भवति । अनया च व्यतिरेकव्याप्त्या हेतुर्व्याप्य इति निर्णीयते । ततश्च तेन व्याप्येन हेतुना व्यापकं साध्यमनुमीयते । पर्वतो वह्निमान् धूमादित्यत्र साध्याभावस्य वह्न्यभावस्य सर्वाण्यप्यधिकरणानि धूमाभाववन्त्यतः साध्याभावस्य वह्न्यभावस्य यावन्त्यधिकरणानि तन्निष्ठाभावपदेन धूमाभावस्य सुग्रहतया तत्प्रतियोगित्वस्य धूमे सद्धेतौ सत्त्वेन लक्षणसमन्वयो निराकुलः ।

---

१. साकल्यं साध्याभाववति साध्ये च बोध्यम् । चि० दी० पृ० ११८

धूमवान् वह्नेरित्यसद्धेतुकस्थले तु साध्याभावस्य धूमाभावस्याधिकरणेषु यावत्सु तप्तायःपिण्डस्यापि प्रविष्टतया तत्र च हेतोर्वह्नेरभावस्य सत्त्वेन, यावत्साध्याभावाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वस्य वह्नावसत्त्वान्नातिव्याप्तिः ।

साकल्यस्यान्यत्र विशेषणसम्भावनाया निरासः

अत्र साकल्यं साध्य एव विशेषणमस्त्विति तु मन्दम्, सकलधूमप्रतियोगिकस्याभावस्य यत्किञ्चिदधिकरणे जलह्रदे वर्तमानस्य हेत्वभावस्य वह्न्यभावस्य प्रतियोगिताया असद्धेतौ वह्नौ सत्त्वेन धूमवान् वह्नेरित्यत्र लक्षणस्यास्याऽतिव्यापकत्वात् ।

साध्ये साध्याभावाधिकरणे च साकल्यं विशेषणमित्यपि निस्सारम्, धूमवान् वह्नेरित्यादावतिव्याप्त्यभावेऽपि पर्वतो वह्निमान् धूमादित्यादौ सकलसाध्यप्रतियोगिकस्य वह्निघटोभयाभावस्याऽधिकरणे यावदन्तर्गते पर्वतमहानसादौ सद्धेतुधूमप्रतियोगिकस्याभावस्यासत्त्वेनाव्याप्त्यापत्तेः ।

साध्याभावविशेषणत्वमपि साकल्यस्य न युक्तम् । तथा सति धूमवान् वह्नेरित्यत्र सकलसाध्याभावकुक्षौ प्रविष्टानां तत्तद्ध्रदावृत्त्यभावानां[1] तत्तदयोगोलकावृत्त्यभावानाञ्च यावतामेकाधिकरणस्याप्रसिद्ध्यातिव्याप्त्यभावेऽपि पर्वतो वह्निमान् धूमादित्यत्र तत्तद्ध्रदावृत्तित्वेन वह्नेरभावस्य सकलसाध्याभावकोटौ प्रविष्टस्य

---

१. तद्ध्रदावृत्त्यभावस्तद्ध्रदावृत्तिर्नास्तीति प्रतीतिसाक्षिकः। अस्याऽभावस्य प्रतियोगी तद्ध्रदावृत्तिः। प्रतियोगितावच्छेदकं तद्ध्रदावृत्तित्वम्, अत एव तद्ध्रदावृत्तयो यावन्तः पदार्थास्ते सर्वेऽपि तद्ध्रदावृत्तित्वेनाभावस्यास्य प्रतियोगिकुक्षौ प्रविशन्ति। तद्ध्रदावृत्तिर्वह्निर्धूमश्चाऽपि, अतः तद्ध्रदावृत्तित्वेन रूपेण वह्निधूमप्रतियोगिकत्वस्याप्यभावेऽस्मिन् स्पष्टतयाऽभावस्यास्य साध्याभावत्वेनो- पादानं युक्तमेव। ह्रदानामनन्ततया तद्ध्रदपदेन कस्याश्चनैकस्या एव बुद्धिस्थाया ह्रदव्यक्तेरुपात्तुं शक्यतया तद्ध्रदावृत्त्यभावस्तद्ध्रदभेदेनानन्तः, अयञ्चैकै- कोऽभावस्तत्तद्ध्रद एव विश्राम्यति। तत्तद्ध्रदावृत्तेःपदार्थस्य तत्तद्ध्रदातिरिक्ते नियमेन सत्तया तद्ध्रदातिरिक्ते तद्ध्रदावृत्त्यभावस्य कथमप्यसम्भवात् ।
एतेन हि तद्ध्रदावृत्तिर्नास्ति, तद्ध्रदावृत्तिर्नास्तीत्येवं रूपेणोल्लेख्यानां तत्तद्ध्रदावृत्त्यभावानां पृथक्-पृथक् तत्तद्ध्रद एव विश्रान्तानां न किञ्चिदपि एकमधिकरणं प्रसिद्ध्यति। अत एव सकलसाध्याभावकुक्षौ तत्तद्ध्रदावृत्त्यभावानां प्रविष्टानां यावतामेकाधिकरणाप्रसिद्ध्याऽसम्भवोपपदानं समीचीनमेव। एवमेव तत्तदयोगोलकाऽवृत्त्यभावादयोऽपि ज्ञेयाः।

शक्यग्रहत्वेन तथाविधस्यानन्तस्याभावस्यैकाधिकरणाऽप्रसिद्ध्याऽसम्भवस्य दुष्परिहरत्वात्।

अत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणकुक्षिनिविष्टतया तत्तद्ध्रदावृत्यभावा अपि संयोगसम्बन्धेन वह्निसाध्यकस्थले संयोगसम्बन्धावच्छिन्नप्रतियोगिताका एव ग्राह्याः। तथा सति तादृशसकलसाध्याभावानामेकमधिकरणं गुणक्रियादिकं प्रसिद्धम्, तेषु संयोगसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणताया अप्रसिद्धेस्तादृशगुणादिवृत्तिधूमाद्यभावप्रतियोगित्वस्य धूमादिसद्धेतौ सौलभ्येन नासम्भवसम्भव इति तु मन्दानां विलासः साकल्यस्य साध्याभावविशेषणत्वपक्षे यथा साध्यतावच्छेदकेतरधर्मानवच्छिन्नत्वं साध्याभावप्रतियोगितायां नेष्टम्, अन्यथा तद्ध्रदावृत्यभावानामपि दौर्लभ्यापत्तेः, तथैव साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमपि नेष्टम् तथा च तत्तद्ध्रदावृत्यभावानां स्वरूपसमवायाद्यवच्छिन्नप्रतियोगिताकानां यावतामेकस्याधिकरणस्य गुणक्रियादेरप्रसिद्धतया तेषु ह्रदावृत्तेः जलत्वाभावगुणत्वादीनां च तत्तत्सम्बन्धेन सत्त्वादसम्भवस्य निराकर्तुमशक्यत्वात्।

साध्यतावच्छेदसम्बन्धावच्छिन्नत्वादेः साध्याभावीयप्रतियोगितायामप्रवेशे सम्बन्धान्तरावच्छिन्नप्रतियोगिताकाभावं विशिष्टाभावादिकं वा सङ्गृह्य सद्धेतुकस्थले लक्षणमिदमव्याप्तं स्यादिति तु नितरामुपहासास्पदम् साध्याभावस्तोमकुक्षौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकेतरधर्मानवच्छिन्नप्रतियोगिताकाभावस्यापि निक्षिप्ततयाऽव्याप्तेः सुदूरपराहतत्वात्। अथैवं व्यभिचारिस्थले यावत्सु साध्याभावेषु कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्यापि प्रवेशात् तस्य च व्यभिचारनिरूपकाऽधिकरणे तप्तायःपिण्डादावसत्त्वेन तदधिकरणं किञ्चिन्नित्यमेवात्मादिः प्रसिद्ध्यति तद्वृत्तिवह्न्याद्यभावप्रतियोगित्वस्यैव वह्नौ सत्त्वेनातिव्याप्तिरिति तु प्रलापमात्रम्, यावत्साध्याभावकोटौ ह्रदावृत्तित्वावच्छिन्नाभावानामपि प्रविष्टानामधिकरणस्यैकस्य कस्याप्यप्रसिद्ध्याऽतिव्याप्तेर्निरवकाशत्वात्।

ननु साध्याभावाधिकरणं साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनैव ग्राह्यमिति प्रथमलक्षणविवरणप्रसङ्ग एव निर्णीततयाऽभावप्रकारकप्रमाविशेष्यतायाः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य साध्यताया-

मात्मत्वादिसद्धेतावभावप्रकारकप्रमाविशेष्यतात्वावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाभावस्याभावप्रकारकप्रमाविशेष्यतारूपस्य साध्याभावतया निरुक्तसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन कालिकेन तदधिकरणताया महाकाल एव सम्भवात् तद्वृत्यभावप्रतियोगित्वस्यात्मत्वादौ सत्त्वेन लक्षणसमन्वयः सुकर इति साध्याभावे साकल्यविशेषणदानेऽपि नासम्भवसम्भव इति चेन्नैवं शङ्किष्ठाः साध्याभावे साकल्यं विशेषणमिति पूर्वपक्षयतो यत्किञ्चित् सम्बन्धेनैव साध्याभावाधिकरणत्वस्येष्टत्वात्। न चैवं कालिकसम्बन्धेन साध्याभावाधिकरणमादाय वह्निमान् धूमादित्यादावव्याप्तितादवस्थ्यमिति वाच्यम्, सम्बन्धविशेषनिवेशेऽपि सकलसाध्याभावकुक्षौ प्रविष्टानां तत्तद्ध्रदावृत्यभावानामेकस्याधिकरणस्याप्रसिद्ध्याऽव्याप्तेरस्या दुष्परिहरत्वात्।

मास्तु साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धत्वेन सम्बन्धविशेषनिवेशः कालिकेनैव साध्याभावस्तोमस्याधिकरणं विवक्ष्यतामिति तु न रम्यम्, तथा सति साध्याभावस्तोमस्यैकमधिकरणं महाकाल एव प्रसिद्ध्यतीत्यनुपदोक्ताभावप्रकारकप्रमाविशेष्यत्वाभावादिसाध्यकस्थले लक्षणसमन्वयसम्भवेन यावत्साध्याभावस्यैकाधिकरणाप्रसिद्धिनिबन्धनासम्भवदोषोपपादनस्य सङ्कटाकुलत्वात्, अतः साध्याभावे साकल्यविशेषणपक्षे स्वरूपसम्बन्धेनैव साध्याभावाधिकरणमभ्युपेयम्, तथा सति घटभिन्नं कपालत्वादित्यादौ घटत्वरूपसाध्याभावघटितसमूहस्य स्वरूपेणाधिकरणाप्रसिद्धिरिति तु नानुयोज्यम् साध्याभावे साकल्यविशेषणपक्षेऽसम्भवदोषस्यास्येष्टतयाऽनुकूलत्वात्।

केचित्तु साध्याभावे साकल्यं विशेषणमिति पक्षेऽपि साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाव एव लक्षणघटकः। वह्निमान् धूमादित्यत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकानां तत्तद्ध्रदावृत्यभावानां यावतामेकाधिकरणस्य गुणादेः प्रसिद्ध्या लक्षणसमन्वयेन नाऽसम्भवः, परं द्रव्यत्वाभाववान् गुणत्वादित्यत्र स्वरूपसम्बन्धेन द्रव्यत्वाभावस्य साध्यतया साध्यतावच्छेदकसम्बन्धः स्वरूप एव, तेन तत्तत्पृथिव्यवृत्यभावानां यावतां साध्याभावानां साध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकानामेकाधिकरणस्याप्रसिद्ध्याव्याप्तिरेव। असम्भवशब्दोऽपि लक्षणस्य न सम्भव इति व्युत्पत्याऽव्याप्तिपर एवेत्यभिप्रयन्ति।

लक्षणकुक्षिप्रविष्टद्वितीयाभावे हेतुताविशिष्टान्यप्रतियोगिताकत्वस्य तदीयप्रतियोगितावच्छेदकतायाः पर्याप्त्यधिकरणत्वस्य च विवक्षायाः प्रयोजनम्

एतावता प्रकरणेन साकल्यं साध्याभाववति एव विशेषणं न तु साध्ये, साध्यसाध्याभाववतोः केवलं साध्याभावे वा विशेषणमिति निर्धारितम्। तथापि धूमवान् वह्नेरित्यत्र धूमाभावाधिकरणेषु यावत्सु वह्निघटोभयाभावमादाय तत्प्रतियोगित्वस्यैव वह्नौ सत्त्वेनातिव्याप्तिरिति तु नाशङ्कनीयम्, लक्षणघटकीभूतद्वितीयाभावपदेन हेतुताविशिष्टान्यप्रतियोगिताकाभावस्यैव विवक्षणात्, हेतुतावैशिष्ट्यञ्च स्वाश्रयवृत्तित्व, स्वानाश्रयवृत्तित्वोभयसम्बन्धेन। तथा च वह्निघटोभयाभावीयवह्निघटोभयनिष्ठप्रतियोगितायां, स्वपदेन वह्निनिष्ठां हेतुतामादाय तदाश्रयवह्निवृत्तित्वस्य तदनाश्रयघटवृत्तित्वस्य च सत्त्वेन तस्यां हेतुताविशिष्टान्यत्वस्याभावात् तन्निरूपकोभयाभावो न लक्षणघटकोऽपि तु घटाभावादिरेवेति नातिव्याप्तिसम्भवः। न चैवमपि द्रव्यं सत्त्वादित्यत्र लक्षणमिदमतिव्याप्तं[1] भवत्येव साध्यस्य द्रव्यत्वस्य योऽभावस्तस्य साध्याभावतया तदधिकरणे गुणे यो गुणकर्मान्यत्वविशिष्टसत्ताभावः, विशिष्टसत्ताप्रतियोगिकस्य तस्यापि विशिष्टस्य शुद्धानतिरेकात् सत्ताप्रतियोगिकतया तत्प्रतियोगित्वस्यैव सत्तायामसद्धेतौ वृत्तेरिति पूर्वपक्षस्तु यावन्ति साध्याभावाधिकरणानि तद्वृत्त्यभावीयप्रतियोगितावच्छेदकतायाः पर्याप्तिसम्बन्धेनाधिकरणं यद्हेतुतावच्छेदकं तद्वत्त्वं व्याप्तिरिति लक्षणं निरुच्य समाधेयः। एवं लक्षणनिर्वचनेन प्रकृते गुणकर्मान्यत्वविशिष्टसत्ता नास्तीति प्रतीतिसिद्धस्यैवाभावस्य गुणादौ साध्याभावाधिकरणे सुलभतया तत्प्रतियोगितावच्छेदकत्वस्य वैशिष्ट्ये सत्तात्वे च पर्याप्तिर्हेतुतावच्छेदकं तु सत्तात्वमात्रं, तेन पर्याप्तिसम्बन्धेनाभावीयप्रतियोगितावच्छेदकताया अधिकरणत्वस्य हेतुतावच्छेदके सत्तात्वे सत्त्वेन नातिव्याप्तिः सम्भवतीति स्फुटमेव।

वह्निमान् धूमादित्यत्रापि साध्याभावस्य वह्न्यभावस्याधिकरणेषु यावत्सु जलह्रदादिषु विद्यमानस्य धूमाभावस्य प्रतियोगितावच्छेदकतायाः पर्याप्तिसम्बन्धेनाधिकरणत्वस्य हेतुतावच्छेदके धूमत्वेऽनपायात् परिष्कृतमिदं लक्षणं समन्वितं भवति। धूमवान् वह्नेरित्यादिषु तु धूमाभावाधिकरणेषु यावत्सु तप्तायः पिण्डोऽपि प्रविष्टस्तत्र वह्न्यभावस्याऽविद्यमानतया घटाभावादिरेव साध्याभावस्य यावदधि-

---

१. न च द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाभाववति गुणादौ सत्त्वादेर्विशिष्टाभावादिसत्त्वादतिव्याप्तिरिति वाच्यम्। व्या० पञ्च० पृ० ३७

करणेषु विद्यमानाभावपदेन ग्रहीतुं शक्यः, तत्प्रतियोगितावच्छेदकतायाः पर्याप्तिसम्बन्धेनाधिकरणत्वस्य घटत्वादावेव सत्त्वेन हेतुतावच्छेदकत्वेनाभिमते वह्नित्वादौ तदभावान्न भवति लक्षणसमन्वयः।

लक्षणघटकद्वितीयाभावीयप्रतियोगितावच्छेदकसम्बन्धविमर्शः

अथ परिष्कृतेऽस्मिन् लक्षणे सकलसाध्याभाववन्निष्ठाभावीयप्रतियोगिता सम्बन्धसामान्यावच्छिन्ना यत्किञ्चित्सम्बन्धावच्छिन्ना वा ग्राह्येति प्रश्ने न सम्भवति प्रथमः कल्पः, वह्निमान् धूमादित्यादौ साध्याभावस्य वह्न्यभावस्य सकलेष्वधिकरणेषु धूमावयवोऽपि प्रविशति तत्र च समवायेन धूमस्य विद्यमानतया सम्बन्धसामान्यावच्छिन्नाया हेतुत्वेनाभिमतधूमनिष्ठप्रतियोगिताया अनुपलम्भेन तदवच्छेदकतायाः पर्याप्त्यधिकरणत्वस्य हेतुतावच्छेदके धूमत्वे सत्त्वादव्याप्त्यापत्तेः। नापि द्वितीयः कल्पः, धूमवान् वह्नेरित्यत्र साध्याभावस्य धूमाभावस्य यावदधिकरणघटकायोगोलकादौ संयोगेन हेतुत्वेनाभिमतस्य वह्नेः सत्त्वेऽपि स्वरूपादिसम्बन्धेन तदभावस्य सुलभतया तत्प्रतियोगितावच्छेदकतायाः पर्याप्तिसम्बन्धेनाधिकरणत्वस्यैव वह्नित्वे सत्त्वेनातिव्याप्तेः। अतः प्रतियोगितेयं हेतुतावच्छेदकसम्बन्धावच्छिन्ना[१] ग्राह्या, तेन च वह्निमान् धूमादित्यत्र संयोगसम्बन्धस्य हेतुतावच्छेदकसंसर्गतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्य धूमाभावस्य धूमावयवेऽपि सुलभतया वह्निमान् धूमादित्यत्र नाव्याप्त्यवकाशः। नापि धूमवान् वह्नेरित्यत्र धूमाभावाधिकरणतप्तायःपिण्डे हेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावस्यानुपलब्धेस्तत्सम्बन्धावच्छिन्नप्रतियोगिताकघटाभावस्यैवोपलम्भेनातिव्याप्तिसम्भवः। अत एव द्रव्यं सत्त्वादित्यत्र साध्याभावस्य द्रव्यत्वाभावस्याधिकरणे गुणादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावमादाय लक्षणमिदमतिव्याप्तमिति केषाञ्चनाक्षेपोऽपि नावकाशं लभते।

अथ सकलसाध्याभाववन्निष्ठाभावीयप्रतियोगितायां व्यधिकरणसम्बन्धावच्छिन्नत्वविवक्षयाऽपि संयोगसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावमादाय द्रव्यं सत्त्वादित्यत्रातिव्याप्तेर्निराससम्भवात्, हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वविवक्षाया नैरर्थक्यमिति तु बालभाषितमात्रम्, अनुपदमुपदर्शिताव्याप्त्यतिव्याप्त्योस्तादवस्थ्यात्, द्रव्यं सत्त्वादित्यत्र साध्याभावस्य द्रव्यत्वाभावस्याधिकरणे गुणादौ

---

१. प्रतियोगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या। व्या० पञ्च० पृ० ३८

द्रव्यानुयोगिकसमवायेन सत्ताभावमादाय, आत्मभिन्नं द्रव्यत्वादित्यादौ साध्याभावस्यात्मभेदाभावस्यात्मत्वस्वरूपस्याधिकरण आत्मनि द्रव्यत्वस्य हेतोः कालिकेनाभावमादायातिव्याप्तेर्वज्रलेपायमानत्वाच्च।

हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वेन सकलसाध्याभाववन्निष्ठाभावप्रतियोगितां विशिष्यापि नास्य लक्षणस्य निर्दुष्टत्वसम्भवः, अयं चैत्रः स्वामित्वसम्बन्धेन तद्धनादित्यत्र हेतुतावच्छेदकसम्बन्धः स्वामित्वमेव तस्य वृत्यनियामकतया[1] [2]तत्सम्बन्धावच्छिन्नप्रतियोगिताकहेत्वभावाप्रसिद्धेरिति तु नानुयोज्यम् वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वं स्वीकृत्यैव[3] लक्षणेऽस्मिन् हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वेन निरुक्तप्रतियोगिताया विशेषणीयत्वात्।

---

१. एवं धनी चैत्रत्वादित्यादौ वृत्यनियामकस्वामित्वादिसम्बन्धेन धनादेः साध्यतायामपि तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेरत आह। चि० दी० जा० पृ० २२४

२. प्रतियोगिनो येन सम्बन्धेन वृत्तित्वं प्रत्यक्षसिद्धं तस्यैव प्रतियोगितावच्छेदकत्वमभ्युपेयते, अत एव यः कुण्डलस्य स्वामी परं कर्णयोः तस्य धारणाभावेन कुण्डलासंयुक्तस्तं वीक्ष्यायं कुण्डलीति प्रत्यक्षं न कस्याप्युदेति, प्रत्युत 'नाऽयं कुण्डली'त्येव प्रत्यक्षं सर्वस्यापि भवति, तदेव च प्रामाणिकं मन्यते। इदं च तदैव सूपपादं यदा वृत्यनियामकस्य स्वामित्वसम्बन्धस्य प्रतियोगितावच्छेदकत्वं नाङ्गीक्रियेत। अन्यथा स्वामित्वसम्बन्धेन कुण्डलविशिष्टे तस्मिन् कुण्डलीत्येव प्रत्यक्षं सर्वस्यापि स्यात् तदेव च प्रामाणिकं भवेत्। नाऽयं कुण्डलीत्याविद्वदङ्गनागोपालं जायमानं प्रत्यक्षं तु दुरुपपादमेव स्यात्।

३. अयंभावः—यदि वृत्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वं नास्ति तर्हि 'पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतमि'ति दिशा पारिमाण्डल्यनिरूपितजन्यताया अप्रसिद्धेः 'पारिमाण्डल्यान्न घट'इत्यादौ 'पारिमाण्डल्यनिरूपितजन्यत्वाभाववान् घट' इत्येवं शाब्दबोधस्य स्वीकर्तुमशक्यतया वाक्यस्यास्य प्रामाणिकत्वानुरोधेन 'जन्यत्वसम्बन्धावच्छिन्नप्रतियोगिताकपारिमाण्डल्याभाववान् घट' इत्येव शाब्दबोधः स्वीक्रियते, स चाऽसम्भवी जन्यत्वसम्बन्धस्य वृत्त्यनियामकत्वात्। नचैवं कुण्डलासंयुक्ते कुण्डलस्वामिनि 'नाऽयं कुण्डली'ति प्रत्यक्षमनुपपन्नं स्यादिति वाच्यम्, अयं कुण्डलीत्यनुमितेः शाब्दबोधस्य च तत्र सर्ववादिसम्प्रतिपन्नस्य प्रामाणिकत्वस्वीकारेण प्रत्यक्षस्थले कथञ्चिदभावप्रतियोगितावच्छेदकत्वं वृत्यनियामकसम्बन्धस्य नापि स्यात्, परं तदतिरिक्तानुमित्याद्यात्मकप्रमास्थले तस्य प्रतियोगितावच्छेदकत्वं स्वीकर्तव्यमेव। अनुमितिस्थले सकलसाध्याभाववन्निष्ठाभावस्य प्रत्यक्षमूलकस्य शाब्दबोधाद्यात्मकस्य स्वीकारेऽपि लक्षणसमन्वयसम्भवेन न किञ्चिदनुपपन्नमिति दिक्।

केचित्तु वृत्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वमनभ्युपेत्यापि लक्षणस्यास्य निर्दुष्टत्वमुपपादयितुमना एवमभिप्रयन्ति—लक्षणेस्मिन् हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितापदेन हेतुताच्छेदकसंसर्गातिरिक्तसंसर्गानवच्छिन्नत्व-हेतुनिष्ठत्वोभयाभाववती प्रतियोगिता एव लक्षणीया, तेन च वृत्यनियामकसम्बन्धेन सद्धेतुकस्थलेऽयं चैत्रस्तद्धनादित्यादौ नाव्याप्तिः सम्भवति। तथाहि—हेतुतावच्छेदकस्य स्वामित्वसम्बन्धस्य वृत्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिता लक्षणघटकत्वेन नोपादातुं शक्या, किन्तु संयोगसमवायादिवृत्तिनियामकसम्बन्धावच्छिन्नैव हेतुनिष्ठा सा ग्राह्या, तेन हि तस्यां हेतुनिष्ठत्वस्य सत्त्वेऽपि हेतुतावच्छेदकवृत्यनियामकस्वामित्वसंसर्गातिरिक्तसंयोगसमवायादिसम्बन्धावच्छिन्नत्वेन हेतुतावच्छेदकसंसर्गातिरिक्तसंसर्गानवच्छिन्नत्वं नास्ति, अतः तादृशोभयाभाववत्प्रतियोगितापदेनास्याः सुग्राह्यतया तद्वति तद्धनादिहेतौ लक्षणसमन्वयः सुघटः।

एवमेव पर्वतो वह्निमान् धूमादित्यादिस्थलेषु हेतुतावच्छेदकसंयोगसम्बन्धेन धूमाभावादिकमादाय तदीयप्रतियोगितायां हेतुतावच्छेदकसंसर्गातिरिक्तसम्बन्धानवच्छिन्नत्वहेतुनिष्ठत्वयोः सत्त्वेन लक्षणघटकत्वस्य दुरुपपादतया स्वरूपादिव्यधिकरणसम्बन्धावच्छिन्नैव हेतुनिष्ठा सा ग्राह्या, तस्यां च हेतुनिष्ठत्वेऽपि हेतुतावच्छेदकसंसर्गातिरिक्तसंसर्गावच्छिन्नत्वस्यैव सत्त्वेन निरुक्तोभयाभावोऽक्षतः फलतस्तद्वत्त्वस्य धूमादिहेतौ सत्त्वेन लक्षणसमन्वयो निराबाध इति। परमिदं निर्बुद्धिव्यायाममात्रम्, धूमवान् वह्नेरित्यादिषु व्यभिचारिष्वपि हेत्वभावीयव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगितामादायातिव्यातेर्दुर्निवारत्वात्।

साध्याभावपरिष्कारः

अथापीदं शङ्कितुं शक्यम् पर्वतो वह्निमान् धूमादित्यादिषु सर्वत्रैव सद्धेतुकस्थलेषु सकलसाध्याभावकुक्षौ महानसीयत्वादिविशिष्टो यो वह्न्यादिस्तस्य संयोगेनाभावस्यापि प्रविष्टतया तदधिकरणे चत्वरादौ हेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकस्य धूमाभावस्यासत्त्वेनासम्भवः, यदि हि साध्याभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वं निवेश्य साध्यतावच्छेदकवह्नित्वाद्यतिरिक्तेन महानसीयत्वादिवैशिष्ट्येनाप्यवच्छिन्नप्रतियोगिताकस्याभावस्यास्य न सकलसाध्याभावकुक्षिप्रवेश इति मन्यते, तदापि समवायेन वह्न्यभावस्य सकलसाध्याभावकुक्षिप्रविष्टस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकस्य सुलभतया

तदधिकरणे पर्वतादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकस्य धूमाद्यभावस्य दौर्लभ्येनाव्याप्तिरतः[१] प्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वमिव साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमपि[२] विशेषणं देयं तेन नेयमव्याप्तिः प्रसरति ।

साध्याभावनिष्ठाऽऽधेयतां तन्निरूपिताधिकरणताञ्चाधिकृत्य लक्षणान्तरपर्यवेक्षणम्

अत्र साध्याभावनिष्ठाधेयता प्रथमलक्षणदर्शितदिशा साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धावच्छिन्ना निरुक्तसाध्याभावत्वावच्छिन्ना च ग्राह्या, तेन गुणत्ववान् ज्ञानत्वात्, विशिष्टसत्त्वाभाववान् गुणत्वादित्यादौ नाव्याप्त्यवकाशः ।

एवं सत्यपि कपिसंयोगी एतद्वृक्षत्वादित्यत्र निरुक्तसाध्याभावकुक्षौ प्रविष्टस्य कपिसंयोगाभावस्यैतद्वृक्षोऽप्यधिकरणम्, तद्वृत्यभावप्रतियोगित्वस्यैतद्वृक्षत्वहेतावसत्त्वेनाऽव्याप्तिरिति प्रश्नस्तु निरुक्तसाध्याभावत्वावच्छिन्नाधेयतानिरूपिताधिकरणतायां निरवच्छिन्नत्वनिवेशेन[३] समाधेयः, निरवच्छिन्नाया निरुक्तसाध्याभावत्वावच्छिन्नयथोक्तसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणताया गुणादावेव विद्यमानतया तत्र चैतद्वृक्षत्वस्य हेतोरभावस्य सौलभ्यं स्पष्टमेव ।

साध्याभावाधिकरणतायां निरवच्छिन्नत्वे विवक्षिते सत्त्वहेतुना कपिसंयोगाभावस्य यत्र साध्यता तत्र साध्याभावस्य कपिसंयोगस्य निरवच्छिन्नमधिकरणमप्र-

---

१. अत्र साध्याभावीयसाध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वं प्रविष्टं परं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं नेष्टम्, तेन साध्यतावच्छेदकावच्छिन्नयत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य साध्याभावत्वेन विवक्षणाद्दधित्वविशिष्टप्रमेयवान् स्थूलदधित्वादित्यादौ केनापि सम्बन्धेन दधित्ववैशिष्ट्यप्रमेयत्वैतदुभयावच्छिन्नप्रतियोगिताकाभावस्य दध्यभावपर्यवसितस्य हेत्वधिकरणे सत्त्वेन तादृशसाध्याभावाधिकरणं स्थूलदधित्वाधिकरणभिन्नं किञ्चिदन्यदेव ग्राह्यम्, तद्वृत्यभावप्रतियोगित्वस्य स्थूलदधित्वे सद्धेतौ सत्त्वेन लक्षणसमन्वयः सुकरस्तेन नाऽसम्भवः किन्त्वव्याप्तिरिति ध्येयम् ।

२. साध्याभावश्च साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः । व्या० पञ्च० पृ० ३८

३. किञ्चिदनवच्छिन्नायाः साध्याभावाधिकरणताया इह विवक्षितत्वात् । व्या० पञ्च० पृ० ३९

सिद्धं तेन च लक्षणमिदमव्याप्तमित्याक्षेपस्त्विष्टापत्त्या परिहरणीयः, केवलान्वयिन्यभावादित्यनेन चिन्तामणिकारेणैव केवलान्वयिसाध्यकस्थलेषु लक्षणस्यास्याऽव्याप्तेरभिधीयमानत्वात्, कपिसंयोगाभावसाध्यकस्यास्य स्थलस्य केवलान्वयिसाध्यकत्वाच्च ।

पुनरपीदं विमर्शनीयम्—यदि कश्चित् कपिसंयोगं हेतूकृत्य पृथिवीत्वं साधयति तदा हेतोरस्यासद्धेतुत्वं निर्विवादं यत्र-यत्र कपिसंयोगो जलादौ तत्र-तत्र साध्यस्य पृथिवीत्वस्याभावात् । परमत्रापीदं लक्षणं समन्वेति, साध्याभावस्य पृथिवीत्वाभावस्याधिकरणेषु यावत्सु जलादिषु कपिसंयोगाभावस्य सत्त्वादिति प्रत्यवस्थानं लक्षणकुक्षिप्रविष्टसकलसाध्याभाववन्निष्ठपदेन निरवच्छिन्नवृत्तिमतो[१] विवक्षया निरसनीयम् । लक्षणस्वरूपन्तु, निरुक्तसाध्याभावत्वावच्छिन्ननिरुक्तसम्बन्धावच्छिन्नाधेयतानिरूपितनिरवच्छिन्नाधिकरणतावन्ति यावन्ति तेषु निरवच्छिन्नवृत्तिमान् योऽभावस्तत्प्रतियोगित्वं हेतौ व्याप्तिरिति पर्यवसेयम् । एवं च साध्याभावस्य पृथिवीत्वाभावस्याधिकरणेषु यावत्सु जलादेर्द्रव्यस्याऽपि प्रविष्टतया तत्र च कपिसंयोगाभावस्य निरवच्छिन्नवृत्तिताया अप्रसिद्धतया न कपिसंयोगाभावो लक्षणघटकः, किन्तु पटत्वघटत्वाद्यभाव एव तत्प्रतियोगित्वं च हेतावसम्भवि । तेन नातिव्याप्तिलक्षणं प्रत्यवस्थानमुद्भावयितुं शक्यम् ।

अन्योन्याभावस्य व्याप्यवृत्तित्वे तदभावोऽतिरिक्तो न प्रतियोगितावच्छेदकस्वरूप इति मतोपन्यासः

परमथापि कैश्चिदेवमाक्षिप्यते—यदि हि निरुक्तसाध्याभावस्य यावत्स्वधिकरणेषु निरवच्छिन्नवृत्तिकस्यैवाभावस्य ग्रहणमिष्टं तर्हि भेदस्य व्याप्यवृत्तित्वसिद्धान्ते द्रव्यत्वाभावस्य साध्यतायां संयोगवद्भेदः सद्धेतुरेव, तत्राव्याप्तिः दुर्निवारा ।

अयमाशयः—संयोगवद्भेदेन हेतुना द्रव्यत्वाभावसाध्यकं स्थलं द्रव्यत्वाभाववान् संयोगवद्भेदादिति । अयं संयोगवद्भेदो हेतुः भेदस्याव्याप्यवृत्तित्वस्वीकारे[२] द्रव्येऽप्यस्ति, न हि द्रव्यं सर्वावयावच्छेदेन यत् किञ्चित् संयोगवत्, तस्य-तस्य संयोगस्य तत्तदवयवावच्छेदेन द्रव्ये सत्त्वात् किन्तु तत्तद्देशावच्छेदेनैव तत्तत्संयोगवत् । एवं च द्रव्यस्य यस्मिन् देशे यः संयोगो नास्ति तद्देशावच्छेदेन द्रव्यं तत्

१. तन्निष्ठपदेन तत्र निरवच्छिन्नवृत्तिमत्त्वस्य विवक्षितत्वात् । व्या० पञ्च० पृ० ३९

२. न चैवमन्योन्याभावस्य व्याप्यवृत्तितानियमनये । व्या० पञ्च० पृ० ४०

संयोगवदिति प्रतीत्यभावेन संयोगवद्भेदः द्रव्ये विद्यत एव परं साध्यो द्रव्यत्वाभावस्तत्र नास्ति, तेन हि अयं संयोगवद्भेदो द्रव्यत्वाभावस्य साध्यतायां न सद्धेतुः, परं भेदस्य व्याप्यवृत्तित्वसिद्धान्ते त्वयं सद्धेतुरेव परमत्रलक्षणस्यास्य समन्वयो दुःशकः।

तथाहि—प्रकृते साध्याभावो द्रव्यत्वाभावाभावो द्रव्यत्वरूपस्तस्य निरवच्छिन्नमधिकरणं द्रव्यमेव तद्वृत्तिनिरवच्छिन्नवृत्तिमानभावः संयोगवद्भेदाभावरूपो हेत्वभावः कदापि न लब्धुं शक्यः, फलतो घटत्वाभावादेरेव लब्धुं शक्यतया तत्प्रतियोगित्वस्य हेतावभावेन लक्षणस्यास्य समन्वयो न सम्भवतीति भवत्युपदर्शितस्थलेऽव्याप्तिरिति।

परं नैतच्चारु भेदस्य व्याप्यवृत्तित्वाभ्युपगमे भेदाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वमनभ्युपगम्य व्याप्यवृत्तित्वमतिरिक्तत्वं[1] चावश्यं स्वीकार्यम् तथा स्वीकृत्यैव च लक्षणमिदं प्रणीतमित्यपि मन्तव्यम्। तेन हि प्रकृतस्थले संयोगवद्भेदस्य हेतोरभावः प्रतियोगितावच्छेदकसंयोगरूपः नास्त्यपितु स्वतन्त्र एकोऽभावो व्याप्यवृत्तिश्च। स च साध्याभावस्य द्रव्यत्वस्य यावत्स्वधिकरणेषु द्रव्यात्मकेषु निरवच्छिन्नवृत्तिरपि तत्प्रतियोगित्वस्य संयोगवद्भेदे हेतौ सत्त्वेनाऽव्याप्तेरसम्भवात्। अन्योन्याभावाभावस्यातिरिक्तत्वे व्याप्यवृत्तित्वे च मूलावच्छिन्नो वृक्षः कपिसंयोगिभेदाभाववान् इति प्रामाणिकप्रतीतिरेव मानम्।

अत्रेदमाकूतम्—यत्र वृक्षे कपिसंयोगोऽस्ति स कपिसंयोगीत्युच्यते कपिसंयोगश्च प्रायः शाखायामेव निरातङ्कस्तिष्ठतीति वस्तुस्थितेः शाखादेशावच्छेदेन वृक्षः कपिसंयोगीत्येव प्रायः सर्वैर्मन्यते। एतेन मूलावच्छेदेन वृक्षः कपिसंयोगी नास्तीति स्वतः स्थितम्। एवं सति यदि कश्चन व्युत्पन्नः पुरुषो वृक्षं पश्यति तत्र च शाखायां कपिसंयोगं मूले च तदभावमवधारयति तदा स एवं चिन्तयति—'शाखायां कपिसंयोगस्य सत्त्वेन वृक्षः कपिसंयोग्यस्त्येवातस्तत्र कपिसंयोगिभेदः न वक्तुं शक्यते। यदि तत्र कपिसंयोगिभेदो नास्ति तर्हि तत्र कपिसंयोगिभेदाभावोऽवश्यमस्ति। एवं सति वृक्षः कपिसंयोगिभेदाभाववान्' इत्येवममुं वृक्षमधिकृत्य वक्तुं शक्यम्, समग्रस्यापि वृक्षस्य कपिसंयोगिभेदाभाववत्वेन मूलदेशावच्छेदेनाप्यस्य कपिसंयोगिभेदाभाववत्वं निराकुलमेव। तेन हि शाखायां

१. अन्योन्याभावस्य व्याप्यवृत्तितानियमनये अन्योन्याभावस्याभावो न प्रतियोगितावच्छेदकस्वरूपः किन्त्वतिरिक्तो व्याप्यवृत्तिः। व्या० पञ्च० पृ० ४०

कपिसंयोगवन्तं वृक्षं निर्दिश्य यद्येवं प्रतीतिरस्ति मूलावच्छिन्नो वृक्षः कपिसंयोगिभेदाभाववानिति, तर्हि प्रतीतिरियं प्रामाणिक्येव। परमस्याः प्रमाणिकत्वमनुपपन्नं स्यात्। अन्योन्याभावाभावस्यातिरिक्तत्वव्याप्यवृत्तित्वयोरनभ्युगमे, कपिसंयोगिभेदस्य कपिसंयोगिन अन्योन्याभावात्मकस्य व्याप्यवृत्तेः गुणादावेव वृत्तित्वम्, तदभावस्तु सर्वत्र द्रव्ये विद्यमानः प्रतियोगितावच्छेदकस्वरूपश्चेत् कपिसंयोगरूपो मन्तव्यः स च वृक्षे मूलदेशे नास्त्येवेति 'मूलावच्छिन्नो वृक्षः कपिसंयोगिभेदाभाववानि'ति प्रामाणिकप्रतीतेरनुपपत्तिर्दुर्निवारैव।

साकल्यपदार्थविचारः

साम्प्रतमेतल्लक्षणघटकं सकलपदमधिकृत्य चिन्त्यते। किमिदमनेकपरम्? तथासति अनेकत्वस्य यावत्त्वापरपर्यायतया गगनत्वाभाववान् घटत्वादित्यत्र साध्यस्य गगनत्वाभावस्य योऽभावो गगनत्वरूपस्तस्य यत एकमेव गगनमधिकरणमतः साध्याभावाधिकरणे यावत्त्वाप्रसिद्ध्याऽव्याप्तिः स्फुटा यदि चाशेषपरम्; तर्हि किन्नामाशेषत्वमति निर्धारणीयम्, येनैकाधिकरणकसाध्याभावस्थलेऽपि लक्षणसमन्वयः स्यादिति चेदत्र ब्रूमः—सकलपदमत्राशेषपरमेव[1] तच्च व्यापकत्वरूपम्।

तथा च साध्याभावाधिकरणताव्यापकत्वं तस्मिन्नभावेऽभिप्रेतं यत्प्रतियोगित्वं हेतौ विद्यमानं व्यप्तिरित्यभिधीयते। एवं सति व्याप्तिलक्षणमित्थं विज्ञेयम्— साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नाधेयतानिरूपितनिरवच्छिन्नाधिकरणताया व्यापकीभूतो योऽभावस्तन्निरूपिताया हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताया अवच्छेदकतापर्याप्त्यधिकरणहेतुतावच्छेदकवत्त्वं व्याप्तिरिति।

व्यापकत्वपरिष्कारपुरस्सरं लक्षणसमन्वयः

अत्र व्यापकत्वं स्वाधिकरणवृत्यत्यन्ताभावाप्रतियोगित्वरूपं[2] न वक्तुं योग्यम् स्वपदेन व्याप्यीभूतायाः साध्याभावाधिकरणताया एवोपादेयतया तत्समानाधिकरणात्यन्ताभावपदेन सद्धेतोरपि वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावस्य सुलभतया हेत्वभावे यथोक्तव्यापकत्वासम्भवेनासम्भवा-

---

१. वस्तुतस्तु सकलपदमत्राशेषपरं, नत्वनेकपरम्। व्या० पञ्च० पृ० ४१

२. तत्समानाधिकरणाभावाप्रतियोगित्वरूपव्यापकताग्रहे। चि० दी० गा० पृ० ८७९

पातात्। किन्तु स्वाधिकरणवृत्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपमेव तद्वक्तव्यम्। तस्य च तादृशप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणधर्मवत्त्वे पर्यवसिततया नायमसम्भवः सम्भवति। वह्निमान् धूमादित्यादौ साध्याभावस्य वह्न्यभावस्य निरवच्छिन्नाधिकरणतावति जलह्रदादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावाभावस्याविद्यमानतया तादृशसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावघटाभावादिरेव ग्राह्यस्तत्प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणीभूतधूमत्वादिधर्मभिन्नो यो धर्मो धूमाभावत्वं तद्वतो धूमाभावस्य हेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्ना या धूमनिष्ठा प्रतियोगिता तदवच्छेदकतापर्याप्त्यधिकरणहेतुतावच्छेदकधूमत्ववत्त्वस्य धूमे सत्त्वेन लक्षणसमन्वयः सुलभः।

एवं गगनत्वाभाववान् पटत्वादित्यादिषु साध्याभावस्य गगनत्वाभावाभावस्य गगनत्वस्वरूपस्य निरवच्छिन्नाधिकरणतावति गगने हेत्वभावस्य पटत्वाभावस्य योऽभावस्तस्याविद्यमानतया पटत्वाद्यभाव एव सुलभस्तत्प्रतियोगितानवच्छेदकत्वस्य पटत्वाभावत्वे सत्त्वेन तद्वति पटत्वाभावे साध्याभावाधिकरणताव्यापकत्वस्याक्षततया नाव्याप्त्यवकाशः।

असद्धेतुकस्थलेषु धूमवान् वह्नेरित्यादिषु तु धूमाभावस्य साध्याभावस्य निरवच्छिन्नाधिकरणतावत् तप्तायः पिण्डादिर्लभ्यते, तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावस्य हेत्वभावस्याभावो लभ्यत, एव, तेन वह्न्यभावत्वादेर्निरुक्तसाध्याभावाधिकरणतावन्निष्ठाभावप्रतियोगितानवच्छेदकत्वविरहेण तद्वतः साध्याभावाधिकरणत्वाऽव्यापकत्वाल्लक्षणसमन्वयाभावेन नातिव्याप्तिरिति सर्वं समञ्जसं प्रतिभाति।

तथापि यत्र सत्त्वेन हेतुना द्रव्यत्वं साध्यते तत्रासद्धेतुकस्थलविशेषेऽतिव्याप्तिरस्त्येव। प्रकृते साध्याभावो द्रव्यत्वाभावस्तस्य निरवच्छिन्नाधिकरणता गुणादौ तत्र हेत्वभावाभावस्य सत्त्वाभावाभावस्य वृत्तित्वं यद्यपि निराकुलम् परं तदीयप्रतियोगितानवच्छेदकत्वस्य प्रमेयत्वेऽक्षततया तद्वत्वस्य हेत्वभावे सत्त्वाभावे सत्त्वेन सत्ताभावरूपहेत्वभावस्य साध्याभावाधिकरणताव्यापकत्वं निवारयितुमशक्यम्, तेन च तादृशाभावप्रतियोगित्वस्यैव हेतौ सत्त्वादिति मन्यते चेत्, तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपमेव व्यापकत्वं प्रकृते ग्राह्यम्।

तथा सति द्रव्यं सत्त्वादित्यादौ तादृशसाध्याभावस्य द्रव्यत्वाभावस्याधिकरणतावति गुणादौ सत्त्वस्य हेतोः सत्त्वेन तदभावस्यानुपलब्ध्या सत्ताभाववान्नेत्येवं

सत्ताभाववद्भेदो वर्तत एव, तेन च साध्याभावाधिकरणतावन्निष्ठान्योन्याभावपदेन सत्ताभाववान्नेत्येवमन्योन्याभावस्य सुलभतया तत्प्रतियोगितावच्छेदकत्वस्यैव हेत्वभावे सत्त्वाभावे सत्त्वेन तत्र साध्याभावाधिकरणताव्यापकत्वस्याभावान्नातिव्याप्तिः सम्भवति, परं धूमाभाववान् वह्न्यभावादित्यत्राव्याप्तिः [1]प्रसज्यते, साध्याभावस्य धूमाभावाभावस्य धूमात्मकस्याधिकरणता यदि पर्वते गृह्यते तर्हि तत्र महानसीयवह्निमान्नेति भेदः सुलभो, यदि तादृशाधिकरणतावन्महानसं गृह्यते तर्हि तत्र पर्वतीयवह्निमान्नेत्येवं भेदः सुलभः, एवं चालनीन्यायेन साध्याभावाधिकरणतावत्सु सर्वेष्वपि पर्वतमहानसचत्वरादिषु वह्न्यभावात्मकस्य हेतोर्योऽभावस्तत्स्वरूपाणां सर्वासामपि वह्निव्यक्तीनां साध्याभावाधिकरणतावन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वेन हेत्वभावे वह्न्यभावाभावे वह्न्यात्मके साध्याभावाधिकरणताव्यापकत्वस्य दौर्लभ्यात् ।

न च वह्न्यभावाभावस्य वह्निस्वरूपत्वानभ्युपगमे साध्याभावो धूमाभावाभावस्तस्याधिकरणता पर्वतमहानसचत्वरादिषु तद्वन्निष्ठोऽन्योन्याभावो हेत्वभाववह्न्यभावाभावनिष्ठावच्छेदकताकप्रतियोगिताको वह्न्यभावाभाववान्नेत्याकारको न सुलभो वह्निमत्सु पर्वतादिषु वह्न्यभावस्य दौर्लभ्येन वह्न्यभावाभावस्य सत्त्वात् । एवं सति साध्याभावाधिकरणतावन्निष्ठाऽन्योन्याभावप्रतियोगितानवच्छेदकत्वरूपं[2] व्यापकत्वं हेत्वभावे वह्न्यभावाभावे सुलभम्, तेन च तत्प्रतियोगित्वस्य हेतौ

---

१. अत्र निरुक्तसाध्याभावाधिकरणताव्यापकत्वं हेत्वभावे यदि तद्ववन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपं स्वीक्रियते तर्हि यथा धूमाभावसाध्यकस्थलेऽव्याप्तिस्तथा हेत्वभावेऽत्यन्ताभावघटिततादृशाधिकरणताव्यापकत्वस्वीकारेऽपि धूमात्मकसाध्याभावाधिकरणतावति पर्वतादौ चालनीन्यायेन समासां वह्निव्यक्तीनां हेत्वभावस्वरूपाणामभावस्य सुलभत्वादव्याप्तिः कुतो न प्रादर्शीति नाशङ्कनीयम्, द्रव्यं सत्त्वादित्यत्रासद्धेतुकस्थले यथा द्रव्यत्वाभावाधिकरणतावन्निष्ठात्यन्ताभावस्य सत्त्वाभावाभावस्य गुणादौ सौलभ्येऽपि तत्प्रतियोगितानवच्छेदकप्रमेयत्ववत्त्वरूपं व्यापकत्वं हेत्वभावे सत्त्वाभावे निरापदं तथैव धूमाभाववान् वह्न्यभावादित्यत्रापि धूमात्मकसाध्याभावाधिकरणतावन्निष्ठात्यन्ताभावस्य चालनीन्यायेन वह्न्यभावात्मकस्य हेत्वभावाभावस्य पर्वतादौ सौलभ्येऽपि तादृशाभावप्रतियोगिताऽनवच्छेदकप्रमेयत्ववत्त्वात्मकव्यापकत्वस्य वह्न्यात्मकहेत्वभावे सत्त्वेनाव्याप्तेरनवकाशात् ।

२. तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं व्यापकत्वमित्युक्तौ ।
व्या० पञ्च० पृ० ४२

सत्त्वेन नेयमव्याप्तिः सम्भवतीति वाच्यम्, तावतापि लाघवानुरोधेनाभावाभावस्य प्रतियोगिस्वरूपत्वपक्ष[१] एव श्रेयानिति मते व्याप्तेर्दुरुद्धरत्वादिति चेन्मैवम्। निरवच्छिन्नायाः साध्याभावाधिकरणताया व्यापकतावच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वं तद्धर्मवत्त्वं[२] व्याप्तिरिति विवक्ष्यताम्, तेन च वह्न्यभावहेतुना धूमाभावस्य साधने नाऽव्याप्त्यवसरः साध्याभावस्य धूमाभावाभावस्य धूमात्मकस्याधिकरणताया व्यापकत्वं हेत्वभावस्य वह्न्यभावाभावस्य वह्नित्वेन नास्ति चालनीन्यायेन धूमस्य (साध्याभावस्य) तत्तदधिकरणे सर्वस्या अपि वह्निव्यक्तेरभावसत्त्वात्, परं वह्न्यभावाभावत्वेन व्यापकत्वमक्षतम् तस्य धूमाधिकरणतावति सौलभ्यादतः धूमात्मकसाध्याभावाधिकरणताया हेतुतावच्छेदकस्वरूपसम्बन्धावच्छिन्नहेतुतावच्छेदकवह्न्यभावत्वावच्छिन्नप्रतियोगिताकाभावत्वे व्यापकतावच्छेदकत्वसत्त्वेन हेतुतावच्छेदकवह्न्यभावत्ववतो धूमाभावव्याप्यत्वस्य निराकुलत्वात्।

व्यापकतावच्छेदकत्वनिर्वचनं लक्षणपरिष्कारश्च

साम्प्रतं व्यापकतावच्छेदकत्वं किमिति चिन्त्यते—तत्र पूर्वं व्यापकत्वं निर्धारणीयमिति प्रश्नोऽवतरति, तत्समाधानञ्च तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्, तद्वन्निष्ठाऽन्योन्याभावप्रतियोगितानवच्छेदकत्वम् वा तदिति भवति।

अत्र प्रथमकल्पे प्रतियोगिवैयधिकरण्येन निरवच्छिन्नवृत्तिकत्वेन वा विशेषित एवात्यन्ताभाव इष्टः, नो चेदेतद्वृक्षत्वव्यापकत्वं कपिसंयोगे न स्यात्, तदधिकरण एतद्वृक्षे कपिसंयोगाभावस्य मूलावच्छेदेन विद्यमानतया तत्प्रतियोगितावच्छेदककपिसंयोगत्ववत्त्वस्यैव कपिसंयोगे सत्त्वात्।

द्वितीयकल्पे त्वन्योन्याभावस्य प्रविष्टतया तस्य च व्याप्यवृत्तित्वस्वीकारेण, तत्र प्रतियोगिवैयधिकरण्यं निरवच्छिन्नवृत्तिकत्वं वा विशेषणं नाभिप्रेतमत एवायं द्वितीयकल्पो लाघवानुरोधेन स्वीक्रियते। एतद्वृक्षत्वाधिकरणे वृक्षविशेषे कपिसं-

१. यदाहुराचार्याः अभावविरहात्मत्वं वस्तुनः प्रतियोगिता इति। चि० दी० पृ० १३५।

२. तादृशाधिकरणताया व्यापकतावच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वस्य विवक्षितत्वात्। व्या० पञ्च० पृ० ४२

योगवान्नेति भेदस्याऽसत्त्वेन कपिसंयोगस्य व्यापकत्वं च निरुपद्रुतं तिष्ठति । एतेन हि तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमेव व्यापकत्वमिति स्थितम्, परं व्यापकतावच्छेदकत्वन्तु नान्योन्याभावघटितं युक्तम्, तद्घटितस्य व्यापकतावच्छेदकत्वस्य तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकतावच्छेदत्वरूपस्य तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वात्मकव्यापकतावच्छेदकत्वमपेक्ष्य गुरुत्वात् ।

एवञ्च तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वं[1] व्यापकतावच्छेदकत्वमिति स्वीकारे कपिसंयोगत्वादेः व्यापकतावच्छेदकत्वमुपपादयितुं यद्यपि प्रतियोगिव्यधिकरणत्वं निरवच्छिन्नवृत्तित्वं वा तद्घटकात्यन्ताभावेऽवश्यं विवक्षणीयम् तथाप्यत्र चतुर्थलक्षणे व्यापकतावच्छेदककुक्षौ प्रविष्टं तत्तथा नापेक्षितम्, साध्याभावाधिकरणतायां निरवच्छिन्नत्वनिवेशेनैव कपिसंयोगत्वादौ व्यापकतावच्छेदकत्वस्योपपादनसम्भवात्, पृथ्वी कपिसंयोगादित्यत्र हेत्वभावत्वस्य कपिसंयोगाभावत्वस्य पृथ्वीत्वाभावात्मकसाध्याभावाधिकरणताव्यापकतावच्छेदकत्वप्रसक्त्यातिव्याप्तेश्च ।

पृथ्वीत्वाभावाधिकरणताव्यापकतावच्छेदकत्वं कपिसंयोगाभावत्वस्य कथमिति चेदत्रायं विवेकः—यदि व्यापकतावच्छेदकत्वकोटौ प्रविष्टोऽत्यन्ताभावः प्रतियोगिव्यधिकरणो निरवच्छिन्नवृत्तिर्वाऽभिप्रेतस्तदा प्रकृते साध्यते पृथ्वीत्वं हेतुश्चास्ति कपिसंयोगः । यत्र-यत्र कपिसंयोगो जलादौ तत्र-तत्र पृथ्वीत्वस्याभावेन स्थलमिदं व्यभिचारि । अत्र साध्याभावः पृथ्वीत्वाभावस्तस्य निरवच्छिन्नाधिकरणता जले, जले विद्यमानायास्तस्या व्यापकतावच्छेदकत्वं कुत्रेति चिन्तायाम् तादृशाधिकरणतावन्निष्ठप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वमेव व्यापकतावच्छेदकत्वमित्यभ्युपगमेन तादृशाधिकरणतावन्निष्ठप्रतियोगिव्यधिकरणात्यन्ताभावात्मना हेत्वभावाभावः कपिसंयोगाभावाभावः कपिसंयोगात्मको नोपादातुं शक्यः प्रतियोगिसमानाधिकरणत्वात् सावच्छिन्नवृत्तिकत्वाद्वा, किन्तु घटत्वाद्यभाव एव, तत्प्रतियोगितावच्छेदकत्वस्य घटत्वत्वादावेव सत्त्वेन हेत्वभावत्वे कपिसंयोगाभावत्व एव तदनवच्छेदकत्वसम्भव इति स्फुटम् ।

---

१. व्यापकतावच्छेदकत्वं तु तदवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वम् । व्या० पञ्च० पृ० ४३

अनया दिशा यद्रूपावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् निरवच्छिन्नसाध्याभावाधिकरणतावन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं तद्रूपवत्त्वं व्याप्तिरिति चतुर्थलक्षणस्यास्य तात्पर्यमुन्नीतं भवति ।

अस्य वह्निमान् धूमादित्यत्र समन्वयप्रकारोऽयम्—वह्न्यभावाधिकरणतावन्निष्ठाभावो न संयोगसम्बन्धावच्छिन्नधूमत्वावच्छिन्नप्रतियोगिताकाभावाभावः किन्तु घटाद्यभाव एव । तत्प्रतियोगितानवच्छेदकत्वस्य धूमत्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वेऽक्षततया यद्रूपपदेन धूमत्वमादाय तद्वत्त्वं धूमस्येति । द्रव्यं सत्त्वादित्यादौ तु नातिव्याप्तिप्रसङ्गः । साध्याभावस्य द्रव्यत्वाभावस्याधिकरणतावति गुणादौ हेतुतावच्छेदकसत्तात्वावच्छिन्नहेतुतावच्छेकसमवायसम्बन्धावच्छिन्नप्रतियोगिताकाभावाभावस्य विद्यमानतया तदीयप्रतियोगितावच्छेदकत्वस्यैव तादृशसत्तात्वावच्छिन्नाभावत्वे सत्त्वाद् यद्रूपपदेन हेतुतावच्छेदकत्वेनाभिमतस्य सत्तात्वस्योपादातुमशक्यत्वात् । धूमाभाववान् वह्न्यभावादित्यादौ तु साध्याभावस्य धूमाभावाभावस्य धूमात्मकस्याधिकरणतावति पर्वतचत्वरादौ तत्तद्वह्न्यभावस्य सत्त्वेऽपि तत्प्रतियोगितावच्छेदकं तत्तद्वह्नित्वमेव न तु स्वरूपसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रतियोगिताकाभावत्वं, तादृशवह्न्यभावत्वावच्छिन्नाभावत्वावच्छिन्नाभावस्य पर्वतादावसत्त्वादिति तादृशवह्न्यभावत्वरूपधर्ममादायैव लक्षणसमन्वयसम्भवान्नाऽव्याप्तिरिति प्रागेवावोचाम ।

अत्र यद्रूपावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाभावत्वे तादृशसाध्याभावाधिकरणताया व्यापकतावच्छेदकत्वमुपेक्ष्य समानाधिकरणवृत्तित्वं विवक्ष्यतामिति तु प्रश्नो न साधीयान्, धूमवान् वह्नेरित्यादौ धूमाभावाधिकरणतावति जलादौ विद्यमाने हेत्वभावे वह्न्यभावे हेत्वभावत्वस्य वह्न्यभावत्वस्य वर्तमानतयातिव्याप्तिप्रसङ्गात् । तादृशाधिकरणताया व्यापकतावच्छेदकत्वस्य हेत्वभावत्वे विवक्षायां तु नायमतिप्रसङ्गसम्भवः, साध्याभावस्य धूमाभावस्याधिकरणता यत्र-यत्राऽयोगोलकादौ तत्र-तत्र हेत्वभावस्य वह्न्यभावस्यासत्त्वेन तद्वृत्तिवह्न्यभावत्वे व्यापकतावच्छेदकत्वाऽसम्भवात् ।

अत्र यदभावत्वे तादृशसाध्याभावाधिकरणताव्यापकतावच्छेदकत्वमुपेक्ष्य यद्धर्मावच्छिन्नाभावत्वे तद्विवक्षायाः प्रयोजनन्तु द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिवारणमेवान्यथा विशिष्टशुद्धसत्तयोरैक्याद् विशिष्टसत्त्वाभाववत् शुद्धसत्त्वाभावस्यापि यदभावपदेनोपादातुं शक्यतया तादृशयदभावत्वे सत्ताभावत्वे साध्यस्य

द्रव्यत्वस्य योऽभावस्तदधिकरणतावति गुणादौ सत्ताभावाभावस्य सत्त्वात् तादृश-साध्याभावाधिकरणताव्यापकतावच्छेदकत्वविरहादव्याप्तिः स्यादेव, किञ्च वह्नित्वेन सकलवह्निनिरूपिता धूमत्वेन सकलधूमे व्याप्तिरेकैवेति[1] लाघवमूलकसिद्धान्तसंरक्षणमपि यद्धर्मपर्यन्तानुधावनेन भवतीति ध्येयम् ।

अत्यन्ताभावस्य साध्याभावाधिकरणतावन्निष्ठत्वं केन सम्बन्धेनेति विमर्शः

अथापीदं विवेच्यम्—एवं परिष्कृतमपीदं लक्षणं वह्निमान्धूमादित्यत्रैव भवत्यव्याप्तम् साध्याभावस्य संयोगेन वह्न्यभावस्याधिकरणतावति जलह्रदादौ हेत्वभावाभावस्य संयोगसम्बन्धावच्छिन्नधूमत्वावच्छिन्नप्रतियोगिताकाभावत्वा-वच्छिन्नाभावस्य कालिकेन वर्तमानतया यद्धर्मधूमत्वावच्छिन्नसंयोगसम्बन्धा-वच्छिन्नधूमनिष्ठप्रतियोगिताकाभावत्वे साध्याभाव—वह्न्यभावाधिकरणतावति कालिकेन वर्तमानो यो धूमाभावाभावस्तत्प्रतियोगितावच्छेदकत्वस्यैव सत्त्वेन व्यापकतावच्छेदकत्वासम्भवात् ।

व्यापकतावच्छेदकत्वकुक्षौ साध्याभावाधिकरणतावन्निष्ठत्वमत्यन्ताभावस्य स्वरूपसम्बन्धेन विवक्षणीयमित्युक्त्या यद्यप्यत्र नाव्याप्तिसम्भवो धूमाभावाभा-वस्य कालिकेन जलह्रदे सत्त्वेऽपि धूमात्मकस्य तस्य स्वरूपेण तत्रासत्त्वात्, तथापि धूमवान् वह्नेरित्यत्रातिव्याप्तिः प्रसज्यते हेत्वभावाभावस्य वह्न्यभावाभा-वस्य वह्न्यात्मकस्य कुत्राप्यसत्त्वात् साध्याभावस्य धूमाभावस्याधिकरणतावत्य-योगोलके सत्त्वायोगाद्वह्नित्वावच्छिन्नाभावत्वस्य साध्याभावाधिकरणे स्वरूपेण वर्तमानस्य घटाद्यभावस्य प्रतियोगितानवच्छेदकतया यद्धर्मपदेन वह्नित्वस्यापि ग्रहीतुं शक्यत्वात् ।

अभावाभावस्यातिरिक्तत्वमभ्युपेत्य लक्षणमिदं प्रवृत्तं तेन हेत्वभावाभावस्य वह्न्यभावाभावस्य वह्न्यनात्मकस्य स्वरूपेणाधिकरणं प्रसिद्धमिति नाऽतिव्याप्त्य-वसर इति तु "निर्वह्नित्वाभावानां वह्निव्यक्तीनां[2] सर्वासामेव चालनीन्यायेन निर्धूम-त्वाभावाधिकरणतावन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वादिति" मथुरानाथ-ग्रन्थविरोधादुपेक्ष्यम्, किञ्च कालिकेन गोत्वस्य साध्यतायां कालिकसम्बन्धेन

१. सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्याद्व्याप्तेरैक्यम् । चि० दी० पृ० ३१

२. व्या० पञ्च० पृ० ४२

घटत्वाभावहेतावव्याप्तिरपि दुर्निवारा, कालिकसम्बन्धावच्छिन्नगोत्वत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्याधिकरणं नित्यो गगनादिरेव तत्र च हेत्वभावाभावस्य घटत्वाभावाभावाभावस्य (समवायसम्बन्धावच्छिन्नघटत्वत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य) समवायसम्बन्धावच्छिन्नघटत्वत्वावच्छिन्नप्रतियोगिताकाभावात्मकस्य स्वरूपेण विद्यमानतया हेत्वभावत्वे तादृशघटत्वाभावाभावत्वे, निरुक्तसाध्याभावाधिकरणतावन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वस्यैव सत्त्वेन तस्मिन् साध्याभावाधिकरणतानिरूपितव्यापकतावच्छेदकत्वाभावादिति चेदत्र ब्रूमः—

स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नप्रकारकं यज्ज्ञानं तन्निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताया अवच्छेदकीभूता या प्रकारता तदवच्छेदकसम्बन्धेनैव साध्याभावाधिकरणतावन्निष्ठत्वमत्यन्ताभावे विवक्षणीयम्, तेन च नैकोऽपि दोषः पदमादधाति। तथाहि पर्वतो वह्निमान् धूमादित्यादौ साध्याभावो वह्न्यभावस्तदधिकरणता ह्रदे तन्निष्ठत्वमत्यन्ताभावे स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धेनैव वक्तव्यम्। तथा च प्रकृते स्वं—साध्याभावस्य वह्न्यभावस्य याऽधिकरणता तादृशाधिकरणतावद्ध्रदादिनिष्ठत्वेनाभिमतोऽभावो, घटाभावादिरेव ग्राह्यस्तत्प्रतियोगितावच्छेदकसंयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारताशालिसंयोगेन घटवद्भूतलमित्याकारकबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता, स्वरूपेण, संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभाववद्भूतलम्, इत्याकारकनिश्चये न तु कालिकेन तादृशनिश्चये, तादृशप्रतिबन्धकतावच्छेदकीभूता या तादृशघटाभावनिष्ठप्रकारता तदवच्छेदकः सम्बन्धः स्वरूप एव, तेन सम्बन्धेन विद्यमानोऽभावः स्वपदेन प्राग्गृहीतः संयोगसम्बन्धावच्छिन्नप्रतियोगिताको घटाभाव एव भविष्यति, तत्प्रतियोगितावच्छेदकत्वस्य घटत्वे सत्त्वेनानवच्छेदकत्वं हेत्वभावत्वे धूमाभावत्वेऽक्षतम् तेन च लक्षणसमन्वयः सुकरो, नासम्भवः सम्भवति।

साध्याभावाधिकरणतावन्निष्ठात्यन्ताभावपदेन ह्रदे कालिकेन विद्यमानं धूमाभावाभावमादाय नात्राव्याप्तिः शक्यसम्भवा, तदीयप्रतियोगितावच्छेदकस्वरू-

पसम्बन्धावच्छिन्नधूमाभावत्वावच्छिन्नप्रकारताक 'ह्रदो धूमाभाववानि'त्याकारक-बुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता संयोगेन धूमवानित्याकारकभ्र-मात्मकनिश्चय एवाप्रामाण्यज्ञानानास्कन्दिततत्वदशापर्यन्तं सम्भवति, संयोगेन धूम-वत्तानिश्चयस्यैव संयोगसम्बन्धावच्छिन्नधूमत्वावच्छिन्नप्रतियोगिताकाभाववत्ता बुद्धिं प्रति प्रतिबन्धकत्वात्, न तु कालिकेन धूमवत्तानिश्चये, कालिकेन धूमस्य, स्वरूपेण संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावस्य चैकत्राधिकरणे युगप-त्सत्त्वेऽविरोधात्, एवं सति तादृशप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्ध-त्वस्य कालिके कथमप्यसम्भवेन तेन सम्बन्धेन धूमाभावाभावस्य धूमात्मकस्य जलह्रदादौ सत्त्वेऽपि धूमाभावत्वे[१] व्यापकतानवच्छेदकत्वस्योपपादनासम्भवात्।

एवं धूमवान् वह्नेरित्यत्र साध्याभावस्य धूमाभावस्याधिकरणतावत्ययोगोलके हेत्वभावाभावो वह्न्यभावाभावो वह्न्यात्मकः सुलभस्तं स्वपदेनादाय तत्प्रतियोगि-तावच्छेदकस्वरूपसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारताशालिवह्न्यभाव वदयोगोलकमित्याकारकबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता संयो-गेन वह्निमदयोगोलकमित्याकारनिश्चय एव। तादृशप्रतिबन्धकतावच्छेदकवह्नि-निष्ठप्रकारतावच्छेदकसंयोगसम्बन्धेन स्वपदेन गृहीतस्यात्यन्ताभावस्य वह्न्यभा-वाभावस्य प्रतियोगितावच्छेदकत्वमेव हेत्वभावत्वे वह्न्यभावत्वे तेन वह्न्यभावत्व-स्य व्यापकतानवच्छेदकत्वान्नातिव्याप्त्यवकाशः।

कालिकेन गोत्ववान् कालिकेन घटत्वाभावादित्यत्र सद्धेतुकस्थले तु हेत्वभा-वाभावो घटत्वाभावाभावाभावो घटत्वाभावरूपः साध्याभावस्य कालिकेन गोत्वाभावस्याधिकरणतावद्गगनादिनिष्ठात्यन्ताभावपदेन ग्रहीतुमशक्यस्तदीय-प्रतियोगितावच्छेदकस्वरूपसम्बन्धावच्छिन्नघटत्वाभावाभावत्वावच्छिन्नप्रकारता-शालिघटत्वाभावाभाववद्गगनमित्याकारकबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकता कालिकेन घटत्वाभाववद्गगनमित्यकारकनिश्चये, न तु स्वरूपेण घटत्वाभाववद्गगनमित्याकारकनिश्चये, स्वरूपेण घटत्वाभाववत्यपि कालिक-सम्बन्धावच्छिन्नघटत्वाभावत्वावच्छिन्नप्रतियोगिताकाभावस्य घटत्वाभावा-भावस्य स्वरूपेण सत्त्वे विरोधाभावात्। तादृशप्रतिबन्धकतावच्छेदकप्रकारता घटत्वाभावे तदवच्छेदकसम्बन्धः कालिकस्तेन सम्बन्धेन निरुक्तसाध्याभावाधिक-

---

१. प्रतियोगितावच्छेदकत्वोपपादनपुरस्सरम्।

रणतावन्निष्ठत्वस्य घटत्वाभावाभावाभावे घटत्वाभावात्मकेऽसम्भवात्,[१] किन्तु तदतिरिक्तः समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नप्रतियोगिताकाभावादिरेव ग्राह्यस्तदीयप्रतियोगितावच्छेदकसमवायसम्बन्धावच्छिन्नरूपत्वाच्छिन्नप्रकारताकरूपवान् घट इत्याकारकबुद्धित्वावच्छिन्नप्रतिबन्ध्यतानिरूपितरूपाभाववान् घट इत्याकारकनिश्चयत्वावच्छिन्नप्रतिबन्धकतावच्छेदकरूपाभावनिष्ठप्रकारतावच्छेदकस्वरूपसम्बन्धेन तस्य साध्याभावस्य कालिकेन गोत्वाभावस्याधिकरणतावति गगने सत्त्वात्। तथा च स्वपदेनामुं रूपाभावमादाय तदीयप्रतियोगितानवच्छेदकत्वस्य हेत्वभावत्वे घटत्वाभावाभावत्वेऽनपायात् तस्य व्यापकतावच्छेदकत्वेन नाव्याप्तिरवकाशं लभत इत्यलम्।

॥इति चतुर्थव्याप्तिविमर्शः ॥

---

१. नित्येषु कालिकायोगात्।

पञ्चमं प्रकरणम्

साध्यवदन्यावृत्तित्वमिति पञ्चमव्याप्तिविमर्शः

साम्प्रतं पञ्चमः सहचारनियमो व्याप्तिस्वरूपोऽन्वीक्ष्यते। अस्य स्वरूपम् 'साध्यवदन्यावृत्तित्वम्' इति। अनुपदमेव समीक्षितश्चतुर्थः सहचारनियमो यद्रूपावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्, निरवच्छिन्नसाध्याभावाधिकरणतावन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकन्तद्रूपवत्त्वमित्येवं स्वरूपो यत्तत्पदघटितत्वेनाननुगतत्वान्नोपादेय[1] इत्याक्षेपं मनसि निधाय यत्तत्पदाघटितः सहचारनियमोऽयं पञ्चमः पुरस्क्रियते।

लक्षणविवरणं समन्वयप्रकारश्च

अस्य पञ्चमस्य सहचारनियमस्य विवरणमिदम्—साधयितुं योग्यं साध्यम् तदस्यास्तीति[2] साध्यवान्, साध्यवतोऽन्यः साध्यवदन्यः तस्मिन्नवृत्तित्वम्—वृत्तित्वाभावः, साध्यवदन्यावृत्तित्वमिति। इदं हि पञ्चमस्यास्य सहचारनियमस्य शरीरात्मकतया स्वरूपलक्षणं गीयते। अत्रान्यपदस्य भिन्नपरतया भिन्नपदस्य च भेदाधिकरणपरतया साध्यवदन्यपदं साध्यवद्भेदाधिकरणपरमिति विव्रियते। तेन च साध्यवद्भेदाधिकरणनिरूपितवृत्तित्वाभावे लक्षणमिदं पर्यवसन्नं भवति।

अन्वयव्याप्तेरेवेदं लक्षणम्। सद्धेतौ समन्वयप्रकारश्चायम्—पर्वते संयोगेन वह्नेः साध्यतायां संयोगेन धूमः सद्धेतुः, तत्र 'पर्वतः पक्षः, वह्निः साध्यः, धूमो हेतुः दृष्टान्तश्च महानसम्। संयोगेन साध्यवतो—वह्निमतो महानसादेर्भेदस्य संयोगेन वह्निमान्नेत्याकारकस्याधिकरणं जलह्रदादिस्तन्निरूपितवृत्तित्वं मीनशैवालादौ तदभावो धूमे सद्धेतौ वर्तते। अयमभावः सहचारनियमशब्देन व्याप्तिशब्देन वा

१. प्राचां मते यत्तदर्थयोरनुगतत्वादाह एकावच्छेदेनेति। चि० दी० जा० पृ० ११८

२. तदस्यास्त्यस्मिन्निति मतुपो विधानादिति। चि० पृ० १३५८

व्यपदिश्यते । अत एव व्याप्तेराश्रयतयाऽयं धूमो व्याप्यः स्वीक्रियते, व्याप्यो नाम व्याप्त्याश्रय इत्युक्तेः ।

धूमवान् वह्नेरित्येवं विधेषु स्थलेषु वह्न्यादिर्न सद्धेतुरत एव तत्राऽलक्ष्ये नेदं लक्षणं समन्वितं भवति । तथाहि साध्यः संयोगेन धूमस्तद्वतो भेदः संयोगेन धूमवान्नेत्याकारकस्तस्याधिकरणं यथा जलह्रदादिस्तथैव तप्तायःपिण्डोऽपि । एवञ्च धूमवद्भेदाधिकरणे तप्तायःपिण्डे वह्नेः विद्यमानतया धूमवद्भेदाधिकरणनिरूपितवृत्तित्वस्यैव हेतुत्वेनाभिमते वह्नौ सत्त्वे तादृशवृत्तित्वाभावो वह्नौ नास्त्येव । तेन च धूमनिरूपितव्याप्तेः वह्न्यावसत्त्वेन धूमव्याप्यो वह्निरिति न स्वीक्रियते, प्रत्युत वह्निर्धूमव्यभिचारीत्येव व्युत्पन्नैः स्वीक्रियते साध्यवद्भेदाऽधिकरणनिरूपितवृत्तित्वस्यैव व्यभिचारपदार्थत्वात्, तस्य च वह्नौ सत्त्वात् ।

लक्षणघटकभेदीयप्रतियोगितावच्छेदकतापरिष्कारः

अस्मिन् व्याप्तिलक्षणे साध्यवद्भेदः प्रविष्टः । स च साध्यवान्नेत्याकारकः, अस्य प्रतियोगिता साध्यवति तन्निरूपिताऽवच्छेदकता च साध्ये सा केन सम्बन्धेनावच्छिन्नेति प्रश्ने, यत्किञ्चित्सम्बन्धावच्छिन्ना सा स्यादिति समाधानं तु न ज्यायः, पर्वतो वह्निमान् धूमादित्यत्र यत्किञ्चित्सम्बन्धपदेन समवायमादाय तदवच्छिन्नवह्निनिष्ठावच्छेदकताकप्रतियोगिताकस्य समवायेन वह्निमान्नेत्याकारकभेदस्याधिकरणे पर्वतादौ धूमस्य सत्त्वादव्याप्तेः ।

सम्बन्धसामान्यावच्छिन्ना साऽपेक्ष्यत इत्यपि नानवद्यम्, संयोगादिसम्बन्धेन वह्निमत्वस्य पर्वतादौ सत्त्वेन सम्बन्धसामान्यावच्छिन्नवह्निनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्य पर्वतादावनुपलब्ध्या तदधिकरणं वह्न्यसमानकालीनजलह्रदादिरेव सुलभस्तन्निरूपितवृत्तित्वाभावस्य धूमे सत्त्वेनाऽव्याप्त्यसम्भवेऽपि धूमवान् वह्नेरित्यादावतिव्याप्तेः वारयितुमशक्यत्वात् । तथाहि साध्यस्य धूमस्याभावाधिकरणं यदयोगोलकं व्यभिचारनिरूपकाधिकरणत्वेन प्रसिद्धम् तत्रापि सम्बन्धसामान्यान्तर्गतकालिकादिसम्बन्धेन धूमसत्त्वं निर्विवादम्, अतस्तत् सम्बन्धसामान्यावच्छिन्नधूमनिष्ठावच्छेदकताकप्रतियोगिताकभेदाधिकरणत्वेन ग्रहीतुमशक्यम् । किन्तु धूमासमानकालीन एव कश्चन ह्रदादिर्ग्राह्यस्तन्निरूपितवृत्तित्वाभावो वह्नौ स्पष्ट इति ।

अत्र यदि कश्चनैवं ब्रूयात्—धूमासमानकालीनत्वेन जलह्रदविशेषो ग्रहीतुमशक्यः सृष्टिकाल एव जलह्रदस्य सम्भवेन तस्य धूमासमानकालीनत्वासम्भवात् ।

अतः प्रलयकाले परमाणुषु याः क्रिया उत्पद्यन्ते, ता एव धूमासमानकालीनपदार्थत्वेन ग्रहीतुं शक्यास्तासु च यद्यपि सम्बन्धसामान्यावच्छिन्नधूमनिष्ठावच्छेदकताकप्रतियोगिताकभेदः प्रसिद्धः परं तन्निरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्धयैव नातिव्याप्तिरिति, तदा वह्निमत्त्वप्रकारकप्रमाविशेष्यत्वमेव हेतूकृत्य धूमसाध्यकस्थलेऽतिव्याप्तिरुद्भाव्यताम्, परमाणुक्रियायां हेतुतावच्छेदकस्वरूपसम्बन्धेन गुणात्वाभावादिकस्य वृत्तित्वं प्रसिद्धम् तदभावस्य च वह्निमत्त्वप्रकारकप्रमाविशेष्यत्वरूपासद्धेतौ सत्त्वात्। एवञ्च साध्यतावच्छेदकसम्बन्धावच्छिन्नैव[1] सा वक्तव्या।

तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यनिष्ठावच्छेदकताकप्रतियोगिताकभेदाधिकरणनिरूपितवृत्तित्वाभावो व्याप्तिरिति लक्षणं निर्वाच्यम्, तेन प्रकृते स्वरूपेण वह्निमत्त्वप्रकारप्रमाविशेष्यतां हेतूकृत्य संयोगेनैव धूमस्य साधयितुमिष्टतया संयोगेन धूमवत एव भेदो ग्रहीतुं शक्यस्तस्य च व्यभिचारनिरूपकाधिकरणेऽयोगोलके सत्त्वेन तन्निरूपितहेतुतावच्छेदकस्वरूपसम्बन्धावच्छिन्नवृत्तित्वस्यैव वह्निमत्त्वप्रकारकप्रमाविशेष्यत्वे हेतुत्वेनाभिमते सत्त्वेन नातिव्याप्त्यवकाशः।

परमेवं सत्यपि पर्वतो वह्निमान् धूमादित्यत्रैव संयोगेन महानसीयवह्निमतो भेदः सुग्राह्यस्तदीयप्रतियोगिताया महानसीयवह्निमन्निष्ठाया महानसीयवह्निनिष्ठायाऽवच्छेदकतां तस्याः साध्यतावच्छेदकेन संयोगसम्बन्धेनावच्छिन्नत्वात् महानसीयवह्निनिष्ठत्वेन महानसीयवह्नेश्च वह्न्यात्मकत्वेन साध्यनिष्ठत्वाच्च। तथा च साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यवह्निनिष्ठावच्छेदकताकमहानसीयवह्निमन्निष्ठप्रतियोगिताकस्य संयोगेन महानसीयवह्निमान्नेत्यांकारकभेदस्याऽधिकरणे पर्वते धूमस्य हेतोर्वृत्तित्वेन लक्षणमिदमव्याप्तमिति[2] शङ्का तु साध्यतावच्छेदकपर्याप्तावच्छेदकताका या प्रतियोगितावच्छेदकता तन्निरूपको यो भेदस्तदधिकरणनिरूपितवृत्तित्वांभावो व्याप्तिरित्येवं व्याप्तिलक्षणं स्वीकृत्य निरसनीया।

---

१. साध्यवत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम्। व्या० पञ्च० पृ० ४५

२. तेन वह्निमान् धूमादित्यादौ तत्तद्वह्निमदन्यस्मिन् धूमादेर्वृत्तावपि नाव्याप्तिः।
व्या० पञ्च० पृ० ४४

तथा सति महानसीयवह्निमान्नेति भेदीयप्रतियोगितावच्छेदकताया महानसीयत्ववह्नित्वाभ्यामवच्छिन्नतया साध्यतावच्छेदकवह्नित्वपर्याप्तावच्छेदकताकत्वाभावेन ग्रहीतुमशक्यतया, वह्निमान्नेति भेद एव लक्षणघटकीभूतभेदपदेन ग्राह्यस्तदीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकवह्नित्वमात्रावच्छिन्नत्वात्। तदधिकरणताया ह्रदावेव सौलभ्येन तन्निरूपितवृत्तित्वाभावस्य धूमेऽक्षततया भवति सर्वं निरवद्यम्।

भेदीयप्रतियोगितायां भेदत्वनिरूपितत्वनिवेशप्रयोजनम्

अथापि स्वावच्छिन्नभिन्नभेदस्य[१] स्वस्वरूपत्वं, समनियतत्वाल्लाघवानुरोधेनाभ्युपेयम्,[२] एवं च वह्निमान्नास्तीत्यत्यन्ताभावोऽपि तादृशात्यन्ताभावावच्छिन्नभिन्नभेदरूपो वह्निमत्त्वावच्छिन्नप्रतियोगिताकश्च, तेन हि वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदपदेन वह्निमान्नास्तीत्यत्यन्ताभावमादाय तदधिकरणपर्वतादिनिरूपितवृत्तित्वस्य धूमे सत्त्वादव्याप्तिरित्याक्षेपस्तु भेदीयप्रतियोगितां भेदत्वनिरूपितत्वेन विशिष्य वारणीयः वह्निमान्नास्तीत्यत्यन्ताभावस्य तदवच्छिन्नभिन्नभेदस्य च सत्यप्यैक्ये तादृशात्यन्ताभावत्वभेदत्वयोर्भिन्नत्वाद्, वह्निमान्नास्तीत्यत्यन्ताभावीया प्रतियोगिता न हि भेदत्वनिरूपिता। भेदत्वनिरूपितत्वं नाम तादात्म्यसम्बन्धावच्छिन्नत्वमेव[३]। अत्यन्ताभावत्वनिरूपितायाः प्रतियोगितायाश्च नियमेन तादात्म्यसम्बन्धानवच्छिन्नतया भेदत्वनिरूपितत्वं कदापि न सम्भवतीति सर्वं समञ्जसम्।

वृत्तितायां हेतुतावच्छेदसम्बन्धावच्छिन्नत्वविवक्षयाः फलम्

नन्वेवमपि पर्वतो वह्निमान् धूमादित्यत्रैव संयोगेन वह्निमान्नेत्येवं विधस्य साध्यवद्भेदस्याधिकरणं यथा जलह्रदादिस्तथैव धूमावयवोऽपि, तन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वस्यैव धूमे सत्त्वेनाऽव्याप्तिरिति चेन्न साध्यवद्भेदाधिकरणनिरूपितवृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशेनाव्याप्तेरस्या निरवकाशत्वात्। संयोगेन वह्निमान्नेति साध्यवद्भेदस्याधिकरणं

---

१. समनियताभावयोर्लाघवेनैक्यात् इति वाच्यम्। चि० दी० जा० पृ० १५७

२. अन्योन्याभावत्वनिरूपितत्वञ्च तादात्म्यसम्बन्धावच्छिन्नत्वमेव। व्या० पञ्च० पृ० ४५

३. तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वस्यैव संसर्गाभावत्वरूपत्वादितिभावः। चि० दी० गा० पृ० ३४०

धूमावयवोऽप्यस्ति परं तन्निरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तितायास्तृणादावेव सम्भवेन तस्या अभावो धूमे सूपपाद एव ।

वृत्तित्वसामान्याभावनिवेशप्रयोजनम् तत्स्वरूपनिरूपणञ्च

साम्प्रतं भेदत्वनिरूपिता साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठावच्छेदकताका या प्रतियोगिता तन्निरूपको यो भेदस्तदधिकरणनिरूपिता या हेतुतावच्छेदकसम्बन्धावच्छिन्ना वृत्तिता तस्या अभावो व्याप्तिरिति लक्षणं पर्यवसन्नम्, इदञ्च लक्षणं धूमवान्वह्नेरित्यत्र भवत्यतिव्याप्तम्, लक्षणकुक्षिप्रविष्टतादृशवृत्तित्वाभावपदेन धूमवद्भेदाधिकरणजलह्रदनिरूपितवृत्तित्वाभावस्य, धूमवद्भेदाधिकरणनिरूपितवृत्तित्वजलत्वोभयाभावस्य च सुग्रहत्वात्तस्य चासद्धेतौ वह्नौ सत्त्वाच्चेति प्रश्नस्तु प्रथमलक्षणोक्तदिशा तादृशवृत्तित्वसामान्याभावविवक्षया[1] समाधेयः ।

वृत्तित्वसामान्याभावस्य स्वरूपन्त्वेवम् प्रतियोगित्वसम्बन्धावच्छिन्नसाध्यवन्निष्ठावच्छेदकताभिन्ना सती भेदत्वनिष्ठावच्छेदकताभिन्नायाऽवच्छेदकता तदनिरूपिका, अथ चैतादृशावच्छेदकताद्वयनिरूपिता या भेदनिष्ठाऽवच्छेदकता, तद्भिन्ना सती अधिकरणत्वनिष्ठाऽवच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका अथ चैतादृशावच्छेदकताद्वयनिरूपिका याऽधिकरणनिष्ठावच्छेदकता, तद्भिन्ना सती वृत्तितात्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका, अथ चैतादृशावच्छेदकताद्वयनिरूपिता या वृत्तित्वनिष्ठप्रतियोगिता तन्निरूपकोऽभाव इति ।

तादृशवृत्तितानवच्छेदकहेतुतावच्छेदकवत्त्वपर्यन्तानुधावनप्रयोजनम्

न चैवमपि गुणकर्मान्यत्वविशिष्टसत्तां हेतूकृत्य द्रव्यत्वस्य साध्यतायामव्याप्तिः, विशिष्टशुद्धसत्तयोरैक्येन साध्यवतो द्रव्यादन्यस्मिन् गुणादौ सत्ताया वृत्तित्वेन विशिष्टसत्तायां निरुक्तवृत्तित्वसामान्याभावस्याभावादिति वाच्यम्, हेतुतावच्छेदकरूपेण हेतौ निरुक्तवृत्तित्वसामान्याभावस्य विवक्षणात्, तेन च साध्यवदन्यनिरूपितवृत्तिताया अनवच्छेदकं यद्धेतुतावच्छेदकं तद्वत्त्वं व्याप्तिरिति लक्षणं फलति, अत एव विशिष्टसत्तात्वशुद्धसत्तात्वयोर्भेदेन द्रव्यत्ववदन्यगुणादिनिरूपितवृत्तिताया अवच्छेदकत्वस्य सत्तात्वे सत्त्वेन तादृशवृत्तितानवच्छेदक-

---

१. तादृशवृत्तित्वाभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः। व्या० पञ्च० पृ० ४४

हेतुतावच्छेदकविशिष्टसत्तात्ववत्त्वस्य विशिष्टसत्तायां सत्त्वेन नास्त्यव्याप्तिगन्धोऽपीति बोध्यम् ।

हेतौ साध्याधिकरणवृत्तित्वविवक्षायाः प्रयोजनम्

इदं वह्निमद्गगनादित्यादौ गगने सद्धेतौ साम्प्रतं निरुक्तस्य वृत्तित्वसामान्याभावस्य सत्त्वेनातिव्याप्तिप्रसङ्गस्तु प्रथमलक्षणदिशा हेतुतावच्छेदकसम्बन्धेन साध्यसमानाधिकरणत्वे सतीति निवेश्य निरसनीयः । तथा च यथा हेतौ तादृशवृत्तित्वसामान्याभावोऽपेक्ष्यते तथैव हेतुतावच्छेदकसम्बन्धेन साध्याधिकरणवृत्तित्वमपि । एतेन हि हेतुतावच्छेदकसम्बन्धेन साध्याधिकरणवृत्तित्वे सति निरुक्तवृत्तित्वसामान्याभाववत्त्वं हेतुनिष्ठं व्याप्तिरिति निष्कृष्टं लक्षणं भवति ।

॥इति पञ्चमव्याप्तिविमर्शः ॥

षष्ठं प्रकरणम्

साध्याऽसामानाधिकरण्यानधिकरणत्वमिति षष्ठ-व्याप्तिविमर्शः

व्याप्तेः पञ्च लक्षणानि निरूप्य षष्ठमिदं लक्षणं पूर्वपक्षभूतं निरूप्यते। लक्षणस्यास्य समुद्भावकः 'सिंह' इत्युपनाम्ना प्रसिद्धः कश्चन विशिष्टो नैयायिकः सञ्जात इति प्रसिद्धिः। एतेषामुपनाम्ना व्याप्तिलक्षणस्यास्याभिधानमपि सिंहलक्षणमिति प्रथितम्। पूर्ववदिदं व्याप्तेःस्वरूपलक्षणं सद्धेतोर्व्याप्यस्य वा तटस्थलक्षणमिति विज्ञेयम्।

लक्षणसमन्वयप्रकारः

साध्यासामानाधिकरण्यानधिकरणत्वमिति सिंहप्रणीते व्याप्तिलक्षणे प्रविष्टस्य 'साध्यासामानाधिकरण्य' पदस्यार्थः 'साध्याऽधिकरणत्वाभाववद्वृत्तित्वमि'ति स्वीक्रियते। लक्षणेऽस्मिन् प्रविष्टस्य द्वितीयस्य, 'अनधिकरणत्व'मिति पदस्य 'तद्वद्भिन्नत्वमित्यर्थःसमुन्नीयते। एवं लक्षणार्थः,"साध्याधिकरणत्वाभाववद्वृत्तित्ववद्भिन्नत्वमि"त्येवं पर्यवसितं भवति।

'पर्वतो वह्निमान् धूमादि'त्यत्र सद्धेतुक-स्थले साध्यो वह्निः, साध्याऽधिकरणत्वं—वह्न्यधिकरणत्वं महानस-चत्वर-गोष्ठादौ प्रसिद्धम्। ह्रदादौ वह्न्यधिकरणत्वाभावस्याऽक्षततया साध्याऽधिकरणत्वाभाववद्ध्रदादिकम्। ह्रदादौ मीनशैवालादीनां वृत्तितया साध्याधिकरणत्वाभाववद्ध्रदादिवृत्तित्वं मीनशैवालादौ प्रसिद्धम्। एवं साध्याधिकरणत्वाभाववद्वृत्तित्वरूपं साध्यासामानाधिकरण्यं मीनशैवालादौ निराबाधम्। साध्याधिकरणत्वाभाववद्वृत्तित्ववत् मीनशैवालादिकम्। धूमे सद्धेतौ साध्याधिकरणत्वाभाववद्वृत्तित्ववत्त्वस्य कथमप्यसम्भवात्

'साध्याधिकरणत्वाभाववद्वृत्तित्ववद्भिन्नत्व' रूपस्य व्याप्तिलक्षणस्य समन्वयो निराकुल एवेति स्पष्टम्।

'पर्वतो,धूमवान्, वह्नेरि'त्यत्राऽसद्धेतुकस्थले साध्यो—धूमः, साध्याधिकरणत्वम्—महानस-चत्वर-गोष्ठादौ सुसिद्धम्। ह्रदादाविव हेतु-वह्न्यधिरणे तप्ताऽयःपिण्डेऽपि साध्य—धूमाधिकरणत्वाभावस्याऽक्षततया साध्य—धूमाधिकरणत्वाभाववत्तप्तायः पिण्डोऽपि तप्ताऽयःपिण्डेऽस्मिन् हेतोः वह्नेःवृत्तितया साध्याधिकरणत्वाभाववद्वृत्तित्वरूपं साध्यासामानाधिकरण्यं हेतौ वह्नावप्यक्षतम्। साध्याधिकरणत्वाभाववद्वृत्तित्ववद्धेतुः-वह्निरपि। एवमसद्धेतौ वह्नौ साध्याधिकरणत्वाभाववद्वृत्तित्ववद्भिन्नत्वस्वरूपस्य सिंहव्याप्तिलक्षणस्यासङ्गमनमपि सुस्पष्टम्।

एतावता सिंहप्रणीतं 'साध्याधिकरणत्वाभाववद्वृत्तित्ववद्भिन्नत्व' रूपे पर्यवसन्नं 'साध्यासामानाधिकरण्यानधिरणत्वमि'ति व्याप्तिलक्षणं तावदव्याप्त्यतिव्याप्त्यसम्भवरूपदूषणत्रयशून्यमिति निर्गलति।

साध्यासामानाधिकरण्यस्य साध्याधिकरणवृत्तित्वाभावरूपताव्युदासः

यदा द्वयोः पदार्थयोः समानम्—एकम् अधिकरणं भवति तदा तयोः सामानाधिकरण्यम्—एकाधिकरणवृत्तित्वं सिद्ध्यति। यथा वह्निधूमयोस्तावत् महानसादिकं समानमधिकरणं लोक-प्रसिद्धम् फलतः अनयोःसामानाधिकरण्यम्।

एवमेव यदा द्वयोः पदार्थयोःयो यस्य पदार्थस्याभावाधिकरणे न तिष्ठत्यसावपि तस्य समानाधिकरण इति प्रामाणिकानां व्यवहारः। यथा धूमो, वह्न्यात्मकस्य पदार्थस्याभावाधिकरणे ह्रदादौ नैव तिष्ठत्यतोऽसौ वह्नेः समानाधिकरण इति प्रमाणिकानामव्याहतो व्यवहारः। अत्र प्रथमद्वितीयव्यवहारयोः विद्यते कश्चन सूक्ष्मो विवेकः। प्रथमव्यवहाराधारेण धूमे यथा वह्निसामानाधिकरण्यं तथैव वह्नावपि धूमसामानाधिकरण्यं प्रसिद्ध्यति। द्वितीयव्यवहाराधारेण धूमे वह्निसामानाधिकरण्यं भवत्येव। धूमवह्न्योर्मध्ये धूम एव वह्निसामानाधिकरण्यं न तु वह्नौ धूमसामानाधिकरण्यनियम अयोगोलके व्यभिचारात्,इति विशिष्टा स्थितिरेवं स्पष्टा भवति।

यदा द्वयोः पदार्थयोः समानम्—एकम् अधिकरणं न भवति यदा तयोः परस्परम् असामानाधिकरण्यम्—एकाधिकरणवृत्तित्वाभावःसिद्ध्यति। यथा

वह्निजलयोः समानमधिकरणमप्रसिद्धमत एवानयोः परस्परं सामानाधिकरण्यं नास्ति एतावताऽनयोः असामानाधिकण्यम् एकाधिकरणवृत्तित्वाभावो वा विद्यत इति स्फीतः प्रेक्षावतां व्यवहारः प्रसिद्धः ।

एवमेव यदा द्वयोः पदार्थयोः यो यस्य पदार्थस्याधिकरणत्वाभाववति तिष्ठत्यसावपि तस्यासमानाधिकरण इति प्रामाणिकानां व्यवहारः । यथा जलं वह्न्यात्मकस्य पदार्थस्याधिकरणत्वाभाववति ह्रदे तिष्ठत्यतोऽसौ वह्नेरसमानाधिरणमिति प्रामाणिकानामक्षुण्णो व्यवहारः । एतावता यो-यो जलाधिकरणावृत्तिः स-स जलासमानाधिकरणः, वह्निरपि जलाधिकरणावृत्तिरतो वह्निर्जलासमानाधिकरणः । एवं यो-यो वह्न्यधिकरणावृत्तिः स-स वह्न्यसमानाधिकरणः, जलमपि वह्न्यधिकरणावृत्तिरतो जलं वह्न्यसमानाधिकरण इति स्पष्टम् ।

एवमेव यो-यो जलाधिकरणत्वाभाववद्वृत्तिः स-स जलासमानाधिकरणः, वह्निरपि जलाधिकरणत्वाभाववद्वृत्तिरतो वह्निर्जलासमानाधिकरणः । एवं यो-यो वह्न्यधिरणत्वाभाववद्वृत्तिः स-स वह्न्यसमानाधिकरणः, जलमपि वह्न्यधिकरणत्वाभाववद्वृत्तिरतो जलं वह्न्यसमानाधिरकरणमिति सुस्पष्टम् ।

अत्रेदं चिन्तनीयम्—ययोः परस्परं व्याप्यव्यापकभावस्तत्रापि धूमवह्न्योर्मध्ये वह्नौ धूमाधिकरणावृत्तित्वरूपं धूमासामानाधिकरण्यं नास्ति धूमाधिकरणे सर्वत्र वह्नेर्व्यापकस्य सत्त्वात्, परमत्रैव वह्नौ धूमाधिकरणत्वाभाववद्वृत्तित्वरूपं धूमासामानाधिकरण्यं वह्नावक्षतम्, धूमाधिकरणत्वाभाववति तप्तायःपिण्डे वह्नेरक्षुण्णत्वात् । अत्र धूमे तावद् वह्न्यधिकरणावृत्तित्वरूपं वह्न्यसामानाधिकरण्यं यथा नास्ति तथैव वह्न्यधिकरणत्वाभाववद्वृत्तित्वरूपमपि वह्न्यसामानाधिकरण्यं धूमे नास्त्येवेति सूक्ष्मानुशीलनेन निर्गलति ।

स्थितावस्यां यदि सिंहव्याप्तिलक्षणघटकं साध्यासामानाधिकरण्यम्—साध्याधिकरणनिरूपितवृत्तित्वाभावरूपम् (साध्याधिकरणावृत्तित्वरूपम्) अभ्युपगम्यते तर्हि 'पर्वतो' धूमवान् वह्नेरि'त्यत्रासद्धेतुकस्थले धूमाधिकरणमहानसादिनिरूपितवृत्तित्वाभावरूपस्य धूमासामानाधिकरण्यस्य वह्नौ असद्धेतौ विरहात् धूमासामानाधिकण्यानधिकरणत्वरूपं सिंहव्याप्तिलक्षणं समन्वितं भवति । फलतः प्रसक्तातिव्याप्तिः वज्रलेपायमाना । अस्या अतिव्याप्तेर्निरसनार्थं साध्यासामानाधिकरण्यं साध्याधिकरणत्वाभाववद्वृत्तित्वरूपमूरीकर्त्तव्यम्, तथा चोपर्युक्ताऽसद्धेतौ वह्नौ, धूमाधिकरणत्वाभाववद्वृत्तित्वस्वरूपस्य साध्यासामानाधिकरण्यस्य

निराबाधेन, एतादृशसाध्यासामानाधिकरण्यानधिकरणत्वरूपस्य सिंहव्याप्तिलक्षणस्य समन्वयाभावदतिव्याप्तिः सुदूरपराहता तिष्ठति ।

एवमेव 'इदम्, द्रव्यम्, सत्त्वादित्यत्रासद्धेतुकस्थलेऽपि सत्त्वरूपेऽसद्धेतौ साध्य-द्रव्यत्वाधिकरणद्रव्यनिरूपितवृत्तित्वाभावस्य सत्त्वेऽविद्यमानतया साध्यासामानाधिकरण्यानधिकरणत्वरूपमिदं व्याप्तिलक्षणमतिव्याप्तं भवति, परं साध्य-द्रव्यत्वाधिकरणत्वाभाववद्गुणादिनिरूपितवृत्तित्वस्य (साध्यासामानाधिकरण्यस्य) सत्त्वेऽक्षततया साध्यासामानाधिकरण्यानधिकरणत्वरूपस्य सिंहव्याप्तिलक्षणस्य समन्वयाभावादत्रापि तावदतिव्याप्तिः साध्याधिकरणत्वाभाववद्वृत्तिस्वरूपस्य साध्यासामानाधिकरण्यस्याभ्युपंगमात् सहजरूपेण निरस्यते ।

साध्यासामानाधिकरण्यस्य साध्यवद्भिन्नवृत्तित्वस्वरूपताव्युदासः

साध्यासामानाधिकरण्यम्— साध्याधिकरणत्वाभाववद्वृत्तित्वमिति पूर्वं निर्धारितम् । धर्मिभेद-धर्मात्यन्ताभावयोरैक्याभ्युपगमेन 'साध्याधिकरणत्वात्यन्ताभावः' साध्याधिकरणान्योन्याभावरूपः साध्यवद्भेदरूपो वेति वक्तुं शक्यते । एवं साध्याधिकरणत्वाभाववद्वृत्तित्वमपि साध्यवद्भेदवद्वृत्तित्वरूपं साध्यवद्भिन्नवृत्तित्वरूपं वा भवति । एतेन साध्यासामानाधिकरण्यं साध्यवद्भिन्नवृत्तित्वरूपं स्वीकृत्य सिंहव्याप्तिलक्षणं साध्यवद्भिन्नवृत्तित्वानधिकरणत्वरूपम् सम्भवतीति प्रतिभाति परमेवं द्वितीयेन व्याघ्रप्रणीतेन साध्यवैयधिकरण्यानधिकरणत्वमिति लक्षणेनाऽस्य लक्षणस्य भेदाभावात् पौनरुक्त्यापत्तिर्जायेत । पुनरुक्तिदोषभिया साध्याधिकरणत्वाभाववद्वृत्तित्वम्, साध्यवद्भिन्नवृत्तित्वस्वरूपमिति नाभ्युपगन्तुं शक्यम् । सप्तमे साध्यवैयधिकरण्यानधिकरणत्वमिति व्याघ्रलक्षणे साध्यवैयधिकरण्यपदस्यार्थः साध्यवद्भिन्नवृत्तित्वमेव स्वीक्रियते । फलतस्तथा स्वीकारे पौनरुक्त्यं दुरपह्नवमेव स्यात् ।

साध्यासामानाधिकरण्यानधिकरणत्वं सिंहव्याप्तिलक्षणे साध्याधिकरणत्वाभाववद्वृत्तित्वमिति न्यरूपि, तदनधिकरणत्वञ्च तद्वद्भिन्नत्वमेव, अधिकरणत्वेनाधिकरणप्रवेशस्य निष्प्रयोजनकत्वादिति विवेकः । एतावता 'साध्याधिकरणत्वाभाववद्वृत्तित्ववद्भिन्नत्वमिति सिंहव्याप्तिस्वरूपं प्रतिफलति । एवमेव साध्याधिकरणत्वाभाववद्वृत्तित्ववत् एव साध्याधिरणत्वाभाववद्वृत्तिः, तथा च 'साध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वम्' सिंहव्याप्तिलक्षणमिति निर्गलतीति सुस्पष्टम् ।

सध्यासामानाधिकरण्यमित्यत्र समासप्रदर्शनम्

षष्ठे सिंहव्याप्तिलक्षणे प्रविष्टं 'साध्यासामानाधिकरण्यपदं' साध्याधिकरणत्वाभाववद्वृत्तित्वरूपमर्थममिधत्तं इति सम्यगालोचितम्। सम्प्रति पदस्यास्य व्याकरणदिशा समासादिकं तथा निरूप्यते यथाऽयमर्थः पर्यवसीयते।

प्रथमं तावत् पूर्वपक्षभूतः 'साध्याधिकरणनिरूपितवृत्तित्वाभाव' इत्यर्थः कथं 'साध्यासामानाधिकरण्यस्य' निर्गलतीति चिन्त्यते—

समानमधिकरणं यस्याऽसौ समानाधिकरणः, इत्येवं बहुव्रीहिः। पुनः समानाधिकरणशब्दात् भावार्थके ष्यञ्प्रत्यये कृते सामानाधिकरण्यशब्दो निष्पद्यते। निष्पन्नस्य सामानाधिकरण्यपदस्य साध्यपदेन, साध्यस्य सामानाधिकरण्यमित्येवं षष्ठीतत्पुरुषसमासे सति साध्यसामानाधिकरण्यशब्दो व्युत्पद्यते। अनन्तरं साध्यसामानाधिकरण्यस्याऽभावः साध्यासामानाधिकरण्यमिति ससम्बन्धिकार्थबोधकोत्तरपदघटितसमुदायेन सह नञ् समासः इत्येवं नञः मध्यनिवेशोऽप्युपपद्यते। एत्र समासमाश्रित्य, साध्यनिष्ठाऽधेयतानिरूपकाधिकरणनिरूपितवृत्तित्वाभावः साध्यासामानाधिरकण्यस्यार्थो भवति यस्य निरसनं पूर्वं दर्शितम्।

इदानीं 'साध्यवद्भिन्नवृत्तित्वरूपोऽर्थः साध्यासामानाधिकरण्यस्य कथमिति विचार्यते—समानमेव सामानम्। साध्यस्य सामानं न भवतीति साध्याऽसामानम्। समानशब्दस्य सामानशब्दस्य वाऽर्थः, 'आधेयतानिरूपकमधिकरणमिति विशेषतोऽवधेयम्।" एवं साध्यस्य, आधेयतानिरूपकमधिकरणं न भवतीति साध्यासामानम्। एतादृशं साध्याऽसामानं—साध्यनिष्ठाऽधेयतानिरूपकमधिकरणभिन्नमधिकरणं यस्य सः साध्याऽसामानाधिकरणस्तस्य भावः साध्यासामानाधिकरण्यमिति समासः। साध्यासामानं यस्याधिकरणमसौ साध्यासामानाधिकरणस्तस्यभावः साध्यासामानाधिकरण्यमिति सुस्पष्टार्थः। वस्तुतः साध्यासामानाधिकरण इत्यत्र लक्षणावृत्याऽधिकरणपदार्थः साध्यानधिकरणवृत्तित्वम्, एतादृशार्थे तात्पर्यग्राहकञ्च 'साध्याऽसामान'पदमिति ध्येयम्। साध्यानधिकरणवृत्तित्वञ्च साध्यवद्भिन्नवृत्तित्वमेवेति द्वितीयलक्षणेन पौनरुक्त्यदोषःपूर्वदर्शितः एवं विधार्थस्वीकारे स्पष्ट एव।

व्याघ्रलक्षणघटकस्य साध्यवैयधिकरण्यस्य साध्यवद्भिन्नवृत्तित्वरूपताप्रतिपादनम्

वि—विरुद्धम्, अधिकरणं यस्याऽसौ व्यधिकरण इत्येवं बहुव्रीहिसमासेन व्यधिकरणशब्दो निष्पद्यते। पुनः व्यधिकरणशब्दात् भावर्थके ष्यञि विहिते वैयधिकरण्यशब्दो व्युत्पाद्यते। व्युत्पन्नस्य वैयधिकरण्यपदस्य साध्यपदेन साध्यस्य वैयधिकरण्यमित्येवं षष्ठीतत्पुरुषसमासे सति साध्यवैयधिकरण्यशब्दो निष्पद्यते। अथवा साध्यस्य वि—विरुद्धम् अधिकरणं यस्य स साध्य-व्यधिकरणस्तस्य भावः साध्यवैयधिकरण्यमिति विग्रहोऽत्र स्वीक्रियते। विग्रहेऽस्मिन् समागतस्य 'वि' पदस्य अधिकरणं भेदश्च, खण्डशक्त्या तावदर्थः सम्मतः। अधिकरणत्वञ्चात्राधेयतानिरूपकत्वमेव। एवं विपदार्थः खण्डशक्त्या आधेयतानिरूकत्ववानिति। विपदार्थैकदेशे आधेयतायां, षष्ठ्यन्तस्य साध्यपदार्थस्य साध्यनिष्ठत्वस्यान्वयः स्वीक्रियते। साध्यंनिष्ठाधेयतानिरूपकाधिकरणस्य विपदार्थभूतस्य पुनः खण्डशक्त्या स्वीकृते द्वितीये विपदार्थे—भेदे (अन्योन्याभावे) प्रतियोगितासम्बन्धेनान्वयोऽभ्युपेयते। एतावता यन्निष्ठाऽधेयतानिरूपकं साध्याधिकरणभिन्नमिति दर्शितविग्रहवाक्यजन्यः शाब्दबोधो निराबाधः। यन्निष्ठाधेयतानिरूपकं साध्याधिकरणभिन्नमित्यस्यैव 'साध्याधिकरणभिन्नवृत्तित्वमिति' स्पष्टार्थः। तथा च साध्यवैयधिकरण्यस्य साध्यवद्भिन्नवृत्तित्वरूपत्वेन व्याघ्रलक्षणेन सिंहलक्षणस्य पौनरुक्त्यमपि सूपपद्यते।

पुनरुक्तिभिया तावत् सिंहव्याप्तिलक्षणम् साध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वमिति निष्कर्षः प्रस्फुटति। न चात्र 'साध्याधिरणत्वाभाववद्वृत्तित्वात्यन्ताभाव' एव सिंहलक्षणम् कुतो नोक्तम्, अन्योन्याभावप्रवेशो लक्षणे व्यर्थ इति वाच्यम्, इदं द्रव्यं सत्त्वादित्यादावसद्धेतुकस्थलेऽतिव्याप्तेः।

सिंहलक्षणेऽधिकरणत्वप्रवेश सार्थक्यम्

साध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वमित्येवं परिष्कृते सिंहव्याप्तिलक्षणे यद्यधिकरणत्वपदं न निवेश्यते तर्हि वृक्षः, कपिसंयोगी, एतद्वृक्षत्वादित्यत्राऽव्याप्यवृत्तिसाध्यके सद्धेतुकस्थलेऽव्याप्तिः प्रसज्येत। अधिकरणत्वपदस्य तावदप्रवेशे, 'साध्याभाववद्वृत्तिभिन्नत्वमि'त्येवं सिंहव्याप्तिलक्षणस्वरूपं जायते। प्रस्तुतस्थले साध्यः कपिसंयोगः वृक्षे शाखावच्छेदेन विद्यते परं मूलावच्छेदेन नास्ति फलतोऽव्याप्यवृत्तेः कपिसंयोगस्याभाववद्वृक्षो भवति कपिसंयोगाभाववद्वृक्षवृत्ति-

रेव च हेतुः—एतद्वृक्षत्वम् । एवं साध्याभाव—कपिसंयोगाभाववद्वृक्षवृत्तिभिन्नत्वस्य हेतौ एतद्वृक्षत्वेऽसत्वादव्याप्तिः स्फुटा । सिंहलक्षणेऽधिकरणत्वनिवेशे तु, अव्याप्यवृत्तेः कपिसंयोगादेरधिकरणताया व्याप्यवृत्तित्वाभ्युपगमेन साध्य—कपिसंयोगाधिकरणत्वाभाववान् गुणादिरेव न तु वृक्षः । साध्याधिकरणत्वाभाववद्गुणवृत्तित्वं गुणत्वादौ न तु एतद्वृक्षत्वे, तथा च साध्याधिकरणत्वाभाववद्वृत्तित्ववद्भिन्नत्वस्य सिंहव्याप्ति-लक्षणस्य सद्धेतौ एतद्वृक्षत्वे समन्वयान्नाव्याप्तिरित्यवधेयम् ।

साध्याधिकरणत्वे साध्यतावच्छेदकावच्छिन्नत्व - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशप्रयोजनम्

सिंहप्रणीते व्याप्तिलक्षणे साध्याधिकरणत्वम् अर्थात् साध्यनिष्ठाधेयतानिरूपिताधिकरणत्वम्, साध्यतावच्छेदकसम्बन्धावच्छिन्ना अथ च साध्यतावच्छेदकधर्मावच्छिन्ना याऽधेयता तन्निरूपिताधिकरणत्वमभिप्रेतम् ।

साध्यनिष्ठाधेयतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशे पर्वते समवायसम्बन्धेन वह्नेः साध्यतायां संयोगेन धूमस्य हेतुतायाम्, असद्धेतौ धूमेऽतिव्याप्तिः स्यात् । साध्यस्य वह्नेरधिकरणत्वाभावो ह्रदादौ सम्भवदुक्तिकः । अत्र ह्रदादौ वृत्तिर्मीनशैवलादिकम् । वृत्तिभिन्नत्वस्य धूमे सत्त्वादतिव्याप्तिः सुस्थिरेति ज्ञेयम् ।

साध्यनिष्ठायामाधेयतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशे तु समवायेन वह्निसाध्यके प्रस्तुते तावदसद्धेतुकस्थले समवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणत्वाभाववन्महानसादिकमादाय तन्निरूपितवृत्तित्वस्यैव धूमेऽसद्धेतौ सत्त्वेनातिव्याप्तिदोषो निरस्यते ।

एवमेव लक्षणेऽस्मिन् साध्यनिष्ठायामाधेयतायां यदि साध्यतावच्छेदकधर्मावच्छिन्नत्वं न प्रवेश्यते चेत् तर्हि द्रव्यम्, गुणकर्मभेदविशिष्टसत्तावत्, जातेरित्यत्रासद्धेतुकस्थलेऽतिव्याप्तिः प्रसज्यते । अत्र 'विशिष्टं शुद्धान्नातिरिच्यते' इति न्यायेन शुद्धसत्ता एव साध्यम् । सत्ताधिकरणत्वाभाववति सामान्यादौ जातेः हेतोरवृत्तित्वेन सत्ताधिकरणत्वाभाववद्वृतिभिन्नत्वरूपस्य सिंहव्याप्तिलक्षणस्यासद्धेतौ समन्वयादतिव्याप्तिः स्फुटैवेति ध्येयम् ।

साध्यनिष्ठायामाधेयतायां साध्यतावच्छेदकधर्मावच्छिन्नत्वप्रवेशे तु साध्यतावच्छेदकगुणकर्मभेदवैशिष्ट्यसत्तात्वावच्छिन्नगुणकर्मभेदविशिष्टसत्तानिष्ठाधेयतानिरूपिताधिकरणत्वाभाववद् गुणादिकमपि, गुणादिनिरूपितवृत्तित्वस्यैव च प्रकृते जातावसद्धेतौ सत्त्वेन लक्षणसमन्वयाभावदतिव्याप्तिःसारल्येन निवार्यते ।

एवं सिंहव्याप्तिलक्षणम्, साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठाधेयतानिरूपिताधिकरणत्वाभाववद्वृत्तिभिन्नत्वमिति निष्पद्यते ।

हेतुतावच्छेदसम्बन्धेन साध्याधिकरणत्वाभाववद्वृत्तित्वविवक्षायाः फलम्

सिंहव्याप्तिलक्षणेऽस्मिन् साध्याधिकरणत्वाभाववद्वृत्तित्वं हेतुतावच्छेदकसम्बन्धेनैव विवक्षणीयम् । वृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशे तु पर्वतो वह्निमान् धूमादित्यत्र सद्धेतुक-स्थले साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यतावच्छेदकवह्नित्वावच्छिन्नवह्निनिष्ठाधेयतानिरूपिताधिकरणतावद्धूमावयवमादाय तन्निरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वस्यैव धूमे सत्त्वेनाव्याप्तिः सुस्थिरा स्यात् ।

इयमव्याप्तिः, साध्याधिकरणत्वाभाववद्वृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशे धूमावयवनिरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावस्य धूमेऽक्षतत्वात् आञ्जस्येन निरस्यते ।

अत्र वृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशेन पर्वतो वह्निमान् धूमादित्यत्राव्याप्तिवारणं भवति परं स्थलान्तरे, अयं सत्तावान् द्रव्यत्वादित्यत्र सत्ताधिकरणत्वाभाववत्सामान्यादिनिरूपितस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वस्याप्रसिद्ध्या साध्याधिकरणत्वाभाववन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्ववद्भिन्नत्वरूपस्य सिंहव्याप्तिलक्षणस्य द्रव्यत्वे सद्धेतौ समन्वयाभावदव्याप्तिः पुनरपि प्रसज्यते ।

अस्या अव्याप्तेर्वारणार्थं हेतौ तादृशाधिकरणत्वाभाववद्वृत्तिभेदमनुक्त्वा साध्याधिकरणत्वाभाववद्वृत्त्यन्योन्याभावप्रतियोगितावच्छेदकत्वं व्याप्तिरित्युच्यते । तथा च सत्तावान् द्रव्यत्वादित्यत्र सद्धेतुकस्थले सत्ताधिकरणत्वाभाववत्सामान्यादिनिष्ठस्य हेतुमतो द्रव्यत्ववतोऽन्योन्याभावस्य प्रतियोगितावच्छेदकत्वं यतो द्रव्यत्वेऽक्षतमतो नाऽव्याप्तिरित्यवगन्तव्यम् ।

परिष्कृते लक्षणेऽस्मिन् हेतुमतोऽन्योन्याभावीया प्रतियोगितावच्छेदकता हेतुनिष्ठा हेतुतावच्छेदकसम्बन्धावच्छिन्ना हेतुतावच्छेदकावच्छिन्ना चाभिप्रेता।

हेतुनिष्ठायां प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वा-निवेशे पर्वतो वह्निमान् धूमादित्यत्र सद्धेतुकस्थले वह्न्यधिकरणत्वाभाववद्धूमाव-यवनिष्ठान्योन्याभावत्वेन धूमवान्नेति प्रतीतिसिद्धस्य धूमवतोऽन्योन्या-भावस्याऽसङ्ग्रहात् तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वरूपाया व्याप्तेः सद्धेतौ धूमे समन्वयो न जायते, इत्यव्याप्तिः।

प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशे तु प्रस्तुते स्थले वह्न्यधिकरणत्वाभाववति धूमावयवे, हेतुतावच्छेदकसंयोगसम्बन्धा-वच्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्याभावः संयोगेन धूमवान्नेति प्रतीतिसा-क्षिकः सुलभः फलत एतादृशान्योन्याभावप्रतियोगितावच्छेदकत्वस्य धूमे सद्धेता-वक्षतत्वेन सिंहव्याप्तिलक्षणसमन्वयादव्याप्तिर्नास्तीति सर्वमनवद्यम्।

एवं हेतुनिष्ठायां प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकधर्मावच्छिन्नत्वं न निवेश्यते चेत् इदम्, द्रव्यम्, जातेरित्यत्रासद्धेतुकस्थलेऽतिव्याप्तिः प्रसक्ता स्यात्।

द्रव्यत्वाधिकरणत्वाभाववति गुणादौ वृत्तिरन्योन्याभावः समवायेन तत्तज्जा-तिमान्नेत्येवं प्रतीतिसिद्धधोऽभावः सङ्गृह्यते। घटत्वपटत्वादितत्तज्जातेर्गुणादा-वसत्त्वेन, अयमन्योन्याभावः सुलभः। एतादृशान्योन्याभावप्रतियोगितावच्छेद-कत्वस्यैवासद्धेतौ जातौ सत्त्वादतिव्याप्तिः निराकुला।

अस्या अतिव्याप्तेर्वारणं प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकधर्माव-च्छिन्नत्वनिवेशेन भवति।तज्जातिमान्नेति प्रतीतिसिद्धस्यान्योन्याभावस्य प्रतियो-गितावच्छेदकतायास्तज्जातिनिष्ठाया हेतुतावच्छेदकजातित्वेतर-तत्त्वधर्माव-च्छिन्नत्वेन हेतुतावच्छेदकधर्ममात्रावच्छिन्नत्वाभावात् न लक्षणघटकता हेतुता-वच्छेदकजातित्वमात्रावच्छिन्नावच्छेदकताकप्रतियोगिताकाऽन्योन्याभावः शुद्धजा-तिमदन्योन्याभावस्तु तादृशसाध्याधिकरणत्वाभाववति गुणादौ नैव सुलभः फलतः जातावसद्धेतौ साध्याधिकरणत्वाभाववद्वृत्यन्योन्याभावप्रतियोगितावच्छेदकत्व-रूपस्य लक्षणस्यासत्त्वान्नातिव्याप्तिरित्यवधेयम्।

ननु साध्याधिकरणत्वाभाववद्वृत्यन्योन्याभावप्रतियोगितावच्छेदकत्वमित्येवं परिष्कृतं, सिंहव्याप्तिलक्षणं पर्वतो धूमवान् वह्नेरित्यत्रासद्धेतुकस्थले पुनरप्यति-व्याप्तं भवति, धूमाधिकरणत्वाभाववति जलह्रदादौ विद्यमानस्य वह्निमदन्योन्याभा-

वस्य प्रतियोगितावच्छेदकतायाः वह्नावसद्धेतौ सत्त्वेन लक्षणसमन्वयादिति चेन्न साध्याधिकरणत्वाभावव्यापकताया अन्योन्याभावे प्रवेशात् ।

साध्याधिकरणत्वाभावव्यापकताया अन्योन्याभावे प्रवेशे तु प्रकृतस्थले धूमाधिकरणत्वाभाववति जलह्रदे वह्निमदन्योन्याभावस्य सत्त्वेऽपि धूमाधिकरणत्वाभाववति तप्तायःपिण्डे वह्निमदन्योन्याभावस्यासत्त्वेन, धूमाधिकरणत्वाभावव्यापकताया वह्निमदन्योन्याभावेऽसम्भवात् धूमाधिकरणत्वाभावव्यापकाऽन्योन्याभावप्रतियोगितावच्छेदकत्वस्य वह्नावसत्त्वेन लक्षणसमन्वयाभावादतिव्याप्तिः सुदूरपराहता तिष्ठति ।

पृथ्वी कपिसंयोगादित्यत्रातिव्याप्तिनिरासः

सिंहव्याप्तिलक्षणम्, 'साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणत्वाभावव्यापको यो हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताकान्योन्याभावस्तत्प्रतियोगितावच्छेदकत्वम् इत्येवं परिष्क्रियते ।

लक्षणेऽस्मिन् इयं, पृथ्वी, कपिसंयोगादित्यत्राव्याप्यवृत्तिहेतुकस्थले, साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्नसाध्यतावच्छेदकपृथ्वीत्वत्वावच्छिन्नपृथ्वीत्वनिष्ठाधेयतानिरूपिताधिकरणत्वाभाववति जलादौ, एतादृशाभावव्यापको, हेतुतावच्छेकसमवायसम्बन्धावच्छिन्नहेतुतावच्छेदककपिसंयोगत्वावच्छिन्नकपिसंयोगनिष्ठावच्छेदकताककपिसंयोगवन्निष्ठप्रतियोगिताकान्योन्याभावः, जलादावव्याप्यवृत्तिर्यतः कपिसंयोगः अतोऽव्याप्यवृत्तिमतोऽन्योन्याभावोऽप्यव्याप्यवृत्तिरिति नियमेन सुलभः । एतादृशकपिसंयोगवतोऽन्योन्याभावीय प्रतियोगितावच्छेदकत्वस्याऽसद्धेतौ कपिसंयोगेऽक्षततयाऽतिव्याप्तिः प्रसज्यते । परमियमतिव्याप्तिस्तावदव्याप्यवृत्तिमतोऽन्योन्याभावस्याव्याप्यवृत्तित्वं निरस्य ऋजुमार्गेण निवार्यते । अत्रेदं हृद्यम्—पृथ्वीत्वाभाववज्जलादिर्यतःकिञ्चिद्देशावच्छेन कपिसंयोगवदस्ति, अतो जलेऽव्याप्यवृत्तिमतः कपिसंयोगवतः, अन्योन्याभावः कपिसंयोगवान्नेति प्रतितिसिद्धः नैव वक्तुं शक्यते तथा च, एतादृशान्योन्याभावप्रतियोगितावच्छेदकत्वस्य कपिसंयोगरूपेऽसद्धेतावभावात् दर्शितातिव्याप्तिः निरवकाशतां नीयत इति ।

एतावता इदं सिंहप्रणीतं व्याप्तिलक्षणं निर्दुष्टमिति प्रतिभाति । परमत्रापि केवलान्वयिसाध्यकस्थले, इदं वाच्यं ज्ञेयत्वादित्यादौ साध्याधिकरणताया—

वाच्यत्वाधिकरणताया एव सर्वत्र जगतीतले प्रसिद्धतया साध्याधिकरणत्वाभावोऽप्रसिद्धः साध्याधिकरणत्वाभावाऽप्रसिद्ध्या चात्र केवलान्वयिसाध्यकस्थले सिंहलक्षणस्यास्य समन्वयाभावादव्याप्तिदोषोऽपरिहार्यो भवति । अस्या अव्याप्तेः पूर्ववदस्मिन् लक्षणेऽपि स्थिरत्वाल्लक्षणस्यास्य दुष्टत्वमपरिहार्यमेव ।

॥इति षष्ठव्याप्तिविमर्शः ॥

सप्तमं प्रकरणम्

साध्यवैयधिकरण्यानधिकरणत्वमिति

सप्तमव्याप्तिविमर्शः

साध्यवैयधिकरण्यानधिकरणत्वमिति सप्तमं व्याप्तिलक्षणम् व्याघ्रप्रणीतं विद्यते । सिंहलक्षणमिव लक्षणस्यास्य प्रणेता व्याघ्रोपनामा कश्चन विशिष्टो नैयायिकोऽभूदिति प्रसिद्धिः । व्याघ्रोद्भावितत्वादेव व्याप्तिलक्षणमिदं व्याघ्रलक्षणनाम्ना प्रथितमिति परम्परया ज्ञायते ।

लक्षणसमन्वयसरणिः

साध्यवैयधिकरण्यानधिकरणत्वमिति सप्तमे व्याघ्रप्रणीते व्याप्तिलक्षणे प्रविष्टस्य 'साध्य-वैयधिकरण्यमि'तिपदस्य साध्यवद्भिन्नवृत्तित्वमर्थः स्वीक्रियते, अनधिकरणत्वशब्दार्थस्तु पूर्ववत्तद्वद्भिन्नत्वमि'त्यवधेयम्, अधिकरणत्वप्रवेशस्य निष्प्रयोजनकत्वात् । एवं सम्पूर्णस्य व्याघ्रलक्षणस्य 'साध्यवद्भिन्नवृत्तित्ववद्भिन्नत्वमि'त्यर्थः पर्यवसितो भवति ।

पर्वतो,वह्निमान् धूमादित्यत्र सद्धेतुकस्थले, साध्यं वह्निः, साध्यवत् महानसादिकम्, साध्यवद्भिन्नः जलह्रदादिः, एतन्निरूपितं वृत्तित्वं मीनशैवालादौ वृत्तित्ववत् मीनशैवालादिकम् वृत्तित्ववद्भिन्नत्वं सद्धेतौ धूमेऽक्षतमिति व्याघ्रलक्षण-समन्वयः सुकरः ।

पर्वतो धूमवान् वह्नेरित्यत्रासद्धेतुकस्थले च साध्यो धूमः, साध्यवन्महानसादिकम्, साध्यवद्भिन्नो यथा जलह्रदातिस्तथैव हेतोः वह्नेरधिकरणं तप्तायःपिण्डोऽपि, तप्तायःपिण्डनिरूपितं वृत्तित्वमेव वह्नौ—हेतौ । फलतो वह्नौ वृत्तित्व-

वत्त्वस्य सत्त्वेन तादृशवृत्तित्ववद्भिन्नत्वरूपस्य व्याघ्रव्याप्तिलक्षणस्यातिव्याप्तिरपि नास्तीति सिद्धम् । एवं लक्षणमिदं निर्दुष्टमिति प्रतिभाति ।

व्याघ्रलक्षणे साध्यवैयधिकरण्यशब्दार्थपरीक्षणम्

साध्यवैयधिकरण्यशब्दार्थः साध्याधिकरणत्वाभावद्वृत्तित्वमिति क्रियते चेत् सम्पूर्णस्य व्याघ्रलक्षणस्य स्वरूपं साध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वमि'त्येवं प्रतिफलति तथा च सिंहलक्षणेन 'साध्यासामानाधिकरण्यानधिकरणत्वे'नास्य व्याघ्रलक्षणस्य पौनरुक्त्यमापद्येत फलतः साध्यवैयधिकरण्यम् व्याघ्रलक्षणघटकं साध्यवद्भिन्नवृत्तित्वमेवेति निर्धारणीयम् ।

व्याघ्रलक्षणेऽस्मिन् साध्यवैयधिकरण्यपदार्थो यदि साध्यवदवृत्तित्वं तर्हि व्याघ्रव्याप्तिलक्षणस्य साध्यवदवृत्तित्ववद्भिन्नत्वमिति पर्यवसितस्य पर्वतो वह्निमान् धूमादित्यत्र सद्धेतुकस्थले, सद्धेतोः धूमस्य वह्निमद्वृत्तित्वाद्वह्निमदवृत्तित्ववद्भिन्नत्वमपि स्पष्टमिति, लक्षणसमन्वयेऽपि इदं द्रव्यं सत्त्वादित्यादावसद्धेतुकस्थलेऽसद्धेतौ सत्त्वादौ द्रव्यत्ववद्द्रव्यवृत्तित्वस्य सत्त्वेन द्रव्यत्ववदवृत्तित्ववद्भिन्नत्वरूपस्य लक्षणस्य तुल्यरीत्या समन्वयादतिव्याप्तिः सञ्जायेत । इमामतिव्याप्तिं निवारयितुं व्याघ्रलक्षणे साध्यवैयधिकरण्यं तावत् साध्यवद्भिन्नवृत्तित्वरूपमेवाभ्युपेयम् ।

अव्याप्यवृत्तिसाध्यकस्थले प्रसक्ताव्याप्तिनिरासः

व्याघ्रलक्षणस्यास्य अयं, कपिसंयोगी, एतद्वृक्षत्वादित्यत्राव्याप्यवृत्तिसाध्यकसद्धेतुकस्थले कपिसंयोगवद्भिन्नवृक्षवृत्तित्वस्यैव सद्धेतौ एतद्वृक्षत्वे सत्त्वेनाव्याप्तिस्तु नाशङ्कनीया, अव्याप्यवृत्तिमतः—कपिसंयोगवतोऽन्योन्याभावस्याऽव्याप्यवृत्तित्वानभ्युपगमेनाऽव्याप्तेर्निरवकाशत्वात् । अत्रेदमवधेयम्—वृक्षे कपिसंयोगः शाखायां विद्यते परं मूले नास्ति फलतः कपिसंयोगो वृक्षे तावदव्याप्यवृत्तिः । अत्र वृक्षो यतः कपिसंयोगवान् अतो वृक्षे कपिसंयोगवान्नेति प्रतीतिसिद्धः कपिसंयोगिभेदो नैव मिलिष्यति कपिसंयोगिभेदस्याव्याप्यवृत्तिमतोऽन्योन्याभावस्य व्याप्यवृत्तेः गुणादावेवोपलम्भात् । एवञ्च कपिसंयोगवद्भिन्नगुणादिवृत्तिभिन्नत्वस्यैतद्वृक्षत्वे सद्धेतौ सत्त्वेन लक्षणसमन्वयान्नाव्याप्तिरिति ।

१	साध्य	वद्	भिन्न	वृत्तित्व	अधिकरण	भिन्नत्वम्	व्याघ्रलक्षणम्
२	साध्य	वद्	भिन्न	वृत्तित्व	वद्	भिन्नत्वम्	अधिकरण-त्वेनाधिकरणा-प्रवेशे व्याघ्रलक्षणम्
३	साध्य	वद्	अन्य	वृत्तित्व	वद्	भिन्नत्वम्	पञ्चमं व्याप्तिलक्षणम्
४	साध्य	वत् (प्रतियोगिक)	अन्योन्या-भावाधिकरण (निरूपित)	वृत्तित्व	वद्	भिन्नत्वम्	तृतीयं व्याप्तिलक्षणम्

[अत्र द्वितीये क्रमे तृतीये क्रमे च पुनरुक्तिः स्पष्टा]

द्वितीयाधिकरणत्वांशनिवेशात् पञ्चमलक्षणेन पुनरुक्तिनिरासः

व्याघ्रव्याप्तिलक्षणस्य 'साध्यवद्भिन्नवृत्तित्ववद्भिन्नत्वमि'त्येवं परिष्कृतस्य 'साध्यवदन्याऽवृत्तित्वमि'ति पञ्चमेन व्याप्तिलक्षणेन पौनरुक्त्यं सम्प्रति समापद्यते। अस्या आपत्तेर्निरासः 'साध्यवैयधिकरण्यानधिकरणत्वमि'ति चिन्तामणिप्रस्तुते व्याघ्रलक्षणेऽनधिकरणत्वांशस्य' अधिकरणभिन्नत्वमेवार्थं स्वीकृत्य विधीयते, एवञ्च व्याघ्रलक्षणे पञ्चमे च व्याप्तिलक्षणे अधिकरणत्वप्रवेशाऽप्रवेशाभ्यामेव भेदः पूर्ववद्व्यवस्थापनीयः।[1] अधिकरणत्वांशस्य वैयर्थ्यन्तु, अखण्डाभावघटकतया नास्तीति पूर्वदर्शितदिशैव निर्धारणीयम्।

साध्यवद्भेदप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकावच्छिन्नत्वनिवेशसार्थक्यम्

एतावता व्याघ्रव्याप्तिलक्षणम्—'साध्यवद्भिन्नवृत्तित्वाधिकरणभिन्नत्वमि'ति निर्गलति। अत्र साध्यवद्भेदः साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताको ग्राह्यः। एवञ्च पर्वतो वह्निमान् धूमादित्यादौ सद्धेतुकस्थले समवायसम्बन्धेन वह्निमतो भेदाधिकरणे साध्यतावच्छेदकसंयोगसम्बन्धेन तद्व्यक्ति -(चत्वरीयवह्नि) मतो भेदाधिकरणे च

१. तृतीयपञ्चमलक्षणयोर्भेदव्यवस्थापनवत्।

महानसादौ धूमस्य सद्धेतोः वृत्तित्वेन साध्यवद्भिन्नवृत्तित्वाधिकरणभिन्नत्वरूपस्य व्याघ्रव्याप्तिलक्षणस्य धूमेऽसमन्वयान्नाव्याप्तिदोषावकाशः, समवायेन वह्निमतो भेदस्य समवायेन वह्निमान्नेति प्रतीतिसिद्धस्य साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वाभावात् संयोगेन तद्व्यक्तिमतो भेदस्य। संयोगेन तद्व्यक्तिमान्नेति प्रतीतिसिद्धस्य च साध्यतावच्छेदकधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वाभावादिति विशेषतोऽवधेयम्।

हेतुतावच्छेदकसम्बन्धेन साध्यवद्भिन्नवृत्तित्वविवक्षायाः प्रयोजनम्

व्याघ्रलक्षणेऽस्मिन् साध्यवद्भिन्नवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन विवक्षणीयम्। तथा च पर्वतो वह्निमान् धूमादित्यत्र सद्धेतुकस्थले साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यतावच्छेदकवह्नित्वावच्छिन्नवह्निनिष्ठावच्छेदकताकवह्निमन्निष्ठप्रतियोगिताकभेदाधिकरणे धूमावयवे जलह्रदे च समवायसम्बन्धेन कालिकसम्बन्धेन च सद्धेतोः धूमस्य वृत्तित्वेन तादृशवृत्तित्वाधिकरणभिन्नत्वस्य व्याघ्रलक्षणस्य सद्धेतौ धूमेऽसत्त्वेऽपि नाऽव्याप्तिः; साध्यवद्भिन्नधूमावयवजलह्रदादिनिरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तित्वाधिकरणं स्फुल्लिङ्गादिकम् मीनशैवालादिकञ्च वृत्तित्वाधिकरणभिन्नत्वरूपस्य व्याघ्रलक्षणस्य धूमे सद्धेतौ समन्वयात्।

एतावता व्याघ्रव्याप्तिलक्षणम्—"साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाधिकरणभिन्नत्वमि"त्येवं पर्यवसीयते।

अन्योन्याभावे साध्यवद्भिन्नत्वव्यापकत्वनिवेशफलम्

अस्य लक्षणस्य घटः सत्तावान् द्रव्यत्वादित्यत्र सद्धेतुकस्थले सत्तावद्भिन्नसामान्यादिनिरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्धेः पुनरप्यव्याप्तिः प्रसरति। अस्या अव्याप्तेर्निरसनार्थं व्याघ्रलक्षणम्, 'तादृशसाध्यवद्भिन्नत्वव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वम्' इत्येवं परिष्क्रियते। तथा च सात्तावद्भिन्नत्वं सामान्यादौ तत्रैव द्रव्यत्ववद्भिन्नत्वमपि विद्यते फलतः सत्तावद्भिन्नत्वव्यापकान्योन्याभावप्रतियोगिताया द्रव्यत्ववति विद्यमानाया अवच्छेदकत्वस्य द्रव्यत्वे सद्धेतौ निराबाधात् व्याघ्रलक्षणस्य सत्तावान् द्रव्यत्वादित्यत्र सद्धेतुकस्थले समन्वयेनाव्याप्तिर्निरवकाशतां यातीति सर्वमवदातम्।

अत्र साध्यवद्भिन्नत्वव्यापकान्योन्याभावप्रतियोगितावच्छेदकतायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशेन पर्वतो वह्निमान् धूमादित्यत्र सद्धेतुकस्थले समवायेन कालिकेन वा धूमवान्नेति प्रतीतिसिद्धमन्योन्याभावमादाय नाव्याप्तिसम्भावनाऽपीति सिंहलक्षणदिशाऽवधेयम्। एवं लक्षणेऽस्मिन् अन्योन्याभावप्रतियोगितावच्छेदकतायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशफलमपि पूर्वदर्शितदिशैवावसेयम्।

सिंहव्याघ्रलक्षणयोः दूषणम्

'साध्यासामानाधिकरण्यानधिकरणत्वमि'ति सिंहप्रणीतं लक्षणम् 'साध्यवैयधिकरण्यानधिकरणत्वमि'ति व्याघ्रप्रणीतं लक्षणञ्च साध्यानधिकरणानधिकरणत्वव्याप्यमिति निर्विवादम्। एवं यत्र-यत्र साध्यासामानाधिकरण्यानधिकरणत्वं साध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वरूपं सिंहलक्षणम्, साध्यवैयधिकरण्यानधिकरणत्वं साध्यवद्भिन्नवृत्तिभिन्नत्वरूपं व्याघ्रलक्षणं वा धूमादिसद्धेतौ तत्र-तत्र साध्यानधिकरणानधिकरणत्वस्य सत्त्वात् साध्यानधिकरणानधिकरणत्वे द्वयोर्लक्षणयोर्व्यापकत्वमपि सिद्ध्यति। द्वयोरेव लक्षणयोः चरमस्याधिकरणत्वस्य प्रवेशस्तु निष्प्रयोजनक एव।

एतावता यथा व्याप्तेः पञ्चानामपि लक्षणानां इदं वाच्यं ज्ञेयत्वादित्यादिकेवलान्वयिसाध्यकस्थले साध्याभावस्य साध्यवद्भेदस्य वाऽप्रसिद्ध्याऽव्याप्तिस्तथैव केवलान्वयिसाध्यकसद्धेतुकस्थलेऽस्मिन् साध्यानधिकरणत्वस्य साध्याधिकरणत्वाभावरूपस्य जगतः वाच्यत्वाधिकरणत्वेनाऽप्रसिद्धेः साध्यानधिकरणानधिकरणत्वे पर्यवसितं सिंहव्याघ्रयोर्व्याप्तिलक्षणमव्याप्तं भवति।

ज्ञेयत्वे सद्धेतौ व्यापकस्य साध्यानधिकरणानधिकरणत्वस्याभावात् व्याप्यभूतयोः द्वयोरपि सिंहव्याघ्रलक्षणयोरभावः स्वतः सिद्धः, फलतः सिंहव्याघ्रलक्षणयोरव्याप्तिस्तावदपरिहार्येति प्रतिफलति। वस्तुतस्तु साध्यानधिकरणानधिकरणत्वमपि साध्यानधिकरणावृत्तित्वमेवेति मन्तव्यम्।

अत्र सिंहलक्षणे साध्याधिकरणत्वाभावस्य, व्याघ्रलक्षणे साध्यवद्भिन्नत्वस्य चाऽप्रसिद्ध्या प्रातिस्विकरूपेणापि केवलान्वयिसाध्यकसद्धेतुकस्थले सिंहव्याघ्रलक्षणावव्याप्ताविति स्वत एवोह्यम्।

साध्यानधिकरणावृत्तित्वं यदि यत्किञ्चित्साध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वरूपं तर्हि सिंहव्याघ्रलक्षणयोः पर्वतो वह्निमान् धूमादित्यादिसद्धेतुकस्थलेऽपि यत्किञ्चित्साध्याधिकरणपदेन महानसमादाय तन्निष्ठाधिकरणत्वाभाववच्चत्वरादिवृत्तित्वस्य धूमे सत्त्वादव्याप्तिरपरिहार्येति ध्येयम् ।

सिंहव्याघ्रलक्षणयोर्द्वितीयाधिकरणत्वाप्रवेशे पञ्चमलक्षणेन पौनरुक्त्यापत्तिनिरासः

सिंहव्याघ्रप्रणीतमुभयमपि व्याप्तिलक्षणं साध्यानधिकणावृत्तित्वरूपं तु विद्यते परं साध्यानधिकरणानधिकरणत्वरूपं नास्ति उभयोर्लक्षणयोः साध्यानधिकरणानधिकणत्वस्वरूपत्वानभ्युपगमात् । अनयोर्लक्षणयोर्मध्ये व्याघ्रलक्षणे तु द्वितीयमधिकरणत्वं प्रवेश्यते परं सिंहलक्षणे तन्नप्रवेश्यत इत्यत्राऽयं विवेकः ।

एवं सति 'साध्यवदन्यावृत्तित्वमि'ति पञ्चमेन व्याप्तिलक्षणेन 'साध्यानधिकरणावृत्तित्व'रूपेण पर्यवसितयोः सिंहव्याघ्रलक्षणयोः पुनरुक्तिशङ्का तु पञ्चमव्याप्तिलक्षणार्थः 'साध्यवदन्यनिरूपितवृत्तित्वाभावः' सिंहव्याघ्रलक्षणयोरर्थस्तु— 'साध्यवदन्यवृत्तिभिन्नत्वम्' इत्येवं स्वीकृत्य निराकरणीया । एवं तावत् पञ्चमे लक्षणेऽत्यन्ताभावस्य सिंहव्याघ्रलक्षणयोश्चाऽन्योन्याभावस्य प्रवेश इति स्फुटप्रतिपत्तिकतया अत्यन्ताभावाऽन्योन्याभावयोः प्रवेशाप्रवेशाभ्यामेव भेदात् नास्ति पञ्चमेन सह पौनरुक्त्यमिति सर्वमवितथम् ।

भट्टाचार्यानुयायिनां सिद्धान्तः

उभयमपि सिंहव्याप्तिलक्षण-व्याघ्रव्याप्तिलक्षणवाक्यं 'साध्यानधिकरणानधिकणत्व'—रूपस्य विशिष्टस्यार्थस्य बोधकमिति भट्टाचार्यानुयायिनामभिमतम् । एवञ्च सिंहव्याप्तिलक्षणेन व्याघ्रव्याप्तिलक्षणेन च 'साध्याधिकरणत्वसामान्याभाववद्वृत्तित्वाभावस्य साध्यवत्सामान्यभिन्नवृत्तित्वाभावस्य, वा बोधो जन्यत इति भावः प्रस्फुटति ।

द्वयोर्लक्षणयोः, इदं वाच्यं ज्ञेयत्वादित्यत्र केवलान्वयिसाध्यकसद्धेतुकस्थले वाच्यत्वाधिकरणत्वसामान्याभावस्य वाच्यत्ववत्सामान्यभेदस्य चाप्रसिद्ध्या यथाक्रमं 'साध्याधिकरणत्वसामान्याभाववद्वृत्तित्वाभाव'रूपस्य सिंहलक्षणार्थस्य 'साध्यवत्सामान्यभिन्नवृत्तित्वाभाव'रूपस्य व्याघ्रलक्षणार्थस्य च सद्धेतौ ज्ञेयत्वेऽसम्भवादव्याप्तिः सिद्धान्तेऽस्मिन् प्रसज्यते ।

अत्र केवलान्वयिसाध्यकसद्धेतुकस्थलेऽव्याप्तिं निरसितुं यदि सिंहव्याघ्रलक्षणयोरर्थः साध्याधिकरणत्वसामान्याभाववद्वृत्तित्वाभाव-साध्यवत्सामान्यभिन्नवृत्तित्वाभावान्यतररूपो न स्वीक्रियते प्रत्युत सिंहव्याघ्रलक्षणवाक्ययोः क्रमशः साध्याधिकरणत्वप्रतियोगिकाभाववद्वृत्तित्वसामान्यभाव-साध्यवत्प्रतियोगिकभेदवद्वृत्तित्वसामान्याभावान्यतरबोधजनकत्वमेवोरीक्रियते, तर्हि पूर्वदर्शिते केवलान्वयिसाध्यकसद्धेतुकस्थले साध्याधिकरणत्वप्रतियोगिकाभावस्य साध्यवत्प्रतियोगिकान्योन्याभावस्य च प्रसिद्धत्वादव्याप्तिवारणेऽपि पर्वतो वह्निमान् धूमादित्यादौ सद्धेतुकस्थले महानसव्यक्तिनिष्ठस्य साध्याधिकरणत्वस्याभाववति चत्वरादौ धूमस्य वृत्तित्वात्, साध्यवत्महानसव्यक्तिप्रतियोगिकभेदवच्चत्वरादौ च धूमस्य वृत्तित्वादव्याप्तिः सुस्थिरैवेति बोध्यम् ।

एतावता सिंहव्याघ्रलक्षणयोः नानाधिकरणसाध्यकसद्धेतुकस्थलेऽव्याप्तत्वादुपेक्षणीयत्वमिति सर्वमवदातम् ।

उत्तरपक्षीयसहचारनियमानुसरणबीजोपन्यासः

यद्यपीदं वाच्यं ज्ञेयत्वादित्यादिषु केवलान्वयिसाध्यकस्थलेषु साध्यवतो भेदस्याप्रसिद्ध्याव्याप्तिरिति न्यायमर्मविदो वदन्ति, परं यदि साध्ये वाच्यत्वादौ केवलान्वयित्वज्ञानमस्ति तदा साध्यसंशयरूपपक्षताया अभावादेव तत्र नानुमितिसम्भवः, तादृशज्ञानाभावकाले तु केवलान्वयिसाध्यकानुमितेः प्रामाणिकत्वे भ्रमात्मकं व्याप्तिज्ञानं स्वीकृत्यैव सोपपादनीयेति नेदं लक्षणं केवलान्वयिसाध्यकस्थलेऽव्याप्तमिति ज्ञेयम् ।

वस्तुतस्तु सर्वाण्यपीमानि लक्षणानि मीमांसकाभिमतानि । तैश्च केवलान्वयिसाध्यिकाया अनुमितेरनङ्गीकाराल्लक्षणमिदं तेषां मते निर्दुष्टमेव ।

नैयायिकास्तु सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपां पक्षतामभ्युपगच्छन्तः केवलान्वयिसाध्यिकामनुमितिं स्वीकुर्वन्ति । तथा च ते तत्र स्थले लक्षणस्यास्योपर्युक्तदिशाऽव्याप्ततया[1] 'प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्य-

१. प्रतियोग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यम् तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः। चि० दी० पृ० ३०७

न्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यरूपाम्, सिद्धान्तव्याप्तिमुत्तरपक्षीयसाहचर्यनियमात्मिकां स्वीकुर्वन्ति। अस्य विस्तारस्तु सिद्धान्तग्रन्थे द्रष्टव्य इति शम्।

॥इति सप्तमव्याप्तिविमर्शः॥

अष्टमं प्रकरणम्

व्याप्तिसप्तकम्

[गङ्गेशोपाध्यायरचिततत्त्वचिन्तामण्या, श्रीमथुरानाथतर्कवागीशकृतमाथुर्या, श्रीरघुनाथशिरोमणिरचितदीधित्या, श्रीगदाधरभट्टाचार्यविरचितगादाधर्या, श्री जगदीशतर्कालङ्काररचितजागदीश्या, श्रीधर्मदत्तझा (बच्चा झा) कृतगूढार्थतत्त्वात्वालोकेन च समुद्भासितम् डॉ० पीयूषकान्तदीक्षितेन संशोध्य सम्पादितम्]

प्रथमं व्याप्तिलक्षणम्

चिन्तामणिः

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः।

* माथुरी *

अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपणमारभते 'ननु' इत्यादिना। 'अनुमितिहेतु' इत्यस्या'नुमाननिष्ठप्रमाण्यानुमितिहेत्वि'त्यर्थः। 'व्याप्तिज्ञाने' इत्यत्र च 'विषयत्वं' सप्तम्यर्थः; तथा च, अनुमाननिष्ठप्रामाण्याऽनुमितिहेतुव्याप्तिज्ञानविषयीभूता[1] व्याप्तिः केत्यर्थः। अनुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यनेन व्याप्तेरनुमा-

---

१. अनुमितीति। अनुमानं प्रमाणम् प्रमितिकरणतावच्छेदकधर्मवत्त्वात् प्रत्यक्षादिवत् इत्येतादृशानुमितिहेतुभूतं यद्व्याप्तिज्ञानमित्यर्थः स्पष्टः।

नप्रामाण्योपपादकत्वकथनादनुमानप्रामाण्यनिरूपणानन्तरं व्याप्तिनिरूपणे[१] उपोद्धात एव सङ्गतिः सूचिता । उपपादकत्वञ्चात्र ज्ञापकत्वम् ।

* दीधितिः *

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते, 'ननु' इत्यादिना ।

* गादाधरी *

अनुमानप्रामाण्योपपादकतया व्याप्तिग्रहोपायस्यैवेदानीमभिधातुमुचितत्वात् 'वक्ष्यते' इत्यनेन तत्प्रतीक्षां विधाय व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशङ्कां परिजिहीर्षुस्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वरूपबीजं दर्शयन् 'ननु' इत्यादिग्रन्थमवतारयति 'समारब्धा' इति ।

* जागदीशी *

[२](ननु 'व्याप्तिग्रहोपायश्च वक्ष्यते' इत्युक्तं प्राक् निरूप्यते च व्याप्तिरित्यर्थान्तरम् [३]अत आह) 'समारब्धा' इति । [४]

* तत्त्वालोकः *

व्याजस्वीकृतसेवया विधुरभूदग्रेसरः श्रीमताम् ।

---

१. उपोद्घातलक्षणन्तु — प्रकृतोपपादकत्वम् । उक्तञ्च—चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः इति ।

२. पुरातनग्रन्थेषु जागदीश्यां प्रकोष्ठगतः पाठो न लभ्यते ।

३. अत इत्यादि । "नन्वनुमितिहेतुव्याप्तिज्ञाने"इति ग्रन्थात्प्रागनुमितिग्रन्थे चिन्तामणिकारो "व्याप्तिग्रहोपायश्च वक्ष्यते" इति ग्रन्थेन व्याप्तिज्ञानोपायनिरूपणं स्वकर्तव्यत्वेन प्रतिज्ञाय व्याप्तिस्वरूपविवेकमारभमाणोऽर्थान्तरं गत इत्याशङ्का प्रेक्षावतां समुद्भवति तामुत्सारयितुं रघुनाथशिरोमणिश्चिन्तामणिसन्दर्भावतरणरूपेणाहेत्यर्थः । अर्थान्तरं पराजयस्थानरूपो दोषः । तल्लक्षणन्तु प्रकृताऽसम्बद्धार्थाभिधानत्वम् ।

४. समारब्धेति । अतीतकालिकसमीचीनाद्यकृतिविषयीभूता परीक्षेत्यर्थः करणीयः ।

मानव्याहतिकैतवावनमनादीशस्त्रिलोकीपतिः ॥
सम्भिन्नाब्जकुलप्रसूतिविभवादम्भोजमब्जालयो ।
यस्य श्रीगिरिजापदाम्बुजयुगन्तत्स्यादभीष्टप्रदम् ॥ १ ॥
जगदीशकृतव्याप्तिग्रन्थव्याख्यावलम्बिनी ।
विवृतिर्धर्म्मदत्तेन मैथिलेन वितन्यते ॥ २ ॥

दीधितौ 'समारब्धा' इति । समीचीनभूतकालिकारम्भविषयेत्यर्थः ।

माथुरी

[१]केचित्तु—अनुमितिपदमनुमितिनिष्ठेतरभेदानुमितिपरम्, [२]तथा चानुमितिनिष्ठेतरभेदानुमितौ यो हेतुः प्रागुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वरूपदस्तद्घटकं यद्व्याप्तिज्ञानं, तदंशे विशेषणीभूता व्याप्तिः केत्यर्थः । घटकत्वार्थकसप्तम्या तत्पुरुषसमासात् । तथा च प्रागुक्तानुमितिलक्षणोपोद्घात एव सङ्गतिरनेन सूचितेत्याहुः ।

गादाधरी

व्याप्तिग्रहोपायाकथनेन प्रामाण्यव्यवस्थापनस्यानिष्पन्नत्वात् 'समारब्धा' इति । परीक्षाविशेषणम् । परीक्षा परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम्, 'कारणीभूत' इति । प्रतिपादनविशेषणम् । यद्यपि व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थापकत्वकथनं न तस्यावश्यकत्वप्रदर्शनाय 'व्याप्तिग्रहोपायश्च वक्ष्यते' इत्येतद् ग्रन्थावतारणाद् व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात्, तथापि प्रामाण्यव्यवस्थापननिर्वाहकतया भवतु व्याप्तिग्रहोपायस्येदानीमाकाङ्क्षितत्वम्, एवमपि तन्न व्याप्तिस्वरूपनिरूपणं विना सम्भवतीति प्रथमत एव तदेवोचितमित्येतत्सूचनायैतदभिहितम् । 'निदानम्' इति । व्याप्तिघटकीभूताव्यभि- चारांशभाने बाधाभावमुद्रया व्यभिचारज्ञानाभावो हेतुः । साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे च विशेषणज्ञानमुद्रया सहचारग्रहो हेतुरितिक्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपमप्रतिपाद्याशक्यत्वादि-

---

१. केचित्त्विति । अनुमितिलक्षणेन साकमुपोद्घातवादिनो नैयायिकाः ।
२. तथा चेति । अनुमितिपदस्याऽनुमितिनिष्ठेतरभेदानुमितिपरत्वे चेत्यर्थः ।

तिभावः। प्रथमतः पूर्वपक्षस्यैवाभिधानेन निरूपयतीत्यसङ्गतमत 'आरभत' इत्युक्तम्, निरूपणस्य परमतनिराकरणपूर्वकस्वसिद्धान्तकथनरूपतया पूर्वपक्षाभिधानतत्खण्डनयोरपि तदारम्भतेति ध्येयम्।

जागदीशी

समारब्धा या अनुमानप्रामाण्यपरीक्षा[१] (परमतनिराकरणपूर्वकं स्वमतेनानुमानप्रामाण्यव्यवस्थापनं) तत्कारणीभूतं[२] यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः। (व्याप्तिज्ञानं विना "अयं व्याप्तिग्रहोपायः" इति ज्ञातुमशक्यत्वात् व्याप्तेस्तत्र विशेषणत्वात् इति भावः) [३] तथा च प्रामाण्यव्यवस्थापनोपोद्घातसङ्गत्या तन्निरूपणमिति हृदयम्।

तत्त्वालोकः

आरम्भश्चाद्यकृतिः, प्रकृते कृतावाद्यत्वञ्च तत्कृतिसमवायिसमवेतप्रामाण्यपरीक्षागोचरकृतिक्षणध्वंसानधिकरणक्षणवृत्तित्वम्। समवेतान्तनिवेशादन्यपुरुषकृतपरीक्षायाः पूर्ववृत्तत्त्वेऽपि न क्षतिः। आरब्धत्वकथनेन प्रामाण्यपरीक्षाया वृत्तत्वनिरासेन तदुपयोगिव्याप्तिग्रहोपायप्रतिपादनादेर्वैफल्यशङ्का निरस्ता। समीचीनत्वञ्चेष्टसाधनत्वादिप्रमाजन्यत्वम् तेन कृतेः संवादित्वलाभेन तद्विषयपरीक्षा-तत्कारणव्याप्तिग्रहोपायप्रतिपादन-तत्साधनव्याप्तिस्वरूपनिरूपणानां फलवत्त्वलाभेनोपादेयत्वव्यक्तिः। 'अनुमानप्रामाण्यपरीक्षा' इति। परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम्परीक्षा। परमतं परकीयमतिविषयः अनुमानप्रामाण्याभावः, तन्निराकरणं तज्ज्ञानेऽप्रामाण्यज्ञापनम् यद्वा परमतं परमतिः, सा च नानुमानं प्रमाणमित्याकारिका, तन्निराकरणं तत्राप्रामाण्यज्ञापनं तच्चासिद्ध्याद्युद्भावनं तत्पूर्वकं तदुत्तरकालिकं स्वमतमनुमानप्रामाण्यं, तद्व्यवस्थापनमप्रामाण्यज्ञानानास्कन्दिततत-

---

१. पुरातनग्रन्थेषु जागदीश्यां प्रकोष्ठान्तर्गतः पाठो न लभ्यते।
२. कारणीभूतो यो व्याप्तिग्रहस्तदुपायप्रतिपादनमित्यर्थः इति कलिकाता पुस्तके पाठः।
३. पूर्वग्रन्थेन साकमस्य ग्रन्थस्याभिमतसङ्गतिं दर्शयति, 'तथा चेति' अनुमानप्रामायव्यवस्थापनोपपत्यै व्याप्तिनिरूपणमित्यर्थः।
अत्र प्रमाण्येत्यादिस्थाने 'व्याप्तिग्रहोपायाभिधानोपयुक्तत्वेन, इति पाठः कलिकातापुस्तके समुपलभ्यते।

द्गोचरज्ञानानुकूलव्यापारः । अनुमानाप्रामाण्यज्ञानेऽसत्यप्रामाण्यज्ञाने, अनुमानप्रामाण्यग्रहोत्पत्तेरसम्भवेन व्यापारस्य न ज्ञानजनकत्वसम्भव इति भवति तस्य परमतनिराकरणपूर्वकत्वम् । अनुमानप्रामाण्यप्रतिपादकग्रन्थस्य परीक्षात्वोक्त्या केवलस्वमतप्रतिपादकत्वनिराकरणादशेषजिज्ञास्वध्ययनयोग्यतालाभेन व्याप्तिस्वरूपनिरूपणस्यापि तल्लाभः । 'कारणीभूत' इति । यत्रानवस्थादुस्थतर्कानिवर्त्यव्यभिचारशङ्कावरुद्धोत्पत्तिकव्याप्तिग्रहासत्त्वनिबन्धनानुमितिरूपफलानुत्पत्याऽप्रामाण्यमनुमानस्य मन्यन्ते परे चार्वाकादयस्तत्र नानभिधाय व्याप्तिग्रहोपायं प्रामाण्यमनुमानस्य व्यवस्थापयितुं शक्यम् इति व्याप्तिग्रहोपायप्रतिपादनस्य भवति परीक्षाकारणत्वमिति भावः । व्याप्तिस्वरूपनिरूपणस्य परीक्षाकारणत्वेऽपि व्याप्तिग्रहोपायप्रतिपादनस्यापि तादृशतया 'व्याप्तिग्रहोपायश्च वक्ष्यत' इत्यनेन तत्प्रतीक्षाविधानमनुचितमित्याशङ्कानिरासाय, व्याप्तिस्वरूपमविद्वांसं प्रति व्याप्तिग्रहोपायप्रतिपादनस्याशक्यतया, तत्प्रथमं स्वरूपाभिधानबीजभूतन्तदुपजीव्यत्वं[1] दर्शयितुं परीक्षाकारणव्याप्तिग्रहोपायप्रतिपादनकारणत्वेन स्वरूपनिरूपणं दर्शितं 'प्रतिपादननिदानम्' इत्यनेन । यद्यप्युक्तशङ्कानिवृत्तिः कारणान्तावचनेपि भवत्येव, तथाप्यनुमानप्रामाण्यनिरूपणनिरूपितोपोद्घातसङ्गतिलाभाय[2] तदुक्तिः । व्याप्तिस्वरूपगोचरपूर्वपक्षस्यैव प्रथममभिहितत्वेन व्याप्तिस्वरूपनिरूपणस्याक्रियमाणत्वेऽपि तदनुकूलगोचरकृतेर्विद्यमातयाऽऽरभ्यमाणत्वन्तत्रास्त्येवेति कुरुत इत्यनुक्त्वारभत इत्युक्तमिति ।

'ननु इत्यादिना' इति मूले[3] 'ननु' इत्यादि । नन्विति प्रश्नः । अनुमितेरितरभेदानुमितेः, कारणं यद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यज्ञात्वरूपहेतुस्तद्घटकव्याप्तिज्ञानस्य विषयं केत्यर्थः । यद्वा अनुमितिकारणपरामर्शविषयव्याप्तिः केत्यर्थः । एतेन घटकत्वार्थकसप्तम्यां समासस्य क्वाचित्कत्वेऽपि कर्मधारयेनार्थलाभे गुरुतरसमासान्तराश्रयणस्यायुक्तत्वेऽपि च न क्षतिः, उक्तार्थस्य कर्मधारयलभ्यत्वात् । अत्र का व्याप्तिरित्यभिधानेऽनुमानप्रामाण्योपपादकत्वलक्षणोपोद्घातसङ्गत्यलाभाज्ज्ञान इत्यन्तम् । अनुमित्युपपादिका व्याप्तिः केत्यभिधाने,

१. व्याप्तिग्रहोपायप्रतिपादनस्य कारणत्वम् ।
२. चिन्तां प्रकृतसिद्ध्यर्थाम् उपोद्घातं विदुर्बुधाः ।
३. चिन्तामणौ ।

कथमनुमित्युपपादिकेत्याकाङ्क्षानिवर्तकस्य वक्तव्यतापत्त्या, 'अनुमितिहेतुव्याप्तिज्ञान' इति। नचैवम् 'अनुमितिहेतुज्ञान' इत्येव वक्तव्यमनर्था पुनरुक्तिरिति वाच्यम्। अनुमित्यनुपपादकस्याप्यनुमितिहेतुसमूहालम्बनज्ञानविषयत्वसम्भवेनानुमित्युपपादकत्वाप्राप्तेः तदुक्तौ च व्याप्तिविशिष्टज्ञानेऽनुमितिजनकत्वान्वये विशेष्यतावच्छेदकेऽसति बाधके विशेषणप्रयोजकत्वनियमेनोक्तावच्छेदकत्वात्मकप्रयोजकत्वस्य लाभेन जनकतावच्छेदके तत्र सर्वजनसिद्धप्रयोजकत्वस्य लाभसम्भवादिति।

'व्याप्तिः'। व्याप्तिपदार्थः, तेन व्याप्तेरनुमितिजनकतावच्छेदकरूपत्वेपि ज्ञान इत्यन्तस्य न वैयर्थ्यम्, सप्तम्या विषयत्वमर्थः। किमो जिज्ञासा। सा च व्याप्तिपदार्थतावच्छेदकावच्छिन्नज्ञानं जायतामित्याकारिका।

चिन्तामणिः

न तावदव्यभिचरितत्वम्। तद्धि न साध्याऽभाववदवृत्तित्वम्।

माथुरी

'न तावद्' इति। 'तावत्' वाक्याऽलङ्कारे। 'अव्यभिचरितत्वम्' अव्यभिचरितत्वपदप्रतिपाद्यम्। तत्र हेतुमाह 'तद्धि' इत्यादि 'हि' यस्मात् 'तत्' अव्यभिचरितत्वपदप्रतिपाद्यम्। 'न' इति सर्वस्मिन्नेव लक्षणे सम्बंध्यते। [१] तथा च [२]व्याप्तिर्यतः साध्याऽभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपा न, अतोऽव्यभिचरितत्वशब्दप्रतिपाद्यरूपा नेत्यर्थः पर्य्यवसितः। विशेषाऽभावकूटस्य सामान्याऽभावहेतुता चं प्रसिद्धैवेति।[३] अत एतन्नञ्द्वयोपादानं न निरर्थकम्।

---

१. तथा चेति। नेत्यस्य प्रत्येकं लक्षणे सम्बन्धे चेत्यर्थः।

२. व्याप्तिरिति। अत्रानुमितिप्रकारस्तु—व्याप्तिः अव्यभिचरितत्वपदप्रतिपाद्यभिन्ना साध्याभाववदवृत्तित्वादिरूपाऽव्यभिचरितत्वपदप्रतिपाद्ययावद्भेदकूटवत्त्वात् पक्षतावत्।

३. 'अत एव' इति पाठान्तरम्।

गादाधरी

मूले 'न तावदव्यभिचारितत्वम्' इति ।' 'व्याप्तिः' इति प्रश्नस्थमनुषज्यते, तथा चाव्यभिचारपदार्थो नानुमितिजनकज्ञानविषय इत्यर्थः । अनुमितिजनकत्वं नाव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नमिति तु पर्यवसितम् । अत्र हेतुमाह, 'तद्धि न साध्याभाववदवृत्तित्वम्' इत्यादि । यतः साध्याभाववदवृत्तित्वादिरूपं तदव्यभिचरितत्वं न व्याप्तिरित्यनुषङ्गेणान्वयः । तथा च साध्याभाववदवृत्तित्वादिरूपा ये येऽव्यभिचारपदार्थास्तत्तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नत्वाभावकूटवत्त्वादिति निरुक्तपर्यवसितसामान्याभावसाधकः फलितो हेतुः । न चाप्रयोजकत्वम्, विशेषाभावकूटस्य सामान्याभावव्याप्यताया अविवादात् ।

तत्त्वालोकः

'न तावदव्यभिचरित्वम्' इति । व्याप्तिरित्यनुषञ्जनीयम् । अनुमितिजनकतावच्छेदकमिति तदर्थः, अव्यभिचरितत्वमव्यभिचरितत्वपदार्थः । तेन साध्याभाववदवृत्तित्वादिसाधारणस्याव्यभिचरितत्वत्वस्यैकस्याभावेपि न क्षतिः । अथात्राव्यभिचारपदार्थो नानुमितिजनकतावच्छेदकः साध्याभाववदवृत्तित्वादिभेदवत्त्वादिति प्रयोगः । तन्न सम्भवति प्रत्येकभेदस्य हेतुत्वेऽवच्छेदकावच्छेदेन साध्यत्वे भागासिद्धिः ।[१] सामानाधिकरण्येन साध्यत्वे अव्यभिचरितत्वपदार्थमात्रेऽभिमतस्य व्याप्तित्वाभावस्यासिद्धेः, साध्यवद्भिन्नावृत्तित्वाद्यंशे जायमानव्यभिचारशङ्कया अनिवृत्तेश्च, मिलितस्य हेतुत्वे स्वरूपासिद्धेरिति चेन्न । अनुमितिजनकत्वं पक्षीकृत्य साध्याभाववदवृत्तित्वादिविषयत्वावच्छिन्नत्वाभावकूटहेतुनाऽव्यभिचारपदार्थविषयकत्वानवच्छिन्नत्वस्यैव साध्यत्वात् । न चानुमितिजनकतात्वावच्छेदेन साध्यता सामानाधिकरण्येन वा । नाद्यः । वह्न्यभाववदवृत्तिधूमादिहेतुकस्थले परामर्शनिष्ठहेतुत्त्वस्य साध्याभाववदवृत्तित्त्वविषयत्वावच्छिन्नत्वेन बाधभागासिद्ध्योः प्रसङ्गात् । न द्वितीयः । विवक्षितार्थासिद्धेः, सर्वतज्जनकतास्वेव तस्य साधनीयत्वादिति वाच्यं प्रकृतपक्षतावच्छेदकतापर्य्याप्त्यधिकरणधर्मपर्य्याप्तावच्छेदकताकविशेष्यतानिरूपितविषयत्वाभिन्नप्रकृतहेतुतावच्छेदकपर्य्याप्तावच्छेदकताकविशेष्यतानिरूपिताव्यभिचारपदार्थतावच्छेदकतासमानाधिकरणावच्छेदकताकविष-

१. 'भागासिद्धिः' इति स्थाने 'भागासिद्धेः' इति पाठो भवेत् ।

यत्वानवच्छिन्नत्वस्य साध्यत्वात्तादृशहेतुविषयत्वनिरूपितसाध्याभाववदवृत्तित्वत्वाद्यवच्छिन्नविषयत्वावच्छिन्नत्वाभावकूटस्य हेतुत्वाच्च पक्षतावच्छेदकतापर्याप्तिनिवेशाच्च वह्न्यभाववदवृत्तिधूमवत्पर्वतपक्षकवह्निसाध्यकधूमहेतुकानुमितिजनकत्वे न भागासिद्धिः । अनुमितिजनकता च प्रकृतहेतुतावच्छेदकावच्छिन्नलिङ्गकप्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयकप्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकानुमितिजनकतारूपा ग्राह्या । नातः प्रागुक्तानुमितिजनकतायां केवलपर्वतत्वादिरूपपक्षतावच्छेदकमादाय भागासिद्धितादवस्थ्यम् ।

माथुरी

'साध्याभाववदवृत्तित्वम्' इति । 'वृत्तम्' वृत्तिः । भावे निष्ठाप्रत्ययात् । वृत्तस्याऽभावोऽवृत्तम् । वृत्त्यभाव इति यावत् । साध्याऽभाववतोऽवृत्तं साध्याभाववदवृत्तम् । साध्याभाववद्वृत्त्यभाव इति यावत् । तद् यत्रास्ति स साध्याभाववदवृत्ती । मत्वर्थीयेन्प्रत्ययात् । तस्य भावः साध्याभाववदवृत्तित्वम् । तथा च साध्याभाववद्वृत्त्यभाववत्त्वमिति फलितमिति प्राञ्चः ।

गादाधरी

अत्र साध्याभाववदवृत्तित्वादिरूपा ये पञ्चाव्यभिचारपदार्थास्तदवच्छिन्नविषयताघटितधर्मानवच्छिन्नत्वकूटस्य प्रत्येकसाधकं हेतुं वक्ष्यति, 'केवलान्वयिन्यभावात्' इति । साध्येऽत्यन्ताभावाप्रतियोगित्वान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वग्रहदशायामत्यन्तान्योन्याभावयोः साध्यतदवच्छिन्नप्रतियोगिकत्वभानासम्भवेन प्रतियोगितया साध्यतदाश्रयविशेषितात्यन्तान्योन्याभाववद्वृत्तित्वत्वावच्छिन्नविषयतायास्तादृशदशाविशेषीयानुमितिजनकज्ञानेऽभावादित्यर्थः । एवञ्च तादृशविषयताशून्यवृत्तित्वमेवानुमितिजनकतायां दर्शितसाध्यसाधको हेतुरभिमत इति नासिद्ध्यादिः । ईदृशदिशाऽग्रिमाग्रिमहेतवोऽपि परिष्करणीयाः ।

तत्त्वालोकः

न चैवमपि धूमव्यापकवह्निसामानाधिकरण्यवह्न्यभाववदवृत्तित्वोभयवद्धूमवान्पर्वत इति ज्ञानीयतादृशसामानाधिकरण्यत्वावच्छिन्नसाध्याभाववदवृत्तित्व-

त्वावच्छिन्नविषयताया जनकतावच्छेदकत्वेन भागासिद्धितादवस्थ्यम्, साध्याभाववदवृत्तित्वत्वातिरिक्तधर्मानवच्छिन्नविषयत्वानवच्छिन्नत्वन्तूभयवत्ताज्ञानीयतद्धर्मावच्छिन्नविषयताया जनकतावच्छेदकत्वासिद्ध्या विवक्षितुमशक्यमिति वाच्यम्। प्रागुक्तविषयतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावस्यैव हेतुसाध्यविधया प्रवेशात्। उक्तज्ञानीयविषयताया अपि तादृशसामानाधिकरण्यत्वावच्छिन्नविषयतात्वेनैवावच्छेदकत्वात्। अथ परमते वह्निव्याप्यो धूमो धूमवान् पर्वत इति ज्ञानस्यापि कारणत्वेन विशिष्टविषयतायाः कारणतानवच्छेदकतया साध्याभाववदवृत्तित्वविषयताया जनकतावच्छेदकत्वेऽपि साध्यसिद्धिरिति न विवक्षितार्थसिद्धिरिति चेन्मैवम्। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपितप्रकृतहेतुतावच्छेदकावछिन्नप्रकारत्वनिष्ठावच्छेदकताविशिष्टहेतुतावच्छेदकावच्छिन्नविशेष्यत्वनिष्ठावच्छेदकतानिरूपिताव्यभिचारपदार्थतावच्छेदकावच्छिन्नविषयतात्वावच्छिन्नावच्छेदकतानिरूपितत्वाभावस्यैव साध्यत्वात्। स्वनिरूपकजनकतानिरूपितत्वसम्बन्धेन वैशिष्ट्यं बोध्यम्। एवञ्च परमते निश्चयविशिष्टनिश्चयत्वेन जनकत्वेऽपि परामर्षस्य न दोषः। एवं सति 'तद्धि न' इत्यादिहेतुवाक्यस्यापि साध्याभाववदवृत्तित्वत्वावच्छिन्नविषयतानवच्छिन्नानुमिति- जनकतेत्यत्रैव तात्पर्ये व्याप्तिपदानुषङ्गं विनोक्तवाक्यस्य बाधितार्थकत्वेन व्याप्तिपदानुषङ्गेन तदनुमितिजनकतावच्छेदकत्वेनाभिमताव्यभिचरितत्वं, साध्याभाववदवृत्तित्वादिरूपा न व्याप्तिरित्यर्थकरणे साध्याभाववदवृत्तित्वस्यानुमितिजनकता- वच्छेदकत्वव्यतिरेकप्रतीतेः।

'केवलान्वयिन्यभावात्' इति। केवलान्वयित्वग्रहेऽनुमितिजनकज्ञाने विषयितायाः परस्परोपश्लिष्टसाध्याभाववदवृत्तित्वनिरूपिताया अभावात्प्रतिबन्धकसत्त्वादित्यर्थः। तथा च तदानीमनुमित्युपपादकव्याप्तिज्ञानस्यैव सर्वत्र हेतुत्वसम्भवेन साध्याभाववदवृत्तित्वादिज्ञानस्यानुमितिजनकतायां मानाभाव इति भावः। ईदृशव्याख्यानक्लेशश्च प्रश्नवाक्योद्देश्यस्योत्तरवाक्ये विधेयत्वनियमावष्टम्भेन तदनङ्गीकारे व्याप्तिरनुमितिजनकतावच्छेदको नाव्यभिचरितत्वपदार्थः, साध्याभाववदवृत्तित्वादिभेदकूटवत्त्वादित्यर्थे बाधासिद्ध्याद्यभावात्, वस्तुतः पक्षतावच्छेदकस्य हेतुव्यापकसाध्यसामानाधिकरण्य एव सत्त्वात्, तन्मात्रस्य तत्त्वेनानिश्चयाच्च न सिद्धसाधनम्। अत्रापि पक्षे तद्धीत्यादेर्व्याप्तिपदानुषङ्गेण तत्साध्याभाववदवृत्तित्वन्न व्याप्तिरित्यर्थ एव ज्यायान्। तदा सम्बन्धात्साध्याभाववदवृत्तित्वादेरव्यभिचरितत्वविशेषत्वलाभेन प्रकृतानुमानस्य विशेषाभावकूटहेतुकसामान्याभावसाध्य-

कत्वप्राप्त्याऽप्रयोजकत्वव्युदासात् । अव्यभिचरितत्वं न साध्याभाववदवृत्तित्वादिस्वरूपमित्यर्थस्त्वव्यभिचरितत्वमित्यनन्तरमनुमितिजनकतावच्छेदकत्वेनाभिमतामत्यस्य पूरणेन, क्लेशेन समर्थनीयः । अन्यथा अव्यभिचरितत्वे साध्याभाववदवृत्तित्वादिरूपतायाः सिद्धान्तेऽपि सत्त्वेन तद्भिन्नत्वस्य प्रतिपत्यसम्भवेनासङ्गत्यापत्तेः, पूरणे तु केवलान्वयिन्यभावात्साध्याभाववदवृत्तित्वादेरनुमितिजनकतानवच्छेदकतया तादृशस्य तस्य भेदोऽनुमितिजनकतावच्छेदकत्वेनाभिमते सुग्रहः । तथा चाव्यभिचरितत्वस्य साध्याभाववदवृत्तित्वाद्यतिरिक्तविधाया अभावेन तेषां भेदस्यानुमितिजनकतावच्छेदके पर्यवसितत्वेऽव्यभिचरितत्वभेदः सिद्ध्यतीति भावः । केवलान्वयिन्यभावादिति तूक्तार्थकमेव । तेन न साध्याभाववदवृत्तित्वसिद्ध्यसिद्धिभ्याम्व्याघात इति दिक् ।

माथुरी

तदसत्, 'न कर्मधारयान्मत्वर्थीयो[१] बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः' इत्यनुशासनविरोधात् । तत्र कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वात् । [२] तच्च [३] अगुणवत्त्वमिति साधर्म्यव्याख्यानावसरे गुणप्रकाशरहस्ये तद्दीधितिरहस्ये च स्फुटम् । [४]अव्ययीभावसमासोत्तरपदार्थेन समं तत्समासानिविष्टपदार्थान्तरान्वयस्याव्युत्पन्नत्वात् । यथा भूतल उपकुम्भं भूतलेऽघटमित्यादौ भूतलवृत्तिघटसमीप—तदत्यन्ताऽभावयोरप्रतीतेः ।[५] एतेन वृत्तेरभावोऽवृत्तीत्यव्ययीभावान्तरं साध्याभाववतोऽवृत्ति यत्रेति बहुव्रीहिरित्यपि प्रत्युक्तम् । वृत्तौ साध्याभाववतोऽनन्वयापत्तेः । अव्ययीभावसमासस्याऽव्ययतया तेन समं समासान्तराऽसम्भवाच्च । नञुपाध्यादिरूपाऽव्ययविशेषणामेव समस्यमानत्वेन परिगणितत्वात् ।

---

१. 'बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इति पाठान्तरम् ।

२. तच्चेति । कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वञ्चेत्यर्थः ।

३. अगुणवत्त्वमिति । गुणप्रकाशरहस्ये गुणप्रकाशदीधितिरहस्ये च, गुणा यत्र विद्यन्ते ते गुणवन्तो न गुणवन्तोऽगुणवन्तस्तेषाम्भावोऽगुणवत्त्वमिति समासः कृतः । गुणस्याऽभावोऽगुणं तदस्यास्तीत्यगुणवान् तस्य भावोऽगुणवत्त्वमिति समासो न कृत इति भावः ।

४. 'अव्ययीभावोत्तरपदार्थेन' इति पाठान्तरम् ।

५. एतेन—अव्ययीभावसमासोत्तरपदार्थेनेत्यादिव्युत्पादनेन ।

वस्तुतस्तु—'साध्याभाववतो न वृत्तिर्यत्र' इति त्रिपदव्यधिकरणबहुव्रीह्युत्तरं त्वप्रत्ययः। साध्याऽभाववत इत्यत्र निरूपितत्वं षष्ठ्यर्थः। अन्वयश्चास्य [१] वृत्तौ। तथा च साध्याभावाधिकरणनिरूपितवृत्त्यभाववत्त्वमव्यभिचरितत्वमिति फलितम्। न च व्यधिकरणबहुव्रीहिः सर्वत्र न साधुरिति वाच्यम्। अयं हेतुः साध्याभाववदवृत्तिरित्यादौ व्यधिकरणबहुव्रीहिं विना गत्यन्तराभावेनाऽत्रापि व्यधिकरणबहुव्रीहेः साधुत्वात्।

तत्त्वालोकः

'साध्याभाववदवृत्तित्वम्' इति। अत्र वृत्तस्याभावोऽवृत्तम्, साध्याभाववतोऽवृत्तं साध्याभाववदवृत्तम्, तदस्यास्तीति साध्याभाववदवृत्ति, तस्य भावः साध्याभाववदवृत्तित्वमिति। वृत्तं वृत्तिः, वृत्तेरभावोऽवृत्तिः साध्याभाववतोऽवृत्तिः यत्र, स साध्याभाववदवृत्तिस्तस्य भावस्तत्त्वमिति वा विग्रहं वर्णयन्ति केचित्तन्न चारु 'न कर्मधारायान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रत्तिपत्तिकरः' इत्यनुशासनविरोधात्। तदर्थश्च—बहुव्रीहीतरसमासान्मत्वर्थीयो न भवति बहुव्रीहिसमासेन मत्वर्थीयार्थलाभे। अगुणवत्त्वमित्यत्र गुणस्याभावोऽगुणन्तदस्यास्तीत्यगुणवानिति विग्रहनिराकरणेन, न गुणवानगुणवानिति विग्रहस्य गुणप्रकाशरहस्यादौ दर्शनेन कर्मधारयपदस्य बहुव्रीहीतरपरत्वात्। न च बहुव्रीहीतरत्वं समासत्वञ्च व्यर्थम्, बहुव्रीहेरन्यपदार्थप्रधानतया तदुत्तरमत्वर्थीयार्थस्य तावत्पदबहुव्रीहिणा बोधयितुमशक्यत्वात्। कृदन्ततद्धितान्तादिपदोत्तरमत्वर्थीयार्थस्य तादृशपदबहुव्रीहिसमासस्यैवासम्भवेन बोधयितुमशक्यत्वाच्चेति वाच्यम्। उद्देश्यांशे उपरञ्जकस्यापि विशेषणत्वेन स्वरूपबोधनार्थत्वात्। न च न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तत्र सम्भवतीत्येव वाच्यमिति वाच्यम्। राजपुरुषवानित्यत्र राज पुरुषो यत्रेति बहुव्रीहेस्सम्भवात् न चैवमपि यत्र राजा राजसम्बन्धी पुरुषश्चास्ति तत्र मतुब्बोध्यस्य देशविशेषस्य बहुव्रीहेः प्रतिपत्तिसम्भवेनानुपपत्तितादवस्थ्यमिति वाच्यम्। यत्पदेन यादृशः धर्मावच्छिन्नविषयताको बोधो मत्वर्थीयसमभिव्याहृतेन जायते, मतुपः समभिव्याहारं विना तेन पदेन बहुव्रीहिणा तादृशधर्मावच्छिन्नविषयताकबोधसम्भवे, तत्पदान्मत्वर्थीयो न भवतीत्यर्थस्य विवक्षितत्वात्। तथा च राजसम्बन्धिपुरुषसम्बन्धित्वावच्छिन्नविषयताको बोधो मतुप्समभिव्याहृतेन राजपुरुषपदेन जायते। बहु-

---

१. वृत्तावित्यस्य भावप्रधाननिर्देशतया वृत्तित्वमर्थः। एवमग्रेऽपि।

व्रीहिसमासेन तु राजाभिन्नपुरुषसम्बन्धित्वेनैवेति न दोषः । एवञ्चारूढवानरवानिति जरच्चित्रगुमानिति चारूढवानरसम्बन्धित्वेन जरदभिन्नचित्रगोसम्बन्धिपुरुषसम्बन्धित्वेन बोधतात्पर्येण साधुरेव । बहुव्रीहिणा स्वकर्मकारोहणकर्तृवानरसम्बन्धिसम्बन्धित्वेन जरदभिन्नचित्रगोसम्बन्धिनः सम्बन्धित्वेन च मत्वर्थीयार्थस्याप्रत्ययादिति । अथाऽसुब्बत इति भाष्यप्रयोगदर्शनाद्रक्तदण्डवानित्यादिलौकिकप्रयोगदर्शनादुक्तव्युत्पत्तेः प्रायिकत्वेनात्रापि तत्क्षतेरनतिदोषत्वमिति चेदेवमप्यवृत्तमित्यस्यावृत्तीत्यस्य च पूर्वपदार्थप्रधानाव्ययीभावसमासत्वेन पूर्वपदार्थप्रधानसमासघटकोत्तरपदार्थेन समं समासाघटकपदस्यानन्वितत्वनियमेन वृत्तित्वे साध्याभाववतोऽन्वयस्यासम्भवो दोषः । नचोक्तनियमे किम्मानं भूतलस्याघटमित्यत्र घटे भूतलानन्वयः, एवं साध्याभाववदवृत्तमितिवदभ्युपगममात्रेण भूतलोपघटमित्यस्य सत्त्वेऽपि घटे भूतलस्यानन्वयः, अव्ययीभावसमासस्याव्ययत्वेऽपि शोभनोपकुम्भमित्यादेः प्रामाणिकत्वेऽव्ययीभावात्मकाव्ययातिरिक्ताव्ययेनैवाव्ययीभावस्य, समस्यमानत्वेन परिगणिताव्ययातिरिक्तस्याप्यव्ययीभावस्य समाससामान्यशास्त्रेण समस्यमानत्वस्य चाभ्युपगमनीयतया वास्तविके वा भूतलोपकुम्भमित्यादौ भूतलानन्वयः । शोभनोपकुम्भमित्यस्याप्रामाणिकत्वे उक्ताभ्युपगमे प्रयोजनविरहेण साध्याभाववतो वृत्तेरनन्वयापेक्षयाऽवृत्तमित्यव्ययीभावेन साध्याभाववतः समासत्वासम्भवनिबन्धनतादृशपदासाधुत्वरूपो बलीयानपि दोषः तादृशव्याख्याने वेदितव्य इति । तस्मात् साध्याभाववतो न वृत्तिर्विद्यते यत्र तत्साध्याभाववदवृत्ति तस्य भावस्तत्त्वमित्येव विग्रहं स्वीकुर्वन्त्यभियुक्ताः । व्यधिकरणबहुव्रीहिश्चायं हेतुः साध्यभाववदवृत्तिरित्यादेस्साध्याभाववदवृत्तपदोत्तरेन्प्रत्ययादिना निर्वाहासम्भवेन स्वीकरणीयः । एवं व्यधिकरणबहुव्रीहेरुदाहरणान्तरस्य सत्त्वेऽपि तद्वशेनात्र व्यधिकरणबहुव्रीहिस्वीकारासम्भवात्तस्यासार्वत्रिकत्वादुक्तप्रयोग एवोदाहरणतया वक्तव्य इति दिक् ।

माथुरी

साध्याभावाधिकरणवृत्त्यभावश्च[१] तादृशवृत्तित्वसामान्याभावो बोध्यः तेन धूमवान् वह्नेरित्यादौ धूमाभाववज्जलह्रदादिवृत्यभावस्य, धूमाभाववद्वृत्तित्वजलत्वोभयत्वावच्छिन्नाभावस्य च वह्नौ सत्त्वेऽपि नाऽतिव्याप्तिः ।

१. नु धूमाभाववद्ध्रदवृत्तित्वाभावं धूमाभाववद्वृत्तित्व-जलत्वोभयाभावं च तादृशवृत्तित्व-

[1]साध्याऽभाववद्वृत्तिश्च हेतुतावच्छेदकसम्बन्धेन विवक्षणीया, तेन वह्न्यभाववति धूमावयवे[2]जलह्रादादौ च समवायेन कालिकविशेषणतादिना च धूमस्य वृत्तावपि न क्षतिः।[3]

प्रतियोगिकमादाय धूमवान् वह्नेरित्यत्र प्रसक्तामतिव्याप्तिं परिजिहीर्षुराह—तादृशवृत्तित्वसामान्याभावो बोध्य इति। तदर्थश्च साध्याभावाधिकरणवृत्तित्वत्वेतरधर्मानवच्छिन्नतादृशवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः। तथा चोक्ताभावयोरतादृशत्वेन नातिव्याप्तिः। विस्तरस्तु ३११ पृष्ठे द्रष्टव्यः।

अस्यैवान्यविधोल्लेखः ननु साध्याभावाधिकरणवृत्त्यभाव इत्यत्र तादृशवृत्तिताप्रतियोगिकाऽभावग्रहणे धूमवान् वह्नेरित्यादौ धूमाभावरूपसाध्याभावस्य जलह्रदादिरूपयत्किञ्चिदधिकरणनिरूपितवृत्तित्वाभावस्य वह्नौ सत्त्वादतिप्रसक्तामतिव्याप्तिं परिहर्त्तुं परिष्करोति—तादृशवृत्तित्वसामान्यभाव इति। तादृश वृत्तितात्वावच्छिन्नप्रतियोगताकाभाव इत्यर्थः। हेतौ साध्याभावस्य यावदधिकरणनिरूपितवृत्तित्वभावो विवक्षित इति यावद्। तथा चोक्तस्थले हेतौ धूमाभावात्मकसाध्याभावस्य जलह्रदादिरूपाधिकरणनिरूपितवृत्तित्वाभावसद्भावेऽप्ययोगोलकरूपसाध्याभावाधिकरणनिरूपितवृत्तित्वाऽभावासत्त्वान्नातिव्याप्तिरिति भावः।

१. ननु येन केनचित्सम्बन्धेन साध्याभावाधिकरणवृत्तित्वग्रहणे समवायसम्बन्धेन वह्निरूपसाध्याभावाधिकरणे धूमावयवे धूमैकदेशे, जलह्रदादौ च समवायेन कालिसम्बन्धेन च हेतोर्धूमस्य वृत्तित्वाद्वह्निमान् धूमादित्यादावव्याप्तिरत आह—'साध्याभाववद्वृत्तिश्च हेतुतावच्छेदकसम्बन्धेन विवक्षणीया' इति। येन सम्बन्धेन हेतुस्तिष्ठति स हेतुतावच्छेदकसम्बन्धः। स च प्रकृते संयोगरूपः तथा च हेतुतावच्छेदकसम्बन्धेन संयोगेन हेतोर्धूमस्य धूमावयवे जलह्रदादौ चावृत्तित्वान्नाऽव्याप्तिरिति भावः।

२. प्रसिद्धविपक्षान्तर्भावेणाऽव्याप्तिं सङ्गमयति—जलह्रदादौ चेति।

३. ननु येन केनापि सम्बन्धेन साध्याभावग्रहणे वह्निमान् धूमादित्यादौ समवायादिसम्बन्धेन सकलवह्न्यभावाधिकरणे, संयोगसम्बन्धेन तत्तद्वह्नित्ववह्निजलोभयत्वाद्यवच्छिन्नाभावाधिकरणे च पर्वतादौ संयोगेन हेतोर्धूमस्य वृत्तित्वेन लक्षणाऽसमन्वयादव्याप्तिरत आह—साध्यभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नेत्यादि। येन सम्बन्धेन साध्यस्तिष्ठति स साध्यतावच्छेदकसम्बन्धः। स चात्र संयोगात्मकः। तथा च संयोगेन साध्याभावविवक्षणादन्यसम्बन्धेन साध्याभावाधिकरणे हेतोर्वृत्तित्वेऽपि विवक्षितसम्बन्धेन तत्र तदवृत्तित्वान्नाव्याप्तिप्रसङ्ग इति भावः। साध्यतावच्छेदकसम्बन्धावच्छिन्नेत्याद्यर्थस्तु सम्बन्धविधया यः प्रकृतसाध्यातावच्छेदकः सम्बन्धविधया तदवच्छिन्नत्वे सति धर्मविधया यः प्रकृतसाध्यतावच्छेदको धर्मविधया तदवच्छिन्ना या

साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः। तेन वह्निमान् धूमादित्यादौ समवायादिसम्बन्धेन वह्निसामान्याभाववति, संयोगसम्बन्धेन तत्तद्वह्नित्ववह्निजलोभयत्वाद्यवच्छिन्नाभाववति[1] च पर्वतादौ संयोगेन धूमस्य वृत्तावपि न क्षतिः।

ननु तथापि गुणत्ववान् ज्ञानत्वात्, सत्तावान् जातेरित्यादौ विषयित्वाव्याप्यत्वादिसम्बन्धेन[2] तादृशसाध्याऽभाववति ज्ञानादौ ज्ञानत्वजात्यादेर्वर्तमानत्वादव्याप्तिः।

न च साध्याभावाधिकरणत्वमभावीयविशेषणताविशेषसम्बन्धेन विवक्षितमिति वाच्यम्। तथा सति घटत्वात्यन्ताभाववान् घटान्योऽन्याभाववान् वा पटत्वादित्यादौ साध्याभावस्य[3]घटत्वादेर्विशेषणताविशेषसम्बन्धेनाधिकरणस्याऽप्रसिद्ध्याऽव्याप्तेरिति चेन्न। अत्यन्ताभावाऽन्योन्याभावयोरत्यन्ताभावस्य सप्तमपदार्थस्वरूपत्वात्।

अत्यन्ताभावान्योन्याभावयोरत्यन्ताभावस्य प्रतियोग्यादिस्वरूपत्वनये तु साध्यतावच्छेदकसम्बन्धावच्छिन्न (साध्यतावच्छेदकावच्छिन्न) प्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदसम्बन्धेन साध्याभावाधिकरणत्वं वक्तव्यम्। वृत्त्यन्तं प्रतियोगिताविशेषणम्। तादृशसम्बन्धश्च वह्निमान् धूमादित्यादिभावसाध्यकस्थले विशेषणताविशेष एव। घटत्वाभाववान् पटत्वादित्याद्यभावसाध्यकस्थले तु समवायादिरेव।[4] समवाय-विषयित्वादिसम्बन्धेन

प्रतियोगिता तन्निरूपकोऽभाव इति बोध्यः। अत्र संसर्गावच्छिन्नत्वाऽनुपादाने समवायेन वह्न्यभावमादाय दोषः। धर्मावच्छिन्नत्वानुपादाने तत्तद्वह्न्यभावं वह्निजलोभयाभावञ्चादाय दोषो ज्ञेयः।

१. 'वह्निजलत्वोभयत्वाद्यवच्छिन्नाभाववति' इति पाठान्तम्।

२. अव्याप्यत्वेति। अव्याप्यत्वम् व्यभिचरितत्वम्। स्वाभाववद्वृत्तित्वमिति यावत्। स्वपदेन साध्याभाव उपादेयः।

३. अत्यन्ताभावस्याभावः प्रतियोगिरूपः। अन्योन्याभावस्याभावः प्रतियोगितावच्छेदकस्वरूप इति नियमादिति तात्पर्यम्।

४. ननु साध्यीयप्रतियोगितोपादानेनापि कार्यसिद्धिर्भवत्येवेति मनस्याशङ्क्य साध्यसामान्यीयेत्यत्र सामान्यपदव्यावृत्तिमाह—समवायविषयित्वादीति। अत्रापि साध्यतावच्छेदकसम्बधेन वृत्तिमत्साध्यीयप्रतियोगितानिवेशे समवायेन प्रमेयसाध्यकस्थले न दोषोऽतो विषयितासम्बन्धेन साध्यत्वाऽनुसरणम्।

प्रमेयादिसाध्यके ज्ञानत्वादिहेतौ, साध्यतावच्छेदकसमवायादिसम्बन्धावच्छिन्नप्रमेयाद्यभावस्य कालिकादिसम्बन्धेन योऽभावः सोऽपि प्रमेयतया साध्यान्तर्गतस्तदीयप्रतियोगिताऽवच्छेदककालिकादिसम्बन्धेन साध्याऽभावाऽधिकरणे [1]ज्ञानत्वादेर्वृत्तेरव्याप्तिवारणाय सामान्यपदोपादानम्। साध्यंसामान्यीयत्वञ्च यावत्साध्यनिरूपितत्वम्[2] स्वानिरूपकसाध्यकभिन्नत्वमिति यावत्।

अस्यैकोक्तिमात्रपरतया गौरवस्यादोषत्वात्, [3]अनुमितिकारणतावच्छेदके च भावसाध्यकस्थलेऽभावीयविशेषणताविशेषेण साध्याऽभावाधिकरणत्वम्, अभावसाध्यकस्थले च यथायथं समवायादिसम्बन्धेन साध्याभावाधिकरणत्वमुपादेयम्। साध्य-साधनभेदेन कार्यकारणभावभेदात्।

नच [4]तथापि घटाऽन्योन्याभाववान् पटत्वादित्यत्राऽन्योन्याभावसाध्यकस्थले[5]घटत्वादिरूपे साध्याऽभावे न साध्यप्रतियोगित्वम्, [6]न वा समवायादिसम्बन्धस्तदवच्छेदकस्तादात्म्यस्यैव तदवच्छेदकत्वादित्यव्याप्तिस्तदवस्थेति वाच्यम्। अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वेन घटभेदस्य घटाभेदात्यन्ताभावत्वावच्छि-

---

१. 'ज्ञानत्वादेर्वृत्याऽव्याप्तिवारणाय' इति पाठान्तरम्।

२. ननु साध्यसामान्यीयत्वस्य यावत्साध्यानिरूपितत्वार्थकत्वे तद्रूपवान् तद्रसादित्यत्राऽव्याप्तिः, साध्यस्यैकव्यक्तिकत्वेन यावत्साध्याऽप्रसिद्धेरत आह स्वानिरूपकसाध्यकेति। स्वस्याऽनिरूपकं साध्यं यस्येति विग्रहः। स्वपदेन कालिकसम्बन्धावच्छिन्ना साध्याभावनिष्ठप्रतियोगिता ग्राह्या। स्वानिरूपकसाध्यकपदेनापि सैव ग्राह्या तद्भिन्ना स्वरूपसम्बन्धावच्छिन्ना साध्याभावनिष्ठा प्रतियोगिता, अत्रानुगमरीत्या तु साध्यतावच्छेदकसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वम् स्वानिरूपकसाध्यकभिन्नत्वम्। भेदीयप्रतियोगिताऽवच्छेदकत्वन्तु निरूपकत्वसम्बधावच्छिन्नं ग्राह्यमिति भावः।

३. अनुमितिकारणतावच्छेदके व्याप्तिपदार्थे इत्यर्थः।

४. तथापीति। निरुक्तसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरणत्वनिवेशेऽपीत्यर्थः।

५. घटत्वादिरूप इति। अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकस्वरूपत्वादिति भावः।

६. यदि अन्योन्याभावाभावस्य प्रतियोगिरूपत्वमेव स्यात्तदा नोक्तस्थलेऽव्याप्तिरत आह—नवेति। तथा च घटभिन्नं घटत्वत्वादित्यत्राव्याप्तिःस्यादिति भावः।

न्नप्रतियोगिताकाभावरूपतया घटभेदात्यन्ताभावरूपस्य घटाभेदप्रतियोगितावच्छेदकीभूतघटत्वस्यापि समवायसम्बन्धेन घटभेदप्रतियोगित्वात् ।

न चान्यत्रात्यन्ताभावाभावस्य प्रतियोगिरूपत्वेऽपि घटादिभेदात्यन्ताभावत्वावच्छिन्नाऽभावो न घटादिभेदस्वरूपः, किन्तु तत्प्रतियोगितावच्छेदकीभूतघटत्वात्यन्ताभावस्वरूप एवेति, सिद्धान्त इति वाच्यम् । यथा हि घटत्वावच्छिन्नघटवत्ताग्रहे घटात्यन्ताऽभावाग्रहात् घटात्यन्ताभावाभावव्यवहाराच्च घटात्यन्ताऽभावाभावो घटस्वरूपस्तथा घटभेदवत्ताग्रहे घटभेदात्यन्ताभावाग्रहात् घटभेदात्यन्ताभावाभावव्यवहाराच्च घटभेद एव तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभाव इति तत्सिद्धान्तो न युक्तिसह इति ।

विनिगमकाभावेनापि घटत्वत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावाभाववद्घटभेदस्यापि घटभेदात्यन्ताभावाभावत्वसिद्धेरप्रत्यूहत्वाच्च ।[१] अत एव तादृशसिद्धान्तो न [२]उपाध्यायसम्मतः ।

[३]अत एव च [४]"अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" [५]इत्याचार्याः । [६]अन्यथा घटभेदात्यन्ताभावप्रतियोगिनि घटभेदे तल्लक्षणाव्याप्त्यापत्तेः । [७]अन्योन्याभावप्रतियोगितावच्छेदके तल्लक्षणस्यातिव्याप्त्यापत्तेश्च ।

न चैवं घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वापत्तिरिति वाच्यम् । तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव तत्स्वरूपत्वाऽभ्युपगमात्, तद्वत्ताग्रहे तादृशतदत्यन्ताभावाभावस्यैव व्यवहारात् ।

---

१. अत एवेति । विनिगमकाभावादेवेत्यर्थः ।

२. उक्तसिद्धान्तो गङ्गेशोपाध्यायसम्मतो नेत्यर्थः ।

३. अत एवेत्यस्य अभावाभावस्य प्रतियोगिस्वरूपत्वादेवेत्यर्थः ।

४. अभावेति । वस्तुनिष्ठं यत् प्रतियोगित्वन्तदभावविरहात्मत्वमभावाभावात्मकत्वमिति यावत् ।

५. आचार्या इत्यस्यान्ते न्यायकुसुमाञ्जलौ तृतीयस्तवक आहुरिति शेषः । एतत्कारिकापूर्वार्धन्तु—"व्यावर्त्याभाववत्तैव भाविकी हि विशेष्यता" । इति

६. अन्यथेत्यस्य अभावाभावस्य प्रतियोगिस्वरूपत्वाभाव इत्यर्थः ।

७. अन्योन्याभावेत्यस्य घटान्योन्याभाव इत्यर्थः । 'अन्योन्याभावप्रतियोगितावच्छेदकघटत्वात्यन्ताभावे' इति पाठान्तरम् ।

उपाध्यायैर्घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वाऽत्यन्ताभावस्य[१] घटभेदस्वरूपत्वाऽभ्युपगमाच्च।

न चैवं साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं, विवक्ष्यतां किं साध्यतावच्छेदकसम्बन्धावच्छिन्नसध्याभाववृत्तित्वस्य प्रतियोगिताविशेषणत्वेनेति वाच्यम्।[२] कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य विशेषणताविशेषेण साध्यत्वे आत्मत्वादिहेतावव्याप्त्यापत्तेः। कालिकसम्बन्धावच्छिन्नसाध्याऽभावस्य विशेषणताविशेषेण योऽभावस्तस्यापि साध्यस्वरूपतया कालिकसम्बन्धवद्विशेषणताविशेषोऽपि साध्यीयप्रतियोगितावच्छेदकसम्बन्धस्तेन सम्बन्धेनाऽऽत्मत्वप्रकारकप्रमाविशेष्यत्वरूपसाध्याभाववत्यात्मनि हेतोरात्मत्वस्य वृत्तेः।

[३]प्रतियोगितावच्छेदकवत् प्रतियोग्यप्यन्योन्याभावाभावः, तेन तादात्म्यसम्बन्धेन साध्यतायां साध्यताऽवच्छेदकसम्बन्धाऽवच्छिन्नसाध्याऽभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वस्यनाऽप्रसिद्धिः।

---

१. 'घटत्वात्यन्ताभावस्यापि घटस्वरूपत्वाभ्युपगमाच्च' इति पाठान्तरम्।

२. साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तित्वस्य साध्यसामान्यीयप्रतियोगिताविशेषणस्य फलमाह—कालिकेति। यद्यपि आत्मत्वप्रकारिका या प्रमा तद्विशेष्यत्वं स्वरूपसम्बन्धेनाऽऽत्मनि वर्त्तते तथापि 'नित्येषु कालिकाऽयोगात्' इति नियमात्कालिकसम्बन्धेन तादृशविशेष्यत्वाभावाः स्वरूपेण वर्तत एवाऽऽत्मनीत्यस्य सद्धेतुत्वम्। अत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तित्वाऽनुपादाने कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य स्वरूपेण योऽभावस्तस्यापि साध्यरूपतया तन्निरूपितप्रतियोगितावच्छेदकसम्बन्धेन स्वरूपेण साध्याभाववत्यात्मनि हेतोर्वृत्तित्वेनाऽव्याप्तिः। तदुपादाने तु साध्यतावच्छेदकसम्बन्धेन स्वरूपेण साध्याभावस्य कालिकेन योऽभावः स एव साध्यरूपस्तन्निरूपितप्रतियोगितावच्छेदककालिकसम्बन्धेन साध्याभाववति घटादौ हेतोरात्मत्वस्यावृत्तित्वाल्लक्षणसमन्वयः।

३. अयं, घटवान्, एतत्त्वादित्यत्र तादात्म्येन घटादेस्साध्यत्वेऽव्याप्तिः। तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य घटभेदस्य स्वरूपसम्बन्धेन योऽभावस्तस्य पूर्वोक्तनियमेन घटत्वरूपतया तत्र साध्यप्रतियोगिताविरहेण साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वाप्रसिद्धेरतआह—प्रतियोगितावच्छेदकवदिति।

[१] इत्थञ्चाऽत्यन्ताभावत्वनिरूपितत्वेनापि साध्यसामान्यीयप्रतियोगिता विशेषणीया, [२]अन्यथा घटान्योन्याभाववान् घटत्वत्वादित्यादावव्याप्त्यापत्तेः। तादात्म्यसम्बन्धस्यापि साध्याऽभाववृत्तिसाध्यीयप्रतियोगितावच्छेदकत्वात्।

[३]यद्वा साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीय[४]निरुक्तप्रतियोगित्व-तदवच्छेदकत्वान्यतरावच्छेदकसम्बन्धेनैव साध्याऽभावाऽधिकरणत्वं विवक्षणीयम्। वृत्त्यन्तमन्यतरविशेषणम्। एवञ्च घटान्योन्याभाववान्पटत्वादित्यादौ साध्याऽभावस्य घटत्वादेः साध्यीयप्रतियोगित्वविरहेऽपि न क्षतिः, तादृशान्यतरस्य साध्यीयप्रतियोगितावच्छेदकत्वस्यैव तत्र सत्त्वात्।

न च तथापि कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति वाच्यम्। निरुक्तसाध्याऽभावत्वविशिष्टनिरूपिता या निरुक्तसम्बन्धसंसर्गकनिरवच्छिन्नाऽधिकरणता तदाश्रयाऽवृत्तित्वस्य विवक्षितत्वात्। गुणकर्म्माऽन्यत्वविशिष्टसत्त्वाऽभाववान् गुणत्वादित्यादौ सत्त्वात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृत्तित्वेऽपि साध्याभावत्वविशिष्टनिरूपिताधिकरणत्वस्य गुणाद्यवृत्तित्वान्नाऽव्याप्तिः।

न चैवं कपिसंयोगाभाववान् सत्त्वादित्यादौ निरवच्छिन्नसाध्याऽभावाऽधिकरणत्वाऽप्रसिद्ध्याऽव्याप्तिरिति वाच्यम्। केवलान्वयिन्यभावादित्यनेन ग्रन्थकृतैवाऽस्य दोषस्य वक्ष्यमाणत्वात्।

न च तथापि कपिसंयोगिभिन्नं गुणत्वादित्वादौ निरवच्छिन्नसाध्याऽभावाधिकरणत्वाऽप्रसिद्ध्याऽव्याप्तिः, अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये तस्य [५]केवलान्वय्यनन्तर्गतत्वादिति वाच्यम्। अन्योन्याभावस्य व्याप्यवृत्तितानियमवादिनये अन्योन्याभावान्तरात्यन्ताभावस्य प्रतियोगितावच्छेदकस्वरूपत्वेऽप्यव्याप्य-

---

१. इत्थञ्चेति। अन्योन्याभावस्य प्रतियोगिस्वरूपत्वाङ्गीकारपक्षे इत्यर्थः।

२. अन्यथेति। अत्यन्ताभावत्वनिरूपितत्वाप्रवेश इत्यर्थः।

३. ननु भावपदार्थात्यन्ताभावाभावो भवतु प्रतियोगित्वरूपः अन्योन्याभावाभावाभावो न भेदरूपप्रतियोगिस्वरूपोऽपितु भेदप्रतियोगितावच्छेदकात्यन्ताभावरूप एवेत्यन्योन्याभावसाध्यकस्थले सर्वत्रैवाव्याप्तिरित्यरुचेराह—यद्वेति।

४. निरुक्तेत्यस्यात्यन्ताभावनिरूपितत्वमर्थः।

५. प्राचाम्मते कपिसंयोगिभेदस्य व्याप्यवृत्तितया गुणादावेव वृत्तित्वं न तु द्रव्ये तथा च सप्तपदार्थवृत्तित्वाभावेन कपिसंयोगिभेदस्य न केवलान्वयित्वमिति भावः।

वृत्तिमदन्योन्याभावाभावस्य व्याप्यवृत्तिस्वरूपस्याऽतिरिक्तस्याऽभ्युपगमात्। तच्च [१]अग्रे स्फुटीभविष्यति।

ननु तथापि समवायादिना गगनादिहेतुके इदं वह्निमद् गगनादित्यादावतिव्याप्तिः, वह्न्यभाववति हेतुतावच्छेदकसमवायादिसम्बन्धेन गगनादेरवृत्तेः, न च तल्लक्ष्यमेव हेतुतावच्छेदकसम्बन्धेन [२] पक्षधर्म्मत्वाभावाच्चाऽसद्धेतुत्वव्यवहार इति वाच्यम्। तत्रापि व्याप्तिभ्रमेणैवाऽनुमितेरनुभवसिद्धत्वात्। [३]अन्यथा धूमवान् वह्नेरित्यादेरपि लक्ष्यत्वस्य सुवचत्वात्।

[४]एवं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः, विशिष्टसत्त्वस्य केवलसत्त्वानतिरेकितया द्रव्यत्वाभाववत्यपि गुणादौ तस्य वृत्तेः, गुणे गुणकर्मान्यत्वविशिष्टसत्तेति प्रतीतेः सर्वसिद्धत्वात्।

[५]सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च, सत्ताभाववति सामान्यादौ हेतुतावच्छेदकसमवायसम्बन्धेन वृत्तेरप्रसिद्धेरिति चेन्न। हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणता-[६]प्रतियोगिकहेतुतावच्छेदकसम्बन्धावच्छिन्नाऽऽधेयतानिरूपितविशेषणताविशेषसम्बन्धेन [७]निरुक्तसाध्याभावत्वविशिष्टनिरूपित [८]निरुक्तसम्बन्धसंसर्ग-

---

१. अग्रे चतुर्थलक्षणव्याख्यानावसरे इत्यर्थः।

२. पक्षधर्मत्वाभावादित्यस्य पक्षवृत्तित्वाभावादित्यर्थः।

३. अन्यथेति। अयमाशयः यदि हेतुतावच्छेदकसम्बन्धेन पक्षवृत्तित्वाभाव एवासद्धेतुत्वनियामकस्तर्हि धूमवान् वह्नेरित्यादौ वह्न्यादिहेतोरप्यसद्धेतुत्वं न स्यात् हेतुतावच्छेदकसम्बन्धेन पक्षावृत्तित्वाभावात्। तथा च सुतरां तस्य लक्ष्यत्वापत्तिरिति भावः।

४. आपत्तिस्वरूपातिव्याप्त्यपेक्षयाऽनुपपत्तिरूपाऽव्याप्तेः प्रबलदोषत्वाल्लक्षणस्याऽव्याप्तिमाह—एवमिति।

५. 'विशिष्टसत्त्वं शुद्धसत्त्वादतिरिक्तम्' इति मते न पूर्वोक्ताऽव्याप्तिः सम्भवति, साध्याभाववति, गुणे शुद्धसत्त्वातिरिक्तस्य विशिष्टसत्त्वस्यावर्त्तमानत्वादतोऽव्याप्त्यन्तरमाह—सत्तावानिति।

६. प्रतियोगिकेत्यस्य निरूपितेत्यर्थः, इदमाधेयताविशेषणम्। आधेयतानिरूपितेत्यत्र निरूपितत्वपदार्थः प्रतियोगिकत्वम्। एवमग्रेऽपि।

७. निरुक्तेत्यस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकेत्यर्थः।

८. निरुक्तेत्यस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वतदवच्छेदकत्वान्यतरेत्यर्थः।

कनिरवच्छिन्नाऽधिकरणताऽऽश्रयवृत्तित्वसामान्याभावस्य विवक्षितत्वात्। वृत्तित्वञ्च न हेतुतावच्छेदकसम्बन्धेन विवक्षणीयम्। [१]अस्ति च सत्तावान् द्रव्यत्वादित्यादौ सत्ताऽभावाधिकरणताश्रयवृत्तित्वस्य हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धेन सामान्याभावो द्रव्यत्वादौ, समवायसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धावच्छिन्नप्रति- योगिताकसत्ताभावाधिकरणत्वाश्रयवृत्तित्त्वाभावस्य व्यधिकरणसम्बन्धावच्छिन्न- प्रतियोगिताकाभावतया संयोगसम्बन्धावच्छिन्नगुणाभावादेरिव केवलान्वयित्वात्।

[२]द्रव्यं सत्त्वादित्यादौ च द्रव्यत्वाभावाधिकरणगुणादिवृत्तित्वस्यैव समवायसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धेन सत्तायां सत्वान्नातिव्याप्तिः। द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिवारणाय प्रतियोगिकान्तमाधेयताविशेषणम्।

[३]वस्तुतस्तु-एतल्लक्षणकर्तृमते विशिष्टसत्त्वं विशिष्टनिरूपिताधारतासम्बन्धेनैव द्रव्यत्वव्याप्यं, न तु समवायसम्बन्धेन। तथा च प्रतियोगिकान्तमाधेयताविशेषणमनुपादेयमेव, तदुपादाने हेतुतावच्छेदकभेदेन कार्य्यकारणभावभेदापत्तेः। [४]हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्वे सतीत्यनेनापि विशेषणाद्वह्निमान् गगनादित्यादौ नातिव्याप्तिः।

ननु तथापि उभयत्वमुभयत्रैव पर्य्याप्तं, न त्वेकत्रेति सिद्धान्तादरे घटत्वतदभाववदुभयत्वादित्यादौ पर्य्याप्त्याख्यसम्बन्धेन हेतुत्वेऽतिव्याप्तिः, घटत्वाभाववति हेतुतावच्छेदकपर्य्याप्त्याख्यसम्बन्धेन हेतोरवृत्तेः। घटो न घटपटोभयमितिवत् घटत्वाभाववान् न घटत्वतदभाववदुभयमित्यपि प्रतीतेरिति चेन्न। तादृशसिद्धान्तादरे हेतुतावच्छेदकसम्बन्धेन साध्यसमानाधिकरणत्वे सतीत्यनेनैव विशेषणीयत्वा-

---

१. सत्तावान् द्रव्यत्वादित्यत्राव्याप्तिं निवारयति—अस्ति चेति।

२. अस्मिन् प्रकारेऽतिव्याप्तिरपि न सम्भवतीत्याह—द्रव्यं सत्त्वादित्यादि।

३. लाववमनुसृत्याह—वस्तुतस्त्विति।

४. वह्निमान् गगनादित्यत्रातिव्याप्तिं निराकरिष्णुराह—हेतुतावच्छेदकसम्बन्धेनेति। साध्याभाववदवृत्तित्वमितिलक्षणे हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्वे सतीति विशेषणीयमित्यर्थः।

दिति ।[१] अत एव निविशतां वा वृत्तिमत्त्वं साध्यसमानाधिकरणत्वं वेति केवलान्वयिग्रन्थे दीधितिकृतः ।

[२] केचित्तु, निरुक्तसाध्याभावत्वविशिष्टनिरूपिता या विशेषणताविशेषसम्बन्धेन यथोक्तसंबन्धेन वा निरवच्छिन्नाधिकरणता तदाश्रयव्यक्त्यवर्त्तमानं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्म्मावच्छिन्नाधिकरणत्वसामान्यं तद्धर्म्मवत्त्वं विवक्षितम् ।[३] धूमवान् वह्नेरित्यादौ पर्वतादिनिष्ठवह्न्यधिकरणताव्यक्तेर्धूमाभावाधिकरणावृत्तित्वेऽप्ययोगोलकनिष्ठवह्न्यधिकरणताव्यक्तेरतथात्वान्नातिव्याप्तिरित्याहुः ।

[४] अन्ये तु, हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नस्वाधिकरणताश्रयवृत्ति यन्निरवच्छिन्नाधिकरणत्वं तदवृत्तिनिरुक्तसाध्याभावत्वविशिष्टिनिरूपितयथोक्तसम्बन्धावच्छिन्नाधिकरणतात्वकत्वमिति [५] विशेषणविशेष्यभावव्यत्यासे तात्पर्यम् स्वपदं हेतुपरम् । [६] इत्थञ्च कपिसंयोगाभाववान् सत्त्वात्, कपिसंयोगिभिन्नं गुणत्वादित्यादावपि नाव्याप्तिरित्याहुरिति संक्षेपः ।

॥ इति प्रथमं व्याप्तिलक्षणम् ॥

---

१. उभयत्वमुभयत्रैव पर्याप्तमिति सिद्धान्तादरे घटत्ववान् तादृशोभयत्वादित्यत्रातिव्याप्तेरेवेत्यर्थः ।

२. सत्तावान् द्रव्यत्वात् द्रव्यं विशिष्टसत्त्वादित्यादौ पूर्वोक्तमव्याप्तिं निराचिकीर्षूणां केषाञ्चिन्मतमाह—केचित्त्विति । वह्निमान् धूमादित्यादौ तत्समन्वयश्चेत्थम् । संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकाऽभावत्वावच्छिन्ना या स्वरूपसम्बन्धावच्छिन्नाऽऽधेयता तन्निरूपितनिरवच्छिन्नाधिकरणताश्रयीभूतह्रदव्यक्त्यवर्तमानं संयोगसम्बन्धावच्छिन्नयद्धर्मा- (धूमात्वा) वच्छिन्नाऽऽधेयतानिरूपिताधिकरणत्वसामान्यं तद्धर्म-(धूमत्व) वत्त्वं धूमे इति ।

३. सामान्यपदकृत्यमाह—धूमवानिति ।

४. कपिसंयोगाभाववान् मेयत्वात्, कपिसंयोगिभिन्नं गुणत्वादित्यादौ लक्षणं समन्वेतुं परिष्करोति—अन्येत्विति । अत्र स्वपदमधिकरणतात्वकत्वमित्यत्राधिकरणताकपदं च हेतुपरम्, तथा च धूमाधिकरणताश्रयपर्वतवृत्तियन्निरवच्छिन्नं रूपाद्यधिकरणत्वं तत्र वह्न्यभावाद्यधिकरणतात्वस्यावर्त्तमानत्वाद्वह्निमान् धूमादित्यादौ लक्षणसमन्वयः ।

५. विशेषणेति । पूर्वोक्तकेचित्वितिकल्पे यादृशो विशेषणविशेष्यभावस्तस्मादत्र लक्षणे विपरीतो विशेषणविशेष्यभावो बोध्य इति तात्पर्यम् ।

६. विशेषणविशेष्यभावव्यत्यासस्य प्रयोजनमाह—इत्थञ्चेति ।

द्वितीयं व्याप्तिलक्षणम्

चिन्तामणिः

साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम् ।

माथुरी

लक्षणान्तरमाह,'साध्यवद्भिन्न' इति[१] । साध्यवद्भिन्नो यः साध्याभाववान् तदवृत्तित्वमित्यर्थः । कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यकाव्याप्तिवारणाय 'साध्यवद्भिन्न' इति साध्याभाववतो विशेषणमिति प्राञ्चः । तदसत् 'साध्याभाववद्' इत्यस्य व्यर्थतापत्तेः । साध्यवद्भिन्नावृत्तित्वमित्यस्यैव सम्यक्त्वात् ।

दीधीतिः

साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह, 'साध्यवद्भिन्न' इति ।

साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृत्तित्वमर्थः ।

गादाधरी

दीधितौ 'अव्याप्य' इति । कपिसंयोगी एतत्त्वादित्यादावित्यर्थः । 'अव्याप्ति' इति । तत्र हेत्वधिकरणे तद्वृक्षादावप्यन्यदेशकालावच्छेदेन कपिसंयोगाद्यभावसत्त्वादिति भावः । साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारयेऽभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्साध्याभावाधिकरणं तद्वृत्तित्वमित्यर्थः स्यात्तथा सति तद्घटकी-

---

१. पुस्तकान्तरे 'साध्यवद्भिन्नेति' प्रतीकनिर्देशो नास्ति ।

भूतस्याभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्तदवृत्तित्वस्यैव लक्षणत्वसम्भवात् साध्याभाववत्त्वांशस्य वैयर्थ्यमतः सप्तमीतत्पुरुषं व्याचष्टे 'साध्यवद्भिन्ने' इति। तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमर्थः, तत्र पूर्ववदभेदेन साध्यवद्भिन्नपदार्थाविशेषितधर्मिवृत्तित्वादेर्न घटकता तादृशपदार्थस्य धर्मिण्यविशेषणत्वाद् वृत्त्यादिविशेषणतयैव साध्यवद्भिन्नस्य निवेशादिति न साध्याभावांशवैयर्थ्यमिति भावः।

जागदीशी

'अव्याप्यवृत्ति' इति। कपिसंयोग्येतद्वृक्षत्वाद् इत्यादावित्यर्थः। [१]इदञ्च येन रूपेण येन सम्बन्धेन च साध्यत्वं तदवच्छिन्नस्य साध्याभावस्य प्रवेशमादृत्य।

तत्त्वालोकः

जागदीश्याम् 'इदञ्च' इति। अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिदानञ्चेत्यर्थ। साध्यतावच्छेदकावच्छिन्नाभावप्रवेशेपि संयोगसम्बन्धावच्छिन्नघटाभावस्य समवायावच्छिन्नवह्न्यभावस्य च तादृशतया तमादाय व्याप्यवृत्तिसाध्यकेऽव्याप्तिः स्यादतो धर्मविधया यः साध्यतावच्छेदको धर्मविधया तदवच्छिन्नत्वस्य संसर्गविधया यः साध्यतावच्छेदकः संसर्गविधया तदवच्छिन्नत्वस्य प्रतियोगितायां प्रवेशसूचनायाह—'येन रूपेण येन सम्बन्धेन' इतिं। अथ साध्यतावच्छेदकीभूतधर्मावच्छिन्नत्वे सति साध्यतावच्छेदकीभूतसम्बन्धावच्छिन्नत्वप्रवेशेऽपि घटाभावादिवारणसम्भवाद्धर्मसंसर्गविधया तदवच्छेदकत्वप्रवेशो व्यर्थ इति चेन्न तत्समवायिनः संयोगेन साध्यतायां तत्समवायिनः समवायेनाभावीयप्रतियोगिताया वारणाय साध्यतानिरूपितसंसर्गतावन्निष्ठावच्छेदकताकत्वस्य, तत्संयोगिनः संयोगेनाभावप्रतियोगिताया वारणाय साध्यतानिरूपितकिञ्चित्सम्बन्धावच्छिन्नावच्छेदकतावन्निष्ठावच्छेदकत्वस्य च प्रवेशनीयत्वात्, संयोगिनः सम-

---

१. इदञ्चेति। अस्यार्थस्तु-यद्रूपावच्छिन्ना यत्सम्बन्धावच्छिन्ना साध्यता भवति तद्रूपावच्छिन्नतत्सम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य प्रथमलक्षणे प्रवेशमादृत्य कपिसंयोग्येतद्वृक्षत्वादित्यत्राव्याप्तिरुक्तेति। सप्रपञ्चमिदं १७० पृष्ठे तृतीयमाटिप्पण्यामभिहितम्। पुस्तकान्तरे 'येन सम्बन्धेन येन रूपेण च' पाठः।

वायेनाभावीयप्रतियोगितावारणाय च प्रतियोगितावच्छेदकताया अपि धर्मसंसर्गविधया प्रवेशनीयत्वात् । वस्तुतः साध्यतावच्छेदकधर्मावच्छिन्नत्वस्य साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वरूपस्यैव वाच्यतया तत्र साध्यतानिरूपितधर्मविधयावच्छेदकतावदितरनिष्ठावच्छेदकत्वानिरूपितत्वमात्रप्रवेशे तादृशातिरिक्तसंसर्गमादायासम्भवस्स्यादिति धर्म्मविधयावच्छेदकत्वानिरूपितत्वं, साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्यापि साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वरूपस्यैव वाच्यतया तादृशसंसर्गातिरिक्तनिष्ठावच्छेदकत्वानिरूपितत्वमात्रप्रवेशे तादृशसंसर्गातिरिक्तधर्म्ममादायासम्भवस्स्यादिति संसर्गविधयावच्छेदकत्वानिरूपितत्वं च प्रवेशनीयम् । एतेन संयोगिनस्समवायेनाभाववारणाय धर्म्मविधया संसर्गविधया वाऽवच्छेदकत्वस्य निरूपितत्वम्प्रवेश्यं नतूभयमिति शङ्का निरस्ता ।

माथुरी,

नव्यास्तु साध्यवद्भिन्ने साध्याभावः साध्यवद्भिन्नसाध्याभावस्तद्वदवृत्तित्वमिति सप्तमीतत्पुरुषोत्तरं मतुप्प्रत्ययः । तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः । एवञ्च साध्यवद्भिन्नवृत्तीत्यनुक्तौ संयोगी द्रव्यत्वादित्यादावव्याप्तिः । संयोगाभाववति द्रव्ये द्रव्यत्वस्य वृत्तेः । तदुपादाने च संयोगवद्भिन्नवृत्तिः संयोगाभावो गुणादिवृत्तिः संयोगाभाव एव, अधिकरणभेदेनाभावभेदात्, तद्वदवृत्तित्वान्नाव्याप्तिः ।

न च तथापि साध्यवद्भिन्नावृत्तित्वमित्येवास्तु लक्षणं किं साध्याभाववदित्यनेनेति वाच्यम् । यथोक्तलक्षणे तस्याप्रवेशेन [1]वैयर्थ्याभावात्, तस्यापि लक्षणान्तरत्वात् ।

---

१. वैयर्थ्यं नाम स्वसमानाधिकरणप्रकृतसाध्यव्याप्यतावच्छेदकलघुभूतधर्मान्तरघटितत्वम् । यथा नीलधूमत्वं धूमत्वघटितम् प्रकृते तु साध्यवद्भिन्ननिरूपितवृत्तित्वभावः साध्यवद्भिन्नवृत्तिसाध्याभावाधिकरणनिरूपितवृत्तित्वाभावश्च मिथो भिन्न एवाभावः । तथा च न द्वयोरभावत्वयोर्मिथःसामानाधिकरण्यं येन वैयर्थ्यं स्यादिति भावः ।

न च तथापि साध्यवद्भिन्नवृत्तिर्यस्तद्वद्वृत्तित्वमेवास्तु किं साध्याभावपदेनेति वाच्यम्। तादृशद्रव्यत्वादिमद्वृत्तित्वादसम्भवापत्तेः। साध्याभावेत्यत्र साध्यपदम्[१] अत एव, द्रव्यत्वादेरपि द्रव्यत्वाभावाभावत्वात्। भावरूपाभावस्य चाधिकरणभेदन भेदाभावात्।

गादाधरी

अभावे साध्यीयत्वानिवेशे ह्रदादिवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेर्वृत्तेरसंभव इति तद्वारणाय साध्यपदसार्थक्यम्। न चाधिकरणभेदेनाभावभेदमत एवैतल्लक्षणकरणात्पर्वतादेर्न ह्रदादिवृत्त्यभाववत्त्वमिति वाच्यम्, अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासेन भेदस्य लक्षणकर्तृसंमतत्वादाकाशाभावादेर्भेदकाभावेन तस्यैक्यात्, अत एवोक्तधर्माणां भेदकत्वम्, 'एतानि च न भेदकानि' इत्यनेन दीधितिकृन्निराकरिष्यति।

अथवा साध्याभावपदमनुयोगिताविशेषसम्बन्धेन साध्यीयपरम्, अभांवीयविलक्षणानुयोगितालाभायैवाभावपदं न त्वभावत्वमपि निवेश्यते प्रयोजनांभावात् तादृशविलक्षणसम्बन्धेन यः साध्यीयस्तद्वद्वृत्तित्वमर्थः।

तत्त्वालोकः

अथ साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगित्वस्य वक्ष्यमाणरीत्यावश्यविवक्षणीयतया तत्र धर्मविधया संसर्गविधयावच्छेदकत्वत्वेनावच्छेदकत्वस्यान्तर्भावेणैकविधनिवेशेनैवपूर्व्वोक्तनिखिलाभाववारणसंभवः। संयोगिनस्समवायेनाभावीयप्रतियोगितायामपि साक्षात्परम्परासाधारणसाध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकस्वरूपसमवायसंयोगगतरूपवृत्तित्वस्य विरहात्। प्रतियोगितायां समवायस्य संसर्गविधया अवच्छेदकत्वेन स्वरूपस्य तदनवच्छेदकत्वादिति चैन् मैवम् समवायिनस्संयोगाश्रयत्वेन, साध्यतायां संयोगाश्रयस्य समवायेनाभावमादायाव्याप्तेर्दुरुद्धरत्वात् इति।

१. अत एवेति। द्रव्यत्वमादायासंभवादेवेत्यर्थः।

माथुरी

ननु तथापि घटाकाशसंयोगघटत्वान्यतराभाववान् गगनत्वादित्यादौ घटानधिकरणदेशावच्छेदेन घटाकाशसंयोगाभावस्य गगने सत्त्वात् सद्धेतुतयाऽव्याप्तिः, साध्यवद्भिन्ने घटे वर्त्तमानस्य साध्याभावस्य घटाकाशसंयोगरूपस्य गगनेऽपि सत्त्वात् तत्र च हेतोर्वृत्तेः। न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववत्त्वं विवक्षितमिति वाच्यम्। साध्याभावपदवैयर्थ्यापत्तेः। साध्यवद्भिन्नवृत्तित्वविशिष्टवदवृत्तित्वस्यैव सम्यक्त्वादिति चेन्न। अभावाभावस्यातिरिक्तत्वमतेनैतल्लक्षणकरणात्।

गादाधरी

तत्र च साध्यस्य यत्पदार्थाविशेषणत्वे ह्रदादिवृत्तिप्रमेयत्वादिमति पर्वतादौ हेतोर्वृत्तेरसंभवः स्यादिति तन्निवेशः। अत्र च साध्याभावः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः, अन्यथा वह्निमान् धूमादित्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमवति सत्त्वेन पृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठस्य द्रव्यत्वाद्यात्मकस्य साध्यप्रतियोगिकाभावस्य जलादौ सत्त्वेन चाव्याप्त्यापत्तेः। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया, अन्यथा ह्रदादिवृत्तिसमवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमादिमत्यपि वृत्तेरसम्भवस्य कालिकसम्बन्धेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वा प्रसङ्गः।

जागदीशी

[1]अन्यथा तु व्याप्यवृत्तिसाध्यकेऽपि विशिष्टाभावादिकमादाय दोषो बोध्यः।

---

१. पूर्वोक्तरूपेण साध्याभावस्याऽप्रवेशे प्रसिद्धस्थलं परित्यज्याऽप्रसिद्धस्थलानुसरणाऽऽनर्थक्यमाह, अन्यथेति। विशिष्टाभावादीति महानसीयत्वपर्वतीयत्वविशिष्टवह्न्याद्यभावं, वह्निघटोभयाद्यभावं समवायेन वह्न्यभावञ्चादाय तद्वति पर्वतादौ धूमादेर्वृत्तित्वेन वह्निमान् धूमादित्यादि व्याप्यवृत्तिसाध्यकस्थलेऽप्यव्याप्तिस्सम्भवत्येवेति भावः।

तत्त्वालोकः

'अन्यथा तु व्याप्यवृत्तिसाध्यके' इत्यादि। ननु साध्यतावच्छेदकावच्छिन्नत्वस्य प्रवेशेऽपि महानसीयवह्न्यभावस्य न वारणसम्भवः। न च साध्यतानिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वं वाच्यम् वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वानवच्छेदकानवच्छिन्नत्व स्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन।

माथुरी

तथा च अधिकरणभेदेनाभावभेदात् साध्यवद्भिन्ने घटे वर्त्तमानस्य साध्याभावास्य [१]प्रतियोगिव्यधिकरणस्य प्रतियोगिमति गगनेऽसत्त्वादव्याप्तेरभावात्।

गादाधरी

अत्र च साध्याभाववत्तायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे वह्निमान् धूमादित्यादौ ह्रदादिवृत्तिवह्न्याद्यभावस्य कालिकादिसम्बन्धेन पर्वतादौ वृत्तेरव्याप्तिः, दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादौ दैशिकविशेषणतया साध्य आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्याभावस्यात्मादिषु वृत्तेर्घटत्वाभावादिसाध्यकस्थले सद्धेतौ साध्याभावस्य घटत्वादेर्दैशिकविशेषणतासम्बन्धेन वृत्तित्वे मानाभावेन चाव्याप्तिः, अतः साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताज्ञानं प्रति यादृशसम्बन्धेन स्वप्रकारकनिश्चयः प्रतिबन्धकस्तेन सम्बन्धेनाभाववत्त्वं निवेश्यं संयोगेन वह्न्यादौ साध्ये तादृशसम्बन्धो दैशिकविशेषणता। कालिकविशेषणतासम्बन्धेनाकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसम्बन्ध एव तथा, समवायादिना घटत्वादेरभावे दैशिकविशेषणतया साध्ये समवायादिरेवेति न दोषः।

---

१. प्रतियोगिव्यधिकरणस्येति। घटे वर्त्तमानो यो घटत्व-घटाकाशसंयोगान्यतराभावाभावः स प्रतियोगिव्यधिकरणः गगने च यस्तादृशाभावस्स प्रतियोगिसमानाधिकरणः यतो गगनेऽन्यतराभावोऽपि वर्त्तते। तथा च विरुद्धधर्माध्यासेन घटत्वघटाकाशसंयोगान्यतराभावाभावस्याधिकरणभेदेन भेदः स्वीकार्यः। तथा सति साध्यवद्भिन्ने घटे वर्तमानस्य साध्याभावस्याधिकरणं घट एव तत्र गगनत्वहेतोरवर्तमानत्वाल्लक्षणसमन्वयः।

जागदीशी

[1]अव्याप्यवृत्तिसाध्यकेऽपि । [2]आकाशादिहेतावव्याप्त्यभावादाह— 'सद्धेतौ' इति । वृत्तिमद्धेताविति तदर्थः ।

तत्त्वालोकः

स्वसामानाधिकरण्यनिवेशाद्वह्निमान्धूमादित्यत्र निरवच्छिन्नघटत्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावामादाय न दोषः स्वावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशात्, घटानुयोगिककालिकेन वह्नित्ववदभावमादाय वह्नित्वाश्रयवान्धूमादित्यत्र नाव्याप्तिः, स्वानवच्छेदकानवच्छिन्नत्वनिवेशान्महानसीयवह्निवृत्तित्वविशिष्टंजात्यवच्छिन्नाभावमादाय न लक्षणासम्भवः स्ववृत्तित्वनिवेशाद्रूपत्वन्यूनवृत्तिजातिमद्वान् रूपादित्यत्र निरवच्छिन्ननीलत्वादिनिष्ठावच्छेदकताकप्रतियोगिताकाभावमादाय न व्याप्यत्वानिर्वाहः एतेन साध्यतावच्छेदकातिरिक्तधर्म्मानवच्छिन्नत्वस्य विवक्षणे प्रमेयवतस्समवायेन साध्यतायां सत्त्वे हेतौ साध्यतावच्छेकातिरिक्ताप्रसिद्धिनिबन्धनो दोषो निरस्तः साध्यतावच्छेदकताविशिष्टान्यघटत्वादिनिष्ठावच्छेदकत्वस्य प्रसिद्धत्वादिति वाच्यम्, यत्र प्रतियोगिनिष्ठनानाविशेष्यतानिरूपिता परम्परानिरूपिता वा अवच्छेदकप्रकारता तत्रैवावच्छेदकताया भिन्नत्वेन महानसीयवह्न्यभावीयप्रतियोगितावच्छेदकताया ऐक्येन तत्र विशिष्टान्यत्वविरहादव्याप्तितादवस्थ्यात् ।

माथुरी

न चैवं साध्याभावेत्यत्र साध्यपदवैयर्थ्यम्[3] अभावाभावस्यातिरिक्तत्वेन द्रव्यत्वादेरभावत्वाभावात् साध्यवद्भिन्नवृत्तिघटाभावादेस्तु हेतुमत्यसत्त्वात् अधि-

---

१. लक्ष्ये लक्षणासत्त्वमित्यव्याप्तिलक्षणादेवाव्याप्तेः सद्धेतुवृत्तित्वेऽवधारिते सद्धेतावव्याप्तिरित्यत्र 'सद्धेतौ' इति निर्देशो व्यर्थ इत्याशङ्क्याह—अव्याप्यवृत्तीति ।

२. आकाशादीति । संयोगादिसम्बन्धेन गगनादिहेतुके वह्निमान् गगनादित्यादौ गगनस्यवृत्तिस्वभावत्वेन लक्षणसमन्वयान्नाव्याप्तिरिति भावः ।

३. अभावेति । अभावाभावाभावस्यातिरिक्तत्वेन द्रव्यत्वाभावाभावो न द्रव्यत्वरूपः किन्त्वतिरिक्तोऽभावस्तस्याधिकरणं साध्यवद्भिन्नो ह्रदादिरेव,

करणभेदेनाऽभावभेदादिति वाच्यम्। यत्र प्रतियोगिसमानाधिकरणत्वप्रतियोगिव्यधिकरणत्वलक्षणविरुद्धधर्म्माध्यासस्तत्रैवाऽधिकरणभेदेनाऽभावभेदाभ्युपगमो न तु सर्वत्र। तथा च साध्यवद्भिन्नवृत्तिघटाभावादेर्हेतुमत्यपिसत्त्वादसम्भववारणाय साध्यपदोपादनात्।

गादाधरी

न चैवं वृक्षनिष्ठा या कपिसंयोगाभावीयमूलावच्छिन्नविशेषणता तादृशसम्बन्धेन वृक्षादौ तादृशाभाववत्ताज्ञानेऽपि कपिसंयोगवत्त्वज्ञानोत्पत्तेस्तादृशसम्बन्धो न लक्षणघटक इति साध्यवद्भिन्नवृत्तित्वविशेषणं व्यर्थमिति वाच्यम्, संयोगतदभावयोरविरुद्धत्वज्ञानाभावदशायां वृक्षः कपिसंयोगाभाववानिति ज्ञानस्यापि वृक्षे कपिसंयोगवत्ताज्ञानविरोधितया वृक्षनिष्ठतदभावीयविशेषणताया अपि साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूतसंसर्गताश्रयत्वात्।

केचित्तु साध्यात्मकस्वाभावनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वं विवक्षितम्, स च सम्बन्धो यत्सम्बन्धावच्छिन्नप्रतियोगिताकः स्वाभावः साध्यमिति नोक्तानुपपत्तिः। अथ समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतुकस्थले कालिकसम्बन्धस्यापि तत्सम्बन्धावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपितप्रतियोगितावच्छेदकत्वात्तेन साध्याभाववति काले हेतोर्वृत्तेरव्याप्तिः।

जागदीशी

[१]अव्याप्यवृत्तिसाध्यं यत्र तत्र सन् वर्त्तमानो यो हेतुस्तत्रेत्यर्थः, तेन संयोगाभाववान् गुणत्वादित्यादावव्याप्त्यभावेऽपि न क्षतिरित्यपि वदन्ति।

अधिकरणभेदेनाभावभेदात् तत्र च धूमस्यावर्त्तमानत्वाद्वह्निमान् धूमादित्यत्र लक्षणसमन्वयसंभवात् साध्यपदं व्यर्थमिति भावः।

१. 'अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्ति' रिति शिरोमणिवचनमसङ्गतम् संयोगाभाववान् गुणत्वादित्यादावव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्त्यभावादत आह, अव्याप्यवृत्तिसाध्यमिति। यस्मिन्नधिकरणे साध्यमव्याप्यवृत्ति भवति तत्राधिकरणे वर्त्तमानहेतावेवाव्याप्तिः, संयोगाभावसाध्यकगुणत्वन्तु न तथेति भावः।

तत्त्वालोकः

न च स्वानवच्छेदकमहानसीयत्वत्वावच्छिन्नत्वसत्त्वेन विशिष्टान्यत्वसम्भव इति वाच्यम् तार्णवह्न्यभावमादायाव्याप्तेः। यदिचैकसम्बन्धेनैकप्रकारेण भासमानधर्म्मेष्वेवैकावच्छेदकत्वमन्यथैकावच्छेदकत्वे निरवच्छिन्नत्वसावच्छिन्नत्वयोर्विरुद्धयोस्सम्बन्धद्वयावच्छिन्नत्वस्य चापत्तेः। न च तत्तद्धर्म्मवृत्तित्वावच्छेदेनोभयोः स्वीकारे क्षत्यभावः प्रतिबध्यप्रतिबन्धकभावगुरुत्वापत्तेः।

माथुरी

[१]यद्वा घटाकाशसंयोगघटत्वान्यतराभावाभावोऽतिरिक्त एव घटाकाशसंयोगादीनामननुगततया तथात्वस्य वक्तुमशक्यत्वात्। घटत्वंद्रव्यत्वाद्यभावाभावस्तु नातिरिक्तो घटत्वद्रव्यत्वादीनामप्यनुगतत्वात्। तथा च द्रव्यत्वादिकमादायासम्भववारणायैव साध्यपदमिति प्राहुरित्यास्तां विस्तरः।

गादाधरी

न च साध्यनिरूपितस्वनिष्ठप्रतिगितावच्छेदकसम्बन्धनिवेशान्नायं दोषः कालिकसम्बन्धावच्छिन्नघटाभावादिरूपप्रमेयस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताया घटादावेव सत्त्वात् कालिकसम्बन्धस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावात्मकस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धत्वविरहादिति वाच्यम्, तादृशप्रमेयाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताको योऽभावस्तस्यापि प्रमेयत्वेन साध्यतया तन्निरूपिततादृशप्रमेयाभावनिष्ठप्रतियोगितावच्छेदकत्वस्य कालिकसम्बन्धेऽप्यक्षततयाऽव्याप्तेर्दुर्वारत्वात्।

---

१. ननु न सर्वोप्यभावाभावोऽतिरिक्तः अपि तु घटत्वघटाकाशसंयोगान्यतराभावाभाव एव तस्य प्रतियोगिस्वरूपत्वेऽननुगमरूपगौरवात्। तथा च द्रव्यत्वाभावाभावमादायासंभववारणाय साध्यपदस्य यथाश्रुतमपि सार्थक्यं संभवतीत्याशयेनाह—यद्वेति।

जागदीशी

[१]ननु साध्यवद्भिन्नो यः साध्याभाववान् इत्यर्थे साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वात्[२]न चावृत्तित्वेन समं साध्यवद्भिन्नस्यान्वयाविवक्षणात् साध्याभाववता सममेव तादात्म्येनैवान्वयविवक्षणान्न वैयर्थ्यमिति वाच्यम्, तथा सति साध्यवद्भिन्नात्मको यो[३]मतुबर्थः सम्बन्धी तदवृत्तित्वस्यैव सम्यक्त्वे साध्याभावपदवैयर्थ्यध्रौव्यात् ।

तत्त्वालोकः

तथा हि समवायेन महानसीयत्वविशिष्टत्वे सति कलिकेन वह्नित्वविशिष्टवत्ताबुद्धौ समवायेन वह्नित्वविशिष्टः सन् कालिकेन महानसीयत्वविशिष्टो नास्तीति बुद्धेः प्रतिबन्धकत्वापत्तिः समवायसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतानिरूपिता सती कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावावगाहिनिश्चयत्वस्य प्रतिबन्धकतावच्छेदकस्य तद्बुद्धावपि सत्त्वादतो महानसीयत्ववृत्तित्वावच्छेद्यसमवायसम्बन्धावच्छिन्नत्ववदवच्छेदकतानिरुपिता सती वह्नित्ववृत्तित्वावच्छेद्यकालिकसम्बन्धावच्छिन्नत्ववदवच्छेदकताकप्रतियोगिताकाभावावगाहिनिश्चयत्वेन प्रतिबन्धकत्वम्वाच्यमिति गौरवम् ।

गादाधरी

न च यावत्साध्यनिरूपितत्वेन प्रतियोगिता विशेषणीया तथा चोपदर्शिताभावात्मकयत्किञ्चित्प्रमेयनिरूपितस्वनिष्ठप्रतियोगितावच्छेदककालिकसंबन्धमादाय न दोष इति वाच्यम्, असमवेतप्रमेयस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावो नास्तीति प्रत्ययाविषयतया तस्य तादृशप्रमेयाभावाभावत्वे मानाभावात्, तादृश-

---

१. साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमिति लक्षणे साध्यवद्भिन्नसाध्याभाववत्पदयोः कर्मधारयसमास एव कर्त्तव्यो लक्षणारूपदोषाभावात् न तु साध्यवद्भिन्ने साध्याभाव इति षष्ठीतत्पुरुषो लक्षणारूपगौरवादित्याशङ्क्ते । नन्विति ।

२. येन पदेन विना विवक्षितान्वयबोधोऽनुपपन्नो न तत्पदं वैयर्थ्यास्पदमिति भावः ।

३. मतुबर्थ इति साध्यवद्भिन्नस्य साध्याभावसम्बन्धिनाऽभेदान्वयो विवक्षितः स च मतुबर्थसम्बन्धिनाऽभेदान्वयेनाप्युपपन्न इति साध्याभावपदवैयर्थ्यमेव, साध्यवद्भिन्नसंम्बन्ध्यवृत्तित्वस्यैव संम्यक्त्वादितिभावः ।

प्रमेयाभावनिष्ठयावत्प्रमेयनिरूपितप्रतियोगित्वाप्रसिद्ध्योक्तस्थलेऽव्याप्तितादवस्थ्यात् । न च साध्यतावच्छेदकसम्बन्धेन वृत्तिमद्यावत्साध्यनिरूपितप्रतियोगिताया निवेशनीयतया नोक्ताप्रसिद्धिरिति वाच्यम्, सर्वत्र समवायिन्येकया सत्तयैव तादृशप्रमेयाभावाभावत्वनिर्वाहे सर्वसमवाय्यसंग्राहकगुणादीनां तादृप्रमेयाभावाभावत्वे मानाभावेन दर्शिताप्रसिद्धेर्दुर्वारत्वादिति चेन्न, साध्यतावच्छेदकसम्बन्धेन वृत्तिमद्यत्किञ्चित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धनिवेशेनैवोपपत्तेः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्यदर्शितसाध्याभावाभावस्य साध्यत्वेऽपि तस्य साध्यतावच्छेदकसमवायसम्बन्धेनावृत्तित्वात् ।

जागदीशी

अतः सप्तमीसमासं समर्थ्य व्याचष्टे 'साध्यवद्भिन्ने' इति । [१]तथा च साध्यवद्भिन्नस्य वृत्तावनन्वयात् यथासन्निवेशे न वैयर्थ्यम् । [२]साध्याभावे साध्यवद्भिन्नवृत्तित्वविशेषणं त्वव्याप्यवृत्तिसाध्यकसङ्ग्रहार्थमेवेत्याशयः ।

तत्त्वालोकः

अथ समवायसम्बन्धावच्छिन्नमहानसीयत्वप्रकारतानिरूपितकालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितविशेष्यत्वावच्छेद्यप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छेद्यविशेष्यत्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबन्धकताया वाच्यत्वान्न दोष इति चेन्न तथाविधाभाववत्ताबुद्धौ विशेष्ये विशेषणन्तत्रापि विशेषणान्तरमितिरीत्या जायमानायाः समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टवत्ताबुद्धेः प्रतिबन्धकतापत्तिवारणाय तत्तत्सम्बन्धावच्छिन्नतद्धर्म्मनिष्ठावच्छेदकताकप्रकारताशालिनिश्चयत्वेन प्रतिबन्धकत्वं वाच्यं तथासत्युपलक्षणस्य प्रकारतावच्छेदकत्वे मानाभावेन नापत्तिः तत्रैकावच्छेदकत्वस्वीकारे कालिकेन महानसीयत्वविशिष्टत्वे सति समवायेन वाह्निविशिष्टवैशिष्ट्यावगाहिबुद्धेः प्रतिबन्धकत्वापत्तेर्वारणाय तत्तद्वृत्तित्वावच्छेद्यसम्बन्धावच्छिन्नत्वस्य निवेशनीयतया गौरवतादवस्थ्यात् न च प्रकारतावच्छेदक-

---

१. सप्तमीतत्पुरुषसमासे स्वीकृते साध्याभाववदिति विशेष्यस्य न वैयर्थ्यमित्याह, तथा चेति ।

२. साध्यवद्भिन्नवृत्तित्वविशेषणस्य फलमाह—साध्याभाव इति ।

त्वस्य नैकत्वं स्वीक्रियत इति वाच्यम् प्रतियोगितावच्छेदकत्वेऽपि तदापत्तेरिति विभाव्यते, तदापि महानसीयवह्निमान्तज्ज्ञानत्वादित्यत्र वह्न्यभावमादायाव्याप्त्यापत्तेरिति चेत् ।

गादाधरी

न चैतत्कल्पेऽपि कालिकसम्बन्धेन प्रमेयसाध्यककालत्वादिहेतावव्याप्तिः कालिकसम्बन्धावच्छिन्नप्रमेयाभावस्य यः कालिकसम्बन्धावच्छिन्नाभावस्तस्य स्वाभावात्मकस्य प्रमेयत्वेन साध्यस्य प्रतियोगितावच्छेदकीभूतकालिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नप्रमेयाभावाधिकरणे हेतोर्वृत्तेरिति वाच्यम्, तादृशप्रतियोगितावच्छेदकीभूतयत्सम्बन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्सम्बन्धेन तद्वदवृत्तित्वस्य विवक्षणीयत्वात्, उक्तस्थले च साध्याभावस्य कालिकसम्बन्धेन साध्यवद्भिन्नेऽवृत्तेः । अथैवं तादृशप्रतियोगितायां स्वनिष्ठत्वनिवेशो विफलस्तदनिवेशे घटभिन्नं घटत्वाभावादित्यादौ घटभेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन घटत्वात्मकसाध्याभाववति घटत्वे हेतोर्वृत्तेः प्रसक्ताया अव्याप्तेरीदृशविवक्षयैव वारणसम्भवाद्घटत्वरूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन साध्यवद्भिन्ने घटेऽवृत्तेः । न चैवं तादृशसाध्यस्य तादृशसम्बन्धेन साध्यवद्भिन्नवृत्तिरभाव एवाप्रसिद्ध इति कथमव्याप्तिपरिहार इति वाच्यम्, घटभेदस्य घटत्वाभावसमनियतत्वेन तदभिन्नतया घटत्वेऽपि समवायसम्बन्धावच्छिन्नायास्तादृशप्रतियोगितायाः सत्त्वेन तादृशप्रतियोगितावच्छेदकसमवायेन साध्यवद्भिन्नघटवृत्तिघटत्वरूपसाध्याभावस्य प्रसिद्धिसम्भवात् ।

जागदीशी

[१]साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति पर्वतादौ धूमादेः सत्त्वादव्याप्तिरसम्भवो[२] वा स्यादतः 'साध्याभाव' इति । न च कपिसंयोग्येतद्वृक्षत्त्वादित्यादेः संग्रहार्थमधि-

१. सप्तमीतत्पुरुषसमासे साध्याभावपदस्य कृत्यमाह—साध्यवदिति ।

२. असम्भवो वेति। पर्वतो वह्निमान् गगनादित्यस्य लक्ष्यत्वेऽवृत्तिगगनादौ साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमत्पर्वताद्यवृत्तित्वाल्लक्षणसमन्वयसम्भवेनाऽव्याप्तिरुक्ता यदि गगनादीनामवृत्तिस्वभावानां न लक्ष्यत्वन्तदा लक्ष्यमात्रे लक्षणासत्त्वादसम्भव इति भावः ।

करणभेदेनाभावभेदमादृत्यैव[1] लक्षणमिदं कार्य्यं, तथा च साध्यवद्भिन्ने योऽभाव-स्तद्वदवृत्तित्वस्यैव सम्यक्त्वे साध्यपदवैयर्थ्यमिति वाच्यम्, [2]प्रतियोगितासंसर्गेण साध्यीयत्वेनैव साध्याभावस्य प्रवेशः न त्वभावत्वेनापीति तद्वैयर्थ्यशङ्कानवकाशात्।

तत्त्वालोकः

अत्र केचित् साध्यतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूप-वृत्तित्वमेवसाध्यतावच्छेदकावच्छिन्नत्वपदेन विवक्षणीयं वृत्तित्वं च स्वावच्छेदक-तात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथा च महानसीयत्ववह्नित्व-योरेका व्यासज्यवृत्यवच्छेदकता भिन्ना वास्तु प्रतियोगितावच्छेदकतात्वेनोभयथैव तस्या व्यासज्यवृत्तितया तत्प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वस्य द्वित्व एव सत्त्वेन तेन सम्बन्धेन तत्प्रतियोगिताया वह्नित्वगतैकत्वे वृत्तित्वविरहेण महान-सीयवह्न्यभावस्य, महानसीयत्ववह्नित्वगतद्वित्वे वह्न्यभावप्रतियोगिताया वृत्तित्व-विरहेण तदभावस्य च लक्षणाघटकत्वान्नाव्याप्तिसम्भवः।

गादाधरी

तादृशाभावयोर्भेदे स्वनिष्ठत्वस्य प्रतियोगिताविशेषणत्वेऽपि घटत्वरूपसा-ध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्या तद्दोषतादवस्थ्यात्, संयोगिभे-दस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपवैधर्म्येण संयोगाभावाभेदासम्भवेऽपि संयोगवत्त्वप्रकारकप्रमाविषयत्वाभावाभेदे बाधकाभावात् स्वरूपसम्बन्धस्यापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धतया तेन सम्बन्धेन साध्यवद्भिन्नवृत्ते-

---

१. लक्षणमिदमिति। यद्यधिकरणभेदेनाभावभेदाभ्युपगमोऽत्र लक्षणे न स्यात्तदा साध्यवद्भिन्नवृत्तित्वनिवेशेऽपि कपिसंयोग्येतद्वृक्षत्वादित्यत्राव्याप्तितादवस्थ्यम्, साध्यवद्भिन्ने गुणादौ वर्तमानस्य कपिसंयोगाभावस्य मूलावच्छेदेन वृक्षादावपि सत्वात्तत्र चैतद्वृक्षत्वस्य वर्तमानत्वादिति भावः।

२. प्रतियोगितेति। प्रतियोगितानिरूपितानुयोगित्वसम्बन्धेन साध्यविशिष्टाभावघटितमिदं लक्षणं, शुद्धाभावघटितसाध्यवद्भिन्नवृत्त्यभाववदवृत्तित्वन्तु लक्षणान्तरं तथा च लक्षणान्तरेण लक्षणान्तरस्य वैयर्थ्यं न सम्भवतीति भावः। वैर्थ्यलक्षणन्तु १८१ पृष्ठे प्रथमटिप्पण्यामभिहितमस्माभिः।

स्तादृशप्रमाविषयत्वरूपसाध्याभावस्य प्रसिद्ध्या संयोगिभिन्नं गुणत्वादित्यादावव्याप्तेरनवकाशादिति चेन्न, प्रतियोगितायां स्वनिष्ठत्वानिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताक आकाशाभावाभावादौ साध्य—आत्मत्वादावव्याप्तेर्दुर्वारत्वात्।

जागदीशी

[१]वस्तुतः स्वप्रतियोगितावच्छेदकसम्बन्धेन सध्यवद्भिन्ने वर्त्तते यः साध्यतावच्छेदकसम्बन्धेन साध्यीयोऽभावः तद्वदवृत्तित्वमर्थः। तथा च साध्यतावच्छेदकसम्बन्धेन साध्यीयत्वार्थकस्य साध्यपदस्याऽनुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसम्बन्धेन वह्न्यादिमतोऽन्यस्मिन् पर्वतादौ यः समवायाद्यवच्छिन्नवह्न्यभावस्तद्वति धूमादेः सत्त्वादव्याप्तिः स्यादतस्तदुपात्तमिति नव्याः।

तत्त्वालोकः

तादृशावच्छेदकतात्वावच्छिन्नत्वञ्च निरूपितत्वसम्बन्धावच्छिन्नसाध्यत्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वं तेन महानसीयवह्नित्वावच्छिन्नसाध्यतानिरूपितवह्नित्ववृत्यवच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वे वह्न्यभावप्रतियोगित्वस्य वह्नित्वावच्छिन्नसाध्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकवह्नित्वगतैकत्वे स्वनिरूपितवह्नित्वनिष्ठावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन महानसीयवह्न्यभावप्रतियोगित्वस्य च वृत्तित्वेऽपि न क्षतिः।

गादाधरी

तादृशसाध्यस्य यः कालिकसम्बन्धावच्छिन्नाभावो दैशिकविशेषणतासम्बन्धावच्छिन्नतदभावस्य तादृशसाध्यस्वरूपतया दैशिकविशेषणतासम्बन्धस्य साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वात्तेन सम्बन्धेनाकाशाभावरूपसाध्याभावस्य साध्यवद्भिन्ने काले हेतुमति च वृत्तेः, प्रतियोगितायां स्वनिष्ठत्वनिवेशे

१. माऽस्तुसाध्यपदवैयर्थ्यं निष्प्रयोजनत्वन्तु साध्यपदस्य दुर्वारमेवेत्याशङ्क्याह— वस्तुतस्त्विति अत्र स्वपदेन लक्षणघटकः साध्याभावो ग्राह्यः।

च दैशिकविशेषणताया आकाशाभावनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वविरहेणाव्याप्तेरनवकाशात्। न च साध्यनिरूपितस्वनिष्ठप्रतियोगितानिवेशे साध्याभावपदोपादानवैयर्थ्यमभावान्तरनिष्ठप्रतियोगितायाः साध्यनिरूपितत्वविरहेणैव तद्व्यावृत्तेरिति वाच्यम्, स्वपदार्थस्य द्विधा निवेशेन साध्याभावनिष्ठसाध्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वनिवेशध्रौव्येण तत्पदवैयर्थ्यानवकाशात्। तादृशसम्बन्धेन साध्यवद्भिन्नवृत्ति यत्तद्वत्त्वमात्रनिवेशे साध्यवद्भिन्नवृत्त्यभावान्तरवति हेतोर्वृत्त्यानुपपत्तेरित्याहुः।

जागदीशी

केचित्तु व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्धधर्माध्यासात् संयोगाद्यभावस्यैव द्रव्यगुणाद्यधिकरणभेदेन भेदः न तु गगनाद्यभावस्य[१] मानाभावात्, तथा च साध्यवद्भिन्नवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेः सत्त्वादव्याप्तिरतः साध्यपदमित्याहुः। तत् मन्दम्[२]गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्यम्, न तु द्रव्ये गगनाद्यभावे तथात्वमित्यादिप्रतीत्या गगनाद्यभावस्यापि गुणत्वादिसामानाधिकरण्यतदभावयोः विरुद्धयोः धर्मयोः सम्भवादिति दिक्।

तत्त्वालोकः

यदि चैकं वह्नित्वं महनसीयवह्नित्वावच्छिन्नस्य प्रतियोगित्वस्य साध्यत्वस्यावच्छेदकमिति प्रतीतिविरहेण महानसीयवह्नित्वावच्छिन्नप्रतियोगित्वाद्यवच्छेदकतात्वेन तत्पर्य्याप्त्यनुयोगितावच्छेदकत्वं वह्नित्वगतैकत्वे मास्तु परन्त्वेकम्वह्नित्वमवच्छेदकमितिप्रतीतेः प्रामाणिकत्वेऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताया यथाविवक्षितानिरूपितत्ववत्या निरूपकीभूतस्य पर्य्याप्त्यनुयोगित्वस्य वह्नित्वगतैकत्वेऽवच्छेदकत्वस्य सत्त्वादव्याप्तितादवस्थ्यमिति विभाव्यते तदा साध्यत्वादिनिष्ठावच्छेदकतानिरूपितत्वमप्युपादेयम्।

---

१. 'मानाभावादिति' विरुद्धधर्मप्रतीत्यभावादित्यभिमानः।

२. गगनाभावेऽपि विरोधिधर्माध्याससम्भवेन गगनाभावोऽप्यधिकरणभेदभिन्न एव इत्याशयेनाह— तन्मन्दमिति।

गादाधरी

अत्रेदं बोध्यम्, साध्यवत्त्वग्रहविरोधिग्रहविषयसम्बन्धेन साध्यनिरूपतप्रतियोगितावच्छेदकसम्बन्धेन वा नाऽनुमित्यौपयिकव्याप्तिशरीरेऽभावसम्बन्धनिवेशसम्भवः साध्यभेदेन व्याप्तेर्भेदाल्लाघवेन तत्तत्साध्यकस्थले तत्तत्साध्याभाववति दैशिककालिकविशेषणतासमवायादिसंसर्गाणामेव विशिष्याभावसम्बन्धतया निवेशौचित्यात्, उक्तगुरुरूपेण विशेषणताविशेषादीनां सम्बन्धताया अत्यन्ताप्रामाणिकतया तद्रूपावच्छिन्नस्य सम्बन्धविधया व्याप्तिघटकत्वायोगाच्च, परन्तु यादृशसाध्यकस्थले यादृशसम्बन्धोऽभावसम्बन्धतया व्याप्तिघटकस्तत्परिचयायैव दर्शितोक्तयः, तथा च यादृशसम्बन्धेन प्रकृतसाध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्तते तादृशसम्बन्धेन तद्वत्त्वं निवेश्यमित्युक्त्यैव तत्परिचयसम्भवादित्यलं वाग्जालेन तत्र च साध्याभाववत्पदेन साध्याभावत्वविशिष्टाधिकरणं विवक्षणीयम्, तेन गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ विशिष्टस्यानतिरिक्ततया सत्तारूपसाध्याभावस्य गुणादौ सत्त्वेऽपि न क्षतिर्गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययात्तत्र तादृशाभावत्वविशिष्टाधिकरणत्वानभ्युपगमात् ।

अथैतल्लक्षणे घटत्वघटाकाशसंयोगान्यतराभाववानाकाशत्वादित्यादावव्याप्तिः, घटत्वस्य व्याप्यवृत्तितया तद्घटितान्यतराभाववद्भिन्ने घटे वर्तमानस्य घटाकाशसंयोगात्मकसाध्याभावस्य हेत्वधिकरणे गगनेऽपि वृत्तेः, निरवच्छिन्नसाध्याभाववत्तानिवेशे च साध्यवद्भिन्नवृत्तित्वांशवैयर्थ्यादितिचेन्न । एतल्लक्षणकर्तृमते स्वप्रतियोगिसामानाधिकरण्यस्वप्रतियोगिवैयधिकरण्यरूपविरुद्धधर्माध्यासोऽभावस्य भेदक इत्येतादृशयुक्त्या द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरित्यनुसृत्याव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्तिः समाधीयते । तथा च घटाकाशसंयोगस्योक्तान्यतराभावप्रतियोगित्वेऽपि न तदभावरूपता । तथा सति तादृशविरुद्धधर्मयोः समावेशापत्तिस्तयोर्विरोधाभावे संयोगाभावस्याप्यधिकरणभेदेन भेदासिद्धेरव्याप्यवृत्तिसाध्यके सर्वत्रैवाव्याप्तेस्तदभिप्रायेण लक्षणान्तरस्यावतारणीयत्वादिति गगनेऽतिरिक्त एव तदभावः स्वीकरणीयः, स च न साध्यवद्भिन्नवृत्तिरिति न दोषः । साध्यवद्भिन्ने वर्तत इत्यनेनानवच्छिन्नाया एव वृत्तेर्विवक्षणान्न घटाकाशसंयोगात्मकाभावमादाय दोष इति तु न श्रद्धेयम् । तथा सति सुषुप्त्यादिकालावच्छेदेनास्मदाद्यात्मवृत्तौ स्वाश्रयाश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकज्ञानत्वाद्यभावे साध्ये सुखादावव्याप्तिस्तत्र साध्यवद्भिन्न ईश्वरे ताद-

शसम्बन्धेन निरवच्छिन्नवृत्तिकस्य ज्ञानत्वादिरूपाभावस्य तेन सम्बन्धेन सुखाद्यधिकरणेऽस्मदाद्यात्मन्यपि वृत्तेः, उत्पत्तिकालावच्छिन्नघटादिवृत्तितादृशसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावादिसाध्यकघटत्वादिहेतावव्याप्तिश्च ।

जागदीशी

न च [1] घटत्वघटाकाशसंयोगान्यतरत्वाद्यवच्छिन्नाभाववान् गगनत्वादित्यत्राव्याप्तिः, साध्यवद्भिन्ने घटे वर्त्तमानस्य गगनघटसंयोगात्मकसाध्याभावस्याप्यधिकरणे गगनादौ गगनत्वादिहेतोः सत्त्वादिति वाच्यम्,[2] अभावाभावस्यातिरिक्तता-मते एवैतल्लक्षणकरणादिति भावः ।

तत्त्वालोकः

अथ वह्नित्वावच्छिन्नसाध्यतावच्छेदकताया ऐक्येन तन्निष्ठप्रतियोगितावच्छेदकत्वस्य लाघवेन तद्व्यक्तित्वस्यैव कल्पनीयतया साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति चेन्न एतल्लक्षणकर्तृमते गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वस्वीकारात् । अन्यथा प्रमेयवह्निमान्धूमादित्यत्र साध्याभावाप्रसिद्ध्या तद्घटभिन्नं पटत्वादित्यत्र तादृशवृत्तित्वाभावाप्रसिद्ध्या चाव्याप्त्यापत्तेः । अथवा साध्यतावच्छेदकतात्वादिसमनियतप्रतियोगितोपादेया व्याप्यता च वह्नित्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तीयतद्व्यक्तित्वावच्छिन्नप्रतियोगितायामेव न तु महानसीयत्ववह्नित्वगतद्वित्वावच्छिन्नानुयोगिताकपर्य्याप्तीयप्रतियोगितायां साध्यतावच्छेदकतात्वस्येति न दोषः । साध्यतावच्छेदकत्वावृत्तिरूपवृत्तित्वम्वा विवक्षणीयं वृत्तित्वञ्च स्वावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगिताव-

---

१. 'घटत्वाकाशेति', अत्र घटत्वाभावमात्रस्य साध्यत्वेऽव्याप्तिरेव न संभवतीत्यतो घटाकाशसंयोगस्योपादानम् । यद्यपि घटाकाशसंयोगाभावमात्रस्य साध्यत्वेऽव्याप्तिः सम्भवति तथापि तस्य केवलान्वयित्वेनाऽव्याप्तेरिष्टतया घटत्वोपादानम् । घटत्वघटाकाशसंयोगोभयाभावस्यापिकेवलान्वयितया तत्साध्यत्वेप्यऽव्याप्तेरिष्टत्वेनान्यतरोपादानम्, अन्यतरत्वञ्च भेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वम् ।

२. अभावाभावस्येति । तथा चान्यतराभावाभावो नाऽन्यतरस्वरूपः किन्त्वतिरिक्तोऽभावस्वरूपस्तस्याधिकरणं घट एव तत्र च गगनत्वस्याऽवर्त्तमानत्वाल्लक्षणसमन्वय इति तात्पर्यम् ।

च्छेदकधर्म्मशून्यत्वसम्बन्धेन तथा च वह्नित्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिप्रतियोगितावच्छेदकतद्व्यक्तित्वशून्यत्वस्य महानसीयत्वनिष्ठावच्छेदकतायां सत्त्वेन महानसीयवह्निसाध्यकस्थले न वह्न्यभावस्य लक्षणघटकताप्रसङ्गः। रूपवृत्तित्वञ्च परम्परायाः संसर्गत्वाभ्युपगमे यथाश्रुतमेवान्यथा तादृशरूपावच्छिन्नानुयोगिताकपर्य्याप्तीया या निरूपितत्वसम्बन्धावच्छिन्नकिञ्चिन्निष्ठावच्छेदकताभिन्नावच्छेदकतात्वतद्व्यक्तित्वैतदन्यतरनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिता तदाश्रयावच्छेदकतानिरुपितत्वम्, एवञ्चानुपदोक्तावृत्तित्वमपि यत्किञ्चित्साध्यतावच्छेदकत्वावृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वरूपम्वाच्यमवच्छेदकतात्वावच्छिन्नप्रतियोगितावारणाय चावच्छेदतात्वन्यूनवृत्तिधर्म्मावच्छिन्नत्वेन प्रतियोगिता विशेषणीया। नन्वत्र तार्णवह्नेर्विषयितया साध्यतायां तज्ज्ञानत्वे सद्धेतौ वह्नितार्णाभावमादायाव्याप्तिः, प्रतियोगित्वसाध्यत्वयोः समानधर्म्मावच्छिन्नत्वादिति चेन्न। प्रतियोगिताभेदम्विनाभावभेदस्यासम्भवेन तार्णवह्न्यभावप्रतियोगितावच्छेदकत्वन्तार्णत्वविशिष्टवह्नित्वे वह्नितार्णाभावप्रतियोगितावच्छेदकत्वम्वह्नित्वविशिष्टतार्णत्वे वाच्यं तादृशावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वमपि बुद्धिभेदेन भिन्नयोस्तार्णत्ववह्नित्वगतद्वित्ववह्नित्वतार्णत्वगतद्वित्वयोः कल्पनीयमितितार्णवह्न्यभावप्रतियोगिताया इव प्रकृतसाध्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकतार्णत्ववह्नित्वगतद्वित्वे, वह्नितार्णाभावीयप्रतियोगिताया वृत्तित्वविरहेणाव्याप्त्यसम्भवादिति। अथावच्छेदकतात्वावच्छिन्नत्वस्य तादृशावच्छेदकतात्वातिरिक्तधर्म्मानवच्छिन्नत्वरूपतया तादृशावच्छेदकतात्वस्यापि तादृशावच्छेदकतात्वगगनोभयभेदवत्वेनासम्भवप्रसङ्गः। अवच्छेदकतात्वभेदस्यापि तथैवपरिष्कारेऽनवस्थाप्रसङ्गः। यदि च विलक्षणप्रतियोगितासंसर्गेण तादृशावच्छेदकतात्वविशिष्टभेदवदवच्छिन्नत्वविशिष्टाभाववत्वरूपमेव तदित्युच्यते तदा विलक्षणस्वावच्छिन्नप्रतियोगितासंसर्गेण साध्यतावच्छेदकविशिष्टाभाव एव साध्याभावपदार्थोऽस्त्वलमुक्तक्रमेण पर्य्याप्तिघटिततद्व्युत्पादनेनेति चेत्सत्यम् उक्तरूपवृत्तित्वस्य तत्तद्धर्म्मावच्छिन्नत्वरूपताप्रतिपादनेन विलक्षणप्रतियोगितायां बालो व्युत्पादयितुं शक्यः, नान्यथा तद्धटकभेदादिषु तच्छङ्कायां तदादिशब्दोपबन्धेन, तद्धर्म्मावच्छिन्नप्रतियोगिताकाभावश्च तद्धर्म्मातिरिक्तधर्म्मानवच्छिन्नप्रतियोगिताकाभाव इति सामान्येन विलक्षणप्रतियोगितामात्रे व्युत्पादयितुं शक्य इत्युक्तरूपेण लक्षणकरणन्नायुक्तमिति गृहाण।

एवञ्च यद्यपि वह्निसाध्यकस्थलीयं लक्षणं वह्नित्वगतैकत्ववृत्तिप्रतियोगिताकाभाववदवृत्तित्वमेवैवमेवचेतरसाध्यकस्थलीयमपि लक्षणं तथापि प्रकृतसाध्यतावच्छेदकत्वत्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगिताकाभाववद वृत्तित्वादिना प्रतिपादनन्नायुक्तं सकृदुक्त्यैव बालव्युत्पादनार्थत्वात् प्रकृतशब्दस्य तदादिवद्बुद्धिविषयतावच्छेदकावच्छिन्नत्वार्थकत्वात्। अत्रोक्तावच्छेदकत्वं रूपस्य परिचायकमात्रमन्यथा तद्विशेषितरूपवृत्तिप्रतियोगिताकाभाववदवृत्तित्वनिश्चयस्य वह्नित्वगतैकत्ववृत्तिप्रतियोगिताकाभाववद्वृत्तित्वग्रहे प्रतिबन्धकत्वानुपपत्तेः। एवञ्च तादृशावच्छेदकत्वसमानाधिकरणरूपनिष्ठावच्छेदकतानिरूपितवृत्तित्वनिष्ठावच्छेदकतानिरुपितप्रतियोगित्वनिष्ठावच्छेदकतानिरुपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वेन लक्षणता बोध्या। अथात्रैकत्वादेः पर्य्याप्त्यनभ्युपगमे वह्निमान्धूमादित्यादावव्याप्तिः कालिकेन महानसीयत्वविशिष्टस्य समवायेन वह्नित्वविशिष्टस्य साध्यतायां धूमे सद्धेतौ समवायेन महानसीयत्वविशिष्टस्य कालिकेन वह्नित्वविशिष्टस्याभावमादायाव्याप्तिश्च।न चैतदभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वमपि प्रतियोगिताविशेषणम्वाच्यं, वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन तथा च प्रतियोगितानिरूपितमहानसीयत्वनिष्ठावच्छेदकतायास्साध्यतानिरूपितमहानसीयत्वनिष्ठावच्छेदकतावच्छेदकसम्बन्धानवच्छिन्नत्वान्नाव्याप्तिरिति वाच्यम्, कालिकेन प्रमेयविशिष्टत्वे सति समवायेन प्रमेयविशिष्टो यः कालिकेन महानसीयत्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टस्तस्य साध्यतायां धूमे समवायेन महानसीयत्वविशिष्टोक्तत्रितयविशिष्टाभावमादायाव्याप्तेः, सामानाधिकरण्यम्विहाय व्यापकत्वस्य प्रवेशेऽपि समवायेन वह्नित्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टस्य विषयितया साध्यतायां तज्ज्ञानत्वे सद्धेतौ समवायेन वह्नित्वविशिष्टाभावमादायाव्याप्त्यापत्तेः न च साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमेव साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकत्वम्।वृत्तित्वञ्च स्वनिरूपितावच्छेदकताघटकसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन, तथा च न दोष इति वाच्यम्। कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशि-

ष्टस्य साध्यतायां तज्ज्ञानत्वे कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टाभावमादायाव्याप्त्यापत्तेः ।

यद्यपि साध्यतावच्छेदकावच्छिन्नत्वं प्रकृते साध्यतासमनियतत्वं सामनैयत्यञ्च स्वनिरूपितावच्छेदकतावत्त्वसम्बन्धेन, अवच्छेदकतावत्ता च स्वसामानाधिकरण्यस्वावच्छेदकसम्वन्धावच्छिन्नत्वस्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन, तथा च न प्रागुक्तदोषाणामवकाशः । तत्र प्रतियोगिताव्यापकत्वदिशि व्यापकताघटकसम्बन्धकोटौ त्रयाणामुपादाने व्याप्यताघटकतया तत्तत्सम्बन्धानामनुपादाने च घटत्वनिष्ठावच्छेदकत्वकालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकत्वसावच्छिन्नवह्नित्वनिष्ठावच्छेदकत्वान्यादाय वह्निमान्धूमादित्यादौ व्याप्तिलक्षणाप्रसक्तिः व्यापकताघटकसंसर्गेऽपि तदनुपादाने विषयितया वह्निसाध्यकस्थले तार्णवह्न्यभावमादाय विषयितया, समवायेन वह्नित्वविशिष्टसाध्यकस्थले कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टाभावमादाय विषयितया वह्निसाध्यकस्थले समवायेन वह्नित्वविशिष्टवह्न्यभावमादायाव्याप्तिस्स्यादिति तत्तत्सम्बन्धनिवेशः साध्यताव्यापकत्वदिशि व्याप्यताघटकसम्बन्धकौटौ तत्तत्सम्बन्धानुपादान उक्तरीत्यैव वह्निमान्धूमादित्यत्राव्याप्तिस्स्यात्, व्यापकताघटकसम्बन्धेष्वपि तेषामनुपादाने विषयितासम्बन्धेन तार्णवह्निसाध्यकस्थले वह्न्यभावमादाय कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टस्य विषयितया साध्यतायां, समवायेन वह्नित्वविशिष्टाभावमादाय विषयितया वह्नित्वविशिष्टवह्निसाध्यकस्थले वह्न्भावमादायाव्याप्तिस्स्यादिति तत्तत्सम्बन्धनिवेशः ।

अत्र तार्णवह्नेर्विषयितया साध्यतायां वह्नितार्णाभावमादायाव्याप्तिवारणायैकत्वादेः पर्य्याप्त्यभ्युपगमेन साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वविवक्षणे स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेनावच्छेदकतावत्त्वम्वाच्यम्, तदुभयफलन्तु कालिकेन महानसीयत्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टसाध्यकस्थले समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टाभावमादायाव्याप्तिवारणम् । वह्नितार्णाभावमादायाव्याप्तिवारणायैकत्वादेः पर्य्याप्त्यनभ्युपगमे स्वावच्छेद्यविशेष्यतावच्छेदकत्वावृत्तित्वसम्बन्धावच्छिन्नसाध्यत्वाभाववत्त्वं प्रतियोगिताविशेषणम्, वृत्तित्वञ्च स्वात्मकसंम्बन्धावच्छिन्नप्रमीयप्रकारत्वावच्छेद्यविशेष्यतावच्छेदकतावत्त्वसम्बन्धेन, तद्वत्ता च सामानाधिकरण्यसम्बन्धेन । प्रमीयत्वनिवे-

शादुक्तप्रतियोगितासम्बन्धेन, तार्णवह्निप्रकारकभ्रमसत्त्वेऽपि न क्षतिः । एवञ्चावच्छेदकतावत्त्वं पूर्वोक्तत्रितयसम्बन्धेनैव, सामनैयत्यव्यावृत्तिरपि पूर्ववत्, तथापि कालिकेन महानसीयत्वविशिष्टं सत्समवायेन वह्नित्वविशिष्टं यत्तद्विशिष्टस्य साध्यतायां सद्धेतौ समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टं यत्तादात्म्येन तद्विशिष्टाभावमादायाव्याप्तेरनुद्धार एव, स्वानच्छेदकानवच्छिन्नत्वस्य स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वरूपत्वे तद्वारणेऽपि प्रागुक्तसाध्यात्मकविशिष्टवतस्साध्यतायां प्रागुक्तयुक्त्याऽव्याप्तेरनुद्धार एव। तद्वारणायोक्तवैशिष्टस्य स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वैतत्त्रितयसम्बन्धेन[१] विवक्षणेऽनवस्थाप्रसङ्ग इति चेत् अत्रोच्यते साक्षात्परम्परासाधारणनिरूपितत्वमङ्गीकृत्यावच्छेदकतावत्त्वनियामकस्वानवच्छेदकानवच्छिन्नत्वस्य स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वसम्बन्धावच्छिन्नस्वाभाववत्त्वरूपत्वोक्तौ न दोषावकाशः । वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वावच्छेदकसंम्बन्धावच्छिन्नत्वोभयसम्बन्धेन । यत्तु स्वानवच्छेदकानवच्छिन्नत्वस्य स्वसामानाधिकरण्येन स्वावच्छेदकताविशिष्टान्यावच्छेदकत्वानिरूपितत्वरूपत्वे प्रमेयसाध्यतावच्छेदकतावच्छेदकस्थले स्वनिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वाप्रसिद्धिस्स्यादिति स्वानवच्छेदकानववच्छिन्नत्वस्य वैशिष्ट्यघटकतयोपादानमावश्यकमेवेत्यनवस्थाप्रसङ्गः । न च स्वसाजात्यमेव वैशिष्ट्यघटकं तथा सति निरवच्छिन्नावच्छेदकत्वे विशिष्टान्यत्वप्रसिद्धिः । साजात्यञ्च सावच्छिन्नत्वंनिरवच्छिन्नत्वान्यतररूपेण, एवञ्च नानवस्थाप्रसङ्ग इति वाच्यम्, प्रमेयविशिष्टवतस्साध्यतायां घटत्वविशिष्टवदभावमादायाव्याप्त्यापत्तेः, घटत्वत्वावच्छिन्नावच्छेदकतायां विशिष्टान्यत्वविरहादित्येवं केवलस्वानवच्छेदकानवच्छिन्नत्वस्यैवावच्छेदकतावत्त्वनियामकसंसर्गतामभ्युपेत्याप्यनवस्थापादनन्तत्र स्वनिरूपितयत्किञ्चिदवच्छेदकत्वावृत्तित्वसम्बन्धावच्छिन्नस्वाभाववत्त्वस्यैव तद्रूपतया विवक्षायान्तदसम्भवात् । वृत्तित्वञ्च स्वनिरूपितावच्छेदकतासामानाधिकरण्यसम्बन्धेन ।

---

१. स्वरूपतो वह्नित्वविशिष्टसाध्यकस्थले सावच्छिन्नावच्छेदकताकप्रतियोगिताकाभाव वारणाय स्वनिरूपितावच्छेदकताविशिष्टवत्तासम्बन्धेन स्वाभाववदवच्छेदकताकत्वसम्बन्धेन स्वाभाववत्त्वरूपं स्वानवच्छेदकानवच्छिन्नत्वं वाच्यम् । अनेनैव सर्वत्र निर्वाहः ।

एवञ्च घटत्वनिष्ठावच्छेदकतायां स्वनिरूपितप्रमेयत्वनिष्ठावच्छेदकत्वावृत्तित्वस्यैव सत्त्वेन न दोष इत्यलम्।

अथ निरवच्छिन्नात्मत्वादिसाध्यतास्थले साध्यतावच्छेदकाप्रसिद्ध्याऽव्याप्तिरिति चेन्न साध्यवदन्यावृत्तित्वादिरूपव्याप्तेरेव तस्य लक्ष्यत्वात्। यद्वा आत्मत्वत्वातिरिक्तधर्म्मानवच्छिन्नप्रतियोगिताकाभाववदवृत्तित्वस्यैव तत्र व्याप्तित्वादात्मत्वत्वस्य साध्यतानवच्छेदकत्वेऽपि क्षत्यभावात्। शब्दैक्यस्यानुपादेयत्वात्।

केचित्तु साध्यताविशिष्टनिरूपकताकाधिकरणत्वाभाववदवृत्तित्वमेवायमात्माज्ञानादित्यादिस्थलसाधारण्यानुरोधेन व्याप्तिः वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वानवच्छेदकानवच्छिन्नत्व-स्ववृत्तित्वैतच्चतुष्टय-सम्बन्धेन। वृत्तित्वञ्च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन, तथा च न कोऽपि दोष इति।

यत्तु साध्यताविशिष्टावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणत्वाभाववदवृत्तित्वं व्याप्तिः। वैशिष्ट्यञ्च स्वनिरूपितत्वनिरवच्छिन्नस्वसमानाधिकरणासाधारणधर्म्मनिष्ठावच्छेदकतात्वान्यतरसम्बन्धेन। वृत्तित्वञ्च स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन। तथा च अयमात्मा, ज्ञानादित्यत्र तादृशं रूपमात्मत्वनिष्ठतद्व्यक्तित्वगतैकत्वमेव प्रसिद्धमिति न दोष इति, तत्तुच्छम्। पूर्वोक्तदोषेण पर्य्याप्तिघटितकल्पस्यानुपादेयत्वादिति वदन्ति। नन्वत्राधेयत्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वेन तादृशाभावस्य लक्षणत्वेन तस्य च वह्नित्वेतरधर्म्मानवच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकाभाववन्निरूपितवृत्तित्वाभावरूपस्य धूमहेतौ सत्त्वेनाव्याप्त्यभावाद्व्यर्थमेव प्रागुक्तसाध्यतावच्छेदकावच्छिन्नत्वपरिष्करणमिति चेन्न। महानसीयवह्निमान्धूमादित्यत्र वह्नित्वेतरधर्म्मानवच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वेनातिव्याप्त्यापत्तेः। न च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितानुयोगित्वनिष्ठाव

च्छेदकतानिरूपितपर्याप्तिनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वेन तादृशाभावप्रवेशे नोक्तदोष इति वाच्यम् । वह्निमान् महानसीयवह्निविषयकवह्निविषयकज्ञानमहानसीयवह्निविषयकज्ञानान्यतरत्वादित्यत्र वह्नित्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वेनातिव्याप्त्यापत्तेः । तद्वारणायेतरवारकपर्य्याप्तिनिवेशे वृत्तित्वाभावकूटनिवेशे वा वह्निमान्धूमादित्यत्राव्याप्त्यापत्तेरुक्तपरिष्कारस्य सार्थक्यसम्भवादिति । अत एव साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसाध्यनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितवृत्तितात्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वेन तादृशाभावनिवेशोप्यपास्तः । उक्तव्यभिचारिणि महानसीयवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकाभावाधिकरणनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वेनातिव्याप्त्यापत्तेः तद्वारणाय सामान्याभावस्य कूटस्य वा निवेशे, वह्निमान्धूमादित्यत्राव्याप्त्यापत्तेरिति ।

अथ तथाप्युक्तपरिष्कारो व्यर्थः । महानसीयवह्न्यभावस्य ह्रदवृत्तेर्य्यदधिकरणं तन्निरूपितवृत्तित्वाभावस्य महानसीयवह्न्यभावाधिकरणह्रदनिरूपितवृत्तित्वाभावस्य तादृशवृत्तित्वघटोभयाभावस्य च हेतौ सत्त्वेनाव्याप्त्यभावादिति चेन्न । उक्तयुक्त्यैव धूमवान्वह्नेरित्यादावतिव्याप्त्यापत्या वृत्तित्वसामान्याभावस्यैव प्रवेश्यतयाऽव्याप्तिवारणासम्भवात् । न चैवमप्यभावादिनिष्ठावच्छेदकतायान्तादृशप्रतियोगित्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वन्निवेश्यतां प्रतियोगित्वनिष्ठावच्छेदकतायां तु प्रतियोगित्वविशेषणीभूतरूपवृत्तित्वनिष्ठावच्छेदकतानिरूपितत्वमात्रमेव दोषाभावादिति वाच्यम्, (तद्वृत्तित्व) तत्क्षणविशिष्टप्रतियोगिताघटितवृत्तित्वाभावमादायातिव्याप्तेस्तथासत्यवारणात् ।[१] वस्तुतस्तु साक्षात्परम्परासाधारणनिरूपितत्वस्य स्वीकृततया वृत्तित्वनिष्ठप्रतियोगितायामेव प्रतियोगितावच्छेदककोटिप्रविष्टतत्तद्धर्म्मनिष्ठावच्छेदकताभिन्नावच्छेकत्वानिरूपितत्वं प्रवेश्यं लाघवादिति प्रतियोगिताविशेषणधर्म्मावच्छिन्नत्वस्येतरवारकस्य प्रवेश

१. वह्न्यभाववान् धूमाभावादित्यत्र ।

आवश्यक इति। तद्व्यक्तेः स्वरूपतो भानाभ्युपगमे वह्न्यभावप्रतियोगितात्मकतद्व्यक्तिवह्न्यभावात्मकतद्व्यक्तिधूमाभावाधिकरणजलात्मकतद्व्यक्तीरादाय धूमवान्वह्नेरित्यत्रातिव्याप्तिवारणायाधिकरणनिष्ठावच्छेदकतापर्य्यन्तन्तदवच्छेदकतानिरूपितत्वं निवेश्यं, वृत्तित्वनिष्ठप्रतियोगितायामवच्छेदकतानिरूपितत्वन्नोपादेयम्। स्वरूपसम्बन्धावच्छिन्नत्वस्य प्रतियोगितायामावश्यकतया ध्वंसीयप्रतियोगितामादाय दोषाप्रसक्तेः। यत्तु प्रतियोग्यंशे उपलक्षणविधया भानस्यापि स्वीकृततया तादृशप्रतीतीयप्रतियोगितामादाय दोष इति। तन्न क्वचिदुपलक्षणविधया भानस्वीकारेऽपि तस्य प्रतियोगितावच्छेदकत्वस्वीकारेण दोषासम्भवात्। परन्तु लक्ष्यमात्रवृत्तेरेव लक्षणत्वे व्याप्तिभिन्ने वृत्तित्वसामान्याभावेऽप्युक्ताभावत्वस्य वृत्तितया तस्य व्याप्तिलक्षणत्वापत्तिभयेनाधिकरणादिनिष्ठावच्छेदकतानिरूपितत्वमुपादेयमेवोक्ताभावत्वेन वृत्तित्वसामान्याभावस्यापि व्याप्तित्वेनोपादेयमेवेत्यवधेयमिति दिक्।

'येन सम्बन्धेन' इति। अथ साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशेऽपि संयोगसमवायोभयसम्बन्धेन वह्निर्नास्तीत्यभावमादायाव्याप्तिः। साध्यतानिरूपितसंसर्गतानवच्छेदकीभूतधर्म्मानवच्छिन्नसंसर्गतानिरूपितत्वनिवेश उक्तदोषवारणेऽपि संयोगत्वसमवायत्वान्यतरवत्सम्बन्धेन वह्निसाध्यकधूमे समवायेन वह्न्यभावमादायाव्याप्तेरनुद्धार इति चेन्न स्वनिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसंसर्गतानिरूपितत्वविवक्षायान्दोषाभावात्। एतेन साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नत्वनिवेशे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य वैयर्थ्यमित्यप्यपास्तमुक्तनिवेशस्योभयपर्य्यवसायित्वात्।

यत्तु रूपवान् पृथिवीत्वादित्यादौ रूपध्वंसीयप्रतियोगितावारणाय तन्निवेश इति, तन्न ध्वंसीयप्रतियोगितायां सामान्यधर्म्मावच्छिन्नत्वे मानाभावेन तस्य लक्षणाघटकत्वादिति एकत्वादेः पर्य्याप्त्यनभ्युपगमपक्षे साध्यतानिरूपितसंसर्गतासमनियतसंसर्गताकत्वं विवक्षितम्। सामनैयत्यञ्च स्वनिरूपितावच्छेदकतावत्त्वसम्बन्धेन। अवच्छेदकतावत्ता च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन। समवायेन साध्यतास्थले स्वरूपत्वावच्छिन्नसंसर्गतामादायाव्याप्तिवारणाय स्वसामानाधिकरण्यनिवेशः। कालिकेन स्वसंयोगवृत्तिसंयोगत्वाश्रयस्य तदवच्छेदकत्वे च समवायेन तादृशसंयोगत्वावच्छिन्नसंसर्गतामादायाव्याप्तिवारणाय स्वावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशः। अत एव

स्वसंयुक्तघटसंयोगवृत्तितद्व्यक्तित्वस्य कालिकेन स्वसंयुक्तवायुसंयोगवृत्तितद्व्यक्तित्वस्य च स्वरूपेणाश्रयस्य संसर्गत्वे विनिमयेन तादृशतद्व्यक्तित्ववत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावमादायाव्याप्तिरित्यप्यपास्तमिति दिक्।

अथ साध्यतावच्छेदकनिष्ठं यत्तन्निरूपकप्रतियोगिताकाभाव एव प्रवेश्यताङ्क्मिवच्छेदकत्वपदोपादानेनेति, चेन्न समवायेन प्रमेयसाध्यकसत्त्वे प्रमेयत्वनिष्ठ- वृत्तितानिरूपकघटाभावीयप्रतियोगितामादायाव्याप्त्यापत्तेः। न च साध्यतावच्छेदकनिष्ठं यत्तन्निरूपितत्वमेव वाच्यमधिकरणे वृत्तितानिरूपकत्वस्यैव सत्त्वेनाव्याप्त्यभावादिति वाच्यम्, घटाभावसाध्यकघटाभावत्वत्वे घटाभावत्वनिष्ठप्रतियोगित्वाभावाभावस्य प्रतियोगितारूपस्य स्वरूपसम्बन्धावच्छिन्नस्य साध्यतावच्छेकनिष्ठतया तन्निरूपितप्रतियोगित्वाभावनिष्ठप्रतियोगिताकाभावाधिकरणे घटाभावत्वे हेतोस्सत्त्वेनाव्याप्त्यापत्तेः। न चावच्छेदकत्वाभावाभावस्यावच्छेदकतारूपस्य घटाभावत्वनिष्ठस्य निरूपिताया अवच्छेदकत्वाभावनिष्ठप्रतियोगिताया निरूपकीभूतस्याभावाधिकरणे हेतोः सत्त्वेनावच्छेदकत्वपदोपादानेऽपि अव्याप्तितादवस्थ्यमिति वाच्यम्, साध्यतावच्छेदकनिष्ठावच्छेदकतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वस्य विवक्षितत्वात्। अवच्छेदकत्वाभावनिष्ठप्रतियोगितात्वेनावच्छेदकत्वाभावाभावत्वेनैव निरूप्यनिरूपकभावेनोक्तदोषासम्भवात्। ननु कालिकसम्बन्धावच्छिन्नघटत्वनिष्ठाधेयत्वेन; कालिकेन विशिष्टस्य तादात्म्येन साध्यतायां घटत्वे सद्धेतौ स्वरूपसम्बन्धावच्छिन्नतादृशवृत्तित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावमादायाव्याप्तिः, अवच्छेदकताया अवच्छेदकस्वरूपतानये स्वरूपसम्बन्धावच्छिन्नावच्छेदकत्वस्यापि कालिकसम्बन्धावच्छिन्नत्वात्। अतः साध्यतावच्छेदकताघटकसंसर्गनिष्ठसंसर्गतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावच्छेदकीभूतावच्छेदकतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वम्विवक्षणीयन्तत्र निरूप्यतावच्छेदकतयावच्छेदकतात्वप्रवेशो विफलः, घटाभावत्वनिष्ठप्रतियोगितात्वस्यैवोक्तनिरूप्यतावच्छेदकत्वेन तस्य प्रतियोगित्वाभावनिष्ठप्रतियोगितानिष्ठनिरूप्यतानिरूपितनिरूपकतानवच्छेदकत्वेन पूर्वोक्ताव्याप्तेरप्रसक्तेरिति चेदवच्छेदकतायाः पदार्थान्तरत्व उक्तरूपेण विवक्षायां प्रयोजनाभावात् अधिकरणस्य चासाधारणधर्म्मपुरस्कारेणानिरूप्यत्वेप्यधिकरणत्वविशिष्टस्य सनिरूपकत्वात्कस्येदमधिकरणमित्याकाङ्क्षादर्शनात्प्रमेयत्वनिष्ठवृत्तितामादाय पूर्वोक्ताव्याप्तेर्दुर्वारत्वाद्वाऽवच्छेदकतात्वमुपादेयमेवेति गृहाण। न च वह्नेर्वह्नित्वावच्छिन्नप्रतियोगित्वाभावानुयोगिकस्ववृत्तिवाच्यत्ववत्त्वादिसम्बन्धेन साध्य-

तायां तादृशाभावनिष्ठतद्व्यक्तित्वे सद्धेतौ वह्नित्वावच्छिन्नप्रतियोगितायाः प्रतियोगित्वाभावाभावात्मिकाया निरूपकस्य प्रतियोगित्वाभावनिष्ठप्रतियोगित्वस्य स्वाभावाभावतयाऽभावस्याधिकरणे हेतोः सत्त्वेनाव्याप्त्या प्रागुक्तनिरूप्यतावच्छेदकीभूतप्रतियोगितात्वघटितधर्म्मावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वस्य विवक्षणीयतया वृत्तित्वनिष्ठनिरूपकतानिरूपितनिरूप्यतावच्छेदकाधिकरणत्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यत्वस्याभावे विरहेण प्रागुक्तदोषाप्रसक्तेर्नोपादेयमवच्छेदकतात्वमिति वाच्यम्, एवं सत्येतल्लाभावयैवावच्छेदकतात्वस्योपादेयत्वात्। वस्तुतस्तूक्तसार्थक्यप्रक्रियाया यथाश्रुतलक्षणाश्रितत्वेन शिष्यबुद्धिवैशद्यमात्रप्रयोजनत्वमेव, सिद्धान्ते पर्य्याप्तिघटितकल्पे सिद्धान्ततमे सामनैयत्यघटितकल्पे च वैयर्थ्यशङ्कापि नास्ति। तथा हि साध्यतानिरूपितत्वावच्छिन्नपर्य्याप्तिप्रतियोगित्वस्य विवक्षितत्वे साध्यतानिरूपितत्वस्य साध्यतात्वनिष्ठाधेयतादौ सत्त्वेन साध्यतानिरूपितत्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदके साध्यतात्वसाध्यतावच्छेदकगतद्वित्वादौ प्रतियोगित्वस्य वृत्तित्वासम्भवेनासम्भवापत्तिः, यत्किञ्चिन्निरूपितत्वविवक्षणे साध्यत्वाभावमादाय महानसीयवह्निसाध्यकस्थले वह्न्यभावादिकमादायाव्याप्त्यापत्तिः, सामनैयत्वघटिते तु स्वनिरूपितत्वस्यैव संसर्गत्वे तेन च सम्बन्धेन साध्यत्वस्य साध्यतात्वनिष्ठवृत्तित्वे सत्त्वेन तत्र प्रतियोगित्वस्य सत्त्वासम्भवेनासम्भवापत्तिरित्युपादेयमेवावच्छेदकतात्वमित्युपरम्यते।

अत्र प्रतियोगित्वानुपादाने वह्नित्वनिष्ठावच्छेदकतात्मकाधिकरणनिरूपिताधेयत्वनिरूपकावच्छेदकतात्मकाभावाधिकरणे वह्नित्वे वह्नित्वत्वस्य वृत्तितयाऽऽधेयतया वह्नौ साध्ये वह्नित्वत्वेऽव्याप्तिः यद्यप्यवच्छेदकतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावच्छेदकीभूतधर्म्मावच्छिन्ननिरूपकत्वविवक्षायान्नसम्भवति, आधेयतात्वेन तादृशावच्छेदकतात्वेन निरूप्यनिरूपकभावविरहात्। तथापि घटाभावस्य साध्यतायां धूमहेतौ घटाभावत्वनिष्ठावच्छेदकतानिरूपितघटाभावत्वावच्छिन्नवृत्तितानिरूपकपटाभावाधिकरणे पर्वतादौ हेतोस्सत्त्वेनाव्याप्तिर्भवत्येवेति प्रतियोगितात्वोपादानम्। सामनैयत्यघटिते पर्याप्तिघटितेऽप्ययमेव दषो बोध्यः। न च प्रतियोगित्वोपादानेऽपि घटाभाववान् घटाभावत्वत्वादित्यादौ तादृशप्रतियोगितानिरूपितावच्छेदकत्वाधिकरणे घटाभावत्वे हेतोः सत्त्वेनाव्याप्तिरतोऽभावत्वावच्छिन्ननिरूपकत्वम्विवक्षणीयन्तथा च प्रतियोगित्वानुपादानेऽपि वृत्तितानिरूपकपटाभावात्मकाधिकरणमादाय न दोष इति वाच्यम्, घटाभावत्वावच्छिन्नवृत्तितानिरूकत्वस्य पटाभावत्वेन सम्भवात्पटाभावस्य वृत्तित्वमिति प्रतीतेः।

न चाभावत्वावच्छिन्ननिरूपितत्वमेव विवक्षणीयं पटाभावस्याधिकरणत्वेनैव वृत्तितानिरूपितत्वाददोष इति वाच्यम्, अभावे प्रतियोगित्वनिरूपकत्वस्यैव स्वीकारेऽसम्भवापत्तेरिति ध्येयम् ।

अथ प्रतियोगितानिरूपकत्वेनैवाभावः प्रवेश्यतामभावत्वेन तत्प्रवेशो व्यर्थ इति, चेन्न वह्नित्वावच्छिन्नप्रतियोगितानिरूपकावच्छेदकत्वाधिकरणे वह्नित्वे वह्नित्वत्वस्य वृत्या वह्निमान्वह्नित्वत्वादित्यत्राव्याप्तेः अवच्छेदकत्वस्यावच्छेदकत्वाभावाभावत्वेऽपि प्रतियोगितानिरूपकतावच्छेदकाभावत्वावच्छिन्नाधिकरणत्वस्य प्रवेशात्प्रतियोगितानिरूपकत्वविशिष्टाभावत्वावच्छिन्नाधिकरणत्वस्य वा प्रवेशाद्दोषासम्भवादिति । यद्वा घटाभावस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य स्वरूपेण साध्यतायां घटत्वे सद्धेतौ घटाभावत्वावच्छिन्नप्रतियोगितानिरूपकानुयोगित्वाधिकरणे घटे हेतोस्सत्त्वेनाव्याप्त्याभावत्वेनाभावप्रवेश इति बोध्यम् ।

यत्तु तत्सम्बन्धावच्छिन्नाधेयत्वतत्संसर्गप्रतियोगित्वयोरैक्यपक्षमाश्रित्य संसर्गीयप्रतियोगितानिरूपकस्वाधिकरणत्वादिरूपसंसर्गस्य साध्यवत्ताबुद्धिविरोधिघटकस्वरूपेणाधिकरणे पर्वते स्वाधिकरणत्वसम्बन्धेन वह्निसाध्यकधूमहेतोर्वृत्याऽव्याप्तिरतोऽभावत्वेनाभावप्रवेश इति, तन्न; आधेयतानिष्ठकालिकसम्बन्धावच्छिन्नाधेयत्वस्य कालिकेन साध्यतायां घटत्वे प्रतियोगितायाः प्रतियोगिस्वरूपत्व आधेयत्वनिष्ठप्रतियोगिताया आधेयतात्मकत्वेन कालिकसम्बन्धावच्छिन्नतया, तन्निरूपकाभाववति घटे हेतोर्वृत्तित्वेनाव्याप्तिरतस्साध्यतानिरूपितसंसर्गतावच्छेदकीभूतधर्म्मावच्छिन्नसंसर्गतात्वावच्छिन्ननिरूप्यतानिरूपितप्रतियोगितात्वावच्छिन्ननिरूपकत्वस्य प्रवेशनीयतया, संसर्गतात्वेन सांसर्गिकप्रतियोगितात्वेन निरूप्यनिरूपकभावविरहेणाभावपदार्थप्रवेशमन्तराव्याप्तिविरहादिति ।

अथ साध्याभावाधिकरणत्वं सम्बन्धसामान्येन सम्बन्धविशेषेण वा नाद्यः कालिकेन वह्न्यभावाधिकरणे पर्वते धूमस्य वृत्या वह्निमान्धूमादित्यत्राव्याप्त्यापत्तेः । न द्वितीयः तद्धि न स्वरूपं, घटत्वाभाववान् पटत्वादित्यत्राव्याप्त्यापत्तेः, नाप्यत एव संयोगः, नापि समवायः, घटाधिकरणत्वाभाववान् तद्व्यक्तित्वादित्यत्राव्याप्तेः । अत्र केचिदभावाभावस्यातिरिक्तत्वे स्वरूपेण साध्याभावाधिकरणत्वविवक्षायां न दोष इत्याहुः । अन्ये तु घटत्वाभावाभावस्य घटत्वरूपत्वेऽपि घटत्वत्वेनैव स्वरूपेण विरोधस्सत्तायां न तु घटत्वाभावाभात्वेन, तथा च साध्याभावत्वावच्छिन्नस्य स्वरूपेणाधिकरणत्वविवक्षायान्न दोष इति वदन्ति । ये तु स्वरूपसमवायान्यतरसम्बन्धेन साध्याभावाधिकरणत्वविवक्षायान्न दोषः, न च

संयोगसम्बन्धावच्छिन्नघटाभावे साध्ये कपालत्वहेतौ घटात्मकसाध्याभावस्य समवायेनाधिकरणे कपालत्वस्य वृत्तित्वादव्याप्तिरिति वाच्यम्, तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाभावत्वावच्छिन्नस्य तेनैवाधिकरणत्वस्वीकारेणोक्तदोषासम्भवात्। न चान्यतरसम्बन्धेन तदवच्छिन्नाधिकरणत्वाप्रसिद्धिरिति वाच्यम्, संयोगस्वरूपसमवायान्यतमसम्बन्धेनाधिकरणत्वस्य विवक्षितत्वादिति मन्यन्ते, तेषां कालिकसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वाभावे साध्य आत्मत्वे साध्याभावत्वावच्छिन्नाधिकरणत्वाप्रसिद्ध्या कालिकसम्बन्धघटितान्यतमसम्बन्धोपादाने वह्निमान्धूमादित्यादौ चाव्याप्तिर्दुरुद्धरैवेति बोध्यम्।

नव्यास्तु साध्यवत्ताबुद्धिविरोधिताघटकसम्बन्धेन साध्याभावाधिकरणत्वोक्तौ न कोऽपि दोषः। साध्यवत्ताबुद्धिविंरोधित्वञ्च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रकारतानिरूपितकिञ्चिद्धर्म्मावच्छिन्नविशेष्यताकग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वम्बोध्यम्।

न च तादृशप्रकारत्वावच्छिन्नप्रतिबध्यत्वमेवोच्यतामलं व्यापकत्वप्रवेशेनेति वाच्यम्, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वाधिकरणत्वाभावसाध्यकस्थले स्वरूपेण तादृशात्मत्वाधिकरणत्वाभावगगनत्वोभयाभाववद्वह्नित्वमित्यादिनिश्चयप्रतिबन्धकतानिरूपिताया एकत्र द्वयमितिज्ञानसाधारणप्रतिबध्यतायास्तादृशप्रकारित्वावच्छिन्नत्वेन स्वरूपस्यापि विरोधिताघटकसम्बन्धत्वेनाव्याप्त्यापत्तेः, प्रतिबध्यता च साध्यतावच्छेदकविशिष्टविषयकग्रहत्वाव्यापिका ग्राह्या, नातो वह्निमत्पर्वतकालीनात्मत्वाधिकरणत्वाभावसाध्यकस्थले स्वरूपसम्बन्धमादायाव्याप्तिरिति।

वस्तुतस्तादृशप्रतिबन्धकतावच्छेदकप्रकारताविशिष्टसाध्याभावत्वावच्छिन्ननिरूपकत्वमवश्यं वाच्यम्, वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वावच्छेदकीभूतधर्म्मावच्छिन्नत्वोभयसम्बन्धेन। तथा च पूर्वोक्तदोषद्वयस्यासम्भवेन तादृशग्रहत्वव्यापकत्वमव्यापकत्वञ्च न विवक्षणीयम्। अत एव कालिकेन वह्न्यभावव्याप्यधूमस्य कालिकेन बुद्धेः प्रतिबन्धकतया तदवच्छेदककालिकसम्बन्धावच्छिन्नसाध्याभावत्वावच्छिन्ननिरूपकताकाधिकरणत्वमादाय न दोषः, निरूपकतायां साध्याभावत्वावच्छिन्नत्वप्रवेशाद्घटस्य प्रतियोगितया साध्यतायां घटाभावत्वे हेतौ पटाभावः प्रतियोगितया घटवानिति बुद्धिप्रतिबन्धकीभूतस्य पटाभावे घटाभाव इति ज्ञानस्य या प्रकारता तद्विशिष्टस्वरूपसम्बन्धावच्छिन्नाधेयत्वस-

म्बन्धावच्छिन्नपटाभावत्वावच्छिन्ननिरूपकताकाधिकरणतावति घटाभावे हेतोः सत्त्वेऽपि नाव्याप्तिः।

न च प्रकारतायामाधेयत्वसम्बन्धानवच्छिन्नत्वम्वाच्यमिति वाच्यमाधेयत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावसाध्यकस्थले तादृशाभावाभावत्वावच्छिन्नस्यान्यसम्बन्धेन सत्ताविरहेणाव्याप्त्यापत्तेः। न च स्वावच्छेदकधर्मावच्छिन्नत्वम्विहाय स्वसामानाधिकरण्यस्यैवास्तु सम्बन्धतेति वाच्यम्, घटवृत्तित्वाभावस्य कालिकसम्बन्धावच्छिन्नाभावे साध्य आत्मत्वे साध्यवान् घट इति प्रतिबन्धकीभूतायास्साध्यं घटावृत्तीति बुद्धेर्या स्वरूपसम्बन्धावच्छिन्नघटवृत्तित्वाभावत्वावच्छिन्नप्रकारता तद्विशिष्टनिरूपकतामादायाव्याप्त्यापत्तेः, स्वावच्छेदकधर्म्मावच्छिन्नत्वमपि पर्य्याप्तिगर्भं वाच्यम् अन्यथाऽनुपदोक्तस्थले महानसीयवह्न्यादिसाध्यकस्थले च कालिकेन वह्निसामान्याभावव्याप्यमहानसीयवह्न्यभाववानिति प्रतिबन्धकज्ञानीयप्रकारतामादायाव्याप्त्यापत्तेः। प्रतिबध्यता च साध्याभावविषयत्वानवच्छिन्ना ग्राह्या नातो विषयतात्वसाध्यकप्रकारतात्वे सद्धेतौ विषयतात्वाभावो विषयतात्ववानिति बुद्धिप्रतिबन्धकस्य विषयतात्वाभावे विषयतात्वाभाव इति ज्ञानस्य या स्वरूपसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नविषयतात्वाभावत्वावच्छिन्नप्रकारतातामादायाव्याप्त्यापत्तिः। प्रतिबन्धकतावच्छेदकता च प्रकारतात्वावच्छिन्ना वाच्या, तेन ह्रदवृत्तिवह्न्यभाववान् कालिकेन पर्व्वत इति[1] ज्ञानीयाया ह्रदवृत्तित्वप्रकारतानिरूपितविशेष्यतात्वेन प्रतिबन्धकतावच्छेदिकायाः कालिकसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारतायाः कालिकसम्बन्धावच्छिन्ननिरूपकतायां सत्त्वेपि न वह्निमान्धूमादित्यत्राव्याप्तिः। प्रकारता चावच्छेदकतानात्मिकात्र विवक्षिता। नातो वह्नेः साध्यतायान्तद्वह्नित्वे सद्धेतौ वह्न्यभावव्याप्यवत्तानिश्चयप्रतिबन्धकतावच्छेदकप्रतियोगित्वसम्बन्धावच्छिन्नवह्न्यभावत्वावच्छिन्नप्रकारतामादायाव्याप्तिः तादृशप्रकारताया अवच्छेदकतात्वेनावच्छेदकत्वपक्षेऽवच्छेदकतानात्मकत्वन्नोपादेयम्। प्रतिबन्धकता च ज्ञानवैशिष्ट्यानवच्छिन्ना ग्राह्या तेन कालिकेन[2] वह्न्यवभाववान् स्वरूपेण वह्न्यभाववानिति निश्चयविशिष्टस्य कालिकेन वह्न्यभाववानिति निश्चयस्य प्रतिबन्धकत्वेऽपि न क्षतिः।

---

१. 'तेन कालिकेन; पर्वतः, ह्रदवृत्तिवह्न्यभाववान् इति ज्ञानीयाया' इत्येवमन्वयः।
२. स्वरूपेण वह्न्यभाववान् कालिकेन वह्न्यभाववानिति प्रकाशितपुस्तके पाठः।

अथ महानसीयवह्निसाध्यकतद्धूमहेतुकस्थले वह्न्यभाववदभाववत्कालीन घटो महानसीयवह्निमानिति बुद्धौ तादृशघटः कालिकेन महानसीयवह्न्यभाववानित्यस्य प्रतिबन्धकतया तदीयप्रकारतामादायाव्याप्तिः। न च तन्निश्चयविशिष्टनिश्चयत्वेनैव प्रतिबन्धकत्वं तादृशघटत्वावच्छिन्नविशेष्यतानिरूपिताभावत्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबन्धकत्वसम्भवे निश्चयविशिष्टनिश्चयत्वेन प्रतिबन्धकत्वे मानाभावात्। न च साध्याभावविषयत्वावच्छिन्नत्वेन प्रतिबध्यत्वस्य वारणं वह्न्यभावस्यासाध्याभावत्वात्। साध्यप्रतियोगिकाभावनिवेशे वह्न्यभावकालीनमहानसीयवह्निसाध्यकस्थले महासीयवह्न्यभावकालीनवह्निसाध्यकस्थले चाव्याप्त्यापत्तेरिति, चेन्न तादृशप्रतिबन्धकतावच्छेदकताविशिष्टनिरूपकताया विवक्षितत्वात्। वैशिष्ट्यञ्च स्वाश्रयावच्छेदकसम्बन्धावच्छिन्नत्वस्वनिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वोभयसम्बन्धेन। तथा सत्यभावत्वावच्छिन्नप्रकारतात्वावच्छिन्नावच्छेदकतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकाभावत्वगतैकत्ववृत्तित्वस्य निरूपकतायां विरहेणाव्याप्त्यसम्भवात्।

यद्वा साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं प्रतिबध्यतायान्निवेशनीयम्। वृत्तित्वञ्च स्वनिरूपितप्रकारत्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन तथा चोक्तप्रतिबध्यताया उक्तसम्बन्धेन वह्नित्वगतैकत्व एव वृत्तित्वन्न तु महानसीयत्ववह्नित्वगतद्वित्व इति न दोषः। एवम्, साध्यवत्ताग्रहप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकप्रकारतावच्छेदकसम्बन्धावच्छिन्नत्वविवक्षयैवोक्तदोषो वारणीयः। एतस्य च परिष्कारः स्वयमुह्यः। एतेन महानसीयवह्निव्यापकाभाववदभाववत्कालीनघटधर्म्मिकमहानसीयवह्निमत्ताबुद्धिप्रतिबन्धकतामादायाव्याप्तिरुक्तविवक्षायामप्यनिवार्य्येति निरस्तम्। अथवा साध्याभावविषयत्वानवच्छिन्नत्वं परित्यज्यैकत्ववृत्तिविशेष्यत्वावच्छिन्नत्वस्य प्रतिबध्यत्वविशेषणतया विवक्षायान्न कोऽपि दोष इति। न च घटभिन्नङ्कपालत्वादित्यत्र साध्याभावस्य घटरूपस्य विरोधिताघटकसमवायेनाधिकरणे कपाले हेतोर्वृत्त्याऽव्याप्तिरिति वाच्यम्, तस्य घटस्वरूपत्वेऽपि घटभेदाभावत्वावच्छिन्नाधिकरणताया घट एव स्वीकारेण दोषासम्भवादिति प्राहुः।

परे तु साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वे सति साध्यतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनु-

योगितावच्छेदकरूपवृत्तिसंसर्गताकप्रतियोगिताकाभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरणत्वविवक्षायान्न दोषः। वृत्यन्तमात्मत्वप्रकारकप्रमाविशेष्यत्वस्य कालिकेनाभावस्य स्वरूपेण साध्यतायामात्मत्वे कालिकसम्बन्धावच्छिन्नसाध्याभावस्य स्वरूपेणाभावस्य साध्यात्मकतया तत्प्रतियोगितावच्छेदकस्वरूपेण साध्याभावाधिकरणे हेतोर्वृत्याऽव्याप्तिवारणाय विशेष्यत्वाभावसाध्यकस्थले तादृशप्रतियोगितावच्छेदको यो यः सम्बन्धस्तत्तत्सम्बन्धेन साध्याभावाधिकरणत्वविवक्षणे स्वरूपकालिकाभ्यां विशेष्यत्वाधिकरणे जन्यआत्मत्वहेतोरवृत्याऽव्याप्तिविरहाद्विशेष्यत्व-आत्मत्वप्रकारकप्रमानिरूपितत्वनिवेशनम्, तथा सति तस्योभयसम्बन्धेनाधिकरणत्वाप्रसिद्ध्यैवाव्याप्तिसम्भवः। अथात्मानुयोगिकस्वरूपसम्बन्धावच्छिन्नसाध्याभावस्यात्मत्वप्रकारकप्रमाविशेष्यतानात्मकतया तदभावस्य स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्यात्मानुयोगिकस्वरूपेण वृत्तिमत्साध्यस्वरूपतया तदवच्छेदकस्वरूपमादायात्मत्वप्रकारकप्रमाविशेष्यत्वाभाववानात्मत्वादित्यत्राव्याप्त्या तद्घटासमानकालीनघटस्य कालिकेन योऽभावस्तस्य तद्घटानुयोगिकस्वरूपेण साध्यतायान्तद्घटत्वे स्वरूपेण साध्याभावस्योक्तघटस्वरूपतया कालिकेन तदभावस्य साध्यात्मकस्य प्रतियोगितावच्छेदकेन कालिकेन साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभावस्य तद्घटसमानकालीनपदार्थान्तरवृत्तितयाऽतिरिक्तस्याधिकरणे हेतोर्वृत्याऽव्याप्त्या च रूपवृत्तिसंसर्गताकत्वमवश्यं विवक्षणीयम्, तथा चात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य स्वरूपेणाभावस्योक्तविशेष्यत्वरूपतया स्वरूपेण तदभावस्य सर्वथात्मावृत्तेस्साध्यस्वरूपत्वविरहेणाव्याप्त्यभावात् साध्यप्रतियोगिकत्वनिवेशनम्व्यर्थमिति, चेन्न कालिकेन घटाभावस्य यः कालिकेनाभावस्तस्य कालिकेन साध्यतायां जन्यत्वहेतावव्याप्तेः, साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभाववृत्तिसाध्यनिरूपितप्रतियोगितावच्छेदकेन कालिकेन साध्याभावाधिकरणे जन्यत्वहेतोर्वृत्तेः। न चैवमपि रूपवृत्तिप्रतियोगिताकत्वनिवेशनम्व्यर्थमिति वाच्यम्, आत्मवृत्तित्वविशिष्टोक्तविशेष्यत्वाभावस्य यस्स्वरूपेणाभावस्तस्यातिरिक्तस्य स्वरूपेणाभावस्य आत्मवृत्तित्वविशिष्टोक्तविशेष्यत्वाभावरूपत्वेन साध्यतया तत्प्रतियोगितावच्छेदकस्वरूपमादायात्मत्वप्रकारकप्रमाविशेष्यत्वाभाववानात्मत्वादित्यादौ तद्घटवृत्तितद्घटासमानकालीनघटाभावस्य स्वरूपेण साध्यतायां तद्घटत्वे शुद्धतादृशघटाभावाभावस्य तादृशघटरूपतया कालिकेन तदभावात्मकसाध्यप्रतियोगितावच्छेदककालिकमादायाव्याप्त्यापत्तेश्चेति।

यत्तु प्रतियोगित्वोपादानमनर्थकमिति, तन्न तादृशरूपवृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावत्वावच्छिन्नवृत्तितानिरूपकस्य कालिकसम्बन्धावच्छिन्नसाध्याभावस्य स्वरूपेणाभावात्मकसाध्यप्रतियोगितावच्छेदकस्वरूपमादायाव्याप्त्यापत्तेः न चैवमप्यभावत्वेन अभावप्रवेशो व्यर्थ इति वाच्यम्, कालिकेनावच्छेदकत्वाभावस्य कालिकेन साध्यतायां, जन्यत्वे तादृशप्रतियोगितानिरूपकावच्छेदकतावृत्तिसाध्यनिरूपितप्रतियोगितावच्छेदककालिकसम्बन्धेन साध्याभाववति हेतोर्वृत्त्याऽव्याप्त्यापत्तेः। अथ कालिकेन प्रमेयाभावस्य कालिकेन साध्यतायां जन्यत्वहेतौ साध्यनिरूपितप्रमेयत्वावच्छिन्नप्रतियोगिताया निखिलप्रमेयवृत्तेस्साध्याभाववृत्तितया तदवच्छेदककालिकमादायाव्याप्तिरभावोपादानेऽपि दुर्वारैवेति, चेन्मैवम् अभावोपादाने साध्याभावत्वसमनियतप्रतियोगिताकत्वस्य विवक्षितुं शक्यतयोक्तदोषवारणसम्भवादन्यथा तादृशप्रतियोगिताकत्वस्यावच्छेदकत्वादिसाधारणतया तत्समनियतप्रतियोगित्वाप्रसिद्ध्याऽसम्भवापत्तेः। न च प्रमेयाभावसाध्यकस्थलीयदोषस्य व्याप्यत्वविवक्षयापि वारणसम्भवेन व्यापकत्वनिवेशे प्रयोजनाभावादभावत्वप्रवेशो व्यर्थ इति वाच्यम्, समवायसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य स्वरूपेण साध्यतायां जातित्वादिहेतावव्याप्त्यापत्तेः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य यः स्वरूपेणाभावस्तस्यापि साध्यरूपतया तदीयप्रतियोगित्वस्य केवलान्वयिनः साध्याभावत्वस्य व्याप्यतया च तदवच्छेदकस्वरूपेण साध्याभावाधिकरणे हेतोर्वृत्तेः।

यद्वा साध्यसामान्यीयप्रतियोगितायां साध्याभावत्वावच्छिन्नत्वमुपादेयम्। तथा च कालिकेन प्रमेयाभावसाध्यकस्थले न दोषः, कालिकसम्बन्धावच्छिन्नप्रतियोगितायाः साध्याभावत्वानवच्छिन्नत्वात्। न च साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिकत्वावच्छिन्नत्वमेवोच्यतामलमभावत्व प्रवेशेनेति वाच्यम्, तादृशप्रतियोगितात्वावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावंत्संसर्गतालाभार्थत्वात्। तदप्रवेशे विशेष्यत्वाभावस्य स्वरूपसम्बन्धेन साध्यतायामात्मत्वे स्वाभाववत्त्वसंसर्गीया या साध्याभावत्वावच्छिन्ना प्रतियोगिता तस्यास्तत्संसर्गेण साध्यात्मकेन निरूपिततया तत्सम्बन्धावच्छिन्नाधेयतारूपतया च तदवच्छेदकस्वाभाववत्त्वसम्बन्धेन साध्याभावाधिकरणे हेतोर्वृत्तित्वात्। अत्यन्ताभावत्वनिरूपितत्वोपादाने संसर्गीयप्रतियोगितामादायोक्तदोषासम्भवेऽपि अत्यन्ताभावत्वसाध्यकतद्व्यक्तित्वे सद्धेतौ साध्याभावनिष्ठा या स्वाभाववत्त्वस-

सर्गीयप्रतियोगिता तामादायाव्याप्तिः, प्रतियोगित्वाधेयत्वादीनामाश्रयात्मकत्वेनै-कत्वे वह्निनिष्ठसंयोगसम्बन्धावच्छिन्नप्रतियोगित्व-कालिकसम्बन्धावच्छिन्ना- धे-यत्वयोरैक्येन कालिकस्य प्रतियोगितावच्छेदकसंसर्गत्वेनाव्याप्तिश्च दुर्वारा स्यादित्यवधेयम् ।

अथ घटभिन्नं पटत्वादित्यत्र साध्याभावस्य घटत्वस्वरूपतया तद्वृत्तिभेदीय-प्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिः । साध्याभावस्य घटात्मकत्वे प्रतियोगित्वप्रसिद्धा-वपि तदवच्छेदकतादात्म्येन घटत्वात्मकसाध्याभावस्याधिकरणे घटत्वत्वस्य वृत्त्याऽव्याप्त्यापत्तिर्घटभिन्नं घटत्वत्वादित्यादाविति चेन्न धर्म्मिभेदधर्म्मात्यन्ताभा-वयोरैक्यस्वीकारेण घटत्वनिष्ठप्रतियोगिताया अपि भेदनिरूपितत्वसम्भवात् । न च घटभिन्नं घटत्वत्वादित्यत्राव्याप्तितादवस्थ्यमिति वाच्यम्, अत्यन्ताभावत्वनिरू-पितत्वेन प्रतियोगित्वस्य विशेषणीयत्वात् । अथैवमपि घटभिन्नं कपालत्वादित्य-त्रात्यन्ताभावत्वनिरूपितप्रतियोगितावच्छेदकसमवायेन घटात्मकसाध्याभावाधि-करणे कपाले कपालत्वहेतोर्वृत्तितयाऽव्याप्त्यापत्तिः, न च साध्याभावत्वावच्छिन्न-निरूपकतायां तादृशप्रतियोगिताविशिष्टत्वं स्वसामानाधिकरण्यस्वावच्छेदकसम्ब-न्धावच्छिन्नत्वोभयसम्बन्धेन वाच्यम्, तथा च घटत्वनिष्ठसमवायसम्बन्धावच्छिन्न-प्रतियोगिताविशिष्टत्वस्य घटनिष्ठनिरूपकतायाम्विरहान्ना- व्याप्तिः । एवं साध्या-भावस्य घटघटत्वोभयात्मकत्वेऽपि तादात्म्यावच्छिन्नायास्समवायावच्छिन्नाया वा घटभेदाभावत्वावच्छिन्ननिरूपकताया निरूपितमधिकरणत्वं घट एव कपालादिषु घटभेदो नास्तीत्यप्रत्ययात् । तथा च विनाप्युक्तनिवेशम्वारणसम्भव इति वाच्यम्, अत्यन्ताभावत्वनिरूपितत्वस्य व्यर्थत्वापत्तेरिति चेन्न ।

अभावाभावस्य प्रतियोगिरूपत्वस्यापि दर्शनाद्घटस्य तादात्म्येन साध्यतायां घटभेदाभावस्य घटानात्मकत्वे साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वाप्र-सिद्ध्याऽव्याप्तेश्च घटभेदाभावस्य घटस्वरूपत्वेऽपि लाघवाद्घटभेदाभावत्वाव-च्छिन्नाधिकरणतानिरूपकत्वस्य घटत्वे एव स्वीकरणीयत्वात् । तथा च न घटाधिकरणतामादाय घटभिन्नं कपालत्वादित्यत्राव्याप्तिप्रसक्तिः न वात्यन्ताभाव-त्वनिरूपितत्ववैयर्थ्यं यदि चात्यन्ताभावत्वभेदत्वयोर्विरुद्धत्वेऽत्यन्ताभावत्वनिरू-पितप्रतियोगितायाम्भेदात्मकसाध्यनिरूपितत्वासम्भवः एवम् भेदाभावस्य भेदप्रतियोगितत्वावच्छेदकान्यतररूपताया एव सिद्धान्तत्वेन तादात्म्येन घटविशिष्टभेदसाध्यकस्थले भेदाभावस्योभयथैव घटरूपतया तदत्यन्ताभावस्य

साध्यानात्मकत्वेनात्यन्ताभावत्वनिरूपितसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तिरिति विभाव्यते तदा साध्याभावत्वसमनियतं साध्याभावत्वावच्छिन्नम्वा यदत्यन्ताभावत्वनिरूपितं साध्यनिरूपितप्रतियोगित्वं यच्च साध्याभाववृत्तिभेदत्वनिरूपितसाध्यनिरूपितप्रतियोगितावच्छेदकत्वं तदन्यतरविशिष्टसाध्याभावत्वावच्छिन्ननिरूपकत्वम्विवक्षणीयम्, वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन। एवञ्च घटभिन्नं घटत्वत्वाद्घटभिन्नं कपालत्वादित्यत्र घटत्वनिष्ठतादात्म्यावच्छिन्नघटनिष्ठसमवायावच्छिन्ननिरूपकत्व आदाय नाव्याप्तिः, भवति च तादात्म्यावच्छिन्ना घटत्वनिष्ठा निरूपकतापि तादृशीत्यत्यन्ताभावत्वनिरूपितत्वप्रवेशः। तथा च भेदप्रतियोगितानिरूपितसमवायावच्छिन्नावच्छेदकतैव घटभेदाभावाभावस्य घटभेदानात्मकत्वेऽपि साध्याभाववृत्तिरिति न दोषः। कालिकेन घटविशिष्टस्य समवायावच्छिन्नाभावस्य साध्यत्वे गुणत्वादौ कालिकेन घटविशिष्टात्मकसाध्याभावस्य घटस्यापि स्वरूपतया तद्वृत्तिसाध्यनिरूपितप्रतियोगितावच्छेदकताघटककालिकमादायाव्याप्तिवारणाय भेदत्वनिरूपितत्वं प्रतियोगिताविशेषणम्। साध्यतावच्छेदकगतरूपवृत्तिसाध्यतानिरूपितसंसर्गतावच्छेदकगतरूपवृत्तिसंसर्गताकप्रतियोगिताकाभाववृत्तित्वप्रवेशफलं पूर्ववदेव। इयाँस्तु विशेषो यत्तत्र तदत्यन्ताभावाभावमादायात्र तदत्यन्ताभाववद्भेदमादायेति। न च कालिकेन प्रमेयवद्घटभेदस्य साध्यतायां सद्धेतौ कालिकसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नावच्छेदकतामादायाव्याप्तिरिति वाच्यम्, साध्याभावत्वावच्छिन्नाधिकरणतायाः कालिकेनापि घटत्व एव सत्त्वात्। समवायेन घटत्वाधिकरणवृत्तित्वविशिष्टप्रमेयस्यैव साध्याभावत्वात् उभयस्य साध्याभावरूपत्वे तु तादृशावच्छेदकतात्वव्यापकत्वतादृशप्रतियोगितावत्त्वान्यतरवदधिकरणावृत्तित्वमेव व्याप्तिः, व्यापकता च स्वनिष्ठाधिकरणतानिरूपितसाध्याभावत्वावच्छिन्ननिरूपकतावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन, प्रतियोगितावत्ता च स्वावच्छेदकसम्बन्धावच्छिन्नसाध्याभावाभावावच्छिन्ननिरूपकताकाधिकरणतावत्त्वसम्बन्धेन। तथा च नाव्याप्तिरिति। एतेन कालिकसम्बन्धेन प्रमेयविशिष्टभेदस्य विषयितया साध्यतायान्तज्ज्ञानत्वे प्रमेयनिष्ठावच्छेदकताघटककालिकमादायाव्याप्तिरित्यपास्तम्। तादृशावच्छेदकतात्वस्य स्वरूपसम्बन्धावच्छिन्नावच्छेदकतायामपि सत्त्वेन तत्र साध्याधिकरणज्ञानस्यासत्त्वात्। यद्वा अवच्छेदकतायां साध्याभावत्वसमनियतत्वं प्रवेश्यं कालिकावच्छिन्नावच्छेदक-

ताया अतादृशत्वान्नाव्याप्तिरिति कालिकेन प्रमेयविशिष्टघटभेदसाध्यकस्थलाव्याप्तिश्च साध्याभावत्वस्य घटत्वमात्रे स्वीकाराद्वारणीया।

अथ सर्वत्रैव साध्याभाववद्भेदमादाय लक्षणस्य सम्भवात्साध्यनिरूपितप्रतियोगितावच्छेदकताघटकसम्बन्धमात्रमुपादेयं व्यर्थमन्यतरोपादानमिति चेन्न कपिसंयोग्येतत्त्वादित्यत्र शुद्धस्वरूपेण कपिसंयोगाभाववद्भेदस्यालीकत्वान्निरवच्छिन्नस्वरूपेण कपिसंयोगाभाववद्भेदस्य मूलावच्छेदेनापि सत्तया कपिसंयोगस्वरूपत्वादव्याप्तेस्सर्वथैव दुरुद्धरत्वादिति। यद्यप्यतिरिक्ते कपिसंयोगिभेदाभावे कपिसंयोगिभेदनिरूपितप्रतियोगितावच्छेदकत्वन्नास्तीति भवति मतिस्तथाप्यतिरिक्तकपिसंयोगिभेदाभाववद्भेदस्य साध्यीभूतकपिसंयोगिभेदरूपतया तन्निरूपितप्रतियोगितावच्छेदकत्वस्य साध्याभावे सम्भवेन कपिसंयोगिभिन्नं गुणत्वादित्यादौ नाव्याप्तिसम्भवः। नन्वत्र विषयितया वह्नेस्साध्यतायान्तज्ज्ञानत्वेऽव्याप्तिः।

विषयित्वसम्बन्धावच्छिन्नवह्न्यभावाभावत्वावच्छिन्नाधिकरणत्वस्य विषयितया वह्निज्ञानेऽसम्भवात्तज्ज्ञानस्य तादृशाभावत्वेन वह्न्यनवगाहित्वात्स्वरूपेण तस्य सत्त्वम्वाच्यमिति न तस्य वह्निरूपत्वमिति साध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वाप्रसिद्धेरिति, चेन्न विषयितयाव्याप्यव्यापकभावानभ्युपगम एवैतल्लक्षणप्रणयनमित्यभ्युपगमात्। प्रतियोगितायां साध्यसाध्यसमनियतान्यतरन्निरूपितत्वस्य वा विवक्षितत्वात्साध्यसामनैयत्यं स्वरूपेणेति साध्यसमनियतातिरिक्ताभावनिरूपितत्वस्य सत्त्वान्न कोऽपि दोषः पदमादधाति।

अत्रेदमवधेयम्। साध्याभावत्वावच्छिन्नसाध्याभावत्वसमनियतम्वा यत्प्रतियोगित्वं साध्यसामान्यनिरूपितं तद्विशिष्टसाध्याभावत्वावच्छिन्ननिरूपकताविवक्षणीया, वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वसामानाधिकरण्योभयसम्बन्धेन। एवञ्च घटभेदाभावस्य घटत्वरूपस्य तादात्म्येन घटत्वे घटरूपस्य समवायेन कपाले सत्त्वेऽपि तत्तत्सम्बन्धावच्छिन्नतत्तन्निष्ठनिरूपकतायास्तादृश्याः समवायावच्छिन्नघटत्वनिष्ठप्रतियोगितया तादात्म्यावच्छिन्नघटनिष्ठप्रतियोगितया वाऽविशिष्टत्वाद्घटभिन्नङ्कपालत्वाद्घटत्वत्वाद्वेत्यादौ नाव्याप्तिः, तथासत्यत्यन्ताभावत्वनिरूपितत्वस्यापि प्रयोजनविरहेणानिवेशनीयतया समवायेन घटभेदाभावाभावस्य घटभेदास्वरूपत्वेऽपि घटात्मकसाध्याभावनिष्ठभेदीयप्रतियोगितामादायैव घटभेदसाध्यकस्थले लक्षणसङ्गतिः। अत्र निरूपकतायां

साध्याभावत्वावच्छिन्नत्वप्रवेशाद्विशिष्टसत्ताभाववान्गुणत्वादित्यत्र सत्ताभावत्वावच्छिन्ननिरूपकत्वमादाय न दोषः। अथ महानसीयवह्न्यभावाद्यवच्छिन्ननिरूपकतायां साध्यनिरूपितवह्निसामान्याभावनिष्ठप्रतियोगित्वसामानाधिकरण्यविरहेणाव्याप्त्यसम्भवान्निरूपकतायां विवक्षितसाध्याभावत्वावच्छिन्नत्वन्न प्रवेशनीयमिति चेन्निरूपकभेदेन निरूपकतायास्तादृशनिरूपकतानिरूपितत्वेन चाधिकरणताया भिन्नत्वे न प्रवेशनीयम्। प्रतियोगितायान्तत्प्रवेशादेव प्रयोजनस्य वृत्तत्वात्, निरूपकताया निरूपकभेदेन भेदाभावे तु वह्निसामान्याभावसाधारणवह्निनिष्ठप्रतियोगिताकाभावत्वावच्छिन्नंवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वावच्छिन्ननिरूपकत्वादिकमादायाव्याप्तिवारणाय साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितनिरूपकत्वं प्रवेशनीयमेव।

यदि चैवं सति घटभेदाभावत्वावच्छिन्नतादात्म्याद्यवच्छिन्नघटघटत्वसाधारणैकनिरूपकतामादाय घटभिन्नं घटत्वत्वादित्यादावव्याप्तितादवस्थ्यमिति वाच्यं घटे घटत्वरूपत्वाद्धटत्वे च घटत्वत्वरूपत्वाद्घटभेदाभावत्वरूपानुयोगिताया उभयत्रैक्यमस्वीकृत्याभावत्वव्याप्यानुयोगितावच्छिन्नत्वं प्रतियोगितायां निरूपकतायाञ्च निवेशीनीयम् उभयावृत्तिधर्म्मावच्छिन्नत्वम्वा वाच्यम् एवञ्च वह्निमान्धूमादित्यादौ पूर्वोक्तयुक्त्या दोषाभावेन उक्तरीत्या निरूपकत्वप्रवेशो न कार्य्यः, किन्त्वनुयोगिताविशेषावच्छिन्ननिरूपकतायाम्विशिष्टसत्ताभाववान् गुणंत्वादित्यत्राव्याप्तिवारणाय साध्यनिष्ठप्रतियोगितानिरूपकत्वावच्छिन्नत्वं प्रवेशनीयमिति विभाव्यते तदाऽनुयोगित्वविशेषावच्छिन्नत्वप्रवेशार्थमेव तादृशनिरूपकतोक्तिरिति सामानाधिकरण्यानुयोगित्वविशेषावच्छिन्नत्वेऽप्रवेश्य स्वावच्छेदकावच्छिन्नत्वस्य प्रवेशे कृते न वैयर्थ्यशङ्कापीति द्रष्टव्यम्।

साध्यसामान्यीयत्वाप्रवेशे हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावनिवेशस्य वक्ष्यमाणस्यानुसन्धाने समवायेन प्रमेयसाध्यकज्ञानत्वादिहेतुकस्थले कालिकसम्बन्धावच्छिन्नसाध्याभावाभावस्यापि साध्यरूपतया तत्प्रतियोगितावच्छेदककालिकमादायाप्यव्याप्तिः, वक्ष्यमाणस्याननुसन्धाने तु समवायेन प्रमेयसाध्यकद्रव्यत्वप्रकारकप्रमाविशेष्यत्वादिहेतावव्याप्तिर्बोध्या। अथ साध्यसामान्यीयत्वञ्च स्वनिरूपकयावत्साध्यकत्वं स्वानिरूपकयत्किञ्चित्साध्यकभिन्नत्वं वा तदपेक्षया साध्ये साध्यतावच्छेदकसम्ब-

न्धेन वृत्तित्वस्य लघुतया तदेव विवक्षणीयं, कालिकसम्बन्धावच्छिन्नसाध्याभावाभावस्यातिरिक्तस्य समवायेनावृत्तित्वादिति चेन्न कालिकेन प्रमेयस्य साध्यतायां जन्यत्वादिहेतावव्याप्त्यापत्तेः, कालिकसम्बन्धावच्छिन्नसाध्याभावाभावस्यापि कालिकेन वृत्तित्वादित्यलम्पल्लवितेन ।

ननु साध्याभावाधिकरणनिरूपिताभाव एव व्याप्तिरस्तु, किं वृत्तितात्वप्रवेशेनेति, चेन्न वह्न्यभावाधिकरणधूमावच्छिन्नप्रतियोगितानिरूपितावच्छेदकत्वस्य धूमे सत्त्वेनाव्याप्त्यापत्तेः । न च हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य विवक्षितत्वेन नाव्याप्तिसम्भव इति वाच्यम्, तत्सम्बन्धावच्छिन्नाधेयत्वतत्संसर्गीयप्रतियोगित्वयोरेकतया साध्याभावाधिकरणसंयोगप्रतियोगित्वमादायाऽव्याप्त्यापत्तेः । वृत्तितात्वाच्छिन्नप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगितानिवेशे साध्याभावाधिकरणनिरूपितत्वावच्छिन्नस्य तत्सम्बन्धस्य व्यधिकरणत्वेन तत्सम्बन्धावच्छिन्नतदभावस्य केवलान्वयित्वेन व्यभिचारिमात्रेऽतिव्याप्त्यापत्तेः । वृत्तितात्वोपादाने तु साध्याभावाधिकरणतावच्छेदकधर्म्मावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावद्वृत्तितात्वावच्छिन्नाभावस्य निवेशेन दोषाभावादिति । अथैवमपि साध्याभावाधिकरणधूमाधिकरणतानिरूपितवृत्तित्वस्यैव हेतौ सत्त्वेनाव्याप्तिः । न चाधिकरणताभिन्नत्वमधिकरणविशेषणमधिकरणताभिन्नं धूमादित्यत्राव्याप्तेः । नापि हेत्वधिकरणताभिन्नत्वं धूमाधिकरणताभिन्नं धूमादित्यत्र दोषात् । नापि साध्याभावाधिकरणनिष्ठाधिकरणतानिरूपितवृत्तित्वस्य लक्षणघटकतासम्भवः, उक्तदोषवारणेऽपि घटभिन्नमधिकरणतात्वादित्यत्र घटनिष्ठाधिकरणत्वस्याधिकरणतात्वाधिकरणत्वेनाधिकरणतानिरूपितवृत्तित्वस्यैव हेतौ सत्त्वेनाव्याप्त्यापत्तेः ।

यद्यप्युक्ताधिकरणताविशिष्टवृत्तित्वस्य लक्षणघटकत्वे नोक्तदोषः, वैशिष्ट्यञ्च स्वनिरूपितत्वस्वाश्रयनिरूपितत्वोभयसम्बन्धेन, तथाप्यवच्छेदकताभिन्नमधिकरणतात्वादित्यत्राधिकरणतात्वनिष्ठवृत्तितायास्सावच्छिन्नत्वेनावच्छेदकतात्मकसाध्याभावाधिकरणनिरूपितत्वस्य तन्निष्ठाधिकरणताया अधिकरणतात्वाधिकरणत्वेन तन्निरूपितत्वस्य च सत्त्वेनाव्याप्त्यापत्तिर्दुरुद्धरेति, उक्ताधिकरणतावैशिष्ट्यं स्वनिरूपितत्वस्वनिष्ठाधिकरणत्वानिरूपितत्वोभयसम्बन्धेन वाच्यम् । एवञ्च न प्रागुक्तदोषाणामवकाशः, अधिकरणतात्वनिष्ठवृत्तितायामधिकरणतानिष्ठाधिकरणतानिरूपितत्वस्य सत्त्वात् । न चैवमप्यवच्छेदकताभिन्नं वाच्यत्वादित्यादावतिव्याप्तिः, वाच्यत्वस्य केवलान्वयित्वेनाधिकरणतानिष्ठाधिकरणत्वेऽपि

सत्त्वेन तन्निष्ठवृत्तितायां स्वनिष्ठाधिकरणत्वानिरूपितत्वविरहादिति वाच्यम्, वृत्तिताया निरूपकभेदेन भिन्नतया साध्याभावाधिकरणावच्छेदकतानिष्ठाधिकरणतानिरूपितवृत्तितायां वाच्यत्वनिष्ठायामवच्छेदकतानिष्ठाधिकरणतानिष्ठाधिकरणत्वानिरूपितत्वस्य सत्त्वात्।

यद्वा साध्याभावाधिकरणतावच्छेदकधर्म्मविशिष्टत्वं वृत्तित्वे विवक्षणीयम्, वैशिष्ट्यञ्च स्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यत्वावच्छेद्यस्वावाच्छिन्नाधिकरणतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वसम्बन्धेन तथा चावच्छेदकत्वस्य अधिकरणतात्वानधिकरणत्वेनावच्छेदकतात्वावच्छिन्नाधिकरणतात्वावच्छेद्यनिरूपकतानिरूपितनिरूप्यताया अवच्छेदकतात्वावच्छिन्ननिरूपकतानिरूपितनिरूप्यत्वानवच्छेद्यत्वात्।

यत्तु साध्याभावाधिकरणवृत्तिवृत्तित्वाभावो व्याप्तिः। वृत्तिता च स्वविशिष्टनिरूपकताकाधिकरणतावत्त्वसम्बन्धेन, वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन। तथा च न प्रागुक्तदोषाणामवकाश इति, तन्न चारु साध्याभावाधिकरणनिष्ठाधिकरणतानिरूपितनिरूपकत्वाभावस्यैव लक्षणत्वसम्भवे तत्परित्यागस्यानौचित्यात्। एवं सत्युक्ताधिकरणताविशिष्टाभावस्यैव व्याप्तित्वमस्तु, पुनर्वृत्तितात्वेन तत्प्रवेशो व्यर्थ एवेति चेत्, अत्रोच्यते साक्षान्निरूपितत्वस्य दुर्निवेशतया साक्षात्परम्परासाधारणन्तद्वाच्यम्। तथा च साध्याभावाधिकरणनिष्ठधूमावच्छिन्ननिरूपकताकाधिकरणतानिरूपितधूमत्वावच्छिन्नावच्छेदकत्वस्यावच्छेदकत्वाधेयत्वयोरवच्छेदकाधेयरूपत्वेनैक्यतया धूमत्वावच्छिन्नवृत्तितारूपस्य हेतौ सत्त्वेनाव्याप्त्यापत्या स्वनिष्ठनिरूपकतानिरूपिताधेयतात्वावच्छिन्ननिरूप्यत्वस्य संसर्गताया वाच्यतया तल्लाभार्थमेवाधेयतात्वेन प्रवेश इति। यदि च साध्याभावाधिकरणनिष्ठाधिकरणतानिरूपितनिरूपकत्वाभाव उक्तलक्षणस्य पर्य्यवसानं तदा न वैयर्थ्यशङ्कापि निरूपकतात्वेनाप्रवेशे घटभिन्नमधिकरणतात्वादित्यत्र घटनिष्ठाधिकरणतानिरूपितवृत्तित्वस्याधिकरणतात्वे सत्त्वेनाव्याप्त्यापत्तेरिति दिक्।

अथ साध्याभावाधिकरणनिरूपितवृत्तितात्वावच्छिन्नप्रतियोगितानिरूपकवत्त्वमेवास्तु लक्षणमभावत्वेन प्रवेशो व्यर्थ इति, चेन्न घटवृत्तिताभिन्नं वृत्तितात्वादित्यत्रातिव्याप्त्यापत्तेः, उक्तप्रतियोगिताकावच्छेदकत्वस्य वृत्तितात्वे सत्त्वात्। न चावच्छेदकत्वस्याप्यवच्छेदकत्वाभावाभावत्वेनाभावतयाऽतिव्याप्तितादवस्थ्यमिति वाच्यम्, अभावत्वस्य भावभेदरूपतयाऽवच्छेदकत्वे तद्विरहात् तादृशप्रतियो-

गितात्वावच्छिन्ननिरूप्यतानिरूपिताभावत्वावच्छिन्ननिरूपकतावत एव व्याप्तित्वाद्वा । एवञ्च प्रतियोगित्वाभावाभावस्य प्रतियोगितारूपतया तन्निरूपितप्रतियोगित्वस्योक्तप्रतियोगित्वाभावे सत्त्वेऽपि वह्निमान्वह्न्यभावाधिकरणनिरूपितवृत्तितात्वावच्छिन्नप्रतियोगित्वाभावादित्यत्र नातिव्याप्तिः ।

केचिदुक्तस्थलेऽभावत्वेनाप्रवेशेऽपि प्रतियोगितानिरूपकत्वेन प्रवेशादेव नातिव्याप्तिः, प्रतियोगित्वस्याभावनिरूपकत्वाभावादित्यपि वदन्तीति । वृत्तित्वाभावस्य व्याप्तित्वञ्च स्वरूपेण बोध्यम्, तेन क्रियात्मकहेतौ व्यभिचारिणि नातिप्रसङ्ग इति ।

ननु सत्तावान् जातेरित्यत्र सत्ताभाववत्समवेतत्वाप्रसिद्ध्या द्रव्यं विशिष्टसत्त्वादित्यत्र विशिष्टसत्त्वे सत्तानतिरेकेण द्रव्यत्वाभाववद्वृत्तित्वस्य सत्त्वेन चाव्याप्त्यापत्तिरिति, चेन्न प्रकृतहेतुतावच्छेदकावच्छिन्ननिरूपकताकाधिकरणत्वीयहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपेण वृत्तित्वाभावस्य विवक्षितत्वात्, सत्ताभावाधिकरणनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वस्य प्रसिद्धेः, विशिष्टसत्तात्वावच्छिन्नाधिकरणत्वीयवृत्तिताप्रतियोगिकस्वरूपेण सत्तात्वावच्छिन्नवृत्तित्वस्यासत्त्वाच्च दोषाभावात् । हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वञ्च यदि हेतुतानिरूपितसंसर्गतावच्छेदकावच्छिन्नसंसर्गतानिरूपितत्वं तदा धूमसाध्यके महानसीयसंयोगेन वह्नौ संयोगसम्बन्धावच्छिन्नवृत्तित्वस्य साध्याभाववन्निरूपितस्योक्तसम्बन्धेन हेतौ सत्त्वेनाव्याप्त्यापत्तेः । न चोक्तवृत्तित्वाभावान्तर्गतमहानसीयसंयोगसम्बन्धावच्छिन्नवृत्तित्वघटिताभावस्य हेतौ सत्त्वेन नाव्याप्तिरिति वाच्यम्, धूमवान्वह्नेरित्यत्र तद्वह्नीयसंयोगसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपेणोक्तवृत्तित्वाभावस्य वह्नौ सत्त्वेनातिव्याप्त्या हेतुतानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकतानिरूपितसंसर्गत्वनिष्ठावच्छेदकतानिरूपिताधेयत्वनिष्ठप्रतियोगित्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितस्वरूपत्वनिष्ठावच्छेदकतानिरूपितसंसर्गताकप्रतियोगिताकाभावत्वेन निवेशस्याशक्यतयोक्ताधेयत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपितत्वादिघटितरूपेणैव संसर्गताया निवेशनीयतयोक्ताव्याप्तितादवस्थ्यादतो हेतुतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितसंसर्गतानिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितवृत्तितानिष्ठावच्छेदकताभिन्नस्वरूपत्वनिष्ठावच्छेदकताभि-

न्नावच्छेदकत्वानिरूपितत्वेनैव संसर्गतानिवेशनीयेति न दोषः, उक्तावच्छेदकताकत्वनिष्ठानच्छेदकताभिन्नावच्छेदकत्वनिवेशात्संयोगत्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकतानिरूपितघटप्रति-योगिकत्वनिष्ठावच्छेदकतानिरूपितसंसर्गताकवृत्तित्वीयस्वरूपसम्बन्धमादाय धूमवान् वह्नेरित्यत्र नातिव्याप्तिः।

यद्वा हेतुतानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपितावच्छेदकत्वनिष्ठावच्छेदकत्वादिघटितरूपेण संसर्गत्वप्रवेशे न कोऽपि दोषः, महानसीयसंयोगेन सद्धेतौ महानसीयत्वनिष्ठावच्छेदकत्वसंयोगत्वनिष्ठावच्छेदकत्वयोर्द्वयोरेव हेतुतानिरूपितसंसर्गतावच्छेदकत्वसमानाधिकरणत्वेनोक्तावच्छेदकत्वसमानाधिकरणावच्छेदकत्वादस्योभयत्र विरहेण महानसीयत्वनिष्ठावच्छेदकतानिरूपितसंयोगत्वनिष्ठावच्छेदकतानिरूपितसंसर्गताकवृत्तित्वीयस्वरूपत्वावच्छिन्नसंसर्गताया अपि तादृशत्वेन तन्निरूपकप्रतियोगिताकाभावस्य हेतौ सत्त्वाल्लक्षणसमन्वयः। घटीयत्वनिष्ठावच्छेदकताया उक्तावच्छेदकतासमानाधिकरणत्वविरहेण तन्निष्ठावच्छेदकताकसंसर्गतामादाय न दोष इति।

अत्र प्रथम उक्तरूपावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकतानिष्ठावच्छेदकतात्वावच्छिन्नसामान्यभेद एव निवेशनीयः, अन्यथैकावच्छेदकताभेदस्यापरावच्छेदकतायां सत्त्वेनावच्छेदकताद्वयनिरूपितसंसर्गताघटितसंसर्गताया लक्षणघटकत्वेन महानसीयसंयोगेन सद्धेतावव्याप्त्यापत्तेः। अत एव द्वितीयेऽपिहेतुतानिरूपितसंसर्गतावच्छेदकतासमानाधिकरणावच्छेदकतात्वावच्छिन्नसामान्यभेदस्तादृशावच्छेदकत्वनिष्ठावच्छेदकतासामान्यभेदश्च निवेश्यस्तदपेक्षया लाघवेन हेतुतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसमानाधिकरणाधेयत्वसम्बन्धावच्छिन्नावच्छेदकताभिन्नाधेयत्वसम्बन्धावच्छिन्नावच्छेदकतात्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितप्रतियोगिताकभेदत्वेन तद्व्यक्तिनिष्ठावच्छेदकताभेदन्निवेश्य तद्व्यक्तिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपितसंसर्गतानिष्ठावच्छेदकत्वादिघटितरूपेण संसर्गता निवेश्या आधेयता च स्वावच्छेदकताप्रतियोगिकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नै- वेतरवारकप्रवेशे प्रयोजनविरहात्, उक्तपरम्परायाः संसर्गत्वाभावेतूक्तरीत्या निवेशस्याशक्यतया गुरुभूतोऽपि द्वितीयकल्प आदरणीयः। एवमेव हेतुतावच्छेदकावच्छिन्नत्वमपि परिष्कृतम्बोध्यम्, निरूपकतावच्छेदकताया इतरवारकपर्य्याप्तिनिवेशे प्रयोजनाभावादिति।

यदि च वह्निज्ञानत्वसाध्यके प्रकारितया वह्निहेतुकस्थले वह्नित्वगतैकत्वावच्छिन्नानुयोगिताकपर्य्याप्तिकावच्छेदकताकनिरूपकतात्वस्य महानसीयत्ववह्नित्वगतद्वित्ववृत्तिनिरूपकतायामपि सत्त्वेन तन्निरूपिताधिकरणताकवृत्तित्वीयस्वरूपेण साध्याभावाधिकरणनिरूपितमहानसीयवह्नित्वाद्यवच्छिन्नवृत्तित्वस्य वह्निमात्रे सत्त्वादव्याप्तिर्विषयितया हेतुहेतुमद्भावेन च प्रकारितया महानसीयवह्निविषयकज्ञाने कुतो न वह्नेस्सत्त्वं वह्नित्वेतरधर्म्मानवच्छिन्ननिरूपितप्रकारितया हेतुत्वेन तेन सम्बन्धेन महानसीयवह्नेस्सत्त्वमिति कुतो वा व्याप्तिरितिवाच्यम्, संसर्गता हि यद्यपि प्रकारितात्वेनैव तथापि वह्नित्वविशिष्टसंसर्गो वह्नित्वेतरधर्म्मावच्छिन्नानिरूपितप्रकारितैव महानसीयवह्निविषयकज्ञानं प्रकारितया वह्निमदित्यप्रत्ययात्, महानसीयवह्निमदिति ज्ञानानन्तरं वह्निज्ञानामीत्यनुव्यवसायाभावाच्चेति, विभाव्यते तदा हेतुतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपे स्वावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन वृत्तित्वमेव निरूपकतायामुपादेयम् ।

अथोक्तरूपवृत्तिनिरूपकतानिरूपितत्वेनैवाधिकरणतोपादेया अधिकरणतात्वेन तत्प्रवेशो व्यर्थ इति चेत्तस्य स्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वोभयसम्बन्धेनाधिकरणताविशिष्टवृत्तित्वलाभार्थत्वान्न वैयर्थ्यमिति गृहाण । न चोक्तविशिष्टवृत्तित्वोपादाने प्रयोजनाभावः वह्निमान् पर्वतावृत्तित्वविशिष्टवाच्यत्वादित्यत्र साध्याभावाधिकरणस्वरूपत्वावच्छिन्नसंसर्गतानिरूपितत्वावच्छिन्नवृत्तिताया उक्तनिरूपकतानिरूपितसंसर्गतानिरूपितवाच्यत्वत्वावच्छिन्नवृत्तित्वीयस्वरूपेण हेतौ सत्त्वादव्याप्तेर्वारकस्यैव प्रयोजनत्वात् । न च स्वनिष्ठाधिकरणत्वानिरूपितत्वन्न निवेश्यमिति वाच्यम्, साध्याभावाधिकरणोक्ताधिकरणतात्मकाधिकरणनिरूपितवाच्यत्वत्वावच्छिन्नवृत्तितामादायाव्याप्तितादवस्थ्यादिति ।

यत्तु वृत्तितात्वेन वृत्तित्वन्नोपादेयं प्रयोजनाभावादिति, तन्न द्रव्यत्वसाध्यके समवायेन प्रमेयविशिष्टस्य समवायेन हेतुतायां सद्धेतौ हेतुतावच्छेदकावच्छिन्ननिरूपकतानिरूपिताधिकरणताविशिष्टप्रमेयत्वावच्छिन्नावच्छेदकतायाः स्वावच्छेदकप्रमेयत्वरूपयोः प्रमेयत्वात्मकप्रमेयत्वावच्छिन्नवृत्तितात्मकत्वेन तत्प्रतियोगिकस्वरूपेण साध्याभावाधिकरणनिरूपितप्रमेयत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नवृत्तित्वस्यैव सत्त्वादव्याप्त्यापत्तेः, वृत्तितात्वेन तत्प्रवेशे तु स्वनिष्ठनिरूपकतानिरूपितवृत्तितात्वावच्छिन्ननिरूप्यत्वस्य संसर्गतालाभेन प्रमेयावच्छिन्न-

वृत्तितायामेवाधिकरणताविशिष्टत्वसत्त्वेन नाव्याप्तिसम्भव इति । यद्यप्यत्र हेतुताव-च्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्ननिरूपकत्वीयस्वरूपेण साध्याभा-वाधिकरणनिष्ठाधिकरणतानिरूपितनिरूपकत्वाभावस्य लघुतरस्य व्याप्तित्वं सम्भवति तथापि यथाश्रुतमूलानुरोधात्तदुपेक्षितम् ।

ननु कालिकसम्बन्धावच्छिन्नधूमत्वनिष्ठावच्छेदकताकवृत्तित्वीयस्वरूपेण वह्न्यभावाधिकरणनिरूपितवृत्तित्वस्य धूमे सत्त्वादव्याप्तिः, हेतुतावच्छेदकताघट-कसम्बन्धावच्छिन्नावच्छेदकताविवक्षयोक्तदोषवारणेऽपि महानसीयवह्निसाध्यके समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन धूमत्वविशिष्टहेतुकेऽव्याप्त्या-पत्तिः, कालिकसम्बन्धावच्छिन्नमहासीयत्वनिष्ठावच्छेदकतानिरूपितसमवायसम्ब-न्धावच्छिन्नधूमत्वनिष्ठावच्छेदकताकवृत्तिताया हेतौ सत्त्वादिति, चेन्न वृत्तिताया आश्रयभेदेन भिन्नतया धूमस्य कालिकेन धूमत्वाश्रयत्वेऽपि संयोगेन धूमस्य ह्रदा-वृत्तित्वानपायात् । एतदभिप्रायेणैव विशिष्टसत्त्वस्य स्वावच्छिन्नाधिकरणत्वेनैव द्रव्यत्वव्याप्त्वं स्वीकृत्य हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशनम्विफलमाक-लय्य हेतुतावच्छेदकाघटितस्य व्याप्तिरूपत्वस्वीकारो ग्रन्थान्तरे पर्य्यालोचनीयः, अन्यथा हेतुतावच्छेदकाप्रवेशे प्रमेयत्वाद्यवच्छिन्नवृत्तितामादायासम्भवापत्तेरिति । वृत्तिताया एकधर्म्मावच्छिन्नाया यावत्स्वावच्छेदकाश्रयेष्येकत्वे तु हेतुतावच्छेदक-ताविशिष्टावच्छेदकतानिरूपितत्वादिरूपं हेतुतावच्छेदकावच्छिन्नत्वम्वाच्यम्, वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन अधिकन्तु साध्यतावच्छेदकावच्छिन्नत्वविचारवदनुसन्धेयमित्यलम् ।

अथ धूमवान् वह्नेरित्यत्रातिव्याप्तिः । निरुक्तवृत्तित्वाभावस्य पर्वतीयव-ह्न्यादौ सत्त्वादिति, चेन्न अनुपदोक्तवृत्तितैक्यपक्षे दोषस्यासम्भवात्पक्षान्तरे तत्रो-क्ताभावस्य सत्त्वेऽपि तस्य लक्ष्यत्वमेवेत्यन्ये, वह्नित्वेनालक्ष्यत्वेऽपि हेतुतावच्छेदकावच्छेद्यत्वविशिष्टोक्तवृत्तित्वाभावस्यैव व्याप्तित्वस्वीकाराददोष इत्यपरे यथोक्तविवक्षायां गौरवेऽपि तादृशवृत्तितानवच्छेदकप्रकृतहेतुतावच्छेद-कस्य व्याप्तित्वावलम्बने नातिव्याप्तिरिति केचित् । साध्याभावाधिकरणावृत्तिहे-तुतावच्छेदकसम्बन्धावच्छिन्नस्वावच्छिन्नाधिकरणताकधर्म्मवत्त्वम्विवक्षणीयम्, एवञ्च सत्तावाञ्जातेरित्यादावपि नाव्याप्तिरिति ग्रन्थान्तर इति ।

दीधितौ 'अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्य' इति । अत्र निरव-च्छिन्नसाध्याभावाधिकरणत्वविवक्षणेऽव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्त्यभावादा-

शङ्केति, न च कपिसंयोगाभाववान्गुणत्वादित्यत्राव्याप्तिः, निरवच्छिन्नाधिकरणत्वस्य साध्याभावनिरूपितस्याप्रसिद्धेरिति वाच्यम्, तस्य केवलान्वयिसाध्यकत्वेन तत्राव्याप्तेरिष्टत्वात्। कपिसंयोगवद्भेदस्याव्याप्यवृत्तित्वे केवलान्वयित्वमेव, व्याप्यवृत्तित्वे तदभावस्य कपिसंयोगरूपत्वाभावेन तन्निरूपितनिरवच्छिन्नाधिकरणत्वस्य सम्भवेन कपिसंयोगवद्भेदसाध्यकेऽपि नाव्याप्तिसम्भवः। न चैवमपि कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य स्वरूपेण साध्यतायामात्मत्वहेतौ साध्याभावस्य कालिकेन निरवच्छिन्नाधिकरणत्वाप्रसिद्धिरिति वाच्यम्, सावच्छिन्नत्वहेतुमन्निष्ठत्वोभयाभाववत्त्वस्याधिकरणतायाम्विवक्षितत्वात्। यद्वा सावच्छिन्ननिरवच्छिन्नकेवलान्वयितावच्छेदकानवच्छिन्नवृत्तितानिरूपितसंसर्गतावच्छेदकानवच्छिन्नसंसर्गताकनिरूपकताकाधिकरणताभिन्नत्वोभयाभाववत्त्वम्विवक्षणीयं कालिकसम्बन्धावच्छिन्नवृत्तितामात्रस्य सावच्छिन्नत्वात् कालिकसम्बन्धावच्छिन्नप्रमेयत्वावच्छिन्नवृत्तिताया निरवच्छिन्नत्वानुभवात्, केवलान्वयितावच्छेदकानवच्छिन्नेत्युक्तम्, अत एव टीकान्तरे प्रागुक्तोभयाभावस्य कपिसंयोगवद्भेदाभावत्वावच्छिन्नाधिकरणतायां सत्त्वेन निरवच्छिन्नाधिकरणत्वाप्रसिद्धिनिबन्धनाव्याप्तिशङ्काऽसङ्गतिरपि निरस्तेतिदिक्।

उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयस्याभ्यर्हितत्वेन तस्यैव विवक्षिततत्वमालोच्याह, 'न च कपिसंयोगाभाववान्' इत्यादि। आदिपदाद्गुणवान् जलीयपरमाणुरूपाद्धटत्वतद्विरुद्धसंयोगान्यतरवान् घटीयरूपादित्यादिपरिग्रहः, तेन सद्धेतावित्यत्र सत्पदस्य सत्तावदर्थकत्वेऽपि व्याप्यवृत्तिसाध्यकेत्यस्याव्याप्यवृत्तिभावसाध्यकार्थकत्वेऽपि च न क्षतिः। ननूक्तार्थकाव्याप्यवृत्तिसाध्यकसद्धेतुत्वावच्छेदेनोक्तलक्षणासत्त्वमाशङ्क्योत्तरलक्षणावतारे तल्लक्षणस्योक्तावच्छेदकावच्छेदेन सत्त्व एव संगतिः। न च तत्संभवति तद्धर्म्मस्य तत्संयोगी गुणादित्यव्यभिचारिण्यपि सत्त्वेन तत्राग्रिमलक्षणस्याप्यसत्त्वात्। न च व्याप्तिपदस्य सद्धेतावेव लक्षणासत्त्वार्थकत्वेन तत्समभिव्याहारवशात् स्वाधिकरणवृत्यभावप्रतियोगितावच्छेदकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकसद्धेतुत्वावच्छेदेनैव लक्षणासत्त्वार्थकत्वस्योक्तवाक्ये स्वीकरणीयतया नासङ्गतिरिति वाच्यम्, कपिसंयोगाभाववान् गुणादित्यादिस्थलीयहेतावप्युक्तसद्धेतुत्वस्य सत्त्वेन तत्राग्रिमलक्षणस्यासत्त्वादसङ्गतेस्तदवस्थानादिति, चेन्न द्वितीयलक्षणस्य तादृशसद्धेतुत्वावच्छेदेन विरहस्यासत्त्वेन तादृशनियमभङ्गरूपाभ्यर्हितत्वमङ्गीकृत्य लक्षणान्तरावतरण एव तात्पर्य्यस्वीकारेऽसङ्गतिविरहात्। अव्याप्यवृत्तिसाध्यकसद्धेतुपदेन भेदप्रतियोगि-

तावच्छेदकतावच्छेदकतादृशसाध्यतावच्छेदकावच्छिन्नसाध्यकसद्धेतोर्विवक्षितत्वात्। स्वप्रतियोग्यनधिकरणवृत्त्यभावप्रतियोग्यव्याप्यवृत्तिसाध्यकसद्धेत्वर्थकत्वस्योक्तपदस्य वा विवक्षितत्वात्।

यद्वा निरवच्छिन्नवृत्तिकभिन्नत्वमव्याप्यवृत्तित्वं तथा चाव्याप्यवृत्ति साध्यं यस्येत्येव विग्रह आदरणीयः। एवञ्च 'सद्धेतौ' इत्यत्र सन्हेतुरिति कर्मधारय एवेति न कश्चिद्दोषः। केचित्तु, स्वप्रतियोगित्व-स्वसामानाधिकरण्य-स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वैतत्तृतयसम्बन्धेनाभावविशिष्टत्वमव्याप्यवृत्तित्वम्। कपिसंयोगाभावस्य न कपिसंयोगवन्निष्ठभेदप्रतियोगितावच्छेदकत्वम्, इति तस्य स्वसामानाधिकरण्यस्वप्रतियोगित्वयोर्निवेशादात्मत्वादेश्च न व्याप्यवृत्तित्वप्रसङ्ग इति प्राहुः।

॥इति द्वितीयं व्याप्तिलक्षणम्॥

तृतीयं व्याप्तिलक्षणम्

चिन्तामणिः

साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम् ।

माथुरी

'साध्यवत्प्रतियोगिकान्योन्याभाव' इति । हेतौ साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणवृत्तित्वाभाव इत्यर्थः ।[१] अन्योन्याभावश्च प्रतियोग्यवृत्तित्वेन विशेषणीयस्तेन साध्यवतो व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तावपि नाऽसम्भवः । नन्वेवमपि नानाधिकरणकसाध्यके वह्निमान् धूमादित्यादौ साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तेरव्याप्तिर्दुर्वरिति । प्रतियोग्यवृत्तित्वमपहाय साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणे तु पञ्चमेन सह पौनरुक्त्यमिति चेन्न । वक्ष्यमाणकेवलान्वय्यव्याप्तिवदस्याप्यत्र दोषत्वात् ।

दीधीतिः

कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह, 'साध्यवद्' इति ।

---

१. ननु वन्हिमद्घटोभयं नेत्याकारकं साध्यवत्प्रतियोगिकमन्योन्याभावमादाय वह्निमान् धूमादित्यादावसम्भव एव स्यादत आह, 'अन्योन्याभावश्चेति' । तथा च व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावस्य केवलान्वयित्वेन प्रतियोगिवृत्तित्वात्तद्वारणम् । व्यासज्यवृत्तित्वं नाम—एकत्वानवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वम् ।

गादाधरी

संयोगाभावनिष्ठयोर्व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोः प्रतियोगिसामानाधिकरण्यप्रतियोगिवैयधिकरण्ययोर्वक्ष्यमाणरीत्या न विरोध इत्यभिप्रायेणाव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्त्या लक्षणान्तरमवतारयति 'कर्मादौ' इति ।

इदं त्ववधेयम्, द्रव्यवृत्तिसंयोगाभावो न गुणादौ स्वीक्रियतेऽपि तु क्लृप्ते तद्वृत्तिसंयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभाव एव संयोगाभावत्वं कल्प्यतेऽनन्तगुणाद्यधिकरणे संयोगाभावकल्पनामपेक्ष्य तथाविधैकाभावे संयोगाद्यभावत्वकल्पने लाघवात् । न च संयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभावे द्रव्यत्वाभावे द्रव्यभेदे संयोगिभेदादौ वा संयोगाभावत्वं कल्प्यत इत्यत्र विनिगमकाभाव इति वाच्यम्, तादृशाभावानां समनियततयाऽभेदात् । एवञ्च द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदः सप्रमाण एव ।

जागदीशी

'भिन्नत्वे' इति । द्रव्यनिष्ठसंयोगाभावतो[१] भिन्नत्व इत्यर्थः । 'मानाभावात्' इति । तथा चात्राव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति भावः ।

माथुरी

न च तथापि साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैवैतल्लक्षणघटकत्वे वक्ष्यमाणकेवलान्वय्यव्याप्तिरसङ्गता, केवलान्वयिसाध्यकेऽपि साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य प्रसिद्धत्वादिति वाच्यम् । तत्रापि तादृशान्योन्याभावस्य प्रसिद्धत्वेऽपि तद्वति हेतोर्वृत्तेरेवाऽव्याप्तेर्दुर्वारत्वात् ।

यद्वा [२]साध्यवत्प्रतियोगिकान्योन्याभावपदेन साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाव एव विवक्षितः । न चैवं पञ्चमाभेदः तत्र साध्यवत्त्वावच्छिन्नप्रति-

---

१. 'भिन्नत्वे' इति । 'कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावात्, इति दीधितौ प्रथमोपस्थितं गुणं विहाय कर्मपर्यन्तानुसरणं यद्यपि निष्प्रयोजनन्तथापि कर्मणआदि कर्मादिरिति षष्ठीसमासेन कर्मादिपदस्य गुणपरत्वमेव ।'

२. साध्याभाव-साध्यवदन्योन्याभावयोरप्रसिद्ध्यैव केवलान्वयिसाध्यकस्थलेऽव्याप्तिर्दत्ता मूलकारेण साऽत्र न सङ्गच्छत इत्यस्वरसं मनसि कृत्वाह 'यद्वेति' ।

योगिताकान्योन्याभाववत्त्वेन प्रवेशः । अत्र तु तादृशान्योन्याभावाधिकरणत्वेन इत्यधिकरणत्वप्रवेशाप्रवेशाभ्यामेव भेदात् ।[१] अखण्डाभावघटकतया च नाधिकरणत्वांशस्य वैयर्थ्यमिति न कोऽपि दोष इति दिक् ।

गादाधरी

अथैवं द्रव्यत्वाभावादीनामप्यानन्त्यापत्तिः । कर्मादौ गुणवृत्तिद्रव्यत्वाभावो न कल्प्यतेऽपि तु क्लृप्ते तद्वृत्तिद्रव्यगुणान्यतरत्वाभाव एव तदभावत्वमित्यादितर्कगवेषणया कर्मादिवृत्तिद्रव्यत्वाद्यभावस्य गुणादिवृत्तितदभावतो भेदसिद्धिरिति चेदिष्टमेवैतदधिकरणभेदेनाभावभेदवादिनाम् । न चैवं संयोगाद्यभावत्वकल्पनायां धर्मिणामप्यानन्त्यादुक्तविनिगमकाभावसम्भव इति वाच्यम्, विनिगमनाविरहेऽपि द्रव्यत्वाभावादौ संयोगाद्यभावत्वकल्पनाया निष्प्रत्यूहत्वादिति ।

।।इति तृतीयं व्याप्तिलक्षणम् ।।

१. अखण्डाभावेप्यस्यातिरिक्ताभावे, इत्यर्थः। तथा च अधिकरणत्वघटिततादृशाभावत्वस्य अधिकरणत्वाघटिततादृशाभावत्वस्य च मिथः सामानाधिकरण्याभावान्न पूर्वोक्तवैयर्थ्यमिति भावः।

चतुर्थं व्याप्तिलक्षणम्

चिन्तामणिः

सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् ।

माथुरी

'सकल' इति। साकल्यं साध्याभाववतो विशेषणं[1]तथा च यावन्ति साध्याभावाधिकरणानि तन्निष्ठाभावप्रतियोगित्वं हेतोर्व्याप्तिरित्यर्थः ।[2]धूमाद्यभाववज्जलह्रदादिनिष्ठाभावप्रतियोगित्वाद्वह्न्यादावतिव्याप्तिरिति, यावदिति साध्याभाववतो विशेषणम् ।[3]

दीधितिः

हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह, 'सकल' इति ।

गादाधरी

'हेतोः' इति । नानाधिकरणकस्येत्यादिः । 'अव्याप्तेः' इति । एतद्रूपवानेतद्रसादित्यादावेतद्रूपाधिकरणस्य द्वित्वादिना भेदसत्त्वेऽपि व्यासज्यवृत्तिधर्मानवच्छि-

---

१. साकल्यस्य साध्याभावाधिकरणे विशेषणत्वे सति यादृशी लक्षणाऽऽकृतिः सम्पन्ना तान्दर्शयति—तथा चेति ।

२. साध्याभावाधिकरणे साकल्यविशेषणस्य प्रयोजनमाह—धूमाद्यभाववदिति ।

३. साध्याभावधिकरणे साकल्यविशेषणस्यातिव्याप्तिवारणमेव प्रयोजनं तत्तु प्रथमोपस्थित-साध्याभावे साकल्यविशेषणेनापि सम्भवतीत्याशङ्कामसम्भवेनापाकरोति—साध्याभावविशेषणत्व इति ।

न्नत्वेन साध्यवन्निष्ठप्रतियोगितायाः प्रतियोग्यवृत्तित्वेन वा भेदस्य विशेषितत्वे लक्षणगमनसम्भवान्नासम्भवो दर्शितः। 'साकल्यम्' इति। 'बोध्यम्' इत्यस्य विशेषणमित्यादिः।

जागदीशी

'हेतोः' इति। न च साध्यवत्प्रतियोगिकान्योन्याभावस्य केवलान्वयित्वादसम्भव एव वक्तुमुचितो नाव्याप्तिरिति वाच्यम्, वह्निमान् गगनादित्यत्रावृत्तिगगनादौ लक्षणसम्भवेन तस्यापि सद्धेतुतायाः स्वयं[१] वक्ष्यमाणत्वादिति भावः। साध्यपदस्य[२] सिद्धिकर्मतत्तद्व्यक्तिपरतया तत्तद्व्यक्त्यवच्छिन्नान्योन्याभावासामानाधिकरण्यरूपस्य पर्यवसितार्थस्य द्रव्यं पृथिवीत्वादित्यादावेव सम्भवाद्गन्धवती पृथिवीत्वादित्यादावव्याप्तिकथनमित्यपि वदन्ति।

माथुरी

साध्याभावविशेषणत्वे[३]तत्तद्ह्रदावृत्तित्वादिरूपेण यो वह्न्याद्यभावस्तस्यापि सकलसाध्याभावत्वेन प्रवेशात् तावदधिकरणाप्रसिद्ध्याऽसम्भवापत्तेः। न च द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाभाववति गुणादौ [४]सत्त्वादेर्विशिष्टाभावादिसत्त्वादतिव्याप्तिरिति वाच्यम्।

---

१. 'वक्ष्यमाणत्वादिति'। सिद्धान्तलक्षणे वक्ष्यमाणत्वादित्यर्थः।

२. 'सिद्धिकर्मतत्तद्व्यक्तीति'। अनुमितिविषयीभूततत्तद्व्यक्तीत्यर्थः 'तत्तद्व्यक्त्यवच्छिन्नेति' तत्तद्व्यक्तिमात्रावच्छिन्नप्रतियोगिताकान्योन्याभावाधिकरणनिरूपितवृत्तित्वाभाव इत्यर्थः। तथा चोभयाभावस्य सिद्धिकर्मतत्तद्व्यक्तिमात्रावच्छिन्नप्रतियोगिताकाभावरूपत्वाभावान्न तमादायाऽसम्भवः किन्तु नानाव्यक्तिगन्धादिसाध्यकसद्धेतावव्याप्तिरेवेति भावः।

३. 'तत्तद्ध्रदावृत्तित्वेति'। इदमाकूतम्, वह्निरपि तत्तद्ध्रदावृत्तित्वस्य च यस्तत्तद्ध्रदावृत्तिर्नास्तीत्याकारकाभावः स च लाघवात्तत्तद्ध्रदत्वादिरूपस्तेषां च मिलितानामधिकरणमप्रसिद्धमित्यसम्भवः। अत्रादिपदेन घटावृत्तित्व-महानसावृत्तित्वादिपरिग्रहः।

४. 'सत्वादेर्विशिष्टेति'। गुणकर्मान्यत्वविशिष्टसत्वाभाव इत्यर्थः। आदिना सत्त्वघटोभयाभावादिपरिग्रहः।

गादाधरी

अत्र साध्याभाववति साकल्यविशेषणसत्त्व एव साध्ये तद्विशेषणव्यावृत्तिः सङ्गच्छते, अन्यथा साध्याभाववत्ताया हेतुमत्साधारण्येऽपि साध्याभाववद्यत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगित्वमादाय नानाव्यक्तिसाध्यकसद्धेतौ लक्षणसमन्वयसम्भवादतः साध्ये तदभाववति चेत्यनुक्त्वा साध्याभाववति साकल्यविशेषणं प्रथमतो दर्शितम् ।

जागदीशी

[१]ननु सकलस्य साध्यप्रतियोगिकाभावस्याधिकरणाऽप्रसिद्ध्या व्यभिचारिण्यतिव्याप्तिवारणाय यदि साध्याभावस्य विशेषणं साकल्यं तदा वह्निमान्धूमादित्यादिसद्धेतावव्याप्तिः । तत्रापि [२] तत्तत्सपक्षावृत्तित्वावच्छिन्नाभावरूपस्य तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावरूपस्य च साध्यप्रतियोगिकाभावस्तोमस्याधिकरणाऽप्रसिद्धेः ।[३]

---

१. धूमवान् वह्नेरित्यत्र ह्रदादिस्वरूपं यत्किञ्चित्साध्याभावाधिकरणमादायापतितामतिव्याप्तिमुद्धर्तुं तु साकल्यं साध्याभावाधिकरणविशेषणमिष्यते परन्तु तदतिव्याप्तिवारणं साध्याभावे साकल्यविशेषणादपि भवितुमर्हतीति व्यर्थमधिकरणे साकल्यविशेषणमित्याशङ्कामपाकुर्वन्नवतारयति—'नन्विति' ।

२. 'तत्तत्सपक्षेति' । सपक्षो निश्चितसाध्यवान् महानसादिः, एवञ्च महानसावृत्तिर्नास्ति चत्वरावृत्तिर्नास्ति पर्वतावृत्तिर्नास्तीत्याद्यभावोऽपि सकलसाध्याभावान्तर्गतः तेषामपि महानसाद्यवृत्तित्वेन वह्निप्रतियोगिकत्वात् । चालनीन्यायेन प्रत्येकं वह्नेः सपक्षावृत्तित्वात् एवं विपक्षो ह्रदादिस्तदवृत्तिर्नास्तीत्यभावोऽपि ह्रदाद्यवृत्तित्वेन वह्निप्रतियोगिकः वह्नेस्तत्र तत्र विपक्षेऽवर्त्तमानत्वात् । तथा च सकलसाध्याभावपदेन ह्रदावृत्तिर्नास्ति घटावृत्तिर्नास्ति महानसावृत्तिर्नास्तीत्याद्यभावानामुपग्रहः ।

३. 'स्तोमस्येति' । समुदायस्येत्यर्थः । 'अधिकरणाप्रसिद्धेरिति' । अयमाशयः घटावृत्तिर्नास्तीत्यभावो लाघवाद्घटत्वरूपः, महानसावृत्तिर्नास्तीत्यभावो महानसत्वादिरूपः । तथा च घटत्व-ह्रदत्व-महानसत्व-पर्वतत्वादिरूपाणां साध्यप्रतियोगिकाभावानामेकाधिकाधिकरणमप्रसिद्धमिति वह्निमान् धूमादित्यादावव्याप्तिरिति ।

माथुरी

[1]तादृशाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वस्येह विवक्षितत्वात्। प्रातयोगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या। तेन द्रव्यत्वाभाववति-गुणादौ सत्ताऽदेः संयोगादिसम्बन्धावच्छिन्नाभावसत्त्वेऽपि नातिव्याप्तिः। साध्या-भावश्च साध्यतावच्छेदकावच्छिन्न-साध्यतावच्छेदकसम्बन्धावच्छिन्न प्रतियोगि-ताको ग्राह्यः। अन्यथा पर्वतादावपि वह्न्यादेर्विशिष्टाभावादिसत्त्वेन[2] समवायादि-सम्बन्धावच्छिन्नवह्न्यादिसामान्याभावसत्त्वेन च यावदन्तर्गततया तन्निष्ठाभावप्र-तियोगित्वाभावात् धूमस्याऽसम्भवः स्यात्।

दीधितिः

साकल्यं साध्याभाववति साध्ये च बोध्यम्।

गादाधरी

न च साध्याभाववति साकल्यविशेषणासत्त्वेऽपि वह्निमान् पर्वतान्यत्वादित्या-दावतिव्याप्तिवारणमेव साध्ये साकल्यविशेषणप्रयोजनमस्त्युभयत्र साकल्यविशे-षणादाने यत्किञ्चित्साध्याभाववति पर्वते हेत्वभावसत्त्वेनातिव्याप्तिः साध्ये साकल्यविशेषणसत्त्वे तु ह्रदादेरेव सकलसाध्याभाववत्तया तत्र हेतुसत्त्वेनाति-व्याप्त्युद्धारान्नोक्ताभिप्रायवर्णनं सम्यगिति वाच्यम्, साध्याभाववति साकल्यविशे-षणासत्त्वे साध्ये साकल्यविशेषणस्योक्तातिव्याप्तिवारणप्रयोजनकत्वसम्भवेऽपि साकल्यविशेषणस्य वक्ष्यमाणप्रयोजनस्यैव वास्तवतया तस्य साध्याभाववति साकल्यविशेषणसत्त्व एव सङ्गतेरादौ तत्प्रदर्शनस्योचितत्वात्।

---

१. 'तादृशाभावेति' सकलसाध्याभाववन्निष्ठाभावेत्यर्थः। प्रतियोगितावच्छेदकहेतुता-वच्छेदकादिपाठस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणहेतुतावच्छेदकतापर्याप्त्य-धिकरणवत्त्वे ततोऽप्यधिके वा तात्पर्यम्।

२. 'विशिष्टेति'। महानसीयत्वादिविशिष्टवह्न्यभाव इत्यर्थः। आदिना वह्निजलोभ-याभावोपग्रहः।

वस्तुतस्तु साध्ये साकल्यविशेषणं परित्यज्य साध्याभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशरूपकल्पान्तरस्यावलम्बनीयतया चरममेव तत्प्रदर्शनमुचितम् ।

जागदीशी

अत आह—'साध्याऽभाववति' इति । तथा च साकल्यं न साध्याभावविशेषणम् अतो नाऽप्रसिद्धिरिति भावः ।

माथुरी

न च कपिसंयोगी एतद्वृक्षत्वात् इत्यादौ एतद्वृक्षस्यापि[१]तादृशसाध्याभाववत्त्वेन यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावादेतद्वृक्षत्वस्याव्याप्तिरिति वाच्यम् । किञ्चिदनवच्छिन्नाया: साध्याभावाधिकरणताया इह विवक्षितत्वात् । [२]इत्थञ्च किञ्चिदनवच्छिन्नाया: कपिसंयोगाभावाधिकरणताया गुणादावेव सत्त्वात् तत्र च हेतोरप्यभावसत्त्वान्नाव्याप्ति: । न च कपिसंयोगाभाववान् सत्त्वादित्यादौ साध्याभावस्य कपिसंयोगादेर्निरवच्छिन्नाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् । केवलान्वयिन्यभावादित्यनेन ग्रन्थकृतैवैतद्दोषस्य वक्ष्यमाणत्वात् । न च पृथिवी कपिसंयोगादित्यादौ पृथिवीत्वाभाववति जलादौ यावत्येव कपिसंयोगाभावसत्त्वादतिव्याप्तिरिति वाच्यम् ।

गादाधरी

'साध्ये तदभाववति च बोध्यम्' इत्युक्त्वा 'साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको वाऽभावो ग्राह्य:, इत्युक्तौ साध्याभाववति च साकल्यं निवेश्यते साध्याभावो वैतादृशो निवेश्यत इत्येतादृशविकल्प: प्रतीयते स चाविवक्षित इति सारम् ।

जागदीशी

केचित्तु—ननु धूमवान् वह्नेरित्यादिव्यभिचारिण्यतिव्याप्ति: । साध्याभाववद्यत्किञ्चिन्निष्ठाऽभावप्रतियोगित्वादित्यत आह—'साकल्यं साध्याभाववति' इति ।

---

१. तादृशेत्यस्य । साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नेत्यर्थ: ।
२. इत्यञ्चेत्यस्य । किञ्चिदनवच्छिन्नसाध्याभावाधिकरणत्वविवक्षणे चेत्यर्थ: ।

नन्वेवमपि[१] साध्याऽभाववन्निखिलान्तर्गते महानसादौ वर्तमानस्याऽभावस्य प्रतियोगित्वं धूमादौ नास्तीत्यव्याप्तितादवस्थ्यमत उक्तं 'साध्ये च' इति। तथा च सपक्षो महानसादिर्न सकलसाध्याभाववानित्यदोषः।

माथुरी

तन्निष्ठपदेन[२] तत्र निरवच्छिन्नवृत्तिमत्त्वस्य विवक्षितत्वात्।[३] इत्थञ्चं पृथिवीत्वाभावाधिकरणे जलादौ यावदन्तर्गते निरवच्छिन्नवृत्तिमानभावो न कपिसंयोगाभावः किन्तु घटत्वाद्यभाव एव तत्प्रतियोगित्वस्य हेतावसत्त्वान्नातिव्याप्तिः। न[४] चैवमन्योन्याभावस्य व्याप्यवृत्तितानियमनये[५] द्रव्यत्वाभाववान् संयोगवद्भिन्नत्वादित्यादेरपि सद्धेतुतया तत्राव्याप्तिः, संयोगवद्भिन्नत्वाभावस्य संयोगरूपस्य निरवच्छिन्नवृत्तेरप्रसिद्धेरिति वाच्यम्।

गादाधरी

अव्याप्तिवारणाय साध्याभावे साकल्यविशेषणे धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकीभूतसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकसकलसाध्याभावाधिकरणं गुणादिरेव स्यादयोगोलकादेर्ह्रदासंयुक्तत्वावच्छिन्नप्रतियोगिताकाभावानधिकरणत्वादित्यतिव्याप्तिः, वह्निमत्त्वप्रकारकप्रमाविषयो धूमादित्यादौ साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्य तत्तद्विपक्षमात्रवृत्तितया सकलसाध्याभावाधिकरणाप्रसिद्ध्याव्याप्तिश्चेति तदुपेक्ष्य साध्ये साकल्यविशेषणं निवेशितम्।

---

१. 'साध्याभाववदिति'। साध्यप्रतियोगिको यः पर्वतीयादिवह्न्यभावस्तद्वीति महानसादावित्यर्थः।

२. तत्र-यावति निरवच्छिन्नसाध्याभावाधिकरणे।

३. अत्रेत्थञ्चेत्यस्य। सकलसाध्याभावाधिकरणे निरवच्छिन्नवृत्तिकाभावनिवेशे चेत्यर्थः।

४. न चैवमित्यत्रैवमित्यस्य हेत्वभावे निरवच्छिन्नवृत्तिमत्त्वनिवेशे चेत्यर्थः।

५. ननु संयोगवद्भिन्नत्वस्य पृथिव्यामेव व्यभिचारितया तत्र लक्षणाऽसत्त्वमिष्टमेवेत्याशङ्कामपाकुर्वन्नाह—'व्याप्यवृत्तितानियमेति'।

जागदीशी

[1]प्राञ्चस्तु, व्यभिचारिण्यतिव्याप्तिवारणार्थं साध्याभाववति यावत्त्वविशेषणे दत्त एव साध्ये यावत्त्वविशेषणमव्याप्तिवारकतया सार्थकं भवति, अतः साध्याभाववत्येव साकल्यं प्राक् प्रयोजयति—'साकल्यम्' इत्यादिना—इत्येवमवधारयन्ति ।

माथुरी

अन्योन्याभावस्य व्याप्यवृत्तितानियमनयेऽन्योन्याभावस्याऽभावो[2] न प्रतियोगितावच्छेदकस्वरूपः किन्त्वतिरिक्तो व्याप्यवृत्तिः,[3]अन्यथा मूलावच्छेदेन कपिसंयोगिभेदाभावभानानुपपत्तिरिति संयोगवद्भिन्नत्वाभावस्यापि निरवच्छिन्नवृत्तिमत्त्वात् ।

गादाधरी

ननु साध्ये साकल्यविशेषणदानेऽपि वह्निमान् धूमादित्यादावव्याप्तितादवस्थ्यं पर्वतादावपि पर्वतीयवह्नेर्द्वित्वादिनाऽभावस्य सत्त्वेन सकलसाध्याभावसत्त्वात् व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणे च वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिर्वह्निमतस्तथाविधसकलसाध्याभावानधिकरणत्वात् ।

जागदीशी

[4]तन्मन्दम् । साध्याभाववति साकल्यानुक्तावतिव्याप्तिवारकतयैव साध्येसाकल्यविशेषणस्य प्रथमतः सार्थकत्वसम्भवात्, अन्यथा गगनावृत्तिधर्मवान् द्रव्य-

---

१. 'प्राञ्चस्त्विति' । यद्यपि प्रथमोपस्थिते साध्ये साकल्यविशेषणमुक्त्वैव साध्याभाववति-

२. 'अन्योन्याभावस्याभाव' इति । अव्याप्यवृत्तिमदन्योन्याभावस्याभाव इत्यर्थः ।

३. 'अन्यथेति' । अव्याप्यवृत्तिमदन्योन्याभावाभावस्यातिरिक्तत्वाऽभाव इत्यर्थः । यदि कपिसंयोगिभेदाभावः कपिसंयोगरूपः स्यात्तर्हि वृक्षे मूले तत्प्रतीतिरप्रमा स्यात् तत्र कपिसंयोगासत्त्वात् । अत्र मूलदेशस्यावच्छेदकं स्वरूपसम्बन्धविशेषरूपं बोध्यम् ।

४. 'तन्मन्दमिति' । प्रथमतः साध्येऽपि साकल्यविशेषणस्यातिव्याप्तिवारणफलकत्वाप्राचामवधारणमयुक्तमिति भावः । वस्तुतस्तु 'साकल्यं साध्याभाववति साध्ये च

त्वादित्यादौ पटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभाववद्गुणादिनिष्ठाभावप्रतियोगिनि द्रव्यत्वादावतिप्रसङ्गादिति ध्येयम् ।(इत्थञ्च प्रथमतः साध्ये साकल्यविशेषणोपादाने गुणत्वादेरपि सङ्ग्रहात् तदभाववान्न गुणादिः किन्तु गगनमात्रं तत्र हेतोः वृत्तित्वान्नातिव्याप्तिः ।)

माथुरी

[१]वस्तुतस्तु सकलपदमत्राशेषपरं, न त्वनेकपरम्, एतद्घटत्वाभाववान् पटत्वादित्याद्येकव्यक्तिविपक्षके साध्याभावाधिकरणस्य यावत्त्वाप्रसिद्ध्याऽव्याप्त्यापत्तेः ।[२] तथा च किञ्चिदनवच्छिन्नाया[३] निरुक्तसाध्याभावाधिकरणताया व्यापकीभूतो योऽभावः हेतुतावच्छेदकसम्बन्धावच्छिन्नतत्प्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वं लक्षणार्थः ।

दीधितिः

साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यस्तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः ।

गादाधरी

साध्यतावच्छेदकातिरिक्तो यो व्यासज्यवृत्तिधर्मस्तदनवच्छिन्नप्रतियोगिताकत्वनिवेशने च लाघवात्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वमेवाभावे विशेषणमुचितं किं साध्ये साकल्यविशेषणेनेत्यभिप्रेत्य तथैवाह, 'साध्यतावच्छेदक' इति । साध्याभाववति साकल्यविशेषणप्रयोजनमाह, 'विपक्ष' इति ।

बोध्यम्' इति वाक्ये प्रथमोपस्थितस्यापि साध्यस्यानन्तरमुपादानाभिप्रायस्तु—साध्ये साकल्यं देयं साध्याभावो वा साध्यातावच्छेदकावच्छिन्नप्रतियोगिताको बोध्य इति विकल्पस्फोरणमेव । यदि साध्याभावस्य पश्चादुपादानं स्यात्तर्हि साध्यसामान्याभावेन साकं साध्याभाववति साकल्यविशेषणस्य विकल्पः प्रतीयेत स चानपेक्षित इति भावः ।

१. यत्रैकमेव साध्याभावाधिकरणं तत्र सकलसाध्याभावाधिकरणाऽप्रसिद्ध्याऽव्याप्तिमाशङ्क्याह—'वस्तुतस्त्विति' ।

२. सकल पदस्याशेषार्थकत्वे यादृशो लक्षणवाक्यार्थस्सञ्जातस्तं दर्शयति । 'तथा चेति' ।

३. 'निरुक्तेति' । साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावेत्यर्थः ।

जागदीशी

ननु साध्यवत्यपि[१] द्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्रतियोगिकाऽभावस्य सत्त्वादसम्भवः।[२] किञ्च[३] सकलपदोत्तरसाध्यनाम्ना सकलसाध्यप्रतियोगिताकाऽभाववतोनुपस्थापनात्तेन[४] समं सकलपदस्य कर्मधारयोऽप्यनुपपन्न इत्यत आह—'साध्याभाव' इति।

माथुरी

न च सत्त्वादिसामान्याभावस्यापि प्रमेयत्वादिना निरुक्तसाध्याभावाधिकरणतायाः[५] व्यापकत्वात् द्रव्यं सत्त्वादित्यादावतिव्याप्तिः।[६] तद्वन्निष्ठान्योन्याभावप्रति-

१. 'द्वित्वावच्छिन्नेति'। वह्निघटोभयं नास्तीत्याकारक—सकलसाध्यप्रतियोगिकाभाववति पर्वतादौ धूमाभावसत्त्वादसम्भव इति भावः।

२. ननु व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकसकलसाध्याभावविवक्षायां नोक्तासंभवः संभवतीत्यत आह—'किञ्चेति'।

३. 'सकलपदोत्तरनाम्नेति'। सकलपदोत्तरवर्त्तिना साध्यनाम्ना (प्रातिपदिकेन) इत्यर्थः।

४. 'तेन सममिति'। यत्पदार्थस्य येन पदार्थेन साकमन्वयोऽपेक्षितस्तद्बोधकपदयोरेव मिथस्समासो भवति, तथा च प्रकृते साकल्यस्य साध्याभाववताऽन्वयो विवक्षितः स च साध्याभाववान्न साध्यपदोपस्थाप्यः किन्तु साध्याभाववत्पदोपस्थाप्यः तस्मात्साध्यपदेन साकं सकलपदस्य कर्मधारयोऽपि न सम्भवतीति भावः। अन्येत्वेवमाहुः— "एकत्र विशेषणतयाऽन्वितस्येतरत्र विशेषणतयाऽन्वयो न भवतीति" नियमात् साध्याभाववद्विशेषणस्य साकल्यस्य साध्यविशेषणत्वासम्भवतात्पर्यकोऽयं ग्रन्थ इति।

५. 'व्यापकत्वादिति'। तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वमिति व्यापकत्वम्। तच्च द्रव्यं सत्वादित्यत्र द्रव्यत्वाभावाधिकरणतावद्गुणादिनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकप्रमेयत्ववत्त्वात्सत्ताऽभावस्याप्यस्तीति तत्प्रतियोगितावच्छेदकसत्तात्ववत्त्वात्सत्त्वस्येत्यतिव्याप्तिरिति भावः।

६. 'तद्वन्निष्ठेति'। तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं व्यापकत्वमिति व्यापकलक्षणे प्रकृते विवक्षिते तु द्रव्यं सत्वादित्यत्र सत्वाभावे द्रव्यत्वाभावाधिकरणतावति गुणादौ सत्त्वाभाववान्नेतिप्रतीतिसिद्धान्योन्याभावप्रतियोगितावच्छेदकत्वस्यैव सत्वान्नातिव्याप्तिप्रसङ्गः। किन्तु ह्रदो निर्धूमत्ववान् निर्वह्नित्वादित्यत्राऽव्याप्तिदोषो बोध्यः। तथा हि

योगितानवच्छेदकत्वं व्यापकत्वमित्युक्तौ तु निर्धूमत्ववान् निर्वह्नित्वादित्यादावव्याप्तिः निर्वह्नित्वाभावानां वह्निव्यक्तीनां सर्वासामेव (चालनीन्यायेन) निर्धूमत्वाभावाधिकरणतावन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वादिति वाच्यम्।

जागदीशी

तथा च साध्याभावत्येव साकल्यं देयन्नतु साध्येऽपीति भावः। साध्याभाववति साकल्यदानस्य प्रयोजनमाह—'तेन' इति। विपक्षैकदेशः कश्चिद्विपक्षः। साध्यनिष्ठसाकल्यस्य साध्यसामान्याभावस्य वा निवेशस्य फल माह —'नवा' इति।

माथुरी

[1]तादृशाधिकरणताया व्यापकतावच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं[2] तद्धर्मवत्त्वस्य विवक्षितत्वात्।[3] व्यापकतावच्छेदकतद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वम्।

दीधितिः

न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः। अव्याप्यवृत्तिसाध्यक—व्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणाय;।

गादाधरी

वैकल्पिकयोः साध्यतदभावयोः साकल्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविशेषणयोर्व्यावृत्तिमाह, 'न वा' इति। एकव्यक्तिसाध्यक एतद्रूपवाने-

---

निर्धूमत्वरूपसाध्याभावाधिकरणत्ववति पर्वतमहानसादौ (चालनीन्यायेन) निर्वह्नित्वाभाववान्नेति प्रतीतिसिद्धान्योन्याभावप्रतियोगितावच्छेदक एव निर्वह्नित्वाभाव इति हेत्वभावस्य साध्याभावाधिकरणत्वाव्यापकत्वादिति भावः।

१. 'तादृशाधिकरणताया' इति। साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावाधिकरणताया इत्यर्थः।

२. 'यद्धर्मेति'। यद्धर्म-तद्धर्मपदाभ्यां हेतुतावच्छेदकधर्मो ग्राह्यः।

३. 'व्यापकतावच्छेदकत्वन्त्विति'। निर्धूमत्ववान् निर्वह्नित्वादित्यत्र निर्धूमत्वाभावाधिकरणत्ववति। महानसादौ वर्तमानो योऽभावः (घटो नास्तीत्याकारकः) तत्प्रतियोगितानवच्छेदकमेव निर्वह्नित्वत्वरूपयद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वं तद्धर्म— निर्वह्नित्वत्ववत्त्वं निर्वह्नित्व इति लक्षणसमन्वयः।

तद्रसादित्यादौ हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्नप्रतिगिव्यधिकरणः पूर्वक्षणवृत्तित्वविशिष्टैतद्रूपादेरेतद्रसाधिकरणे वृत्तेरेतद्रूपतद्रूपोभयत्वावच्छिन्नाभावोऽपि न तथा, प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेरिति तत्र लक्षणसङ्गतिरित्यतो 'नानाव्यक्ति- साध्यक' इत्युक्तम्। अत एवाव्याप्तिरेवोक्ता नासम्भवः।

जागदीशी

एकव्यक्तिसाध्यके सकलसाध्योक्तावप्यव्याप्तिरग्रे स्थास्यतीत्याशयेन 'नाना' इत्युक्तम्। (न चैकव्यक्तिसाध्यकस्थलेऽपि द्वित्वाद्यवच्छिन्नाभावमादायाऽसम्भव एव सम्भवति, नत्वव्याप्तिरिति वाच्यम्। व्यासज्यवृत्ति धर्मानवच्छिन्नत्वविशेषणेनैव तद्वारणसम्भवात्) 'अव्याप्यवृत्ति' इति।[१] कपिसंयोगी एतत्त्वादित्यादावित्यर्थः।

माथुरी

[२] न तु तद्वन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वं तद्वति निरवच्छिन्नवृत्तिमान् योऽभावस्तत्प्रतियोगितानवच्छेदकत्वं वा, प्रकृतव्यापकतायां प्रतियोगिवैयधिकरण्यस्य निरवच्छिन्नवृत्तित्वस्य वा प्रवेशे प्रयोजनविरहात्, [३] तेन पृथिवी कपिसंयोगादित्यादौ नातिव्याप्तिः, कपिसंयोगाभावत्वस्य[४] निरुक्तव्यापकतावच्छेदकत्वविरहादित्येव परमार्थः।

---

१. 'कपिसंयोगीति'। अयमभिप्रायः यदि साध्याभावे प्रतियोगिवैयधिकरण्यविशेषणोपादानं न स्यात्तदा कपिसंयोगसामान्याभाववति सकलान्तर्गते मूलावच्छिन्ने वृक्षे हेत्वभावासत्वादव्याप्तिरिति भावः।

२. 'न त्विति'। प्रयोजनानुरोधेन व्यापकतावच्छेदकत्वशरीरे प्रतियोगिवैयधिकरण्यस्य-स्वप्रतियोग्यधिकरणावृत्तित्वरूपस्य-निरवच्छिन्नवृत्तित्वस्य वा निवेशः क्वचिदस्ति, परन्त्वत्र प्रयोजनाभावान्न तन्निवेश इति भावः।

३. 'तेनेति'। प्रकृतव्यापकतायां प्रतियोगिवैयधिकरण्यस्य निरवच्छिन्नत्वस्य वाऽप्रवेशेनेत्यर्थः।

४. 'निरुक्तव्यापकतावच्छेदकत्वविरहादिति'। यद्यत्र प्रतियोगिवैयधिकरण्यघटितं, निरवच्छिन्नवृत्तित्वघटितं वा व्यापकतावच्छेदकत्वमभिमतं स्यात्तदा पृथिवी कपिसंयोगादित्यत्रातिव्याप्तिस्स्यात्। पृथिवीत्वाभावाधिकरणत्ववति जलादिद्रव्ये

गादाधरी

अत्र 'नानाव्यक्तिसाध्यकत्वम्', व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वम्, अत एवैतद्व्यक्तिवृत्तियावद्धर्मवानेतत्त्वादित्यादौ नानाव्यक्तिसाध्यकेऽव्याप्तिविरहेऽपि न क्षतिः । 'अव्याप्यवृत्ति' इति । कपिसंयोग्येतद्वृक्षत्वादित्यादावित्यर्थः । 'अव्याप्तेर्वारणाय' इत्यन्वयः । 'व्यभिचारिणि च' इति । पृथिवी कपिसंयोगादित्यादौ चेत्यर्थः । 'अभावद्वये' साध्याभावे हेत्वभावे च । तथा चाव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तिवारणाय साध्याभावे, व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यमित्यर्थः । यद्यपि प्रतियोगिवैयधिकरण्यविशेषणस्यावश्यकतया कपिसंयोगी कपिविभागादित्यादावव्याप्यवृत्तिहेतुकेऽव्याप्तिवारणप्रयोजनकत्वं साध्याभावे तद्विशेषणस्य सम्भवतीति व्याप्यवृत्तीत्यकिञ्चित्करम्, तथापि हेत्वभावे तद्विशेषणप्रतिसन्धानं विनैव व्याप्यवृत्तिहेतुकस्थलेऽव्याप्तिनिर्णयो भवतीत्येतदभिसन्धायैव तदुक्तम् ।

जागदीशी

[1]यद्यप्यग्रे हेत्वभावस्यापि प्रतियोगिवैयधिकरण्यावच्छिन्नस्यैव निवेशः करणीय इति अव्याप्यवृत्तिहेतावव्याप्तिः सम्भवति,[2] तथापि यथाश्रुतमूलस्य न तत्राव्याप्तिरित्यावेदयितुं व्याप्यवृत्तिहेतूक्तिः ।'व्यभिचारिणि' इति ।

वर्त्तमानो यः प्रतियोगिवैयधिकरण्यादिविशिष्टोऽभावः स न कपिसंयोगाभावः किन्तु घटाद्यभाव एव, तत्प्रतियोगितानवच्छेदकत्वस्य कपिसंयोगाभावत्वे सत्त्वात् । तदनिवेशे तु साध्याभावाधिकरणे जलादौ कपिसंयोगाभावाभावस्यापि सत्त्वात्तत्प्रतियोगितावच्छेदकमेव कपिसंयोगाभावत्वमिति नातिव्याप्तिरिति भावः ।

१. 'यद्यप्यग्र इति' । साध्याभावे प्रतियोगिवैयधिकरण्यविशेषणानुपादानेऽव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तिर्दीधितिकारेण दत्ता तत्र सद्धेतौ व्याप्यवृत्तित्वविशेषणात्प्रतीयते यदव्याप्यवृत्तिसद्धेतौ नाव्याप्तिसम्भवः स चासङ्गतः, कपिसंयोगी कपिविभागादित्यत्राव्याप्यवृत्तिसद्धेतावप्यव्याप्तिः सम्भवत्येव, कपिसंयोगाभाववति वृक्षे वक्ष्यमाणप्रतियोगिवैयधिकरण्यावच्छिन्नकपिविभागाभावस्यासत्त्वादिति ।

२. यावदनागतावेक्षणन्यायेनाग्रिमं हेत्वभावे प्रतियोगिवैयधिकरण्यविशेषणं नालोच्यते तावद्यथाश्रुतलक्षणस्याव्याप्यवृत्तिसद्धेतौ नाव्याप्तिस्संभवति कपिसंयोगरूपसाध्याभाववति वृक्षे कपिविभागाभावस्य सत्त्वादित्याशयेनाह, 'तथापीति' ।

दीधितिः

अभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यम् ।

गादाधरी

प्रतियोगिवैयधिकरण्यञ्च न प्रतियोग्यधिकरणावृत्तित्वम्, अव्याप्यवृत्तिसाध्यके तथाविधहेतुके च तादृशसाध्याभावहेत्वभावाप्रसिद्ध्याऽव्याप्तेरपि तु प्रतियोग्यनधिकरणवृत्तित्वम्, तथा च प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणेषु यावत्सु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः सन् वर्तते योऽभावस्तत्प्रतियोगित्वमर्थः । तेन कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितकपिसंयोगाद्यभावस्य हेत्वधिकरणे सत्त्वेऽपि नाव्याप्तिर्नैवैतद्वृक्षत्ववान् कपिसंयोगादित्यादौ तथाविधकपिसंयोगाद्यभावस्य सकलसाध्याभावाधिकरणे सत्त्वेप्यतिव्याप्तिः, प्रतियोग्यनधिकरणीभूतसाध्याभावाधिकरणयावन्निष्ठस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलितोऽर्थः । प्रथमे साध्यतावच्छेदकसम्बन्धेन, चरमे हेतुतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरण्त्वं बोध्यम् ।

जागदीशी

[१]एतद्वृक्षत्ववान् कपिसंयोगात् इत्यादावित्यर्थः । 'अभावद्वये' इति । साध्याभावे हेत्वभावे चेत्यर्थः । अत्र च साध्याभावे प्रतियोगिवैयधिकरण्यं [२]साध्यताघटकसम्बन्धेन प्रतियोगिनो यदनधिकरणं तद्वृत्तित्वं, [३] तेन धूमाद्यभाववतोऽपि अयःपिण्डादेः कालिकसम्बन्धेन धूमादिमत्त्वेऽपि नातिव्याप्तिः ।हेत्वभावे प्रतियोगिवैय-

---

१. 'एतद्वृक्षत्ववानिति'। यदि हेत्वभावे प्रतियोगिवैयधिकरण्यं न विशेष्यते तदा एतद्वृक्षत्ववान् कपिसंयोगादित्यत्र व्यभिचारिण्यतिव्याप्तिः, एतद्वृक्षत्वाभाववति भूतलादौ कपिसंयोगाभावसत्त्वादिति ।

२. 'साध्यताघटकेति'। साध्यतावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं तद्भिन्नवृत्तिर्यः साध्याभाव इत्यर्थः। कलिकातामुद्रितपुस्तके 'प्रतियोगिनो यदधिकरणं तदवृत्तित्वम्' इति पाठो दृश्यते स तु संयोगी सत्त्वादित्यादावतिव्याप्त्याधायकत्वादुपेक्षणीयः।

३. साध्यताघटकसम्बन्धेन प्रतियोगिवैयधिकरण्यविवक्षायाः फलमाह—'तेनेति' ।

धिकरण्यं तु प्रतियोगितावच्छेदकसम्बन्धेन [१] प्रतियोग्यनधिकरणत्वघटितं बोध्यम्।[२] तेन अयमात्मा ज्ञानादित्यादौ साध्याभाववतो घटादेर्विषयतया हेत्वभावप्रतियोगिमत्त्वेऽपि नाऽव्याप्तिः।

दीधितिः

हेत्वभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः, तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यम्।

गादाधरी

तेनायमात्माऽऽत्ममहाकालान्यतरत्वादित्यादौ व्यभिचारनिरूपकाधिकरणस्य कालस्य कालिकसम्बन्धेनात्मत्वाधिकरणत्वेऽपि नातिव्याप्तिर्नवा वह्निमान् धूमादित्यादौ साध्याभावाधिकरणयावदन्तर्गतकालज्ञानादिषु कालिकविषयित्वादिसम्बन्धेन हेत्वभावप्रतियोग्यधिकरणतासत्त्वेऽप्यसम्भवोऽव्याप्तिर्वा इत्थञ्च प्रतियोगित्वे सम्बन्धविशेषावच्छिन्नत्वेन न निवेशनीये सम्बन्धान्तरावच्छिन्नप्रतियोगिताकयोः साध्याभावहेत्वभावयोरुक्तसम्बन्धेन प्रतियोगिसमानाधिकरणतयाऽसम्भवातिव्याप्त्योरनवकाशात्। 'हेत्वभावोऽपि' इति। अपिशब्देन साध्याभावेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यं निवेशनीयमिति सूच्यते, तेन विशिष्टसत्तावान् जातेरित्यादौ हेत्वधिकरणगुणादिषु साध्याभावप्रतियोगिसत्त्वादेः सत्त्वेऽपि नातिव्याप्तिः। अत्र 'साध्याभावोऽपि' इत्युक्तावग्रिमतत्पदेन हेत्वभावपरामर्शासम्भवस्तत्र हेत्वभावपदोपादाने चाऽक्षराधिक्यमिति तन्नोक्तम्। 'तत्प्रति-

---

१. 'प्रतियोग्यनधिकरणत्वघटितमिति'। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणभिन्नवृत्तिर्हेत्वभावो ग्राह्य इति भावः।

२. प्रतियोगितावच्छेदकसम्बन्धेन वैयधिकरण्यानिवेशेऽयमात्मा ज्ञानादित्यादावव्याप्तिः, आत्मत्वरूपसाध्याभाववति घटादौ विषयतासंबन्धेन ज्ञानस्य विद्यमानत्वेन तत्र ज्ञानाभावस्य प्रतियोगिव्यधिकरणत्वाभावाल्लक्षणाघटकत्वात्। तन्निवेशे तु विवक्षितप्रतियोगितावच्छेदकसम्बन्धेन घटादेर्ज्ञानानधिकरणतया तत्र ज्ञानाभावस्य प्रतियोगिव्यधिकरणत्वेन लक्षणघटकत्वाल्लक्षणसमन्वयान्नाव्याप्तिरित्याह—'तेनेति'।

योगित्वम्' साध्याभाववन्निष्ठाभावप्रतियोगित्वम्, 'हेतुतावच्छेदकरूपेण' हेतुतावच्छेदकावच्छिन्नमित्यर्थः ।

जागदीशी

'हेत्वभावोऽपि' इति । अपिना साध्याभाव [1]सङ्ग्रहः[2] तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः ।[3] यद्यपि साध्याभावोऽपीत्येवं रूपेण वक्तुमुचितम्, अपिशब्दादेव हेत्वभावस्य लाभसम्भवात्, तथापि[4]तत्प्रतियोगित्वञ्चेत्यग्रिमतत्पदेनानिर्दिष्टहेत्वभावस्य परामर्शासम्भवात्, हेत्वभावप्रतियोगित्वञ्च इत्यभिधाने च ग्रन्थगौरवादित्थमभिधानम् ।[5] 'प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि' इति ।[6] प्रतियोगिपदं प्रतियोगितावच्छेदकताघटक सम्बन्धेनावच्छेदकस्य वैशिष्ट्यलाभाय । तेन ह्रदादौ कालिकादिसम्बन्धेन धूमत्वावच्छिन्नस्य काष्ठादेः संयोगसम्बन्धेन सत्त्वेऽपि नाव्याप्तिः । 'तत्प्रतियोगित्वं', हेत्वभावप्रतियोगित्वम् ।'हेतुतावच्छेदकरूपेण' इति । हेतुतावच्छेदकसम्बन्धेनेत्यपि बोध्यम् ।[7] तेनात्मभिन्नं

---

१. 'संग्रह इति'। साध्यतावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तिः साध्याभावो लक्षणे ग्राह्य इति भावः। अत्र 'समुच्चय इति पाठान्तरम्' ।

२. 'तेनेति'। साध्याभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याप्रवेशे गुणकर्मान्यत्वविशिष्टसत्तावान्, जातेरित्यत्रातिव्याप्तिः स्यात्, गुणादौ विशिष्टसत्त्वाभावस्य विशिष्टसत्ताभावप्रतियोगि—विशिष्टसत्त्वात्मकसत्तासमानाधिकरणत्वेन जात्यादावेव तस्य प्रतियोगिव्यधिकरणत्वात् तत्र च जात्यभावस्य सत्वात् । प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यविवक्षणे तु गुणादेरपि विशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपिताधिकरणत्वशून्यत्वेन गुणादौ साध्याभावस्य प्रतियोगिव्यधिकरणत्वेन तत्र च जात्यभावस्यासत्वान्नातिव्याप्तिरिति भावः।

३. 'यद्यपि साध्याभावोऽपीत्येव क्रमानुरोधाद्वक्तुमुचितम्' इति पाठान्तरम् ।

४. 'तत्प्रतियोगित्वञ्चेत्यग्रेतन' इति पाठान्तरम् ।

५. 'ग्रन्थगौरवं स्यादितीत्थमभिधानम्' इति पाठान्तरम् ।

६. यदि प्रतियोगितावच्छेदकावच्छिन्नः प्रतियोग्येव भवति तर्हि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्य इत्यत्र प्रतियोगिपदं किमर्थमित्याङ्क्याह—'प्रतियोगिपदमिति'। अत्र प्रतियोगितावच्छेदकताघटकेत्यादेः प्रतियोगितावच्छेदकतावच्छेदकसम्बन्ध इत्यर्थः। स च प्रकृते समवायः।

७. हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशस्यात्मभिन्नं द्रव्यत्वादित्यत्रासद्धेतावतिव्याप्तिवारणं फलमाह—'तेनेति' ।

द्रव्यत्वादित्यादौ साध्याभाववत्यात्मनि वर्त्तमानस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिंव्यधिकरणस्य कालिकादिसम्बन्धेन द्रव्यत्वाभावस्य प्रतियोगित्वेऽपि द्रव्यत्वस्य नातिव्याप्तिः।[१] न च हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्योक्त्यैवातिव्याप्तिवारणसम्भवात्, हेतुतावच्छेदकसम्बन्धेन प्रतियोगित्वविवक्षा व्यर्थेति वाच्यम्।

दीधितिः

तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाऽव्याप्तिः।

गादाधरी

हेत्वभावनिष्ठप्रतियोगिवैयधिकरण्यशरीरे स्वप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनमाह, 'द्रव्यत्वादौ' इति। 'विशिष्ट' इति। गुणकर्मान्यत्वविशिष्टेत्यर्थः।[२]

---

१. 'न चेति'। आत्मभिन्नं द्रव्यत्वादित्यत्र कालिकसंबन्धेनात्मनि प्रतियोगिव्यधिकरणद्रव्यत्वाभावमादाय समागतातिव्याप्तिनिराकरणार्थं हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशितम्। अयमात्मा ज्ञानादित्यत्राव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यं प्रतियोगितावच्छेदकसंबन्धेन पुरस्तादेव निवेशितमिति द्विः सम्बन्धनिवेशे गौरवं, तदपेक्षया हेतुतावच्छेदकसम्बन्धेन हेत्वभावे प्रतियोगिवैयधिकरण्यविवक्षणादेवाव्याप्त्यतिव्याप्त्योर्वारणसम्भवाल्लाघवमिति भावः।

२. 'तथा सतीति'। अत्रेदं तात्पर्यम्। चतुर्थलक्षणम्परित्यज्य पञ्चमलक्षणानुसरणे निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यत्र चतुर्थलक्षणस्याव्याप्तिं वक्ष्यति दीधितिकारः सा च हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसंबन्धनिवेशे सत्येवोपपद्यते, निर्धूमत्वव्याप्याभाववति पर्वतादौ स्वरूपेण निर्वह्नित्वाभावस्य महानसीयवह्न्यादिस्वरूपस्यावर्त्तमानत्वात्। यदा तु हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं परित्यज्य हेतुतावच्छेदकसंबन्धेन प्रतियोगिवैयधिकरण्यं निवेश्यते तदा हेतुतावच्छेदकस्वरूपसम्बन्धेन प्रतियोगिव्यधिकरणस्य निर्वह्नित्वं नेत्याकारकस्यान्योन्याभावस्य साध्याभाववति पर्वतादौ सत्त्वेन लक्षणसमन्वयादव्याप्तिरसङ्गता स्यादिति।

जागदीशी

तथा सति निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ निर्वह्नित्वभेदमादायैव लक्षणसम्भवे निर्धूमत्वव्याप्येत्याद्युत्तरग्रन्थवक्ष्यमाणाव्याप्त्यलग्नतापत्तेरिति ध्येयम्। (वस्तुतः निर्वह्नित्वस्य व्याप्यवृत्तितया तद्धेतुस्थले हेत्वभावे प्रतियोगिव्यधिकरणत्वं न देयं व्यर्थत्वात्, परन्तु हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वं वाच्यम्, अतः[१]नाग्रिमग्रन्थासङ्गतिरिति ध्येयम्।)

हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यविवक्षाया फलमाह—'तेन द्रव्यत्वादौ' इति।

दीधितिः

न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्त्वादावतिप्रसङ्गः।

गादाधरी

हेत्वभावप्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनमाह, 'न वा' इति। अत्रापि 'द्रव्यत्वादौ साध्ये' इत्यनुषज्यते। 'विशिष्टसत्तात्वादिना' गुणकर्मान्यत्वविशिष्टसत्तात्वादिना। तृतीयार्थश्चात्रावच्छिन्नप्रतियोगिताकत्वं तस्याभावेऽन्वयः, प्रतियोगिपदार्थैकदेशप्रतियोगित्वान्वितमवच्छिन्नत्वं वा तदर्थः। 'तादृशाभाव' इति। सकलसाध्याभाववन्निष्ठाभावेत्यर्थः। न च हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्थले हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेश्यतां, ततोऽपि तत्प्रयोजननिर्वाहात्, तथा च द्रव्यं सत्त्वादित्यादौ गुणादिनिष्ठविशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणतयैवातिव्याप्तिवारणसम्भवात्प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशनमफलमिति वाच्यम्, हेत्वभावे हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टनिरूपिताधिकरणता तन्निरूपकाभावप्रतियोगित्वमर्थः स्यात्तदपेक्षया सकलसाध्याभाववन्निष्ठा या

---

१. 'नाग्रिमेति'। हेतुतावच्छेदकस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकनिर्वह्नित्वाभावस्य महानसीयादिवह्निरूपस्य साध्याभाववति सकलान्तर्गते पर्वतादाववृत्तित्वेनाव्याप्तिसङ्गतिरिति भावः।

हेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणता तद्वत्त्वरूपस्यास्मदीयफलितार्थस्यागुरुत्वात्। न च ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मावच्छिन्नानधिकरणत्वं तद्धर्मवत्त्वमित्येवार्थः स चातिलघुरेवेति वाच्यम्, एतादृशार्थकरणे मूलोक्तं प्रतियोगिताया व्याप्तित्वं व्याहन्येतेति मूलानुसारेण दीधितिकृता गुर्वर्थानुसरणादुक्तविशेष्यविशेषणभावेनानिवेशे व्यर्थविशेषणतानवकाशात्।

केचित्तु हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठविशिष्टसत्तात्वावच्छिन्नव्यधिकरणाभावप्रतियोगित्वरूपव्याप्तिविशिष्टवैशिष्ट्ययज्ञानस्य गुणेऽपि सत्त्वाद्वाधानवतारदशायां तत्र द्रव्यत्वानुमित्यापत्तिः, अस्मन्मते तु 'तत्प्रतियोगित्वञ्च' इत्यतो लब्धस्य तादृशप्रतियोगितावच्छेदकहेतुतावच्छेदकस्य व्याप्तितया तद्विशिष्टवैशिष्ट्यावगाहिज्ञानस्य गुणेऽपि भ्रमत्वादित्याहुः।

जागदीशी

[1]अन्यथा साध्याभाववति गुणादौ विशिष्टसत्त्वाभावस्य सत्तारूपप्रतियोगिसमानाधिकरणत्वादव्याप्तिरेव स्यादिति भावः। अत्र तु द्रव्यत्वस्य साध्यतायां साकल्याप्रसिद्ध्याऽव्याप्तेरुक्तविवक्षयाप्यप्रतीकारादादिपदम्, तेन[2]गुणवत्त्वादिसाध्यस्योपग्रहः[3] द्रव्येतरासमवेतमात्रं वा प्रकृते द्रव्यत्वमिति ध्येयम्। हेतुतावच्छेदकरूपावच्छिन्नप्रतियोगित्वविवक्षायाः फलमाह—'न वा' इति। 'सत्त्वादौ' इति। द्रव्यत्वादौ साध्ये इत्यनुषज्यते।

॥इति चतुर्थं व्याप्तिलक्षणम्॥

---

१. 'अन्यथेति'। हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यविवक्षाऽभाव इत्यर्थः।

२. 'तेन गुणवत्त्वस्येति'। तथा च गुणवत्त्वस्य चतुर्विंशतिगुणस्वरूपतया तत्र साकल्यं प्रसिद्धमिति भावः।

३. 'द्रव्येतरासमवेतमात्रमिति'। अथवाऽत्र द्रव्यत्वपदेन जातिरूपमनुगतं "द्रव्येतरासमवेतत्वे सति निखिलद्रव्यसमवेतं" न ग्राह्यं, तस्यैकत्वेन साकल्याप्रसिद्धेः; किन्तु द्रव्येतरस्मिन् गुणदावसमवेतं यद्द्रव्यत्वगुणकर्मादि तदेवात्र द्रव्यत्वपदेन विवक्षितं तथा च तन्निष्ठं साकल्यं प्रसिद्धमेवेति भावः।

पञ्चमं व्याप्तिलक्षणम्

चिन्तामणिः

साध्यवदन्यावृत्तित्वं वा

माथुरी

'साध्यवदन्य' इति । अत्रापि प्रथमलक्षणोक्तरीत्या हेतौ साध्यवदन्यवृत्तित्वाभाव इत्यर्थः । तादृशवृत्तित्वाभावश्च[1]तादृशवृत्तित्वसामान्याभावो बोध्यः ।

दीधितिः

यत्रैकव्यक्तिकं साध्यं विपक्षो वा । तत्र निर्धूमत्वादिव्याप्ये ।

गादाधरी

एतल्लक्षणं दूषयित्वोत्तरलक्षणमवतारयति 'यत्रैकव्यक्तिकम्' इति । यत्रैकव्यक्तिकं साध्यं तत्राव्याप्तिरित्यन्वयः । एतद्रूपवानेतद्रसादित्यादावनेकाशेषत्वरूपसाकल्यस्य साध्येऽसत्त्वादितिभावः । साध्ये साकल्यविशेषणं परित्यज्य कल्पान्तरानुसरणान्न तत्रैतद्दोषावकाश इत्यत आह 'विपक्षो वा' इति । 'विपक्षः'

---

१. ननु धूमवदन्यह्रदनिरूपितवृत्तित्वाभावं, धूमवदन्यनिरूपितवृत्तित्वजलत्वोभयाभावञ्च साध्यवदन्यवृत्तिताप्रतियोगिकमादाय धूमवान् वह्नेरित्यत्रातिव्याप्तिरत आह—'तादृशवृत्तित्वसामान्याभाव' इति.। साध्यवदन्यनिरूपितवृत्तित्वत्वेतरधर्मानवच्छिन्न-तादृशवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभाव इति तदर्थः। उक्ताभावयोस्तादृशत्वान्नातिव्याप्तिः। अत्र सामान्याभावपरिष्करणरीतिस्तु प्रथमलक्षणवदेव बोध्या।

साध्याभाववान्, अत्राप्येकव्यक्तिक इत्यस्य विशेषणस्य लिङ्गव्यत्ययेनानुषङ्गः। तथा चैतद्घटभिन्नं पटत्वादित्यादौ साध्याभाववत्येतद्घटादौ साकल्याप्रसिद्ध्याऽव्याप्तिरित्यर्थः। सकलपदस्याशेषमात्रपरत्वे दोषान्तरमाह, 'निर्धूमत्वादिव्याप्य' इति। 'तत्त्वेन' निर्धूमत्वव्याप्यत्वेन, तथा च धूमत्वावच्छिन्नाभावव्याप्यवान् वह्नित्वावच्छिन्नाभावादित्यादावित्यर्थः। धूमत्वाद्यवच्छिन्नाभावे साध्य एकव्यक्तिकतया पूर्वदोषाक्रान्तत्वेन तद्व्याप्यसाध्यकानुसरणम्।

जागदीशी

'यत्रैकव्यक्तिकम्' इति। तथा च द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः सकलसाध्याप्रसिद्धेरित्यर्थः। ननु [१]इतोऽप्यस्वरसात् साध्यसामान्याभावस्यैव निविष्टत्वात् साध्ये साकल्यं न देयमेवेत्यत आह—'विपक्षो वा' इति। (विपक्षः साध्याभाववान्)

माथुरी

[२]तेन धूमवान् वह्नेरित्यादौ धूमवदन्यजलह्रदादिवृत्तित्वाभावस्य धूमवदन्यवृत्तित्वजलत्वोभयाभावस्य च हेतौ सत्त्वेपि नातिव्याप्तिः। साध्यवदन्यत्वञ्च अन्योन्याभावत्वनिरूपितसाध्यवत्त्वावच्छिन्नप्रतियोगिताकाभाववत्त्वम्। [३]तेन वह्निमान् धूमादित्यादौ तत्तद्वह्निमदन्यस्मिन् धूमादेर्वृत्तावपि नाव्याप्तिः।

जागदीशी

[४]एकव्यक्तिकमित्यनुषज्यते। तद्घटावृत्तिधर्मवान् तद्घटान्यत्वादित्यादावव्याप्तिः। साध्याभाववत्तद्घटस्य साकल्याप्रसिद्धेरिति भावः। (साध्याभावव-

---

१. 'इतोऽप्यस्वरसादिति'। इतः—द्रव्यं पृथिवीत्वादित्यत्र साकल्याप्रसिद्ध्याऽऽव्याप्तेरस्वरसा-(अरुचेः) दित्यर्थः। अपिना साध्याभाववद्विशेषणस्य साकल्यस्य साध्ये विशेषणत्वायोगरूपो दोषः पूर्वोक्तः समुचितः।

२. तेन। तादृशवृत्तित्वसामान्याभावनिवेशेनेत्यर्थः।

३. साध्यवत्प्रतियोगिताकाऽभावं परित्यज्य साध्यवत्त्वावच्छिन्नप्रतियोगितानिवेशस्य व्यावृत्तिमाह—'तेनेति'।

४. 'एकव्यक्तिकमिति'। यत्रैकव्यक्तिको विपक्ष इति लिङ्गविपर्ययेणार्थः। तद्घटावृत्तिधर्मवान् तद्घटान्यत्वादित्यस्य स्थाने 'तथा च यत्रैकव्यक्तिरेव

न्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकीभूताभावप्रतियोगित्वं वक्तव्यमतो दोषान्तरमाह—'निर्धूम' इति । कश्चित्)[१] ननु साध्यादिभेदेन व्याप्तेर्भेदात् यत्रैकव्यक्तिरेव विपक्षस्तत्रत्यलक्षणे साध्याभाववति साकल्यविशेषणं न देयमिति दोषान्तरमाह—'निर्धूमत्वव्याप्य' इति ।[२] निर्धूमत्वस्य साध्यत्वे यत्रैकव्यक्तिकमित्यनेनैव गतार्थता स्यादतो व्याप्यपर्य्यन्तम् ।

माथुरी

[३]न वा वह्निमत्त्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य[४]स्वावच्छिन्नभिन्नभेदरूपस्य अधिकरणे पर्वतादौ धूमस्य वृत्तावप्यव्याप्तिः ।

दीधितिः

तत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह—'साध्यवद्' इति ।

साध्याभाववती तत्र गगनावृत्तिधर्मवान् गनान्यत्वात्' इति पाठान्तरम् ।

१. निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यत्र चरमदोषदानबीजमाह—'नन्विति' । यत्र बहूनि साध्याभावाधिकरणानि तत्रैवाधिकरणे साकल्यविशेषणस्य सार्थक्यादेकमात्रविपक्षस्थले साकल्यविशेषणमनुपादेयमतो न पूर्वोक्तदोषाणामवकाश इति भावः । 'न देयम्' एतदनन्तरं 'अशेषत्वरूपं वा साकल्यं निवेश्यमतो' इति पुस्तकान्तरेऽधिकः पाठः ।

२. निर्धूमत्व-(धूमाभाव) वान् निर्वह्नित्वा-(वह्न्याभावात्) दित्यत्रैव व्याप्तिसंभवे व्याप्यपर्यन्तानुसरणे बीजमाह—'निर्धूमत्वस्येति ।' तथा च धूमत्वावच्छिन्नप्रतियोगिताकाभावस्य (निर्धूमत्वस्य) यत्रैकव्यक्तिकमित्यनेन गतार्थत्वेऽपि तद्व्याप्यानां स्नेहजलत्वादीनां बहुत्वेन न तेन गतार्थतेति हृदयम् ।

३. साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववत्त्वरूपं साध्यवदन्यत्वं विहायाऽन्योन्याभावत्वनिरूपिता या साध्यवत्त्वावच्छिन्ना प्रतियोगिता तन्निरूपकाभाववत्त्वनिवेशप्रयोजनमाह—'नवेति' ।

४. 'स्वावच्छिन्नभिन्नेति' । अत्र स्वपदेन वह्निमान्नास्तीत्यत्यन्ताभावो ग्राह्यः तदवच्छिन्नो वह्निमच्छून्यो देशः पर्वतादिः तद्भिन्नः पर्वतावयवादिः तद्भेदः पर्वतादौ वर्तते, तत्रैव स्वपदग्राह्यो वह्निमान्नास्तीत्यत्यन्ताभावोऽपि वर्त्तत इति समनियतत्त्वाद्वह्निमान्नास्तीत्यत्यन्ताभावस्य स्वावच्छिन्नभिन्नभेदस्वरूपत्वमिति तथा च वह्निमान्नास्तीत्यत्यन्ताभावस्यापि साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावरूपतया तद्वति पर्वतादौ धूमस्य वर्तमानत्वादव्याप्तिः स्यादिति भावः ।

गादाधरी

निर्धूमत्वव्याप्यजलत्वादेस्ताद्रूप्येण साध्यतायां सद्धेतुत्वानुपपत्तिरतः 'तत्त्वेन' इति । उक्तम् । 'हेत्वभावास्य' इति । अथ वह्न्यात्मकहेत्वभावस्य प्रत्येकं सकलसाध्याभाववन्निष्ठत्वासम्भवेऽपि सकलतन्निष्ठवह्न्यभावादिभेदप्रतियोगितामादायैव लक्षणं सङ्गमनीयम्, हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशादेव व्यभिचारिणि सम्बन्धान्तरावच्छिन्नप्रतियोगिताकहेत्वभावमादायातिप्रसङ्गानवकाशेन हेत्वभावप्रतियोगितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशात् ।

जागदीशी

निर्धूमत्वव्याप्यस्यापि[1] स्नेहादेः स्नेहत्वादिना साध्यत्वे वह्न्यभावस्य व्यभिचारित्वादसंग्रहो न दोष इत्यत उक्तं, 'तत्त्वेन साध्ये' इति । निर्धूमत्वव्याप्यत्वेन साध्ये इत्यर्थः । 'प्रत्येकम्' इति । हेत्वभावस्य महानसीयादिवह्नेः साध्याभाववत्सकलान्तर्गतपर्वताद्यवृत्तित्वादव्याप्तिरिति[2] भावः ।

माथुरी

[3]तस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताया अत्यन्ताभावत्वनिरूपितत्वेन अन्योन्याभावत्वनिरूपितत्वविरहात् ।[4]अन्योन्याभावत्वनिरूपितत्वञ्च तादात्म्यसम्बन्धावच्छिन्नत्वमेव ।

---

१. 'स्नेहादेरिति' निर्धूमत्वव्याप्यस्तु स्नेहोऽपि तथा च स्नेहवान् निर्वह्नित्वादित्यत्र लक्षणसत्त्वमिष्टमेव । स्नेहाभाववति भूतलादौ निर्वह्नित्वस्य वृत्तित्वेन तस्य व्यभिचारित्वात्, यदा तु निर्धूमत्वव्याप्यत्वेन साध्यत्वं तदा न निर्वह्नित्वस्य व्यभिचारित्वं निर्वह्नित्वाधिकरणे कस्यापि धूमाभावव्याप्यस्य सत्त्वादितिभावः ।

२. 'अव्याप्तिरिति' । निर्वह्नित्वाभावस्तु महानसीयपर्वतीयादिवह्निसामान्यस्वरूपः, तस्य साध्याभाववत्सकलान्तर्गतपर्वतादिषु प्रत्येकं वर्तमानत्वादिति भावः ।

३. प्रतियोगितायामन्योन्याभावत्वनिरूपितत्त्वनिवेशे यथा नोक्तदोषस्तथा दर्शयति— 'तस्येति' । अत्र षष्ठ्यर्थो निरूपितत्वं तथा च वह्निमान्नास्तीत्यत्यन्ताभावत्वनिरूपितायास्साध्यवत्त्वावच्छिन्नप्रतियोगिताया इत्यर्थः ।

४. अन्योन्याभावनिरूपितत्वपदार्थं निर्वक्ति—'अन्योन्याभावत्वेति' ।

गादाधरी

यत्तु वह्निमद्भेदहेतुताभिप्रायकोऽयं ग्रन्थः भेदभेदस्यानवस्थाभयेनाधिकरण-स्वरूपस्य स्वीकरणीयतया तस्य च प्रत्येकविश्रान्ततया यावद्विपक्षवृत्तित्वासम्भवात् तत्र हेतुभेदमादायापि लक्षणगमनासम्भवादिति तन्न,आकाशाभावाद्यधिकरणभेद-भेदस्याकाशाभावाद्यधिकरणस्वरूपतया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणगमनसम्भवात् । न चैतादृशरीत्याकाशाभावमादाय भेदहेतुकव्यभिचारिण्य-तिप्रसक्त्या हेत्वभावत्वेन सकलसाध्याभावाधिकरणवृत्तित्वं विवक्षणीयम् । तथा-सत्यधिकरणस्वरूपाभावस्य स्वस्मिन्नेव तदभावत्वेन वृत्तिरिति नातिव्याप्त्यव-काशः । एवञ्चाकाशाभावमादाय नोक्ताव्याप्तिपरिहारसम्भव इति वाच्यम्, उक्तस्थल आकाशाभावस्य हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्य- वि-रहादेवातिव्याप्तिवारणसम्भवेन तादृशविवक्षाया निष्प्रयोजनकत्वाद्वह्निमद्भेदहेतु-कस्थले च साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरणत्वेनाकाशाभाव-रूपहेतुभेदस्य प्रतियोगिव्यधिकरणत्वेनाव्याप्तिवारणसम्भवादिति दिक् ।

जागदीशी

अत्र [१]निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकं निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नयद्रूपावच्छिन्नाभावत्वं तद्रूपवत्त्वं व्याप्तिरि-त्युक्तौ तु न दोष इति ध्येयम् । ननु साध्यवत्प्रतियोगिकान्यत्वस्य धूमादिमति सत्त्वादव्याप्तिः ।

---

१. 'निरुक्तेति'। साध्यतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरण-वृत्तिसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववन्निष्ठात्यन्ताभावप्रतियोगितान-वच्छेदकं—प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरण-वृत्तिहेतुतावच्छेदकसंबन्धावच्छिन्नयद्रूपा- (हेतुतावच्छेदक) वच्छिन्नप्रतियोगिताका-भावत्वं—तद्धर्म- (हेतुतावच्छेदक) वत्त्वमिति पर्यवसितार्थः। उक्तविशेषणविशिष्ट-निर्धूमत्वाभाववति पर्वतादौ वर्तमानो योऽभावः स घटाभाव एव तत्प्रतियोगितावच्छेदकं घटत्वमनवच्छेदकं निर्वह्नित्वत्वावच्छिन्नप्रतियोगिताकाभावत्वं तादृशनिर्वह्नित्वत्वस्य निर्वह्नित्वे सत्त्वादिति रीत्या ह्रदो निर्धूमत्ववान् निर्वह्नित्वादित्यत्र लक्षणसमन्वयः।

माथुरी

[१]साध्यवत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम् । तेन वह्निमान् धूमादित्यादौ वह्निमत्त्वावच्छिन्नप्रतियोगिताकस्य समवायेन वह्निमतोऽन्योन्याभावस्य अधिकरणे पर्वतादौ धूमादेर्वृत्तावपि नाव्याप्तिः ।[२]सर्वमन्यत् प्रथमलक्षणोक्तदिशा-अवसेयम् ।[३]यथा चास्य न तृतीयलक्षणाभेदस्तथोक्तं तत्रैवेति समासः ।

गादाधरी

अत्र केचित्, यत्र वह्न्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यं साध्यं वह्न्यभावा-
न्यत्वविशिष्टवह्न्यभावो हेतुस्तत्र वह्न्यभावस्यापि सकलसाध्याभाववदन्तर्गततया
तत्र वह्न्यभावभेदासत्त्वेन तमादाय लक्षणगमनासम्भवात् । न च तादृशविशिष्टहे-
तुकस्थले हेतुभेदस्य सकलसाध्याभाववन्निष्ठत्वासम्भवेऽप्यखण्डविशिष्टात्यन्ता-
भावस्य तथात्वमादायैव लक्षणं सङ्गमनीयमिति वाच्यम्, प्राचीनमते विशिष्टाभावस्य
विशेषणाभावविशेष्याभावाभ्यामनतिरिक्ततया तादृशविशिष्टाभावस्य वह्न्यभा-
वत्व-वह्न्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वासम्भवात् । अथैवमपि
विषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्न्यभावात्यन्ताभावस्याखण्डतया
सकलधूमवन्निष्ठतया तमादायैव लक्षणं सङ्गमनीयमिति चेन्न, वृत्त्यनियामकतया
विषयितादिसम्बन्धानामत्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । संयोगादिरूप
व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावात्यन्ताभावस्याखण्डस्य सक-
लधूमवन्निष्ठत्वेऽपि तदभावप्रतियोगिता न हेतुतावच्छेदकीभूतवह्न्यभावत्वा-
वच्छिन्ना तत्र लाघवेनाभावत्वस्यैवावच्छेदकत्वादिति न तमादायापि

---

१. ननु समवायेन यो वह्निमान् तदन्यत्वं पर्वतादौ तत्र धूमस्य सत्त्वादव्याप्तिरत आह, 'साध्यवत्वमिति'। अत्र तेनेत्यस्य साध्यतावच्छेदकसम्बन्धेन साध्यवत्वनिवेशेनेत्यर्थः।

२. 'सर्वमन्यदिति'। अयमभिप्रायः, यथा प्रथमलक्षणे निरुक्तसाध्याभाववृत्ति-
साध्यसामान्यीयप्रतियोगित्वतदवच्छेदकत्वान्यतरावछेदकसंबन्धेन साध्याभावा-
धिकरणत्वं विवक्षितन्तथा प्रकृतेऽपि साध्यवदन्योन्याभाववत्वं वक्तव्यम्। यथा च
प्रथमलक्षणे हेतुतावच्छेदकसंबन्धावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेन तादृशवृत्तित्वा-
भावोऽभिमतस्तथा प्रकृतेऽपि विवक्षणीयः तेन नोक्तदोषाणामत्रावकाश इति।

३. ननु तृतीयपंचमलक्षणयोः पुनरुक्तिरत आह—'यथा चेति'।

लक्षणसङ्गतिः । न च गुरुधर्मावच्छिन्नहेतुकस्थले लक्षणसङ्गमनाय पारिभाषिकमेवावच्छेदकत्वं हेतुतावच्छेदके निवेश्यम्, तथा च वह्न्यभावत्वादेरपि तादृशावच्छेदकत्वमक्षतमेवेति वाच्यम्, एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारानावश्यकत्वेन पारिभाषिकावच्छेदकत्वं न निविष्टमित्यभिप्रायेण तद्दोषदानादिति वदन्ति ।

तदसत्, तथा सत्यपि सकलसाध्याभाववन्निष्ठं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाद्यभावमादाय लक्षणसमन्वयसम्भवात् । न च जन्यमात्रस्य कालोपाधितानये साध्याभाववति पर्वतादौ कालिकसम्बन्धेन वह्न्यभावादिसत्त्वात्तत्र तत्सम्बन्धेन तस्याभावो न वर्तत एवेति वाच्यम्, कालिकसम्बन्धेन तत्र वह्न्यभावसत्त्वेऽपि प्रतियोग्यनधिकरणीभूतवह्निमदवयवावच्छेदेन तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात् । एवं विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्यामनतिरिक्तत्वे द्रव्यं विशिष्टसत्त्वादित्यादावेवाव्याप्तिसम्भवे तदुपेक्ष्याभावसाध्यकाभावहेतुकस्थलानुधावने बीजाभावात् । तस्मात् प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिवैयधिकरण्यं निविष्टं प्रतियोगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्नैव निविष्टेत्याशयेनैव तद्दोषदानम् । हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यदाने त्वग्रिमलक्षणापेक्षया गौरवमेव तल्लक्षणावतारे बीजं बोध्यम् । एतेन सकलशब्दस्य व्यापकतार्थकतया साध्याभावव्यापकीभूताभावप्रतियोगित्वमेव निष्कृष्टैतल्लक्षणार्थः, धूमवान् वह्नेरित्यादौ प्रमेयत्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वेऽपि न क्षतिः, यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्षणत्वात् । एवञ्च हेत्वभावे प्रतियोगिवैयधिकरण्यं न निवेश्यते व्यापकतालक्षणे प्रतियोगिवैयधिकरण्यानिवेशेनाव्याप्यवृत्तिहेतुकव्यभिचारिणि हेत्वभावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितया व्यापकत्वासम्भवेनातिप्रसङ्गविरहात् । व्यापकताशरीरे च हेतुतावच्छेदकसम्बन्धेन साध्याभाववन्निष्ठत्वमभावे निवेश्यं तेन वह्न्याद्यभाववति कालिकादिसम्बन्धेन धूमादिरूपाभावस्य वृत्तावपि धूमाभावादेर्न साध्याभावव्यापकताक्षतिः । सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिश्च लक्षणपञ्चक एव दोषः ।

अस्तु वा हेतुतावच्छेदकसम्बन्धेन हेतुमत्ताज्ञानं प्रति यादृशसम्बन्धेन हेत्वभाववत्ताग्रहः प्रतिबन्धकस्तादृशसम्बन्धेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधि-

करणकं यद्यत्स्वं तद्भिन्नत्वमेव साध्याभावव्यापकतावच्छेदकत्वम्, इत्थञ्च सत्तावान् जातेरित्यादावेतादृशं स्वं जातित्वाभावत्वादिकमेव तद्भिन्नञ्च जात्यभावत्वादिकमिति लक्षणसमन्वयः। इत्थञ्चैतद्वृक्षत्ववान् कपिसंयोगादित्यादौ कपिसंयोगाभावत्वावच्छिन्नानधिकरणत्वाप्रसिद्ध्या कपिसंयोगाभावत्वं नैतादृशं स्वमिति कपिसंयोगाभावत्वस्य साध्याभावव्यापकतावच्छेदकत्वादतिव्याप्तिवारणाय हेत्वाभावे प्रतियोगिवैयधिकरण्यविशेषणं देयमेव।

दीधितिः

अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम्।

गादाधरी

न देयमेव, वाऽधिकरणत्वाभावस्यैवाधिकरणाभिन्नत्वस्थाने निवेशनीयत्वात्, कपिसंयोगाभावादेरिव तदधिकरणताया अप्यव्याप्यवृत्तितया तदभावस्य साध्याभाववति सत्त्वेनातिव्याप्त्यनवकाशात्। अधिकरणत्वाभावश्च भावप्रतियोगिकतयाऽतिरिक्त एवेति विशेषणत्ताविशेषेणैव तद्वत्त्वं साध्याभाववति विशेषणीयमिति। एवञ्च निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वेऽपि हेत्वभावत्वेन तेषां साध्याभावव्यापकत्वान्नाव्याप्तिरिति पूर्वपक्षोऽप्यकिञ्चित्करः। यत्र यावतां साध्याभाववतां सम्भवस्तत्र प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वमेव हेत्वभावविशेषणतया लक्षणघटकं, न तु साध्याभावव्यापकत्वमित्यभिप्रायेणैवेतद्दोषदानात्। प्रकारान्तरानुसारेण परिष्कारे सकललक्षणानामेव परिष्कारसम्भवादिति कृतं पल्लवितेन।

परे तु 'निर्धूमत्वव्याप्ये तत्त्वेन साध्ये' इत्यस्य सामानाधिकरण्यसम्बन्धाच्छिन्नप्रतियोगिताकधूमाभावव्याप्ये साध्ये तत्सम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावादावव्याप्तिरित्यर्थः। तत्र च हेतोरपि सकलसाध्याभाववदन्तर्गततया तत्र हेतुभेदासत्त्वेन न वह्न्यभावभेदमादाय लक्षणसङ्गतिरित्यव्याप्तिर्दुर्वारैव। तथाहि सामानाधिकरण्यसम्बन्धेन पर्वतत्वादौ वर्तमानस्य वह्नेस्तादृशसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य पर्वतादौ सत्त्वेन तत्र सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावसत्त्वात् साध्याभावाधिकरणत्वमविवादमेवेति ध्येयमित्याहुः

साध्यवद्व्यक्तिविशेषभेदमादायाव्याप्तिं परिहरति 'अत्र' इति'। 'साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वमिति' साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः।

जागदीशी

अत आह—'अत्र' इति। तथाच साध्यवत्पदेन[१] निरूढलक्षणयोपस्थापितस्य [२]साध्यवत्त्वावच्छिन्नप्रतियोगिताकस्यान्यपदार्थैकदेशेऽन्यत्वे [३]तादात्म्येनान्वयात्।

दीधितिः

नहि भवति नीलो घटो घटान्य इति।

गादाधरी

तेन वह्निमान् धूमादित्यादौ तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषस्तादृशभेदप्रतियोगितावच्छेदकतायास्तत्ताविशिष्टवह्निमत्व एव पर्याप्तत्वात्। 'व्युत्पत्तिबललभ्यम्' अन्यादिपदसमभिव्याहारलभ्यम्, नञादिपदसमभिव्याहारज्ञानस्यैवैतादृशपदसमभिव्याहारज्ञानस्याप्यन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दत्वावच्छिन्नं प्रत्येव जनकत्वादिति भावः। 'व्युत्पत्तिबललभ्यम्' इत्यनेन यथाश्रुतलक्षणवाक्यार्थ एवायमिति सूचितम्, तादृशसमभिव्याहारस्थले तत्प्रतियोगिताकाभावमात्रबोधेऽतिप्रसङ्गं सूचयति, 'न हि भवति' इति। प्रामाणिक-

---

१. 'निरूढलक्षणयेति' अनादिकालिकतात्पर्यवती लक्षणा निरूढलक्षणापदेन बोध्यते। अत्र यद्यपि शक्यसंबन्धरूपा लक्षणा शक्त-पद एव संभवति नतु साध्यवदित्याकारके प्रकृतिप्रत्ययसमुदायात्मके वाक्ये, तस्याशक्तत्वात् तथापि शक्तस्य मतुप्प्रत्ययस्यैव प्रकृतिसहकारेण साध्यवत्त्वावच्छिन्नप्रतियोगिताके निरूढलक्षणा साध्यपदन्तु तात्पर्यग्राहकम्। अथवा वैयाकरणमते नेदम्, तन्मते तद्धितवृत्तिस्वीकारात्।

२. अत्र 'साध्यतावच्छेदकविशिष्ट' इति पुस्तकान्तरे अधिकः पाठः।

३. 'तादात्म्येनेति'। अभेदेनेत्यर्थः। (अभेदस्तादात्म्यम्) इति वचनात्। तथा च साध्यवत्त्वावच्छिन्नप्रतियोगिताकाऽऽभिन्नो यो भेदस्तदधिकरणनिरूपितवृत्तित्वाभावस्य लक्षणार्थत्वान्नाव्याप्तिरित्यर्थः।

व्यावहार इति शेषः । तथा चान्वयिप्रतियोगिकाभावमात्रबोधे नीलघटेऽपि पीतघटादिभेदसत्त्वेन तादृशव्यवहारोऽपि स्यादिति भावः । द्रव्यं न घट इत्याद्यप्रयोगादनुयोगितावच्छेदकावच्छेदेनैवान्योन्याभावादिरन्यादिपदेन प्रत्याय्यते, अनुयोगितावच्छेदकश्च प्रतियोग्यवृत्तिरेव धर्म इति प्रकाशकृदङ्गीकृतव्युत्पत्त्यन्तरविरोधात् 'घटो घटादन्यः' इति प्रयोगवारणसम्भवात् 'नील' इति । 'घटादन्यः' इत्यादौ प्राचीनमते पञ्चम्याः प्रतियोगित्वमर्थः ।

जागदीशी

साध्यवति च विशिष्टसाध्यवत्त्वावच्छिन्नभेदासत्त्वान्नाव्याप्तिः[1] गुरुधर्मस्यावच्छेदकत्वोपगमाच्च द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत्वविशिष्टद्रव्यत्ववत्त्वावच्छिन्नभेदाप्रसिद्ध्या नाव्याप्तिरिति भावः ।[2] यद्धर्मविशिष्टबोधकपदसमभिव्याहृतेनान्यादिपदेनोपस्थापितेऽन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्येनान्वयो[3]न तु तद्धर्म्माश्रयप्रतियोगिताकत्वेनेत्यत्र व्युत्पत्तौ प्राचां संवादमाह—'न हि' इति । तथा च तादृशव्युत्पत्यस्वीकारे नीलघटे पीतघटप्रतियोगिकभेदसत्त्वात् नीलघटो घटान्य इत्यपि व्यवहारः स्यादिति भावः ।

गादाधरी

तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेयतासम्बन्धेनान्वयः । अथवा केवलाधेयत्वमेव घटस्य सम्बन्धः, धर्मिपारतन्त्र्येण घटत्वादेरप्यवच्छिन्नत्वसम्बन्धेन तत्रान्वयोपगमादेकविशेषणत्वेनोपस्थितस्याप्यन्यत्र

१. अत्र साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्यत्व (भेद) पदेन साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकमात्रावच्छिन्नावच्छेदकताकप्रतियोगिताकभेद एव ग्राह्यः, अन्यथा, वह्निमान् धूमादित्यादौ महानसीयवह्निमत्वावच्छिन्नप्रतियोगिताकभेदमादायाव्याप्तिंतादवस्थ्यात् । तथा च द्रव्यं पृथिवीत्वा दित्यत्राव्याप्तिः, स्वरूपतो द्रव्यत्वापेक्षया द्रव्येतरासमवेतत्त्वे सति सकलद्रव्य समवेतत्वरूप-द्रव्यत्वत्वविशिष्ट-द्रव्यत्वस्य गौरवेण प्रतियोगितानवच्छेदकत्वाल्लक्षणाप्रसिद्धेरत आह—'गुरुधर्मस्येति' ।

२. 'यद्धर्मेति' । यद्धर्मः साध्यवत्वरूपो धर्मः तद्विशिष्टबोधकं साध्यवत्पदं, तेन पदेन समभिव्याहृतं सहोच्चारितमन्यादिपदं तदुपस्थापितेऽन्यत्वादावित्यर्थः ।

३. 'नत्विति' । न तु तद्धर्माश्रय-यत्किञ्चित्प्रतियोगिताकत्वेनेत्यर्थः ।

पारतन्त्र्येणान्वयस्य व्युत्पत्तिसिद्धत्वात्, प्रतियोगित्वस्य व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशे भेदे निरूपकतासम्बन्धेनान्वयः, 'घटादन्यः' इत्यादौ च निरूपकतासम्बन्धेन घटत्वावच्छिन्नप्रतियोगिताविशिष्टो लक्षणया घटादिपदार्थस्तत्पुरुषस्थले पूर्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्टे लाक्षणिकत्वात्तादृशघटादिपदार्थस्य चाभेदसम्बन्धेन भेदेऽन्वयः ।

नवीनमते 'घटादन्य' इत्यादावनुयोगित्वं पञ्चम्यर्थः, तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्नप्रतियोगितानिरूपकतासम्बन्धेनान्वयः । अनुयोगितायाश्चाश्रयतासम्बन्धेन भेदेऽन्वयः, समासस्थले च घटत्वावच्छिन्ननिरूपितानुयोगिताविशिष्टे पूर्वपदस्य लक्षणा तस्य चाभेदसम्बन्धेन भेदेऽन्वयः । अथैवं 'साध्यवदन्यावृत्तित्वम्' इत्येतादृशलक्षणवाक्यादभेदसम्बन्धेन तादृशप्रतियोगिताविशिष्टविशेषितस्तादृशानुयोगिताविशिष्टविशेषितो वा यो भेदस्तद्वदवृत्तित्वमेव प्रतीयते ।

जागदीशी

[1]अत्र च द्रव्यं घटान्यदित्याद्यप्रयोगात् यन्निष्ठप्रतियोगिकत्वेन भेदोऽन्यादिशब्देन बोध्यते तदवृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वात्[2] तत एव घटो घटान्य इत्यस्य वारणसम्भवात्, नीलघटत्वस्य धर्मितावच्छेदकत्वानुधावनमिति मन्तव्यम् । नीलो घटो घटान्य इत्येव सम्यक् पाठः । [3] तथैव प्रकृतोपयोगित्वसङ्गतेः ।

---

१. यत्किञ्चिद्घटे यत्किंचिद्घटप्रतियोगिकभेदसत्वमूलको घटो घटान्य इत्यपि व्यवहारो न भवति स एव यद्धर्मविशिष्टेत्यादिव्युत्पत्तिमूलमस्तु, नीलघटत्वस्य धर्मितावच्छेदकत्वानुधावनं व्यर्थं घटत्वस्यैव धर्मितावच्छेदकत्वेनेष्टसिद्धेरित्याशङ्कायामाह—'अत्र चेति' । व्युत्पत्तिशब्देन समभिव्याहारो बोध्यः ।

२. 'तत एवेति' । प्रतियोग्यवृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वनियमादेवेत्यर्थः । 'धर्मितावच्छेदकत्वानुधावनम्' इति स्थाने 'अनुयोगितावच्छेदकत्वपर्यन्तानुधावनम् ।

३. तथैव । 'घटान्य' इति । समस्तपाठे सत्येवेत्यर्थः । 'प्रकृतोपयोगित्वेति' । अत्र प्रकृतमुपमेयभूतं साध्यवदन्येति लक्षणवाक्यं, तच्च साध्यवतोऽन्यः साध्यवदन्य इति कृतसमासं, तत्र निर्विभक्तिकस्यैव 'साध्यवत्' पदस्य निरूढलक्षणया साध्यवत्त्वावच्छिन्नप्रतियोगिताकबोधजनकत्वं नीलघटो घटान्य इत्युपमानोपन्यासे नोपपादनीयं तत्तु निर्विभक्तघटपद एव संगच्छते इति भावः ।

गादाधरी

तथा चानुमित्यौपयिकव्याप्तिस्वरूपजिज्ञासायां तादृशलक्षणाभिधानेऽर्थान्तरप्रसङ्गस्तादृशप्रतियोगितासम्बन्धेन तादृशानुयोगितासम्बन्धेन वा साध्यवद्विशेषितभेदवदवृत्तिताज्ञानस्यैव लाघवेनानुमितिहेतुत्वादिति चेन्न, यादृशव्याप्तिज्ञानमनुमितिहेतुस्तस्यामेवास्य तात्पर्याच्छाब्दबोधविषयत्वेऽपि तन्मूलकोदीच्यव्याप्तिविषयकमानसोपनीतभानस्यैव तादृशतात्पर्यनिर्वाह्यत्वात्तादृशशाब्दबोधस्यापि कथञ्चिदुपपादयितुं शक्यत्वाच्च। 'नीलो घटः कम्बुग्रीवादिमदन्यः' इत्यादिवाक्यस्याप्रमाणत्वात्, 'पटः कम्बुग्रीवादिमदन्यः' इत्यादिवाक्यस्य प्रमाणत्वादन्वयितावच्छेदकनिरूपितपारिभाषिकमवच्छिन्नत्वं प्रतियोगितायां भासत इत्युपेयम्, अतः 'साध्यवदन्यः' इत्यादौ मतुबन्तप्रतिपाद्यतावच्छेदकस्य साध्यसम्बन्धस्य साध्यापेक्षया गुरुतयानवच्छेदकत्वेऽपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः। पारिभाषिकं तदवच्छिन्नत्वञ्च तद्विशिष्टसम्बन्धिनिष्ठाभावीया या या प्रतियोगिता तत्तदवच्छेदकत्वाभावकूटवदवच्छिन्नत्वम्। एतादृशावच्छिन्नत्वस्य च सम्बन्धतया प्रातिस्विरूकपेण तत्तत्प्रतियोगिताव्यक्तीनां दुर्ज्ञेयत्वेऽपि न क्षतिः।

जागदीशी

घटादन्य इति पाठस्तु साध्यवदन्य इत्यत्र पञ्चमीसमासे[१] लुप्तविभक्तिस्मारितप्रतियोगित्वे[२] प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वस्य संसर्गमर्य्यादया भानमादृत्य कथञ्चित् सङ्गमनीयः।[३] घटः पटो न इत्यादौ पटपदं मुख्यार्थपरमेव, न तु प्रकृत इव पटत्वावच्छिन्नप्रतियोगिताकपरं, निपातातिरिक्तस्थल एव नामार्थयोर्भेदान्वयस्या-

---

१. लुप्तविभक्तीत्यादेः। 'लुप्तविभक्तिस्मरणोपस्थितप्रतियोगित्वरूपपञ्चमीविभक्त्यर्थे' इत्यर्थः।

२. 'प्रकृत्यर्थतेति' साध्यवत्त्वावच्छिन्नत्वसंबन्धेन विभक्त्यर्थे प्रतियोगित्वे प्रकृत्यर्थस्य साध्यवतोऽन्वयः साध्यवदन्वितप्रतियोगित्वस्य च निरूपकत्वसंबन्धेनाऽन्यपदार्थैकदेशे भेदेऽन्वयः, तथा च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदबोधः संभवतीति भावः। लुप्तविभक्तेः स्मरणस्यासार्वत्रिकत्वेनात्राऽस्वरसः कथञ्चिदित्युक्त्या सूचितः।

३. ननु किं सर्वत्रैव नञ्समभिव्याहारस्थले प्रतियोगिवाचकपदस्य लाक्षणिकत्वम्? नेत्याह—'घटः पटो नेति'।

व्युत्पन्नतया नञ्पदोपस्थाप्यभेदे पटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव पटस्यान्वयसम्भवात्।

गादाधरी

सम्बन्धज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वात्, अनुमितिं प्रति च साध्यावच्छिन्नप्रतियोगिताकत्वावगाहिज्ञानमेव कारणं कल्पते लाघवान्न तु साध्यसम्बन्धावच्छिन्नप्रतियोगितावगाहिज्ञानम्, अनुमित्यौपयिकव्याप्तिशरीरे तादृश्येव प्रतियोगिता निवेश्यते, कम्बुग्रीवादिमत्त्वान् घटादित्यादौ विशेषदर्शिनामनुमितेः प्रामाणिकत्वे निरुक्तपारिभाषिकावच्छिन्नत्वमेवानुमित्यौपयिकव्याप्तिघटकं तादृशगुरुधर्मावच्छिन्नसाध्यकानुमानस्य केवलान्वयिसाध्यकसमशीलतावादिनस्तु स्वरूपसम्बन्धरूपमेवाच्छिन्नत्वं व्याप्तिशरीरे निवेशयन्तीति समासः।

जागदीशी

पटत्वावच्छिन्नप्रतियोगिताकत्वन्तु पटत्वमवच्छिन्नत्वं प्रतियोगित्वञ्चेति त्रितयमेव[१]विशेष्यविशेषणभावापन्नं संसर्गः[२]न तु वस्तुगत्या पटत्वावच्छिन्नं यत् प्रतियोगित्वं तन्मात्रं पटो न इत्यत्र पटत्वावच्छिन्नत्वस्यानुभवसिद्धत्वात्,[३]अन्यथा प्रतियोगिताव्यक्तिभिरेव[४]तत्तद्विशिष्टबुद्ध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वमेव न स्यात्[५]मानाभावात्।[६] अत एव केवलान्वयिग्रन्थे वह्निर्नास्तीत्यत्र वह्नित्वमवच्छि-

---

१. 'विशेष्यविशेषणभावेति'। निरूपितत्वसंबन्धेन यटत्वविशिष्टं यदवच्छिन्वत्वं स्वरूपसंबन्धेन तद्विशिष्टं यत्प्रतियोगित्वं स एव पटो नास्तीत्यत्र प्रतीतौ प्रतियोगिनोऽभावांशे संसर्ग इति भावः।

२. 'न तु वस्तुगत्येति'। वस्तुतो या पटत्वावच्छिन्ना प्रतियोगिता तन्मात्रस्य पटत्वावच्छिन्नत्वाविशिष्टस्य न ससंर्गत्वमिति भावः।

३. पटत्वावच्छिन्नत्वाविशिष्टस्य प्रतियोगितामात्रस्य संसर्गत्वेऽनुपपत्तिमाह—'अन्यथेति'। 'प्रतियोगिव्यक्तिभिरेव' इति पाठान्तरम्।

४. 'तत्तद्विशिष्टेति'। तत्तत्प्रतियोगिविशिष्टाभावबुद्ध्युपपत्तावित्यर्थः।

५. 'मानाभावादिति'। पटत्वस्य प्रतियोगितावच्छेदकत्वे मानन्तु प्रतियोगितायां संसर्गमर्यादया पटत्वावच्छिन्नत्ववैशिष्ट्यावगाहित्वमेव तदनवगाहने पटत्वस्यावच्छेदकत्वमप्रामाणिकमेव स्यादिति भावः।

६. पटत्वविशिष्टावच्छिन्नविशिष्टप्रतियोगित्वमेव संसर्गो न तु प्रतियोगित्वमात्रमित्यत्र दीधितिकारसम्मतिमप्याह—'अत एवेति'।

न्नत्वं प्रतियोगित्वञ्च संसर्गमर्य्यादया भासते इति स्वयमप्युक्तम् ।[१]इत्थमेव च प्रमेयं नास्ति कम्बुग्रीवादिमान् नास्तीत्यादि शाब्दबोधानां संसर्गकोटावेव प्रतियोगितायां प्रमेयत्वाद्यवच्छिन्नत्वावगाहितया भ्रमत्वं, संसर्गप्रकारसाधारणविशेष्यविशेषण-भावस्यैव भ्रमत्वघटकत्वात्,[२]अन्यथा (परस्परविशेष्यविशेषणभावापन्नसम्बन्धान-ङ्गीकारे) स्वरूपसम्बन्धेन प्रमेयत्वावच्छिन्नप्रतियोगित्वस्यालीकतया[३] अखण्डतादृशसम्बन्धेन प्रमेयस्याभावधर्मिण्यन्वयासम्भवेन भ्रमत्वानुपपत्तेः[४]सदु-परागेणाप्यसतः संसर्गमर्य्यादया भानस्य मणिकृतानङ्गीकारात् । क्लृप्तेन पटत्वाद्य-वच्छिन्नप्रतियोगित्वसम्बन्धेन च अभावे प्रमेयस्य सत्त्वेन तादृशसम्बन्धेन भ्रमत्वस्य वक्तुमशक्यत्वात्,[५] पटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगित्वस-म्बन्धेन प्रमेयत्वादिविशिष्टस्यान्वये निराकाङ्क्षत्वाच्च[६]अन्यथा घटवत्यपि घटो नास्तीत्यादेः प्रमात्वापत्तेः तत्तत् घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन घटविशिष्टस्य घटविशेषाभावस्य तत्र सत्त्वात् ।[७] एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टसत्ता-

---

१. 'इत्थमेव चेति' । मिथो विशेष्यविशेषणभावापन्नप्रतियोगित्वस्य संसर्गविधयाऽव-गाहन एवेत्यर्थः ।

२. ननु भ्रमत्वं तदभाववति तत्प्रकारकज्ञानत्वं, तत्तु ज्ञानस्य संसर्गांशे न संभवति, संसर्गविशेषणस्य प्रकारत्वाभावादत आह—'संसर्गप्रकारेति' । संसर्गे प्रकारे च समानो यो विशेषणविशेष्यभावः स एव भ्रमलक्षणघटक इत्यर्थः । तथा च तदभाववद्विशेष्यकत्वे सति तद्विशेषणकं ज्ञानं भ्रम इत्येव भ्रमलक्षणं तच्च ज्ञानस्य संसर्गकोटावपि संभवत्येवेति भावः ।

३. 'अखण्डतादृशसम्बन्धेनेति' । मिथो विशेषणविशेष्यभावानापन्नप्रमेयत्वा-वच्छिन्नप्रतियोगित्वरूपाखण्ड (धर्मधर्मिभावशून्य) सम्बन्धस्य मृषात्वेन तेन संबन्धेन प्रमेयस्याभावेऽन्वयो न संभवति सुतरां भ्रमत्वसंपादनं दूरत एव पराहतमिति भावः ।

४. ननु प्रमेयत्वावच्छिन्नप्रतियोगितात्वेन, स्वरूपसंम्बन्धावच्छिन्नप्रतियोगितात्वेन वा, सद्रूपेण तादृशालीकप्रतियोगित्वभानं स्यादत आह, 'सदुपरागेणेति' । सद्रूपेणेत्यर्थः ।

५. 'पटत्वादेरिति' । यद्धर्मावच्छिन्नस्याऽऽभावे धर्मिण्यन्वयस्तद्धर्मावच्छिन्न-प्रतियोगित्वमेव संसर्गतया भासते तथा चाभावे धर्मिणि प्रमेयत्वावच्छिन्नस्य पटत्वावच्छिन्नप्रतियोगित्वसंबन्धेनान्वयो न भवतीति भावः ।

६. अन्वयितानवच्छेदकरूपावच्छिन्नप्रतियोगित्वसंबन्धेन यदि प्रतियोगिनोऽभावेऽन्वयः स्यात्तदा दोषमाह—'अन्यथेति' ।

७. कलृप्तेन पटत्वावच्छिन्नप्रतियोगित्वादिपूर्वोक्तसमाधाने सति पटत्वादेरन्वयितान-वच्छेदकेत्यादि द्वितीयसमाधानमफलमित्याशङ्कया-माह—'एतेनेति' ।

त्वावच्छिन्नस्य समवायेनासत्त्ववत् घटत्वाद्यवच्छिन्नप्रतियोगित्वसम्बन्धेन घटत्वावच्छिन्नवतोऽपि घटाद्यभावस्य न तादृशसम्बन्धेन प्रमेयत्वाद्यवच्छिन्नवत्त्वमतः प्रमेयं नास्तीत्यादौ घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेनैव प्रमेयत्वावच्छिन्नस्यैवाभावांशे भ्रमत्वमित्यपि प्रत्युक्तं[१]घटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वविशिष्टस्यान्वये निराकाङ्क्षतया तथा शाब्दस्यासम्भवादिति ध्येयम्। नीलघटो नास्तीत्यादौ नीलघटत्वस्यान्वयितावच्छेदकत्वे तादृशधर्म्मावच्छिन्नप्रतियोगित्वमेव संसर्गः न तु नीलत्वादिप्रत्येकधर्मावच्छिन्नप्रतियोगित्वम्,[२]नीलपटस्य पीतघटस्य चाधिकरणे तादृशप्रयोगापलापापत्तेः। नीलत्वोपलक्षितस्य घटत्वमात्रस्यान्वयितावच्छेदकत्वस्थले तु नीलत्वोपलक्षितघटत्वावच्छिन्नप्रतियोगित्वमेव[३]तथा संयोगेन घटो नास्तीत्यादौ तृतीयाविभक्तेर्नावच्छिन्नत्वमर्थः[४]संसर्गीभूतप्रतियोगितायां तदन्वयासम्भवात् (पदार्थापदार्थयोरन्वयस्य निराकाक्षत्वात्, पदार्थः पदार्थेनान्वीयते इति नियमाच्च) किन्तु अवच्छिन्नप्रतियोगिताकत्वं [५]प्रतियोगितामात्रं वा, अवच्छिन्नत्वसंसर्गेण संयोगादेस्तत्रान्वयादेव [६]विशिष्टलाभात्। [७]न चैवं संयोगेन घटाभावस्यैव

निराकाङ्क्षस्वरूपद्वितीयसमाधानेनेत्यर्थः। प्रत्युक्तमित्यग्रेतनेन चास्यान्वयः।

१. एतेनेत्यादिना सूचितं बीजमाह—'घटत्वादेरिति'।

२. नीलो घटो नास्तीत्यत्र यदि नीलत्वावच्छिन्नप्रतियोगित्वं, घटत्वावच्छिन्नप्रतियोगित्वं वा संसर्गःस्यात्तदा क्रमशो दोषमाह—'नीलपटस्य पीतघटस्य चेति'। 'वाधिकरणे' इति पाठान्तरम्।

३. 'तथेति'। संसर्ग इत्यर्थः। आपत्त्यनुपपत्त्यभावान्नीलत्वोपलक्षितघटत्वावच्छिन्नप्रतियोगित्वमेव संसर्गतया भासत इत्यर्थः। 'नीलोपलक्षितस्य' इति पाठान्तरम्, अग्रे 'नीलत्वोपलक्षित' इति पाठः पुस्तकान्तरेषु नास्ति।

४. 'संसर्गीभूतेति'। संसर्गविधया भासमानघटत्वावच्छिन्नत्वविशिष्टप्रतियोगित्वे तृतीयाविभक्त्यर्थस्याऽन्वयो न संभवति, (पदार्थः पदार्थेनान्वेति नत्वपदार्थेन संसर्गादिना) इति नियमादिति भावः।

५. लाघवादाह—'प्रतियोगितामात्रमिति'।

६. 'विशिष्टलाभादिति'। संयोगावच्छिन्नप्रतियोगित्वलाभादित्यर्थः।

७. एवं—तृतीयाविभक्तेरवच्छिन्नप्रतियोगिताकत्वार्थकत्वे, प्रतियोगितामात्रार्थकत्वे वेत्यर्थः।

समवायेन[१] घटविशिष्टद्रव्यत्वाभावतया समवायेन कपाले घटो नास्तीति[२] व्यवहारापत्तिः तृतीयान्तसमभिव्याहारस्थले[३] तदुपस्थाप्यप्रतियोगित्वस्यैव संसर्गतया भानस्य व्युत्पन्नत्वात् समवायावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावस्य च कपाले विरहात् ।[४] अस्तु वा घटत्वावच्छिन्नत्वस्येव संयोगादिसम्बन्धावच्छिन्नत्वस्यापि प्रतियोगित्वांशे संसर्गमर्य्यादयैव भानं तृतीयान्तसमभिव्याहारस्य नियामकत्वाच्च[५] नातिप्रसङ्गः ।

घटानधिकरणं भूतलम् इत्यादौ तु लक्षणया अधिकरणपदमेव घटाधिकरणार्थकं, घटपदन्तु[६] तात्पर्यग्राहकम्, अन्यथाऽनधिकरणपदेन अधिकरणसामान्यभिन्नत्वोक्तौ च[७] भूतले तस्य बाधः स्यात् । न च घटान्वितस्यैव अधिकरणस्य भेदस्तत्र नञा बोधनीयः ।[८] समासान्तर्गतनञ उत्तरपदार्थमात्रान्वयित्वव्युत्पत्तेः ।[९] अन्यथा नीलाऽघटो घटइत्यादौ नीलघटान्यस्य घटत्वं नीलाऽप्रमेयः पट इत्यादौ च नील-

---

१. 'घटविशिष्टेति' । स्वाधिकरणवृत्तित्वसंबन्धेन (अत्र स्वपदेन घटो ग्राह्यः तस्य संयोगसंबन्धेनाधिकरणं समवायेन वृत्तित्वम् ।) घटविशिष्टद्रव्यत्वाभावेत्यर्थः ।

२. 'व्यवहारापत्तिरिति' । संयोगेन घटाभाव—समवायेन घटविशिष्टद्रव्यत्वाभावयोस्समनियताभावत्वादैक्येन यथा घटविशिष्टद्रव्यत्वाभावः समवायावच्छिन्नप्रतियोगिताकः कपाले वर्तते तथा घटाभावोऽपि वर्तते इति कपाले समवायेन घटो नास्तीति व्यवहारापत्तिः स्यादिति भावः ।

३. 'तदुपस्थाप्येति' । तृतीयान्तपदोपस्थाप्येत्यर्थः । तथा च तृतीयान्तपदोपस्थाप्यसमवायावच्छिन्न-घटत्वावच्छिन्नप्रतियोगितासंबन्धेन घटविशिष्टस्याभावस्य कपालेऽसत्वान्न कपाले समवायेन घटो नास्तीति व्यवहारापत्तिरिति भावः ।

४. प्रकारविधया संयोगादिसंबन्धावच्छिन्नत्वस्य निवेशापेक्षया तस्य संसर्गविधया प्रवेशे लाघवमभिप्रेत्याह—'अस्तु वेति' ।

५. 'नातिप्रसङ्ग इति' । नानपेक्षितसंबन्धावच्छिन्नप्रतियोगित्वसंसर्गकाभावधीरित्यर्थः ।

६. 'तात्पर्यग्राहकमिति' । इदं घटपदं घटाधिकरणबोधेच्छयोच्चरितं न तु पटाद्यधिकरणबोधेच्छयेत्याकारकवक्तुस्तात्पर्यग्राहकं घटपदमित्यर्थः ।

७. 'भूतले तस्य बाधः स्यादिति' । भूतलस्य बहूनां पदार्थानामधिकरणत्वेन तत्राधिकरणत्वावच्छिन्नप्रतियोगिताकसामान्यभेदस्य बाधितत्वादिति भावः ।

८. 'समासान्तर्गतनञ इति' । समासान्तर्गतनञर्थस्येत्यर्थः ।

९. 'अन्यथेति' समासान्तर्गतनञर्थस्योत्तरपदार्थमात्रान्वयित्वव्युत्पत्त्यनङ्गीकारे इत्यर्थः ।

प्रमेयान्यस्य पटत्वं[१]प्रतीयेत।[२]वस्तुतः ससम्बन्धिकपदस्थले[३]व्युत्पत्तिवैचित्र्यात् प्रतियोगितानवच्छेदकं घटानधिकरणमित्यादौ घटाद्यन्वितस्यैवाधिकरणादेर्भेदो भासते,[४]अन्यत्र त्रिपदतत्पुरुषानुपगमेऽपि घटस्य नाधिकरणं प्रतियोगिताया नावच्छेदकमित्यादिरीत्या त्रिपदतत्पुरुषेण विशिष्टलाभसम्भवादिति परमार्थः। पीतः शङ्खो नास्तीत्यादिशाब्दबोधस्तु शङ्खत्वावच्छिन्नतया न प्रतियोगित्वमवगाहते तन्मात्रस्यान्वयितानवच्छेदकत्वात्, शङ्खवत्तया निश्चित्ते धर्मिण्यपि तादृशप्रयोगात्, परन्तु[५]पीतशङ्खत्वावच्छिन्नप्रतियोगितात्वेन संसर्गमर्य्यादया प्रतियोगित्वमवागाहते। नञादिपदानां यद्धर्मविशिष्टवैशिष्ट्यावगाहिस्वोपस्थाप्याभावधर्मिकान्वयबोधजनकत्वं[६] तद्धर्मावच्छिन्नप्रतियोगितात्वेन प्रतियोगितासंसर्गकधीजनकत्वव्युत्पत्तेः।[७] इयांस्तु विशेषः यत् घटो नास्ति इत्यादिशाब्दबोधे,

---

१. 'प्रतीयेतेति'। नीलाघटो घटः नीलाप्रमेयः पट इत्यादयः शब्दा न प्रमाणानि, घटान्यादौ घटत्वादिबोधकत्वात्। परन्तूक्तव्युत्पत्यनङ्गीकारे नीलघटान्यादौ घटत्वादिबोधकत्वेन यथार्थत्वात्प्रमाणं स्यादिति भावः।

२. अधिकरणपदस्य घटाधिकरणे लक्षणाभ्युपगमे गौरवमभिप्रेत्य लाघवादाह, 'वस्तुत इति'। अत्र ससंबन्धिकपदेत्यस्य साकाङ्क्षपदेत्यर्थः।

३. 'व्युत्पत्तिवैचित्र्यादिति'। साकाङ्क्षपदसमभिव्याहृतसमासान्तर्गतनञर्थस्य पूर्वपदार्थान्वितोत्तरपदार्थान्वयित्वमित्याकारकव्युत्पत्त्यन्तरस्वीकारादित्यर्थः। घटानधिकरणम्' इति स्थाने 'घटानधिकरणं भूतलम्' इति पाठान्तरम्।

४. ननु न अधिकरणमनधिकरणं घटस्यानधिकरणं घटानधिकरणमिति समासः? घटस्य न अधिकरणं घटानधिकरणमिति वा त्रिपदतत्पुरुषसमासः? तत्र नाद्यः अनधिकरणोपस्थाप्याधिकरणभिन्नैकदेशेऽधिकरणपदार्थे घटपदार्थस्यान्वयासंभवात्। नान्त्यः, त्रिपदतत्पुरुषाऽनुपगामादत आह—'अन्यत्रेति'।

५. 'पीतशङ्खत्वेति'। पीतत्व-शङ्खत्वधर्मद्वयावच्छिन्नप्रतियोगित्वेन विशिष्टं प्रतियोगित्वं संसर्गमर्यादया तत्र भासत इत्यर्थः।

६. 'स्वोपस्थाप्येति'। स्वं नञ्पदम्। तदुपस्थाप्योऽभावः (भेदः) तथा च यद्धर्मावच्छिन्नप्रकारतानिरूपकाऽभावत्वावच्छिन्नविशेष्यताशालिबोधो नञ्पदेन भवति तद्धर्मावच्छिन्नप्रतियोगितात्वविशिष्टप्रतियोगिताया एव संसर्गविधया भानमिति भावः। 'प्रतियोगितासंसर्गकधीजनकत्व' इति स्थाने 'प्रतियोगितासंसर्गकान्वयबोधजनकत्व' इति पाठान्तरम्।

७. ननु पीतशङ्खत्वावच्छिन्नप्रतियोगितात्वेन प्रतियोगित्वावगाहिन्याः पीतः शङ्खो नास्तीति प्रतीतेः घटो नास्तीति प्रतीतेश्च वैषम्यं न स्यात्तत्रोभयत्रापि सामान्यधर्मावच्छिन्नप्रतियोगित्वस्य संसर्गविधयावगाहनसाम्यादत आह, 'इयांस्तु' इति।

सांर्गिकप्रतियोगित्वावगाहिताप्रसिद्धेन[१] घटत्वाद्यवच्छिन्नप्रतियोगितात्वेनैव प्रतियोगिता निरूपिता, पीतः शङ्खो नास्तीत्यादौ तु पीतशङ्खत्वावच्छिन्न-प्रतियोगितात्वेनाप्रसिद्धेनेत्यादिकं बहुतरमूहनीयम् ।

---

१. अवगाहितेत्यस्य विषयितेत्यर्थः तथा च घटो नास्तीत्यादिवाक्यजन्यशाब्दबोधनिष्ठा या सांसर्गिकी प्रतियोगित्व-विषयिता सा प्रसिद्धधर्मावच्छिन्नप्रतियोगित्वनिष्ठनिरूपकता-निरूपितनिरूप्यतावतीत्यर्थः। तादृशीमसिद्धधर्मावच्छिन्नप्रतियोगिता निरूपिता सांसर्गिक-विषयिता पीतः शङ्खो नास्तीति शाब्दबोधे नास्तीति वैषम्यन्तयोः प्रतीत्योरिति भावः।

चिन्तामणिः

केवलान्वयिन्यभावात्।

माथुरी

सर्वाण्येव लक्षणानि केवलान्वय्यव्याप्त्या दूषयति—'केवलान्वयिन्यभावात्' इति।

गादाधरी

मूले 'केवलान्वयिन्यभावात्'इत्यादावेतादृशलक्षणपञ्चकस्य केवलान्वयिन्यप्रसिद्धेरित्यर्थः। न च हेतुतावच्छेदकसम्बन्धेन साध्याभाववदवृत्तित्वस्यावश्यं निवेशनीयतया सत्तावान् द्रव्यत्यादित्यादावव्याप्तिरस्तीति केवलान्वयिसाध्यकमात्रेऽव्याप्तिकथनमसङ्गतमिति वाच्यम्, केवलान्वयिपदेन हेतुतावच्छेदकसम्बन्धेन यत्किञ्चिदधिकरणवृत्त्यभावप्रतियोगित्वरूपकेवलान्वयित्वाश्रयसाध्यकमात्रस्योक्तत्वात्।

अथवा हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमनिवेश्य हेतुतावच्छेदकसम्बन्धातिरिक्तो यो हेतुप्रतियोगिकः सम्बन्धस्तदन्यसम्बन्धावच्छिन्नवृत्तित्वमेव निवेश्यम्, वह्निमान् धूमादित्यादौ कालिकसम्बन्धेन धूमादेः साध्याभाववद्वृत्तित्वेऽपि तत्सम्बन्धस्य हेतुतावच्छेदकसम्बन्धातिरिक्तत्वाद्धेतुप्रतियोगिकत्वाच्च लक्षणाघटकतया तदन्यसम्बन्धेन तद्वृत्तित्वाभावोऽस्त्येवेति भावः। एवञ्च सत्तावान् द्रव्यत्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वाप्रसिद्धावपि हेतुतावच्छेदकसम्बन्धातिरिक्तहेतुप्रतियोगिकसम्बन्धान्यविशेषणताविशेषादिना वृत्तित्वप्रसिद्ध्या नाव्याप्तिरिति ध्येयम्।

तत्त्वालोकः

मूले 'केवलान्वयिन्यभावात्' इति। अथ स्वावच्छिन्नाभाववद्वृत्तित्वसम्बन्धावच्छिन्नसाध्यतावच्छेदकाभाववत्त्वमेव व्याप्तिरस्तु तावतैव वाच्यं ज्ञेयत्वादित्या-

दिकेवलान्वयिनि नाव्याप्तिर्वाच्यत्वत्वस्योक्तसम्बन्धस्य व्यधिकरणत्वादिति चेन्न, वृत्तिनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे धनी चैत्रत्वादित्यादावव्याप्तेः, वृत्तिनियामकसम्बन्धाघटितस्वावच्छिन्नाभाववद्वृत्तित्वस्य वृत्तिनियामकत्वेऽपि वृत्त्यनियामकसम्बन्धघटितस्य वृत्त्यनियामकतया वृक्षः शिंशपाया इत्यत्राव्याप्तेश्च ।

माथुरी

पञ्चानामेव लक्षणानामिदं वाच्यं ज्ञेयत्वादित्यादिव्याप्यवृत्तिकेवलान्वयिसाध्यके[१] द्वितीयादिलक्षणचतुष्टयस्य तु कपिसंयोगाभाववान् सत्त्वादित्याद्यव्याप्यवृत्तिकेवलान्वयिसाध्यकेऽपि[२] चाभावादित्यर्थः । साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्य साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य चाप्रसिद्धत्वात् । कपिसंयोगाभाववान् सत्त्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वस्याप्रसिद्धत्वाच्चेति भावः । तृतीयलक्षणस्य केवलान्वयिसाध्यकासत्त्वञ्च तद्व्याख्यानावसर एव प्रपञ्चितम् ।[३]एतच्चोपलक्षणं, द्वितीये कपिसंयोग्येतद्वृक्षत्वादित्यादावप्यव्याप्तिः अधिकरणभेदेनाऽभावभेदे मानाभावेन कपिसंयोगाभाववति[४] वृक्षे एतद्वृक्षत्वस्य वृत्तित्वात् । न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववद्वृत्तित्वं वक्तव्यम् । एवञ्च वृक्षस्य विशिष्टाधिकरणत्वाभावान्ना-

---

१. 'व्याप्यवृत्तीति'-व्याप्यवृत्तित्वं स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्, केवलान्वयित्वञ्च स्वप्रतियोग्यनधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् । यस्मिन् पदार्थे निरुक्तं व्याप्यवृत्तित्वं केवलान्वयित्वञ्च वर्त्तते तद्व्याप्यवृत्तिकेवलान्वयीत्युच्यते । यथा वाच्यत्वप्रमेयत्वादिकं तत्साध्यके पञ्चानामपि लक्षणानामव्याप्तिः यत्र पदार्थे व्याप्यवृत्तित्वं न वर्तते किन्तु निरुक्तं केवलान्वयित्वमात्रमस्ति तद्व्याप्यवृत्तिकेवलान्वयि, यथा कपिसंयोगाभावादिः, तत्साध्यके द्वितीयादिचतुर्णामव्याप्तिरिति भावः ।

२. 'अभावादिति' । अप्रसिद्धत्वादित्यर्थः, अन्यथा सिद्ध्यसिद्धिभ्यां व्याघातः स्यादिति भावः ।

३. 'एतच्चोपलक्षणमिति' उभयविधकेवलान्वयिन्यव्याप्त्यभिधानमुदाहरणमात्रमन्येऽपि वक्ष्यमाणा दोषा यथायथं लक्षणे सम्भवन्त्येवेति भावः ।

'कपिसंयोगावच्छिन्नवृत्ति कपिसंयोगाभाववति' इति पाठान्तरम् ।

व्याप्तिरिति वाच्यम्, साध्याभावपदवैयर्थ्यापत्तेः। साध्यवद्भिन्नवृत्तित्वविशिष्टवद्-वृत्तित्वस्यैव सम्यक्त्वात्, सद्धेतौ हेत्वधिकरणे विशिष्टाधिकरणत्वाभावादेव असम्भवाभावात् तृतीये साध्यवत्प्रतियोगिताकान्योन्याभावमात्रस्य घटकत्वे चाल-नीन्यायेनान्योन्याभावमादाय नानाधिकरणकसाध्यके वह्निमान् धूमादित्यादावव्या-प्तिश्चेत्यपि बोध्यम्।

तत्त्वालोकः

यदि च वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे साध्यताव-च्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धित्वाभाववद्धेतुतावच्छे-दकसम्बन्धावच्छिन्नसम्बन्धितावच्छेदकप्रकृतहेतुतावच्छेदकस्यैव वा व्याप्तित्वे न दोषः। अभावश्च स्वरूपसम्बन्धावच्छिन्नस्वाभाववन्निरूपितस्वरूपसम्बन्धाव-च्छिन्नवृत्तित्वसम्बन्धावच्छिन्नप्रतियोगिताक इति। एतेन स्ववृत्तिवाच्यत्ववत्त्व-सम्बन्धेन घटादिसाध्यकस्थलेऽव्याप्तिः तत्सम्बन्धावच्छिन्नाभावस्याप्रसिद्धत्वा-दिति निरस्तम्, स्वरूपसम्बन्धावच्छिन्नाभावस्य प्रसिद्धेरिति विभाव्यते, तदात्र केचित्सम्बन्धिताया नानात्वे धूमवान् वह्नेरित्यत्रातिव्याप्तिः, पर्वतीयवह्न्यादिसम्ब-न्धिताया उक्तसम्बन्धित्वाभाववत्त्वेन तदवच्छेदकत्वस्य वह्नित्वे सत्त्वात्। यद्धर्म्मा-वच्छिन्नसम्बन्धित्वत्वावच्छेदेनोक्तसम्बन्धित्वाभाववत्त्वविक्षणे, उक्तदोष-वारणेप्युक्तसम्बन्धितात्वावच्छेद्यत्वस्य व्यापकतारूपत्वेन सिद्धान्तलक्षणापेक्षया लघुत्वाभावः, अव्यभिचरितत्वस्य पारिभाषिकत्वापत्तेः उक्तस्य व्यभिचारज्ञानाप्रति-बध्यत्वेन व्याप्तिरूपत्वासम्भवश्चेति वदन्ति। तन्न चारु स्वाभाववन्निरूपितसम्ब-न्धितावच्छेदकत्वसम्बन्धावच्छिन्नोक्तसम्बन्धित्वाभाववद्धेतुतावच्छेदकस्य व्याप्तित्वे उक्तातिव्याप्तिसम्भवात्। एवमुक्तपारिभाषिकत्वस्य न दोषत्वमन्यथा द्रव्यं विशिष्टसत्त्वादित्यादिस्थलीयाव्याप्ति- वारणायोक्तस्य लक्षणस्य पारिभाषि-कार्थकत्वेन हेयत्वमापद्येत। साध्याभाववद्वृत्तित्वस्यैव व्यभिचारत्वे, समानप्रकार-त्वादिनैव प्रतिबन्धकत्वे च सिद्धान्तव्याप्तेरपि तदप्रतिबध्यतयाऽव्याप्तित्वप्रसङ्गः। न च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमपि व्यभिचार इति न दोष इति वाच्यं प्रतियोगिताधर्म्मिकोभयाभावघटितकल्पस्य सिद्धान्तत्वेन तज्ज्ञानस्योक्तव्य-भिचारज्ञानप्रतिबध्यत्वविरहात्। यदि मणिमन्त्रादिन्यायेनोक्तव्याप्तिज्ञान-स्याप्युक्तव्यभिचारज्ञानप्रतिबध्यत्वं तदा प्रकृतव्याप्तिज्ञानस्यापि तत्त्वं सुघटमेव तादृशव्याप्तिज्ञानविरोधिज्ञानविषयव्यभिचारकल्पना च प्रकृतेऽपि समेति।

अत्र ब्रूमः स्वनिष्ठप्रतियोगिताकाभाववद्वृत्तित्वस्य संसर्गत्वेऽसम्भवापत्याऽवच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वस्य संसर्गत्वम्वाच्यन्तथा सति गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वे तद्रूपवान् रसादित्यत्रातिव्याप्तिः, तद्रूपत्वावच्छिन्नसम्बन्धित्वाभावप्रतियोगितावच्छेदकत्वस्य लाघवेन तद्व्यक्तित्व एव कल्पनीयतयोक्तावच्छिन्नाभाववद्वृत्तित्वस्य तद्रूपत्वावच्छिन्नसम्बन्धित्वव्यधिकरणत्वेन तदभावस्य हेतुतावच्छेदकावच्छिन्नसम्बन्धित्वे सत्त्वात् उक्तसम्बन्धिताव्यक्त्यभावनिवेशे वह्निमान्धूमादित्यत्राव्याप्तिः उक्तसम्बन्धितात्वं यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नाभाववत्त्वविवक्षणे तद्रूपावच्छिन्नसम्बन्धितात्वस्य गौरवेण रूपत्वावच्छिन्नसम्बन्धितात्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वेन तद्रूपावच्छिन्नाभाववत्त्वस्य हेतौ सत्त्वेनातिव्याप्तिप्रसङ्गः। यद्रूपावच्छिन्नाभावकूटवत्त्वविवक्षा च वह्निमान्धूमादित्यादावव्याप्त्यैवानुपादेया, तद्रूपावच्छिन्नाभावकूटान्तर्गतस्य तद्व्यक्त्यभावस्य धूमे विरहात्। एवं वाच्यं ज्ञेयत्वादित्यादावपि साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसम्बन्धित्वाभावप्रतियोगितावच्छेदकत्वस्य सम्बन्धितात्व एव लाघवेन कल्पनीयतया तादृशसम्बन्धितात्वावच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तिप्रसङ्गः। यदि गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वमङ्गीक्रियते तदैतस्य लक्षणान्तरत्वमेवावसेयमिति ध्येयम्।

अथ निरूप्यनिपरूकभावापन्नविषयतात्मकसाध्याभाववद्वृत्तित्वप्रकारतानिरूपितविशेष्यत्वाभावः प्रमीयविशेष्यताप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको व्याप्तिरस्त्विति चेन्न, यत्र व्यभिचारिणि साध्याभाववद्वृत्तित्वस्य न प्रमा तत्रातिव्याप्त्यापत्तेः। न चेश्वरस्यैव प्रमासम्भवः विशकलितपदार्थावगाहित्वेनैव सर्वविषयकत्वोपपत्तौ विशिष्टविषयकत्वे मानाभावात्। एवं वृत्त्यनियामकसम्बन्धस्य गुरुधर्म्मस्य च प्रतियोगितानवच्छेदकत्वे धीः द्रव्यत्वात्प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेरित्यलम्।

व्याप्तिपञ्चकतत्त्वालोकः सम्पूर्णः*

॥इति पञ्चमं व्याप्तिलक्षणम्॥

षष्ठं सिंहव्याप्तिलक्षणम्

चिन्तामणिः

नापि साध्यासामानाधिकरण्यानधिकरणत्वम् ।

माथुरी

'नापि' इति । अत्र साध्यासामानाधिकरण्यं न साध्याधिकरणवृत्तित्वाभावः द्रव्यं सत्त्वादित्यादावतिव्याप्त्यापत्तेः, द्रव्यत्वाधिकरणवृत्तित्वाभावानधिकरणत्वात् सत्तायां, नापि साध्यवद्भिन्नवृत्तित्वम्[१] द्वितीयेन पौनरुक्त्यापत्तेः, किंतु साध्याधिकरणत्वाभाववद्वृत्तित्वम् ।

दीधितिः

'नापि' इति । साध्यमसमानाधिकरणं यस्य, यदधिकरणानधिकरणं साध्यं तत्त्वम् । साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम् ।

गादाधरी

साध्यसामानाधिकरण्यानधिकरणत्वमित्येतल्लक्षणे यदि तदधिकरणावृत्तित्वरूपमसामानाधिकरण्यं निवेश्यते तदा द्रव्यं सत्त्वादित्यादावतिव्याप्तिः, सत्ताया द्रव्यत्वाधिकरणवृत्तितया तादृशासामानाधिकरण्यानधिकरणत्वात् । तदनधिकरणवृत्तित्वस्यासामानाधिकरण्यपदार्थत्वेऽनन्तरवक्ष्यमाणलक्षणाभेद इत्यतो व्याचष्टे, 'साध्य' इति । साध्यमसमानाधिकरणं यस्येत्यत्रासमानाधिकरणपदस्य स्वानधिकरणाधिकरणार्थकत्वे द्रव्यं सत्त्वादित्यादावेवातिव्याप्तिर्द्रव्यत्वादेः सत्ताद्यनधिकरणाधिकरणकत्वविरहेण यत्पदेन सत्त्वादेरुपादानासम्भवात्, सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च सत्तादेर्द्रव्यत्वाद्यनधिकरणाधिकरणकत्वादतस्तदधिकरणानधिकरणकत्वपरतया तत्पदं व्याचष्टे, 'यदधिकरण' इति । यदधिकरणानधि-

---

१. 'द्वितीयेनेति' । साध्यवैयधिकरण्यानधिकरणत्वमिति लक्षणे साध्यवैयधिकरण्यस्य साध्यवद्भिन्नवृत्तित्वमर्थः । तथा च द्वितीयलक्षणेन पौनरुक्त्यं स्यादिति भावः ।

करणकं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वे व्याप्तेर्विशिष्टैकार्थरूपतानुपपत्त्या विशिष्टपरामर्शस्यानुमितिहेतुत्वानिर्वाहः, यत्त्वतत्त्वानुगमेन तत्त्वाधिकरणत्वाभाव-कूटस्य निवेशनीयतया दुर्ज्ञेयत्वं गौरवञ्चेत्याशयेन यत्त्वतत्त्वाघटितं साध्यासामाना-धिकरण्यपदार्थमाह, 'साध्यनिष्ठ' इति'। साध्यनिष्ठं यत् 'असामानाधिकरण्यं' स्वाधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तित्वाभावः।

जागदीशी

साध्यासामानाधिकरण्यपदस्य साध्यवद्भिन्नवृत्तित्वार्थकत्वे साध्यवैयधि-करण्येत्याद्युत्तरलक्षणेन पौनरुक्त्यापत्तिरतो व्याचष्टे, 'साध्यमसमानाधिकरणं यस्य' इति। तत्त्वमिति परेणान्वयः। वह्निमात्रस्यैव व्यधिकरणतत्तद्धूमासमानाधिकरण-त्वात् वह्निमान्धूमादित्यादावव्याप्तेराह—'यदधिकरण' इति।[1]यदधिकरणमनधि-करणं यस्येति व्युत्पत्त्या यस्याधिकरणं साध्यानधिकरणं तत्त्वमित्यर्थः। तत्तद्धूमादिकरणं तु न वह्निसामान्यानधिकरणमतो नाव्याप्तिरिति भावः। ननु घटा-दिस्वरूपयत्किंचिद्व्यक्त्यधिकरणं साध्यीभूतधूमाद्यनधिकरणं तद्व्यक्तित्वानधि-करणत्वं वह्न्यादेरप्यतो धूमवान्वह्नेरित्यादावतिव्याप्तिः। यद्यद्व्यक्त्यधिकरणं साध्यानधिकरणं तत्तद्व्यक्तित्वानधिकरणत्वोक्तौ तु महागौरवमत आह—'साध्य-निष्ठ' इति।

माथुरी

तदनधिकरणत्वं च तद्भिन्नत्वम्, अधिकरणत्वप्रवेशे प्रयोजनविरहात्।[2] तथा च साध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वं हेतोरव्यभिचरितत्वमिति फलितम्। अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिवारणायाधिकरणत्वप्रवेशः। [3]अव्याप्यवृत्तेर-

---

१. 'यदधिकरणमिति'। अत्र यदधिकरणमनधिकरणं यस्येत्यत्र बहुव्रीहिलभ्योऽन्यपदार्थः साध्य एव परन्तु तत्त्वमित्यत्र तत्पदेन यदधिकरण घटकयत्पदोपस्थाप्यसाध्यासमाना-धिकरणस्य जलादेर्ग्रहणं तत्त्वमपि तत्रैव तत्त्वानधिकरणत्वन्तु धूमे हेताविति तात्पर्यम्। 'साध्यानधिकरणम्' इति स्थाने 'साध्यसामान्यानधिकरणम्' इति पाठान्तरम्।

२. साध्यासामानाधिकरण्यानधिकरणत्वमिति लक्षणस्याकृतिं निष्कृष्य दर्शयति—'तथा च' इति।

३. ननु कपिसंयोगानाधिकरणत्वाभाववति मूलावच्छिन्ने वृक्षे एतद्वृक्षत्वहेतोस्सत्त्वादव्याप्तितादवस्थ्यमेवेत्यत आह—'अव्याप्यवृत्तेरधिकरणतेति'।

धिकरणता तु नाव्याप्यवृत्तिः ।[१]साध्याधिकरणत्वं च साध्यतावच्छेदकावच्छिन्नं साध्यतावच्छेदकसम्बन्धावच्छिन्नं च ग्राह्यम् ।

गादाधरी

'तत्प्रतियोगित्वं' तत्प्रतियोगिकोटिप्रविष्टाधिकरणकत्वम्, साध्यनिष्ठाभावीयाधेयत्यनिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धेन यदवच्छेदकं तद्वृत्तित्वमिति यावत् । वह्निमान् धूमादित्यादौ साध्यनिष्ठाभावो ह्रदाधेयत्वाभावस्तदीयप्रतियोगितायामुक्तसम्बन्धेनावच्छेदको ह्रदादिस्तद्वृत्तित्वानधिकरणत्वं धूमादाविति लक्षणसमन्वयः ।

जागदीशी

साध्यनिष्ठाभावप्रतियोगित्वं सद्धेतोरप्यस्तीत्यतः सामानाधिकरण्याभाव उक्तः । न च साध्यनिष्ठस्य सामानाधिकरण्याभावस्य प्रतियोगित्वं सामानाधिकरण्य एव न तु वह्न्यादावित्यसद्धेतावतिव्याप्तिः । साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणवृत्तित्वस्य विवक्षितत्वात् ।[२]वस्तुतः असामानाधिकरण्यं सामानाधिकरण्यसंबन्धेनाभावः इति परमार्थः ।[३]न चैवं द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः । सामानाधिकरण्याभावस्य व्याप्यवृत्तित्वेन साध्यानिष्ठत्वात् एतदस्वरसेनैव वा कल्पान्तरानुसरणादित्यपरे । नन्वेवमपि वह्निमान्धूमादित्यादिविषमव्याप्ते हेतावव्याप्तिः ।

तथा चाव्याप्यवृत्तेः कपिसंयोगस्याधिकरणत्वं नाव्याप्यवृत्ति, नातस्तदभाववान् वृक्षः किन्तु गुणादिरेवेति नाव्याप्तिः।

१. 'साध्याधिकरणत्वमिति' । साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणत्वमित्यर्थः।

२. असमानाधिकरणपदस्य यथाश्रुतार्थकत्वं लाघवञ्चानुसृत्याह, 'वस्तुत इति' ।

३. 'न चैवमिति' । न चेत्यस्याऽव्याप्तिरित्यग्रेतनेनान्वयः। एवम् साध्यवनिष्ठाभावप्रतियोगिवृत्तित्वादिविवक्षायां साध्ये सामानाधिकरण्यसंबन्धेनाभावविवक्षायां वा इत्यर्थः। गुणावच्छेदेन विशिष्टसत्वसामानाधिकरण्याभावस्य द्रव्यत्वे सत्वात्, उक्तपरम्परया तत्प्रतियोगित्वस्य विशिष्टसत्वे विद्यमानत्वादव्याप्तिः। एवं गुणावच्छेद्यसामानाधिकरण्यसंबन्धेन द्रव्यत्वे विशिष्टसत्वाभावस्य विद्यमानत्वेनाव्याप्तिः। 'विशिष्टसत्त्वात्' इति स्थाने 'पृथिवीत्वात्' इति पाठान्तरम् ।

माथुरी

[१]अन्यथा गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ सत्ताया एव साध्यत्वेन साध्याधिकरणत्वाभाववत्सामान्याद्येव, तदवृत्तित्वाज्जातेरतिव्याप्तिः स्यात्। स्याच्च समवायेन वह्न्यादौ साध्ये संयोगेन धूमादिहेतावतिव्याप्तिः। वह्न्यधिकरणत्वाभाववज्जलह्रदाद्येव तदवृत्तित्वाद्धूमादेः। [२]इत्थं च साध्यतावच्छेदकविशिष्टसत्तात्वावच्छिन्नसाध्याधिकरणत्वाभाववद्गुणादिः तद्वृत्तित्वाज्जातेः, साध्यतावच्छेदकसमवायसंबन्धावच्छिन्नवह्न्यधिकरणत्वाभाववत्पर्वताद्यपि धूमस्य च तद्वृत्तित्वान्नातिव्याप्तिः। वृत्तिश्च हेतुतावच्छेदकसंबन्धेन बोध्या, तेन तादृशवह्न्यधिकरणत्वाभाववति धूमावयवे समवायेन धूमस्य वृत्तावपि न क्षतिः।

दीधितिः

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति यावत्। तदनधिकरणत्वमित्यर्थः। साध्यवद्भिन्नस्य[३] साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसङ्गः।

गादाधरी

अत्र साध्यनिष्ठाभावप्रतियोग्याधेयत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम्। अन्यथा वह्निमान् धूमादित्यादौ पर्वतादिसमवेतत्वाद्यभावमादायानुपपत्तेः, तथा च सत्तावान् समवायित्वादित्यादौ साध्यनिष्ठाभावीयसमवेतत्वनिष्ठप्रतियोगितावच्छेदकीभूताधिकरणाप्रसिद्धेरव्याप्तिः, वह्निमान् धूमादित्यादावपि धूमादेरयोगोलकीयवह्न्यादिनिष्ठपर्वतादिवृत्तित्वाभावस्य प्रतियोगितावच्छेदकपर्वतादिवृत्तित्वादव्याप्तिश्च। साध्यतावच्छेदकव्यापकीभूताभावनिवेशे च गौरवमित्याशयेन फलितार्थमाह, 'साध्यनिष्ठाधेयत्व' इति। आधेयत्वमिह साध्यतावच्छेदकव्यापकीभूतं ग्राह्यं तेन वह्निमान् धूमादित्यादौ महानसादेः पर्वतीयवह्निनिष्ठाधेय-

---

१. साध्यतावच्छेदकाद्यवच्छिन्नाधेयतानिरूपिताधिकरणत्वानुपादाने क्रमेण दोषमाह—'अन्यथेति'।

२. तन्निवेशेनोक्तातिव्याप्तिरित्याह—'इत्थञ्चेति'।

३. 'साध्यवद्भिन्नस्य च' इति पाठान्तरम्।

त्वानिरूपकत्वेऽपि नाव्याप्तिः। एवं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयता निवेशनीया, तेनायमात्माऽऽत्ममहाकालान्यरत्वादित्यादौ कालस्य कालिकसम्बन्धावच्छिन्नात्मत्वादिनिष्ठाधेयता- निरूपकत्वेऽपि नातिव्याप्तिः, तादृशाधेयत्वानिरूपकाधिकरणेत्यत्राधिकरणत्वमविवक्षितम्, तदनिरूपकत्वमात्रं निविष्टम्। प्रथमतो द्रव्यं सत्त्वादित्यादावतिव्याप्तेराशङ्कितया व्यभिचारिसामान्य एवातिव्याप्तिमुद्धरति, साध्यवद्भिन्नस्य' इति। व्यभिचारनिरूपकाधिकरणस्य चेत्यर्थः। अत्राधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन ग्राह्यम्।

जागदीशी

महानसीयवह्निनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगिभूतं यदाधेयत्वं तन्निरूपके पर्वतादौ धूमादेर्वर्तमानत्वात् साध्यसामान्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वोक्तौ च महागौरवमत आह—'साध्यनिष्ठाधेयत्व' इति। अत्राधेयत्वं साध्यताघटकसंबन्धेन ग्राह्यम्। तेन रूपवान्महाकालत्वादित्यादौ संबन्धसामान्येन रूपनिष्ठाधेयत्वानिरूपके गगनादौ हेतोरवृत्तित्वेपि नातिव्याप्तिः। 'तद्वृत्तौ'। साध्यवद्भिन्नवृत्तौ।

माथुरी

न चैवं सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः सत्ताधिकरणत्वाभाववति सामान्यादौ हेतुतावच्छेदकसमवायसम्बन्धेन वृत्तेरेवाप्रसिद्धेरिति वाच्यम्।[१]तादृशसाध्याधिकरणत्वाभावव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वमिति विवक्षितत्वात्।

१. 'तादृशेति'। सत्तावान् द्रव्यत्वादित्यादौ तत्समन्वयश्चेत्थम्—साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणत्वाभावो यः समवायेन सत्वाधिकरणत्वं नास्तीत्याकारकस्तस्य व्यापकीभूतो योऽन्योन्याभावः द्रव्यं नेत्याकारकः तत्प्रतियोगितावच्छेदकत्वस्य द्रव्यत्वे सत्त्वादिति।

दीधितिः

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणता-सामान्यकत्वमिति निष्कर्षस्तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः।

गादाधरी

अन्यथा वह्निमान् धूमादित्यादौ वह्निनिष्ठाधेयत्वानिरूपकस्वावयवादौ धूमादेः समवायेन वृत्तेरव्याप्त्यापत्तेः, इत्थञ्च सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धात्मक-समवायादिसम्बन्धेन वृत्तेरप्रसिद्धेः, एवं द्रव्यं विशिष्टसत्त्वादित्यादावपि विशिष्ट-सत्त्वादेः सत्ताद्यनतिरिक्ततया साध्यनिष्ठाधेयत्वानिरूपकाधिकरणगुणादिवृत्तित्वा-नधिकरणत्वासम्भवादव्याप्तिरित्यतो निष्कृष्टार्थमाह, 'साध्यनिष्ठ' इति। अत्रापि पूर्वदोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयत्वं निवेशनीयम्। एवमधिकरणत्वमप्यविवक्षितम्। तादृशाधेयत्वानिरूपकत्वव्यापकतैवाभावे निवेशनीया। तादृशाधेयत्वानिरूपकवृत्तित्वमात्रनिवेशे धूमवान् वह्नेरित्यादौ वह्न्यधिकरणत्वसामान्याभावस्य साध्यनिष्ठाधेयत्वानिरूपकह्रदादिवृत्तित्वादति-व्याप्तिरतो व्यापकतानिवेशः। व्यापकत्वञ्च तद्वन्निष्ठान्योन्याभावप्रतियोगितानव-च्छेदकत्वम्, न तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, सर्वस्यैव तथाविधद्वित्वा-वच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः। न वा तद्वन्निष्ठाभावप्रतियोगितानवच्छेद-कधर्मवत्त्वं तादृशप्रतियोगितावच्छेदकीभूताभावत्वादिकमादाय वह्न्यधिकरणत्व-सामान्याभावस्यापि धूमनिष्ठाधेयत्वानिरूपकत्वव्यापकतया धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः। अनवच्छेदकत्वञ्चावच्छेदकतापर्याप्त्यनधिकरणत्व-मतो नोभयवद्भेदमादाय दोषः।

जागदीशी

ननु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यं हेतुताघटकसम्बन्धेन वाच्यमन्यथा वह्निनिष्ठाधेयत्वानिरूपके स्वावयवे समवायादिना धूमादेः सत्त्वाद-व्याप्त्यापत्तेः। तथा च सत्तावान्द्रव्यत्वाद्धूमाद्वेत्यादावव्याप्तिः, साध्यनिष्ठाधेयत्वा-निरूपके जात्यादौ समवायेन संयोगेन वा वृत्त्यप्रसिद्धेः। किं च द्रव्यं

विशिष्टसत्त्वादित्यादावव्याप्तिः, द्रव्यत्वनिष्ठाधेयत्वानिरूपकगुणादिवृत्तित्वस्य विशिष्टसत्तायां सत्त्वादित्यत आह—'साध्यनिष्ठ' इति।

माथुरी

[१] साध्याधिकरणत्वाभावसामानाधिकरण्येत्युक्तौ धूमवान् वह्नेरित्यादौ धूमाधिकरणत्वाभाववति जलह्रदादौ वह्निमदन्योन्याभावसत्त्वादतिव्याप्तिरतो[२]व्यापकत्वानुधावनम्।

गादाधरी

अथवा यदधिकरणतासामान्याभावत्वं साध्यनिष्ठाधेयत्वानिरूपकवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकं तत्त्वमेव समुदायार्थः, अतोऽभावत्वादिना व्यापकतामादाय न दोषः। अधिकरणता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या, तेन वह्निमान् धूमादित्यादौ वह्न्यनधिकरणधूमावयवादौ धूमाधिकरणत्वसामान्याभावासत्त्वेऽपि न क्षतिः। धूमवान् वह्नेरित्यादौ यत्किञ्चिद्वह्न्यधिकरणत्वाभावस्य धूमानधिकरणत्वव्यापकतयाऽतिव्याप्तिवारणाय सामान्यपदम्, तथा च तादृशाधेयत्वानिरूपकत्वव्यापकाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणतात्वम्, यद्रूपावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वं वा तादृशाधेयत्वानिरूपकत्वव्यापकतावच्छेदकं तद्रूपवत्त्वं व्याप्तिरिति फलितार्थः। तेन धूमानधिकरणत्वव्यापकीभूतवह्न्यधिकरणत्वधूमाधिकरणत्वोभयसामान्याभावप्रतियोगिताया वह्न्यधिकरणत्वसामान्यनिष्ठत्वेऽपि नातिव्याप्तिः। यदधिकरणतामात्रनिवेशे द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः, द्रव्यत्वानधिकरणगुणादौ हेत्वधिकरणतात्वावच्छिन्नाभावासत्त्वादतो यद्रूपावच्छिन्नेति।

---

१. ननु व्यापकत्वस्य गुरुशरीरतया तदपेक्षया सामानाधिकरण्यस्य लघुत्वाद्व्यापकत्वस्थाने सामानाधिकरण्यमेवान्योन्याभावे कुतो न लक्षणे निवेश्यत इत्यत आह—'साध्याधिकरणत्वेति'। तथा च धूमवान् वह्नेरित्यत्रातिव्याप्तिप्रसङ्गान्न तथोक्तमिति भावः।

२. 'व्यापकत्वानुधावनमिति'। व्यापकत्वनिवेशे धूमाधिकरणत्वाभाववान् यथा जलह्रदस्तथा तप्तायः पिण्डोऽपि तत्र वह्निमद्भेदस्यावर्त्तमानत्वाद्व्यापकत्वमिति नातिव्याप्तिः।

जागदीशी

[1]धूमनिष्ठाधेयत्वानिरूपके जलादौ वह्न्याद्यधिकरणत्वाभावसत्त्वाद्व्यभिचारिण्यतिव्याप्तिरतो 'व्यापक' इति ।[2]व्यापकत्वं तु प्रतियोगिवैयधिकरण्याघटितमेव ग्राह्यम् । तेन संयोगेन वह्न्यधिकरणत्वस्याव्याप्यवृत्तितया तदभावस्य तप्तायःपिण्डवृत्तित्त्वेपि नातिव्याप्तिः । वह्न्यधिकरणत्व-गगनोभयत्वावच्छिन्नाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादतिव्याप्तिरतः सामान्यपदम् ।

माथुरी

अन्योन्याभावप्रतियोगितावच्छेदकत्वं हेतुतावच्छेदकसम्बन्धावच्छिन्नं हेतुतावच्छेदकावच्छिन्नं च ग्राह्यम् ।[3]अन्यथा वह्निमान् धूमादित्यादौ वह्न्यधिकरणत्वाभाववति धूमावयवे धूमवदन्योन्याभावासत्त्वादव्याप्तिः स्यात्, स्याच्च द्रव्यं जातेरित्यादौ घटत्वपटत्वादितत्तज्जातिमतोन्योन्याभावस्य द्रव्यत्वाधिकरणत्वाभावव्यापकत्वेनातिव्याप्तिः ।[4]अव्याप्यवृत्तिमतोऽन्योन्याभावस्तु नाव्याप्यवृत्तिरिति पृथिवी संयोगादित्याद्यव्याप्यवृत्तिहेतुके व्यभिचारिणि नातिव्याप्तिरिति सङ्क्षेपः ।

---

१. धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणत्वसमानाधिकरणत्वाभावप्रतियोग्यधिकरणतासामान्यकत्वमित्येव निष्कर्षोऽस्तु, व्यापकत्वनिवेशे गौरवादत आह—'धूमनिष्ठेति' ।

२. 'व्यापकत्वन्त्विति' । अत्र व्यापकत्वशरीरेऽभावांशे प्रतियोगिव्यधिकरणत्वं न देयम्, अन्यथा धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्ववति तप्तायः पिण्डादौ वर्तमानो यः प्रतियोगिव्यधिकरणोऽभावः स तु घटाद्यधिकरणत्वाभाव एव (न तु वह्न्यधिकरणत्वाभावाऽभावोऽपि, तस्याव्याप्यवृत्तित्वेन वह्न्यधिकरणत्वाभावरूपप्रतियोगिसमानाधिकरणत्वात्) तदप्रतियोगितया वह्न्यधिकरणत्वाभावस्य व्यापकत्वेनातिव्याप्तिः स्यादिति भावः ।

३. 'अन्यथेति' । यद्यन्योन्याभावप्रतियोगितावच्छेदकताया हेतुतावच्छेदकसंबन्धावच्छिन्नत्वोपादानं न स्यात्तदा वह्निमान् धूमादित्यादावव्याप्तिः, साध्याधिकरणत्वाभाववति धूमावयवे समवायेन धूमवदन्योन्याभावस्यासत्त्वेनाव्यापकत्वात्, तदुपादाने तु संयोगेन धूमवद्भेदस्य तत्र सत्वान्नाव्याप्तिः । एवमुक्तप्रतियोगितावच्छेदकतायां हेतुतावच्छेदकावच्छिन्नत्वोपादानाभावे द्रव्यं जातेरित्यत्रातिव्याप्तिः, द्रव्यत्वाधिकरणत्वाभाववति गुणादौ कतिपयजातिमद्भेदस्य सत्त्वेन व्यापकत्वात् तन्निवेशे तु जातिमत्सामान्यभेदस्य तत्रासत्त्वान्नातिव्याप्तिरितिभावः ।

४. 'अव्याप्यवृत्तीति' । अव्याप्यवृत्तिमदन्योन्याभावो यदि व्याप्यवृत्तिर्न भवेत्तदा पृथिवी

गादाधरी

हेत्वभावस्य व्यापकतानिवेशे व्यापकताशरीरे हेतुतावच्छेदकसम्बन्धावच्छिन्नं तद्वन्निष्ठत्वं निवेश्यम्, अन्यथा वह्निमान् धूमादित्यादौ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे ह्रदादौ धूमात्मकाभावस्य कालिकसम्बन्धेन वृत्तेरव्याप्त्यापत्तेः, तथा च सति सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः, साध्यनिष्ठाधेयत्वनिरूपकाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेरतो हेत्वधिकरणत्वाभावस्य व्यापकताघटितमेव तल्लक्षणं कृतम् । तथा चाधिकरणताया विशेषणताविशेषेण वृत्तिमत्तया तेन सम्बन्धेन तद्वन्निष्ठत्वं निवेश्यमतो न दोषः । पूर्वकल्पपरित्यागे बीजमाह 'तेन' इति । 'न दोष' इति । सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धावपि तत्सम्बन्धावच्छिन्नाया द्रव्यत्वाधिकरणताया द्रव्ये प्रसिद्धाया अभावस्य साध्यनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापकत्वादिति भावः ।

जागदीशी

[1]तथा च हेतुतावच्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वं तद्धर्मवत्त्वमर्थः ।[2]तेन वह्निनिष्ठाधेयत्वानिरूपकाधिकरणजलादौ कालिकसंबन्धेन धूमाधिकरणतायाः सत्त्वेऽपि नाव्याप्तिः ।[3]न वा वह्न्यधिकरणत्वाभावस्यापि प्रमेयत्वादिना धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेऽप्यतिव्याप्तिः । न च हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नाभावत्वेन तादृशाधिकरणताया व्यापकत्वमित्यस्यैव सम्यक्त्वेऽधिकरणत्वाभावपर्यन्तानुप्रवेशो व्यर्थ इति वाच्यम् । वृत्त्यनियामकसंबन्धेन हेतुतायामव्याप्तिप्रसङ्गात्, तादृशसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः । अस्माकं तु तादृशसंबन्धेन यद्धेतुसंबन्धित्वं तस्य स्वरूपसंबन्धावच्छिन्नाभावप्रति-

---

कपिसंयोगादित्यत्रातिव्याप्तिः पृथिवीत्वाधिकरणत्वाभाववति जलादौ संयोगिभेदस्याव्याप्यवृत्तित्वेन वर्त्तमानतया व्यापकत्वात् । तस्य व्याप्यवृत्तित्वे तु गुणादावेव संयोगिभेदो न तु जलादावित्यव्यापकत्वात् संयोगिभेदस्येति नातिव्याप्तिः ।

१. सामान्यपदोपादानेन कथमतिव्याप्तिनिरास इत्याह-'तथा चेति' ।

२. हेतुतावच्छेदकसंबन्धावच्छिन्नत्वप्रवेशस्य फलमाह—'तेनेति' ।

३. अधिकरणत्वसामान्याभावत्वावच्छिन्नव्यापकत्वविवक्षायाः फलमाह—'नवेति' ।

योगित्वमादाय लक्षणसंभवात् ।[१]किं चाधिकरणत्वाप्रवेशे वह्न्यादेः साध्यत्वे संयोगादिसंबन्धेन रूपादिहेतावतिव्याप्त्यापत्तिः । संयोगेन रूपाद्यभावस्य केवलान्वयितया वह्निनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादिति भावः ।

॥इति षष्ठं सिंहव्याप्तिलक्षणम् ॥

---

१. वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वाभ्युपगमे पूर्वोक्तदोषाभावेऽप्याह—'किञ्चेति' । 'लक्षणसम्भवात्' इति स्थाने 'लक्षणसमन्वयः' इति पाठान्तरम् ।

सप्तमं व्याघ्रव्याप्तिलक्षणम्

चिन्तामणिः

साध्यवैयधिकरण्यानधिकरणत्वं वा

माथुरी

'साध्यवैयधिकरण्यम्' इति। साध्यवैयधिकरण्यं साध्यवद्भिन्नवृत्तित्वं, साध्यवद्वृत्तित्वपरत्वे[1] द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। अव्याप्यवृत्तिमतोऽन्योन्याभावस्तु नाव्याप्यवृत्तिरित्यव्याप्यवृत्तिसाध्यकसद्धेतौ नाव्याप्तिः। अनधिकरणत्वमित्यत्राधिकरणत्वांशस्याधिकस्य प्रवेशान्न साध्यदवन्यावृत्तित्वमित्यनेन यथाश्रुतस्य पौनरुक्त्यम्, अखण्डाभावघटकतया चाधिकरणत्वांशस्य न वैयर्थ्यम्।[2]साध्यवद्भिन्नत्वं च साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकं बोध्यम्। तेन वह्निमान् धूमादित्यादौ धूमस्य समवायेन वह्निमतो भिन्ने यत्किञ्चित्साध्यवद्व्यक्तिभिन्ने च पर्वतादौ वृत्तित्वेपि न क्षतिः।[3]तादृशसाध्यवद्भिन्नत्वव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वमिति तु समुदायार्थनिष्कर्षः।[4]अन्यथा पूर्ववत्साध्यवद्भिन्नवृत्तित्वमित्यत्र वृत्तेर्हेतुताव-

---

१. 'द्रव्यमिति'। साध्यवैयधिकरण्यपदस्य साध्यवद्वृत्तित्वार्थकत्वे द्रव्यं सत्त्वादित्यत्रातिव्याप्तिः, सत्त्वे हेतौ द्रव्यत्ववद्वृत्तित्वाभावानधिकरणत्वसत्त्वादिति भावः।

२. 'साध्यवद्भिन्नत्वं चेति'। अत्र साध्यवद्भिन्नत्वपदेन,साध्यवत्प्रतियोगिकभेदो बोध्यः।

३. 'तादृशेति'। साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताको भेदः संयोगेन वह्निमान्नेत्याकारकस्तद्व्यापकीभूतोऽन्योन्याभावो धूमवान्नेत्याकारकः तत्प्रतियोगितावच्छेदकत्वस्य धूमे सत्वाल्लक्षणसमन्वयः।

४. 'अन्यथा पूर्ववदिति'। यदि व्यापकत्वघटितं लक्षणं न स्यात्किन्तु यथा श्रुतं

च्छेदकसम्बन्धेनैव वाच्यतया सत्तावान् द्रव्यत्वादित्यादावव्याप्यत्यापत्तेः । शेषं पूर्ववत् ।

दीधितिः

साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वम् ।

गादाधरी

साध्यवैयधिकरण्यस्य निरुक्तार्थकत्वे पुनः पौनरुक्त्यमतस्तद्व्याचष्टे, 'साध्यवैयधिकरण्यम्' इति ।

जागदीशी

'साध्यवद्भिन्न' इति ।[1]अत्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षो बोध्यः ।

चिन्तामणिः

तदुभयमपि साध्यानधिकरणानधिकरणत्वम् । तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चाप्रसिद्धम् ।

इति चिन्तामणिः

माथुरी

लक्षणद्वयमेकदैव दूषयति—'तदुभयमपि' इति ।[2]साध्यानधिकरणानधिकरणत्वं-साध्यानधिकरणानधिकरणत्वनियतं, साध्यानधिकरणावृत्तित्वव्याप्यमिति

साध्यवद्भिन्नवृत्तित्वानधिकरणत्वमेव स्यात्तदा सत्तावान् द्रव्यत्वादित्यत्राव्याप्तिः, हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्भिन्नवृत्तित्वाप्रसिद्धेरिति भावः।

१. 'अत्रापीति' हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मा(हेतुतावच्छेदका) वच्छिन्नाधिकरणत्वसामान्याभावत्वावच्छिन्नं साध्यवद्भिन्नत्वव्यापकत्वं भवति तद्धर्मवत्त्वमित्यर्थः।

२. 'साध्यानधिकरणेति'। अत्रायमाशयः, साध्यासामानाधिकरण्येत्यादिलक्षणद्वयं व्याप्यम्, अनयोर्व्यापकन्तु साध्यानधिकरणानधिकरणत्वं पर्यवसितम्। केवलान्वयिसाध्यकस्थले साध्यसामान्यानधिकरण्याप्रसिद्ध्या पूर्वोक्तव्यापकाप्रसिद्धिः

यावत्। 'तच्च'। व्यापकीभूतं साध्यानधिकरणावृत्तित्वं च। 'तत्र'। केवलान्वयिसाध्यकेऽप्रसिद्धमित्यन्वयः। साध्यानधिकरणत्वस्य साध्याधिकरणत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वस्य तत्राप्रसिद्धेः।

'यत्किञ्चित्' इति।[१]यदि च साध्यानधिकरणत्वं न तत्सामान्यभेदः किं तु साध्याधिकरणप्रतियोगिताकभेदवत्त्वमात्रं तदा वह्निमान् धूमादित्यत्र यत्किञ्चिद्वह्न्यनधिकरणे पर्वतादौ वर्तमाने धूमेप्यप्रसिद्धमित्यर्थः।

दीधितिः

चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वयमेकोक्त्या अनूद्य दूषयति, 'तदुभयमपि' इति। साध्येत्यादेः, साध्यं यदधिकरणानधिकरणं तत्त्वाभावः, साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः।

गादाधरी

ननु मूले 'तदुभयमपि साध्यानधिकरणानधिकरणत्वम्' इत्यनेनोक्तलक्षणद्वयार्थानुवादोऽसङ्गतोऽसामानाधिकरण्यवैयधिकरण्ययोरधिकरणताद्वयघटितत्वेन तादृशलक्षणयोरधिकरणताद्वयघटितत्वादनुवादे चाधिकरणताद्वयमात्रस्य निवेशादित्यतस्तादृशमूलं सङ्गमयति, 'चरमाधिकरणत्वांशस्य' इति। 'अनतिप्रयोजनकतया' इति।

जागदीशी

तेन सत्तावान्द्रव्यत्वादित्यादौ नाव्याप्तिः। ननु प्रागुक्तस्यार्थस्य शब्दान्तरेणाभिधानमनुवादः स चात्रासंभवी, साध्यं यदधिकरणानधिकरणं तत्त्वानधिकरणत्वस्य साध्यवद्भिन्नवृत्तित्वानधिकरणत्वस्य च प्रागुक्तस्य साध्यान

व्यापकाप्रसिद्धौ सुतरां व्याप्यस्य लक्षणद्वयस्याप्रसिद्धिरिति।

१. 'यदि चेति'। यदि साध्यानधिकरणत्वशब्देन यत्किञ्चित्साध्याधिकरणान्यत्वं विवक्षितं तदा वह्निमान् धूमादित्यत्र वाच्यं ज्ञेयत्वादित्यत्र चाव्याप्तिः, यत्किञ्चित्साध्याधिकरणान्ये पर्वतादौ हेतोर्वर्त्तमानत्वादिति भावः।

धकरणानधिकरणत्वशब्देनाबोधनादत आह—'चरम' इति।[१] तत्त्वाधिकरणत्वाभावे तत्त्वाभावस्याप्रवेशाद्वैयर्थ्यमसंभवीत्यत उक्तम्—'अनतिप्रयोजनकतया' इति।

माथुरी

अप्यर्थकचकारात्केवलान्वयिसाध्यकसमुच्चयः। तथा च व्यापकाभावाद्व्याप्यीभूतं तदुभयलक्षणमपि तदुभयत्राप्रसिद्धमिति भावः।[२]साध्यानधिकरणानधिकणत्वमिति यथा श्रुतं तु न सङ्गच्छते यथोक्तलक्षणद्वयस्य तत्स्वरूपत्वाभावादिति ध्येयम्।

गादाधरी

अनधिकरणत्वस्याधिकरणत्वाभावरूपतया तद्घटकाधिकरणत्वांशं परित्यज्य साध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावनिवेशेनैवोपपत्तेरिति भावः। असामानाधिकरण्याद्यधिकरणत्वाभावस्याखण्डस्यासामानाधिकरण्याद्यभावाघटिततया न वैयर्थ्यमिति 'अनतिप्रयोजनकतया' इत्युक्तम्, 'तदपहाय' चरमाधिकरणत्वांशं परित्यज्य, 'द्वयम्' साध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावरूपनिष्कृष्टलक्षणार्थद्वयम्, 'साध्यानधिकरणानधिकरणत्वम्' इत्यनेन सत्तावान् द्रव्यत्वादित्यादावव्याप्तिवारणाय विवक्षितस्य प्रथमलक्षणनिष्कृष्टार्थस्य कथञ्चिदपि प्रतिपादनासम्भवात्तदनुवादकतानुपपत्तिरिति यथा श्रुतार्थानुवादपरतया सङ्गमयितुमनुवादनीयलक्षणद्वयार्थमाह 'साध्येत्यादेः' इति। लक्षणद्वयस्य क्रमेणेति शेषः। 'तत्त्वाभावः', इत्यन्तेन प्रथमलक्षणार्थकथनम्। एवञ्च साध्यानधिकरणानधिकरणशब्देन साध्यं यदधिकरणानधिकरणकं तद्बोध्यते तदुत्तरत्वप्रत्ययेन तत्त्वं, साध्यपदोत्तरसन्निकृष्टनञा तदभावः, प्रत्याय्यत इति प्रथमलक्षणार्थबोधकत्वं साध्यानधिकरणानधिकरणत्वमित्यस्य। न च साध्याधिकरणान-

---

१. 'तत्त्वाधिकरणत्वाभाव' इति। साध्यमसमानाधिकरणं यस्य तत्त्वाधिकरणत्वाभावः, साध्यवद्भिन्नवृत्तित्वाधिकरणत्वाभावस्य, तत्त्वाभाव-साध्यवद्भिन्नवृत्तित्वाभ्यामतिरिक्तः। तथा चातिरिक्ताभावेनातिरिक्ताभावस्य न वैयर्थ्यमिति भावः, वैयर्थ्यस्वरूपन्तु पूर्वमेव निर्दिष्टम्।

२. साध्यानधिकरणानधिकरणत्वस्य यथाश्रुतार्थपरित्यागे बीजमाह 'साध्यानधिकरणेति'।

धिकरणत्वपदेन नञ्पदसमासे सत्येव तदर्थाभावो नञा प्रत्याययितुं शक्यते। तथा च साध्यपदोत्तरनञ्निपातोऽसम्भवी समस्यमानपदपूर्वनिपतितस्यैव नञः साधुत्वात्, अन्यथाऽचित्रगुरित्यादौ चित्रादिपदोत्तरमपि नञ्निपातापत्तेरिति वाच्यम्, समर्थ्यान्धिकार्थबोधकोत्तरपदघटितसमुदायेन समं नञ्समासस्थले नञो मध्यनिवेशस्यापि साधुतासम्पादकत्वात्, अन्यथा घटानधिकरणत्वं साध्याभाववदवृत्तित्वमित्यादौ च घटाधिकरणत्वाभावतद्वृत्तित्वाभावप्रत्ययानुपपत्तेर्न हि तत्रानधिकरणत्वादिपदानां घटादिपदैः समासे तादृशार्थप्रतीतिरुपपद्यते, अनधिकरणत्वादिपदजन्यप्रतीतिविशेष्यीभूताभावेन सममेव घटादिसंसर्गभानात् समस्यमानपदप्रतिपाद्यतावच्छेदककोटिनिविष्टेनापरपदार्थान्वये राजपुरुषादन्य इत्यर्थे राजा पुरुष इत्यादिसमासापत्तेः। एवं नञाऽन्वयितावच्छेदकावच्छिन्नाभावस्यैव बोधनादधिकरणसामान्यभेदवानेवानधिकरणपदार्थः स्यात् तस्य चाप्रसिद्ध्या नञ्पदाधिकरणपदयोः प्राथमिकसमासासम्भवाच्चेति, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपप्रथमलक्षणस्य निष्कृष्टयथाश्रुतार्थोऽपि साध्यानधिकरणानधिकरणत्वमिति शब्देन प्रतिपाद्यते, तथाहि आधेयतानिरूपकार्थकचरमाधिकरणपदघटितेनाधिकरणानधिकरणपदेन स्वाधिकरणमनधिकरणमाधेयत्वानिरूपकं यस्येति व्युत्पत्त्याऽधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावत्त्वेनान्यपदार्थो बोध्यते।

जागदीशी

तथा च प्रकृतलक्षणवाक्यस्य साध्यं यदधिकरणानधिकरणं तत्त्वाभावे साध्यस्य यदनधिकरणं तद्वृत्तित्वाभाव एव च तात्पर्यात्। प्रागभिप्रेतार्थस्य शब्दान्तरेणाभिधानमेवानुवादः स चात्र संभवत्येवेति भावः। 'साध्यम्' इत्यादि।[१]साध्यानधिकरणेत्यादौ मध्यवर्तिनञो व्यत्यासेन चरमाधिकरणत्वांशेन सहान्वयादेव तल्लाभ इत्याशयः।

---

१. साध्यासामानाधिकरण्यानधिकरणेत्यादिलक्षणवाक्यद्वयस्य क्रमशः 'यस्याधिकरणं साध्यानधिकरणं तत्त्वाभावः' 'साध्यवद्भिन्नवृत्तित्वाभावश्च' विवक्षितोऽर्थः स च मूलस्य—'तदुभयमपि साध्यानधिकरणे' त्याद्यनुवादेन यथा लभ्यते तादृशं समन्वयं दर्शयति—'साध्यानधिकरणेत्यादावविति'। तथा च साध्यानधिकरणेत्याद्यनुवादघटकसाध्यपदोत्तरनञर्थस्य यस्याधिकरणमित्यादिनिर्दिष्टनिष्कर्षान्तःपातिचरमाधिकरणत्वेन साकमन्वयात् प्रथमलक्षणनिष्कर्षस्य लाभ इति भावः।

माथुरी

भट्टाचार्यानुयायिनस्तु, 'तदुभयमपि'—तदुभयलक्षणवाक्यमपि । 'साध्यानधिकरणानधिकरणत्वम्'—साध्यानधिकरणानधिकरणत्वबोधजनकम् । साध्याधिकरणत्वसामान्याभाववद्वृत्तित्वाभाव-साध्यवत् सामान्यभिन्नवृत्तित्वाभावान्यतरबोधजनकमिति यावत् । 'तच्च' तादृशान्यतराभाववत्त्वं च । 'तत्र' । केवलान्वयिसाध्यकेऽप्रसिद्धमित्यन्वयः । साध्याधिकरणत्वसामान्याभावादेरप्रसिद्धत्वादिति भावः । ननु तदुभयवाक्यं न प्रागुक्ताभावान्यतरविषयबोधजनकम्, अपि तु साध्याधिकरणत्वप्रतियोगिकाभाववद्वृत्तित्वसामान्याभाव-साध्यवत्प्रतियोगिकभेदवद्वृत्तित्वसामान्याभावान्यतरबोधजनकमेव । साध्याधिकरणत्वप्रतियोगिकाभाव-साध्यवत्प्रतियोगिकभेदौ च केवलान्वयिन्यपि प्रसिद्धावित्यत आह—'यत्किञ्चित्' इति । शेषं पूर्ववदित्याहुः ।

इति माथुरी

गादाधरी

बहुव्रीहौ विग्रहवाक्याद्यादृशविशेषणविशेष्यभावापन्नस्य बोधस्तद्विपरीतविशेषणविशेष्यभावापन्नस्य प्रत्ययाच्चित्रा गौर्यस्येति विग्रहवाक्याद्यत्पदार्थसम्बन्धित्वेन चित्रगोश्चित्रगुरित्यतश्चित्रगोनिष्ठसम्बन्धप्रतियोगित्वेन यत्पदार्थस्य बोधनात्, प्रकृतस्थले च विग्रहवाक्यादन्यपदार्थनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवत्त्वेनाधिकरणप्रतीतेः, एवं साध्यं यदधिकरणानधिकरणं यदधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावदिति व्युत्पत्त्या साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवदधिकरणवृत्तित्वं साध्यानधिकरणाधिकरणशब्देन प्रत्याय्यते तदभावश्च साध्यपदोत्तरनिविष्टनञ्पदघटितवाक्येनेति ।

द्वितीयलक्षणार्थमाह, 'साध्यस्य' इति । तथा च साध्यानधिकरणमधिकरणमाधेयतानिरूपकं यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणत्वशब्देन साध्यानधिकरणवृत्तित्वं प्रत्याय्यते तदभावश्च द्वितीयनञेत्युक्तशब्दस्यैतदर्थानुवादकतेति भावः ।

दीधितिः

'तत्र' केवलान्विनि, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्या, नानाव्यक्तिसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वानिरूपकाधिकरणत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः। क्वचिद्व्यभिचारिण्यतिप्रसङ्गश्चाद्ये, द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितस्तदा केवलान्वयिनि, यदि च यत्किंचित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः।

गादाधरी

पूरणसंवलितं 'तत्र' इति ग्रन्थं व्याचष्टे 'तत्र' इत्यादिना। मूले केवलन्वयिनि वह्निमान् धूमादित्यादौ चाव्याप्तेर्हेत्वकथनात्प्रथमलक्षणे केवलान्वयिन्यव्याप्तिहेतुं पूरयति 'साध्येत्यादिनाऽप्रसिद्ध्येत्यन्तेन'। साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशाभिप्रायेणेयमप्रसिद्धिरभिहिता, यत्किञ्चिन्निरूपकभेदनिवेशे च तादृशभेदवदधिकरणे हेतोर्वृत्तेरव्याप्तिर्बोध्या, वक्ष्यमाणक्रमेण नानाव्यक्तिसाध्यकहेत्वन्तरेऽप्यव्याप्तिसत्त्वाद् धूममात्रे तत्कथनं मूलकृतो न्यूनतासम्पादकमतो धूम इत्यस्योपलक्षणत्वाभिप्रायेण पाठमधृत्वैव व्याचष्टे 'नानाव्यक्तिसाध्यके' इति। अत्र च यथासम्भवमव्याप्तिर्बोध्या तेनैतद्वृत्तियावद्धर्मवानेतत्त्वादित्यादौ वक्ष्यमाणरीत्याऽव्याप्तिविरहेऽपि न क्षतिः। अत एवाग्रे 'नानाधिकरणके सर्वत्र' इति वक्ष्यति।

अथवा 'नानाव्यक्तिसाध्यके' इत्यस्य मिथो व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदकक इत्यर्थः, अत्राव्याप्तेर्हेतुं पूरयति, 'एकसाध्येत्यादिना इतीत्यन्तेन'। अनया रीत्याऽव्याप्तिश्च यत्किञ्चित्साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदनिवेशाभिप्रायेण, साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशे च केवलान्वयिन्यव्याप्तिरेव दोष इति ध्येयम्। 'क्वचिद्' इति। पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्द्रव्यत्वादित्यादावतिव्याप्तिरिति। विशिष्टद्रव्यत्वस्य शुद्धद्रव्यत्वानतिरेकितया पृथिव्यादेः साध्यनिष्ठाधेयत्वानिरूपकत्वासम्भवादिति भावः। आधेयतायां साध्यतावच्छेदकावच्छिन्नत्वनिवेशे च नैष दोषोऽधिकरणतानिरूपकतावच्छेदकस्यैवाधेयतावच्छेदकतया पृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदकपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वादेः पृथिवीनिरूपिताधेयतानवच्छेदकत्वादिति ध्येयम्। द्वितीयलक्षणे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदनिवेशे च धूमादौ नाव्याप्तिरतस्तत्कल्पे केव-

लान्वयिसाध्यकाव्याप्तिरेव, यत्किञ्चित्साध्यवद्व्यक्तिभेदनिवेशे चोभयस्थल एवाव्याप्तिरिति मूलाभिप्रायं स्फुटयति, 'द्वितीये च' इत्यादिना। साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदः साध्यवैयधिकरण्ये विवक्षित इति योजना, साध्यवैयधिकरण्यघटकतया विवक्षित इत्यर्थः।

जागदीशी

'केवलान्वयिनि' इति। अव्याप्तिरिति परेणान्वयः। अव्याप्तेर्हेतुमाह-'साध्यनिष्ठ' इति। 'नानाव्यक्तिसाध्यके च' इति। मूलोक्तं धूमहेतुमभिप्रेत्य, तेन शब्दवान् गगनत्वादित्यादौ नानाव्यक्तिसाध्यकाव्याप्तिविरहेऽपि न क्षतिः। न्यूनतां परिहरति, 'क्वचिद्' इति। विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरित्यर्थः।[१] विशिष्टधर्मावच्छिन्नाधिकरणत्वस्येव तदवच्छिन्नाधेयत्वस्यानतिरिक्तत्वादिति भावः। 'यत्किञ्चित्' इति। साध्यवत्तत्तद्व्यक्तित्वावच्छिन्न इत्यर्थः। 'नानाधिकरणसाध्यके' इति। यत्र साध्यतावच्छेदकावच्छिन्नाधिकरणं नाना तत्रेत्यर्थः।

दीधितिः

केचित्तु साध्यासामानाधिकरण्यं-हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थः।

गादाधरी

'केवलान्वयिनि' केवलान्वयिन्येव। नानाधिकरणक एकव्यक्तिसाध्यकेऽपि सत्तावान् द्रव्यत्वादित्यादावेकस्य साध्यवतो भेदस्यान्यस्मिन् साध्यवति सत्त्वादव्याप्तेर्नानाव्यक्तिसाध्यकेऽपि एतद्वृत्तिधर्मवानेतत्त्वादित्यादावव्याप्त्यसम्भवान्नानाव्यक्तिसाध्यकेति नोक्तम्। तथा च द्वितीयलक्षणाभिप्रायेण धूम इति मूलं नानाधिकरणसाध्यकसामान्योपलक्षणमिति भावः।

---

१. 'विशिष्टधर्मेति'। यथा विशिष्टधर्मावच्छिन्नाधिकरणत्वमतिरिक्तं तथा विशिष्टधर्मावच्छिन्नाधेयत्वं नातिरिक्तमित्यर्थः। अथवा वक्ष्यमाणगुरुमतानुसारेण यथा विशिष्टाधिकरणत्वं नातिरिक्तं तथा विशिष्टाधेयत्वमपि नातिरिक्तमिति यथाश्रुत एवार्थः।

'साध्यासामानाधिकरण्यानधिकरणत्वम्' इत्यत्र साध्यासामानाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणेऽपि द्रव्यं सत्त्वादित्यादावतिव्याप्तिर्न सम्भवति, सामानाधिकरण्यस्याव्याप्यवृत्तितया सत्तायामपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधिकरण्याभावसत्त्वात्, किन्तु वह्निमान् धूमादित्यादावव्याप्तिः, स्वावयवाद्यवच्छेदेन धूमादौ वह्न्यादिसामानाधिकरण्याभावसत्त्वात् । सापि हेतुतावच्छेदकसम्बन्धेन यद्धेतुमत्तदवच्छिन्नत्वेनाभावं विशेष्य वारयितुं शक्यत इत्यभिप्रायेण तत्पदं तादृशाभावपरतया वर्णयतः सार्वभौमस्य मतमुपन्यस्यति 'केचित्तु' इति ।

'हेत्वधिकरणे' इति । सप्तम्यर्थोऽभावान्वितमवच्छिन्नत्वम्, 'तेनैव सम्बन्धेन' इति । तृतीयार्थोऽपि वृत्त्यन्वितमवच्छिन्नत्वम्, वृत्तिपदस्य सम्बन्धार्थकत्वे तु अभेद एव तदर्थः, अनधिकरणत्वपदस्याधिकरणत्वाभावोऽभावमात्रं वा यद्यर्थः स्यात्तदाऽव्याप्यवृत्त्यधिकरणताया अप्यव्याप्यवृत्तितया सत्त्वादौ द्रव्यावच्छेदेन साध्यसामानाधिकरण्याभावाधिकरणत्वाभावस्य सामानाधिकरण्यरूपतदभावाभावस्य चाक्षतत्वादतिव्याप्तिस्तदवस्थैवेत्यनधिकरणपदमधिकरणभेदवदर्थकतया व्याकरोति, 'तदधिकरण' इति ।

जागदीशी

तेन कस्याश्चिदपि वह्निव्यक्तेर्नानाधिकरणवृत्तित्वविरहेपि न वह्निसाध्यकधूमाद्यसंग्रहः । 'सर्वत्र' केवलान्वयिनि तद्भिन्ने च । सार्वभौममतमुत्थापयति । 'केचित्तु' इति । 'हेत्वधिकरणे' इति । सप्तम्यर्थोऽवच्छेद्यत्वं तच्च साध्यवद्वृत्तित्वाभावेऽन्वितम् । 'तेनैव' इति' । हेतुतावच्छेदकसम्बन्धेनैवेत्यर्थः, तस्य च साध्यवद्वृत्तित्वेन सहान्वयः । साध्यवत्त्वमपि येन संबन्धेन येन रूपेण साध्यता तत्संबन्धेन तद्रूपावच्छिन्नवत्त्वं बोध्यम् । तेन समवायेन वह्नेः साध्यत्वे धूमे विशिष्टसत्त्वसाध्यके सत्त्वादौ च[1] नातिव्याप्तिः । 'तदधिकरणभिन्नत्वम्' इति । तदत्य-

---

१. 'नातिव्याप्तिरिति' । यदि साध्यतावच्छेदकसम्बन्धेन साध्यवत्वनिवेशो लक्षणे न स्यात्तदा समवायेन वह्नेः साध्यत्वे धूमादावतिव्याप्तिः स्यात् हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणावच्छेद्यो यः संयोगसंबन्धेन वह्निमन्निरूपितवृत्तित्वाभावस्तदधिकरणभिन्नत्वाद्धूमादेरिति । साध्यतावच्छेदकावच्छिन्नत्वाप्रवेशे तु विशिष्टसत्तावान् सत्त्वादित्यत्रातिव्याप्तिः, निरुक्तहेत्वधिकरणावच्छेदेन

न्ताभाववत्त्वोक्तौ द्रव्यं सत्त्वादित्यादावतिव्याप्तिः गुणाद्यवच्छेदेन द्रव्यवृत्तित्वाभावस्यैव द्रव्यावच्छेदेन सत्तायामभावसत्त्वादतो भिन्नत्वपर्यन्तानुसरणम्।

गादाधरी

यद्यप्यधिकरणभेदेनाभावभेदाभावात्संयोगादिना धूमाधिकरणपर्वताद्यवच्छिन्नो यः सम्बन्धान्तरेण तद्वृत्तिरूपादिनिष्ठवह्न्यादिमत्संयुक्तत्वाभावस्तस्यैव स्वावयवावच्छेदेन धूमादौ वर्तमानतया धूमादेस्तादृशाभावानधिकरणत्वं दुर्घटम्, तथापि तादृशहेत्वधिकरणावच्छिन्नत्वविशिष्टाभावानधिकरणत्वस्यैव विवक्षणीयतया न दोषः। रूपे पर्वते न वह्निमत्संयुक्तत्वमितिप्रतीतिवद्धूमे पर्वते न वह्निमत्संयुक्तत्वमितिप्रतीत्यनुदयात् पर्वतावच्छिन्नत्वविशिष्टनिरूपिताया वह्निमत्संयुक्तत्वाभावीयविलक्षणाधिकरणताया रूपादावेवोपगमादभावाधिकरणतायामेव वाधिकरणविशेषावच्छिन्नत्वं निवेशनीयम्, तावतापि धूमरूपयोरभिन्नस्याप्यभावस्य परस्परानवच्छेदकावच्छिन्नाधिकरणताभेदेन कथितदोषनिराकरणसम्भवात्। उभयत्र हेतुतावच्छेदकसम्बन्धप्रवेशप्रयोजनं क्रमेण दर्शयति, 'तेन' इति। स्वावयवे संयोगेनावृत्तावपीत्यन्वयः। तथा च स्वावयवावच्छेदेन साध्यवत्संयुक्तत्वाभावसत्त्वेन तदभावस्याक्षततया प्रथमतो हेतुतावच्छेदकसम्बन्धानिवेशे स्वावयवरूपस्वाधिकरणावच्छिन्नसाध्यवत्संयुक्तत्वाभावानधिकरणत्वविरहेण संयोगेन धूमहेतौ कस्यापि साध्यस्य व्याप्तिर्न स्यादिति भावः। यद्यपि तादृशसम्बन्धनिवेशेऽपि वह्निमत्संयुक्तत्वादेः कालिकाव्याप्यवृत्तितया धूमादावुत्पत्तिकालावच्छेदेन वह्निमत्संयुक्तत्वाभाववृत्तेः पर्वतादेरपि कालोपाधितया तादृशाभावावच्छेदकत्वादव्याप्तितादवस्थ्यम्, तथापि इदानीमितिप्रतीतिनियामककालस्यावच्छेदकत्वादिहेतिप्रतीतिनियामकदेशनिष्ठावच्छेदकताया वैलक्षण्यं दुरपह्नवं यदभावात्पर्वते धूमे न वह्निमत्संयुक्तत्वमितिप्रत्ययाभावो हेतुमन्निष्ठतादृशावच्छेदकतानिरूपकत्वमेवाभावे निवेश्मतो न दोषः। न च कालोपाधेरवच्छेदकतायामवच्छेद्याधिकरणेनावच्छेदकस्य कालिकसम्बन्धो नियामक इत्थं च तादृशसम्बन्धेनानवच्छिन्नत्वमेव देशस्यावच्छेदकतायां वैलक्षण्यमन्यस्य दुर्वचत्वात्। तथा च व्यभिचारिणि कालिकसम्बन्धेन हेतोर्वर्तमानसाध्यसामानाधिकरण्याभावे व्यभिचारनिरूपकहेत्वधिक-

---

सत्त्वात्मकसाध्यवन्निरूपितवृत्तित्वाभावाधिकरणभिन्नत्वात् 'सत्त्वस्येति'। तदुपादाने तु नोक्तदोषाविति भावः।

रणावच्छेदकतायां कालिकसम्बन्धावच्छिन्नत्वविरहादतिव्याप्तिरिति वाच्यम्, कालिकव्याप्यवृत्तावपि कालिकसम्बन्धघटितात्मत्वाकाशत्वाद्युभयसामानाधिकरण्ये दैशिकसम्बन्धेनात्मत्वाद्यनधिकरणकालस्य देशविधयैवावच्छेदकत्वात्कालविधया कालस्यावच्छेदकत्वे तादृशसामानाधिकरणस्य कालिकाव्याप्यवृत्तित्वापत्तेः कालिकसम्बन्धानवच्छिन्नत्वादन्यस्यैव वैलक्षण्यस्य देशविधयावच्छेदकतायां स्वीकरणीयत्वात् । 'हेत्वधिकरणे' इत्यत्र हेतुपदमधिकरणभिन्नत्वानुयोगितत्तद्धेतुपरम्, अतो धूमाद्यन्तरसंयुक्तस्वावयवाद्यवच्छेदेन धूमादेस्तादृशाभाववत्त्वेऽपि न क्षतिः । एवञ्च व्याप्तेः प्रतिधूमादिभिन्नत्वेऽपि केनापि रूपेणानुगतानां तासां धूमत्वादिकमेवावच्छेदकम् ।

यत्तु हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमेव, हेतुतावच्छेदकसम्बन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्ना याऽधिकरणता तदन्यत्वेन साध्यसामानाधिकरण्याभावाधिकरणताया विशेषणीयत्वान्नैष दोषो न वाऽननुगमः ।

दीधितिः

तेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनावृत्तावपि न क्षतिः ।

गादाधरी

एवञ्च कालोपाधिविधया हेत्वधिकरणदेशस्यावच्छेदकत्वेनोक्त दोषस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकत्वनिवेशेनापि वारणसम्भवः पर्वतरूपादौ हेतुतावच्छेदकसम्बन्धावच्छिन्नपर्वतादिनिष्ठावच्छेदकताकसाध्यसामानाधिकरण्याभाववत्त्वाप्रसिद्धावपि रूपादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतायां धूमादिप्रसिद्धनिरुक्ताधिकरणतानां भेदस्याक्षततया तदन्यत्वेन धूमादौ लक्षणसमन्वयादिति । तन्न साधु, तथा सति 'किञ्च'इत्यग्रिमदोषासङ्गतेः, गगननिष्ठसाध्यसामानाधिकरण्याभावाधिकरणताया एवोक्ताधिकरणताभिन्नायाः प्रसिद्धेः । 'वह्निमति च' इति । तथा च 'तेनैव सम्बन्धेन' इत्यनुक्त्वा 'यत्किञ्चित्सम्बन्धेन' इत्युक्तौ पर्वतावच्छिन्नवह्निमत्संयुक्तत्ववत्यपि तदवच्छिन्नवह्निमत्समवेतत्वाभावसत्त्वाद्धूमस्य वह्निव्याप्यत्वं नोपपद्यत इति भावः । साध्यवत्सम्बद्धत्वसामान्याभावनिवेशे वह्निमत्समवेतत्वसामान्याभावस्य लक्षणाघटकत्वेऽपि हेत्वधिकरण-

विशेषावच्छिन्नसाध्यवत्सम्बद्धत्वसामान्याभावस्याप्रसिद्ध्याऽसम्भवो बोध्यः, साध्यवदसम्बद्धस्य गगनादेर्हेतुमति सम्बन्धासम्भवादवच्छेद्याधिकरणसम्बन्धिन एवावच्छेदकतया तन्निष्ठाभावे हेतुमतोऽनवच्छेदकत्वात्। 'न क्षतिः' इति। नाव्याप्तिर्नासम्भवश्चेत्यर्थः। साध्यवत्त्वं साध्यतावच्छेदकसम्बन्धेन बोध्यम्। तेन समवायेन वह्नौ साध्ये संयोगेन धूमे पर्वताद्यवच्छिन्नवह्निमद्वृत्तित्वसामान्याभावस्यासत्त्वेऽपि नातिव्याप्तिः, न वा, सद्धेतावपि यत्किञ्चित्सम्बन्धेन यः साध्यवान् तद्वृत्तित्वसामान्याभावस्यासत्त्वेऽपि नातिव्याप्तिः। साध्यञ्चोपलक्षणविधयाऽभावप्रतियोगितावच्छेदककोटौ निवेशनीयं न तु विशेषणविधया।

जागदीशी

भेदस्तु नाव्याप्यवृत्तिः तदव्याप्यवृत्तित्वे तु तादृशवृत्तित्वाभाववती यावती व्यक्तिस्तत्तद्भेदकूटवत्त्वं[१] वक्तव्यमिति भावः। हेतुतावच्छेदकसंबंधेन हेत्वधिकरण इत्यस्य फलमाह—'स्वावयवे संयोगेन' इति। अवृत्तावपि न क्षतिरित्यन्वयः। तथा च तादृशसम्बन्धेन हेत्वधिकरणत्वाप्रवेशे स्वावयवावच्छेदेन धूमस्य वह्निमत्संयुक्तत्वाभाववत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिः स्यान्न पुनरसंभवः। इदं वाच्यं ज्ञेयत्वादित्यादिकेवलान्वयिनि[२] लक्षणसम्भवादिति भावः। अत्र चोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वे रूपवद्वृत्तित्वं नेत्यादिप्रतीत्या घटाद्यवच्छेदेन पृथिवीत्वादौ रूपवद्वृत्तित्वाभावाभ्युपगमे हेत्वधिकरणनिष्ठमवच्छेदकत्वं निरवच्छिन्नं ग्राह्यम्। तेन रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः। तत्र घटनिष्ठावच्छेदकत्वस्योत्पत्तिकालेनावच्छेदादिति ध्येयम्। तेनैवेत्यस्य फलमाह—'वह्निमति च समवायेन' इति। हेतुतावच्छेदकसंबन्धेन साध्यवद्वृत्तित्वानुक्तौ सम्बन्धसामान्येन हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वसामान्याभावो न निवेश्यः।

---

१. 'वक्तव्यमिति'। भेदस्याव्याप्यवृत्तित्वेऽपि तत्तद्व्यक्तिभेदस्याव्याप्यवृत्तित्वाभ्युपगमान्न दोष इति भावः।

२. 'लक्षणेति'। इदं वाच्यं ज्ञेयत्वादित्यत्र येन केनापि संबन्धेन ज्ञेयत्वाधिकरणावच्छेदेन वाच्यत्ववद्वृत्तित्वाभावाधिकरणभिन्नत्वेन ज्ञेयत्वे लक्षणसमन्वयादित्यर्थः।

गादाधरी

तेनोत्पत्तिक्षणावच्छिन्नघटादौ गन्धाद्यसत्त्वात्तादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गन्धादिविशिष्टवृत्तित्वाभावसत्त्वेऽपि गन्धवान् पृथिवीत्वादित्यादौ, मूलावच्छिन्नवृक्षादौ कपिसंयोगाद्यभावसत्त्वात्तादृशवृक्षाद्यवच्छेदेनैतद्वृक्षत्वादौ कपिसंयोगादिविशिष्टवृत्तित्वाभावसत्त्वेऽपि कपिसंयोगी एतद्वृक्षत्वादित्यादौ नाव्याप्तिस्तत्तत्कालदेशावच्छिन्नतत्तदधिकरणावच्छेदेनापि तत्र-तत्र हेतौ तादृशसाध्योपलक्षितधर्मिवृत्तित्वसत्त्वात्। न चैवमपि धूमादौ पर्वतादिवृत्तेरनवच्छेदको यो देशःकालो वा तदवच्छिन्नपर्वताद्यवच्छेदेन वह्न्यादिमद्वृत्तित्वाभावस्य धूमादौ सत्त्वादव्याप्तिर्दुर्वरिति वाच्यम्, तत्तद्देशकालावच्छिन्नपर्वतादेर्धूमाद्यसम्बन्धितया धूमादावभाववृत्तावपि तादृशस्यानवच्छेदकत्वात्। न चैवमुत्पत्तिक्षणादिविशिष्टपर्वते धूमस्य न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्यनुपपत्तिर्द्रव्यत्वे गुणे न पृथिवीत्वादिसामानाधिकरण्यमित्यादिप्रतीतिवदुक्तप्रतीतेः सामानाधिकरण्यावच्छेदकत्वाभावावलम्बनता न सम्भवति विशेष्यस्यावच्छेदकत्वे विशिष्टस्यानवच्छेदकत्वासम्भवादिति वाच्यम्, तादृशप्रतीतीनां सामानाधिकरण्ये विशिष्टपर्वताद्यवच्छेद्यत्वाभावावगाहितयैवोपपत्तेरुत्पत्तिक्षणे पर्वते धूमस्य न वह्निमत्संयुक्तत्वमित्यादौ पर्वतावच्छिन्नं यद्धूमस्य वह्निमत्संयुक्तत्वं तस्योत्पत्तिक्षणो नावच्छेदक इत्यादिरप्यर्थः सम्भवति, धूमनिष्ठवह्निमत्संयुक्तत्वाभाव उत्पत्तिक्षणपर्वतोभयावच्छिन्नत्वं तु नार्थः पर्वतस्य प्रतियोग्यवच्छेदकतया तदन्तर्भावेन द्वयोरभावावच्छेदकत्वस्यासम्भवाद्घटपटोभयोर्घटत्वाभावाधिकरणतावत्। एतेनोक्तो भयावच्छिन्नसाध्यसामानाधिकरण्याभाववत्त्वव्यावर्तनाय हेत्वधिकरणमात्रावच्छिन्नत्वप्रवेशनं केषाञ्चिदनुपादेयमेव तथा सति वह्न्यादिनिष्ठधूमसामानाधिकरण्याभावस्याप्ययोगोलकस्वावयवोभयावच्छिन्नतया हेतुतावच्छेदकसम्बन्धेन हेतुमन्मात्रावच्छेद्यतयाऽतिव्याप्तिप्रसङ्गाच्च।

केचित्तु विशिष्टपर्वतादेरवच्छेदकतामादायाव्याप्तिवारणायावच्छेदकान्तरानवच्छिन्नहेत्वधिकरणावच्छिन्नत्वमभावे निवेशनीयम्। एवञ्च पर्वतादेः कालविधया धूमनिष्ठवह्निमत्संयुक्तत्वाद्यभावावच्छेदकत्वस्यापि व्यावृत्तिः पर्वतादेः स्थूलकालतया वह्निमत्संयुक्तत्वादिरूपप्रतियोगिनोऽप्यवच्छेदकत्वात्तन्निष्ठाभावावच्छेदकताया अविरोधायावान्तरकालावच्छिन्नत्वोपगमादित्याहुः।

जागदीशी

साधनाधिकरणाद्यवच्छेद्यतादृशाभावस्याप्रसिद्धेः,[१] किंतु यत्किंचित्संबन्धेन साध्यवद्वृत्तित्वाभावः प्रवेशनीयः। तथा च हेत्वधिकरणपर्वताद्यवच्छेदेन धूमादौ वह्निमत्समवेतत्वाद्यभावसत्त्वादसम्भव एव स्यात्, यदि तेनैव संबन्धेन साध्यवद्वृत्तित्वप्रवेशो न स्यादिति भावः।

दीधितिः

तादृशाभावश्च सम्बन्धान्तरेण तत्रैव वर्तमाने सुलभः।

गादाधरी

हेतुमदसम्बद्धे साध्यसामानाधिकरण्याभावस्योक्तयुक्त्या हेत्वधिकरणावच्छिन्नत्वविरहाद्धेतुतानवच्छेदकसम्बन्धेन हेतुमत्सम्बद्धे हेतुमदवच्छिन्नतादृशाभावप्रसिद्धिमाह 'तादृश' इति। हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वस्य तेन सम्बन्धेन हेत्वधिकरणावच्छिन्नाभावश्चेत्यर्थः। 'तत्रैव' तादृशहेतुमत्येव। न च तथाविधरूपादौ वह्निमत्संयुक्तत्वाद्यभावो व्याप्यवृत्तिरेवेति तत्राधिकरणविशेषस्यावच्छेदकत्वं निर्युक्तिकं प्रतियोगिमत्यभाववृत्तावेव विरोधभञ्जनार्थमवच्छेदकभेदापेक्षणाद्धूमवत्कपालादिसमवेतवह्निमन्महानसादिसंयुक्तघटादौ महानसाद्यवच्छेदेन वह्निमत्संयुक्तत्ववति हेतुमत्कपालाद्यवच्छेदेन वह्निमत्संयुक्तत्वाभावसौलभ्येऽप्येतद्रूपवानेतद्रसादित्यादावेतद्रूपवत्समवेतत्ववति हेत्वधिकरणावच्छेदेन प्रतियोगिसत्त्वात्तदवच्छेदेन साध्यसामानाधिकरण्याभाववृत्त्यसम्भवादेतद्रूपादिमति सम्बन्धान्तरेण वर्तमानसाध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्त्वधिकरणानवच्छिन्नत्वान्निरुक्ताभावाप्रसिद्धेर्दुर्वारत्वादिति वाच्यम्, पर्वते रूपे न वह्निमत्संयुक्तत्वमितिप्रतीतिबलेन व्याप्यवृत्तेरपि सामानाधिकरण्याभावस्याधिकरणविशेषावच्छिन्नत्वोपगमात्।

---

१. तादृशाभावस्येति। साध्यवन्निरुपितसम्बन्धसामान्यावच्छिन्नवृत्तित्वसामान्याभावस्याप्रसिद्धेरित्यर्थः। सम्बन्धसामान्यावच्छिन्नसाध्यवद्वृत्तित्वाभावस्य हेत्वधिकरणावच्छेद्यत्वासंभवादिति भावः।

यत्तु व्याप्यवृत्तेरभावस्याधिकरणविशेषावच्छिन्नत्वानुपगमे हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये हेत्वनुयोगिकत्वहेत्वधिकरणविशेषावच्छिन्नत्वोभयाभावो विवक्षणीयः, तथा च धूमादिनिष्ठस्वावयवाद्यवच्छिन्नतदधिकरणतायां हेतुतावच्छेदकसम्बन्धेन हेतुमदवच्छिन्नत्वस्य रूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावाधिकरणतायां घटादिनिष्ठधूमवत्कपालाद्यवच्छिन्नतदधिकरणतायाञ्च हेत्वनुयोगिकत्वस्याभावेनोभयाभावसत्त्वाल्लक्षणसमन्वय इति। तन्न, व्याप्यवृत्तेरवच्छेदकत्वानुपगमे पृथिवी रूपादित्यादावतिव्याप्तिः, पृथिवीत्वादिव्यभिचारिजलीयरूपादिनिष्ठसाध्यसामानाधिकरण्याभावस्य व्याप्यवृत्तितया तदधिकरणता सामान्ये निरुक्तोभयाभावस्याक्षतत्वात्।

जागदीशी

ननु हेत्वधिकरणावच्छेद्यत्वविशिष्टस्य साध्यवद्वृत्तित्वाभावस्याधिकरणाप्रसिद्ध्या लक्षणमिदमसम्भवि,[१] तदधिकरणस्यैव तन्निष्ठधर्मावच्छेदकतया गगनजलत्वादौ वह्निमत्पर्वतसंयुक्तत्वाभावस्य धूमवत्पर्वतानवच्छेद्यत्वादत आह— 'तादृशाभावश्च' इति। हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावश्चेत्यर्थः। 'संबन्धान्तरेण' हेतुतावच्छेदकसंबन्धान्यसम्बन्धेन। तथा च हेतुमत्पर्वतावच्छेद्यत्वविशिष्टस्य वह्निमत्संयुक्तत्वाद्यभावस्याधिकरणत्वं पर्वतीयरूपादवेव प्रसिद्धमिति भावः। यद्यपि रूपादौ वह्निमत्संयुक्तत्वाद्यभावस्य व्याप्यवृत्तित्वात् तत्र पर्वतादिकं नावच्छेदकं भावाभावयोरेकत्र वृत्त्यर्थमेवावच्छेदकभेदस्वीकारादित्यप्रसिद्धिःतादवस्थ्यम्। न च महानसादिसंयुक्ते[२]कालिकादिसंबन्धेन पर्वतादिनिष्ठघटादौ वह्निमत्संयुक्तत्वाभावस्य पर्वताद्यवच्छेद्यत्वप्रसिद्ध्या न दोष इति वाच्यम्।[३]इत्थमपि

---

१. 'तदधिकरणस्यैवेति'। अयमभिप्रायः, वह्निमन्निरूपितवृत्तित्वाभावो गगनजलत्वादौ प्रसिद्धः तन्निष्ठ (गगनजलत्वादिनिष्ठ) वृत्तित्वाभावस्य तदधिकरण- (जलत्वाद्यधिकरण) मेवावच्छेदकं न तु हेत्वधिकरणं पर्वतादिरित्यप्रसिद्ध्याऽसंभव इति।

२. तदधिकरणमेव तन्निष्ठधर्मावच्छेदकमिति नियममाश्रित्याह, 'कालिकसंबन्धेन पर्वतादिनिष्ठेति'।

३. 'इत्थमपीति'। अत्र जलपरमाणुनिष्ठतद्रूपरसयोः साध्यसाधनभावो बोध्यः। तथा च हेत्वधिकरणे परमाणौ कालिकसंबन्धेन पदार्थमात्रस्य वृत्त्या तदधिकरणेत्यादिनियमानुसारेण हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावस्याप्रसिद्ध्याऽव्याप्तिरिति भावः।

एतद्रूपवानेतद्रसादित्यादावेतद्रसाधिकरणावच्छेदेन एतद्रूपवत्समवेतत्वाभावस्याप्रसिद्धेर्दुर्वारत्वात् । तथापि पर्वतावच्छेदेन तदीयरूपे न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या व्याप्यवृत्तेरवच्छेदकत्वस्वीकारादित्थमभिधानम् । [1]हेतुतावच्छेदकसंबन्धेन साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणन्तदन्यत्वे वा ग्रन्थतात्पर्यम् । तथा च व्याप्यवृत्तेरवच्छेदकत्वासत्त्वेऽपि साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणं (साधनाधिकरणं) तद्भिन्नत्वमादायैव लक्षणसङ्गतिः । न च वस्तुगत्या साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वोक्तौ वह्निमान्धूमादित्यादावव्याप्तिः, स्वावयवावच्छेदेन वह्निमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधनवत्पर्वतादौ सत्वात्[2]साध्यवद्वृत्तित्वविशिष्टयद्व्यक्तित्वावच्छिन्नाधिकरणत्वम् हेतुमतस्तदन्यत्वोक्तौ तु वह्निमान् धूमादिदं वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रैवासम्भवः ।

दीधितिः

व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्वम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात् । न चैवं गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः ।

गादाधरी

अथ हेत्वधिकरणावच्छिन्नत्वस्थानेऽवच्छिन्नत्वहेत्वधिकरणानवच्छिन्नत्वोभयाभावस्यैव निवेशनीयत्वान्नायं दोषो जलरूपादिनिष्ठपृथिवीसमवेतत्वाभावाधिकरणतायामवच्छिन्नत्वविरहेणोभयाभावसत्त्वात्, एवञ्च तावतैव दर्शिताप्रसिद्धेरपि निवारितत्वात्तादृशोभयाभाववत्तादृशाधिकरणतावदन्यत्वमेव

---

१. व्याप्यवृत्तेरवच्छेदकानङ्गीकारेऽप्याह—'हेतुतावच्छेदकेति' । तथा च हेतुतावच्छेदकसंबन्धावच्छिन्नवह्निमद्वृत्तित्वाभावविशिष्टस्य यस्या- (पर्वतीयरूपादेः) धिकरणं धूमाधिकरणं तदन्यत्वं (रूपान्यत्वं) धूमादाविति लक्षणसमन्वयः ।

२. 'स्वावयवावच्छेदेन' वह्निमद्वृत्तित्वाभावविशिष्टयद्व्यक्तित्वा- (तद्धूमव्यक्तित्वा) वच्छिन्नाधिकरणत्वं हेत्वधिकरणस्य तद्व्यक्तिभिन्नत्वं महानसीयधूमे वर्तते एवं यद्व्यक्तिपदेन महानसीयधूमादिग्रहणे तदन्यत्वं पर्वतीय धूमे वर्तते । तथा च वह्निमान् धूमादित्यत्र लक्षणसमन्वयसम्भावनामाशङ्क्यासम्भवेन निराकरोति—'साध्यवदिति' ।

निवेशनीयं न तूक्ताधिकरणतासामान्ये हेत्वनुयोगिकत्वतादृशोभयाभाववत्त्वोभयाभावः प्रयोजनविरहादिति चेदेवमपि वक्ष्यमाणायाः कालिकसम्बन्धेन हेतावव्याप्तेरसङ्गतिर्दुर्वारैव। तत्र कालिकसम्बन्धेनावृत्तौ गगनादावेव दर्शितोभयाभाववत्साध्यसामानाधिकरण्याभावाधिकरणतायाः प्रसिद्धेरवृत्तावेव सर्वत्र तादृशाभाववत्त्वप्रसिद्ध्या सम्बन्धान्तरेण वर्तमानपर्यन्तानुधावनविरोधस्तस्माद्व्याप्यवृत्तेरवच्छेदकत्वमेव ग्रन्थकारानुमतमित्यवधेयम्।

द्रव्यं सत्त्वादित्यादावाशङ्कितातिव्याप्तिमुद्धरति 'व्यभिचारिणस्तु' इति। 'तादृशि' इति। हेतुतावच्छेदकसम्बन्धेन हेतुमतीत्यर्थः। अवच्छेदकत्वं सप्तम्यर्थः,'तादृशाभाववत्त्वम्'। हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभाववत्त्वम्। अत्र प्रमाणाकाङ्क्षायामाह, 'सत्तायाम्' इति। तादृशप्रतीत्या द्रव्यत्वसामानाधिकरण्यवत्यामपि सत्तायां तदनवच्छेदकगुणाद्यवच्छेदेन तदभाववत्त्वावगाहनादिति भावः। एवं सत्तायां द्रव्यत्वसामानाधिकरण्याभावोपगमे विशिष्टसत्त्वे गुणाद्यन्यत्वविशिष्ट- सत्तात्वाद्यवच्छिन्नेऽव्याप्तिरिति गुणाद्यवच्छेदेन साध्यसामानाधिकरण्याभाववत्यां केनापि रूपेण तदनधिकरणत्वासम्भवादिति भावः।

जागदीशी

साध्यवदसंयुक्तत्वादिविशिष्टतत्तद्रूपादिव्यक्तित्वस्य[१] गुरुतया (प्रमेयरूपत्वावच्छिन्नायाः प्रतियोगिताया इव) तदवच्छिन्नाधिकरणत्वाप्रसिद्धेः, केवलस्यातिप्रसङ्ग एव विशिष्टधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वकल्पनादिति वाच्यम्। सार्वभौमानां मते प्रतियोगिताया इवाधिकरणताया अपि गुरुधर्मावच्छेद्यत्वोपगमात्। अन्यथा समवेतत्वत्वादिकमपेक्ष्य सत्तावत्समवेतत्वत्वस्य गुरुतया साध्यवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या सत्तावान्द्रव्यत्वादित्यादावव्याप्तिप्रसङ्गात्। ननु साध्यसामानाधिकरण्यवतो न तदभाववत्त्वमतो द्रव्यं सत्त्वादित्यादौ व्यभिचारिण्यतिप्रसङ्ग इत्यत आह—'व्यभिचारिणस्तु' इति। 'तादृशि' इति। हेतुताघटकसम्बन्धेन हेतुमतीत्यर्थः। 'तादृशाभाववत्त्वम्' साध्यवद्वृत्तित्वाभाववत्त्वं। अत्रैवानुभवं प्रमाणयति—'सत्तायाम्' इत्यादि।

१. 'गुरुतयेति'। तत्तद्व्यक्तित्वापेक्षया साध्यवदसंयुक्तत्वादिविशिष्टतत्तद्व्यक्तित्वस्य गुरुत्वादित्यर्थः।

'एवं'—सत्तायामपि द्रव्यत्वसामानाधिकरण्यविरहे। 'विशिष्टसत्त्वे' इति। [१]विशिष्टसत्त्वशब्दप्रतिपाद्यहेतावित्यर्थः।

दीधितिः

विशिष्टस्यातिरिक्तत्वात्।

गादाधरी

'विशिष्टस्य' इति। तथा च विशिष्टसत्त्वं द्रव्यमात्रवृत्ति तदधिकरणत्वं न गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववत्त्वमिति नाव्याप्तिरितिभावः। यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छिन्नत्वं निवेश्यापीयमव्याप्तिः शक्यते वारयितुं तथापि प्रकारान्तरेणाव्याप्तिवारणसम्भवे लक्षणेऽधिकनिवेशनमनुचितमित्यभिप्रेत्य विशिष्टस्यातिरिक्तत्वपक्ष आश्रितः। न च हेतुतावच्छेदकविशिष्टाधिकरणतानिवेशनमावश्यकमन्यथेदं स्पर्शवद्भूतत्वमूर्तत्वोभयस्मादित्यादौ भूतत्वे मूर्तत्वे च हेतौ स्वाधिकरणे गगने मनसि च साध्यसामानाधिकरण्यविरहेणाव्याप्तिप्रसङ्गादिति वाच्यम्, उभयत्वस्यैकविशिष्टापरत्वरूपतामतमवलम्ब्य विशिष्टस्यातिरिक्तत्वेन तत्र स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेनोभयत्वस्यैव हेतुत्वमिति स्वीकृत्यैव वा तत्राव्याप्तेः समाधानसम्भवात्। ननु द्रव्यं गुणाद्यन्यत्वे सति सत्त्वादित्यादौ विशिष्टस्यातिरिक्ततापक्षमवलम्ब्याव्याप्तेर्वारणं न विचारसहम्। तथाहि गुणादिवृत्तिसत्त्वादितो गुणाद्यन्यत्वविशिष्टसत्तादेरतिरिक्तत्वेऽनुगतधर्ममात्रोच्छेद एकव्यक्तिवृत्तित्वविशिष्टस्यापरव्यक्तिवृत्त्यन्यत्वात्। न च तत्तद्व्यक्तिवृत्तित्वविशिष्टसत्तादीनां मिथो भेदेऽपि शुद्धसत्तादिकमनुगतं निराबाधमेवेति वाच्यम्, शुद्धसत्त्वादौ तत्तद्व्यक्तिवृत्तित्ववैशिष्ट्याभ्युपगमे भवतां तदेकत्वासम्भवात्तदनभ्युपगमे तस्यावृत्तित्वप्रसङ्गादेवं सर्वेषामेव वस्तूनां तत्तत्क्षणवृत्तित्वरूपविशेषणभेदाद्भेदप्रसक्त्या क्षणभङ्गापत्तिपर्यवसानं दुर्वारमेव।

---

१. 'विशिष्टेति'। विशिष्टसत्त्वशब्दप्रतिपाद्यविशिष्टे हेत्रावित्यर्थः। यदि विशिष्टसत्ताव्यक्तिमात्रेऽव्याप्तिर्विवक्षिता भवेत्तर्हि विशिष्टसत्त्वस्यातिरिक्तत्वादित्येवमुत्तरणीयम्। विशिष्टस्यातिरिक्तत्वादित्युत्तरेण ज्ञायते यद्विशिष्टहेतुमात्रेऽव्याप्तिर्विवक्षितेत्यर्थः।

जागदीशी

यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्ताव्यक्तावव्याप्त्याशङ्कायामुत्तरग्रन्थेन तदनिरासादसङ्गत्यापत्तेः। 'अतिरिक्तत्वात्' इति। विशेष्यविशेषणाभ्यां भिन्नत्वादित्यर्थः। तथा च गुणादिकं न हेत्वधिकरणमतो नाव्याप्तिः। उभयत्वमप्येकविशिष्टापरत्वमेव तच्चातिरिक्तमेव नातः स्पर्शवान् मूर्तत्वभूतत्वोभयस्मादित्यादावव्याप्तिरिति भावः। यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावपि विशिष्टसत्तादिहेतौ नाव्याप्तिः। न च धूमाधिकरणमहानसाद्यवच्छेदेन पर्वतीयादिधूमे वह्निमत्संयुक्तत्वाभावस्य (चालनीन्यायेन) सत्त्वादव्याप्तिः महानसादेरपि कालिकादिसम्बन्धेन पर्वतीयधूमाधिकरणत्वात् तत्र साध्यवद्वृत्तित्वाभाववत्तायामवच्छेदकत्वादिति वाच्यम्। [१]स्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाववदवृत्तिधर्मवत्त्वमित्यस्यैव फलितार्थस्य तत्तद्धूमत्वधर्ममादायैव लक्षणसम्भवेन धूमत्वस्य हेतुतावच्छेदकत्वेपि क्षत्यभावात्। तथापि विशिष्टस्यातिरिक्तत्वात्तत एवाव्याप्तिवारणसंभवे हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशे गौरवम्[२]असंभवो वा विशिष्टनिरूपकाधिकरणत्वाप्रसिद्धेः।[३] एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वे ताद्रूप्येण कथायां हेतोरुपन्यासो न स्यादित्याशयः।

दीधितिः

अनतिरिक्तत्वे तु विशेषणविशेष्यसंबन्धस्यैव परम्परया व्याप्तत्वात्। केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुस्तच्चिन्त्यम्। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि—

---

१. 'स्वावच्छिन्नेति' स्वपदेन धूमत्वं ग्राह्यम्। धूमत्वावच्छिन्नाधिकरणमहानसावच्छेद्यवह्निमद्वृत्तित्वाभाववति पर्वतीयधूमेऽवर्त्तमानतद्धूमत्व- (महानसीयधूमत्व) वत्त्वाद्धूमे लक्षणसमन्वयः।

२. नन्वतिरिक्तपदार्थाभ्युपगमापेक्षया लक्षणे हेतुतावच्छेदकावच्छिन्नत्वनिवेशे गौरवं न दोषाववहमत आह—'असम्भवो वेति'।

३. 'ननु हेतुतावच्छेदकधर्मे स्वा- (हेतुतावच्छेदका) श्रयनिष्ठाधिकरणतानिरूपितनिरुपकतानवच्छेदकत्वयत्किञ्चिन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वोभयाभावस्तदवच्छेद्यसाध्यवद्वृत्तित्वाभाववद्वृत्तिधर्मवत्त्वविवक्षणे नासंभव इत्याशङ्कायामाह—'एवमिति'। तद्धूमत्वेन हेतोरुपन्यासो भवेन्नतु धूमत्वेनेति भावः।

गादाधरी

अथ प्रत्यभिज्ञाद्यनुरोधेनैकस्मिन्नानादेशकालवृत्तित्ववैशिष्ट्यं स्वीक्रियत एव। परन्तु 'गुणे द्रव्यवृत्तित्वविशिष्टसत्ता नास्ति' इदानीं पूर्वक्षणवृत्तित्वविशिष्टघटो नास्तीति प्रतीत्यनुरोधेन मिथो भिन्ना अपि तत्तद्विशेषणविशिष्टसत्त्वघटत्वादयः स्वीक्रियन्ते तदवलम्बनेनैव तादृशप्रतीत्युपपत्तेर्द्रव्यवृत्तित्वादिवैशिष्ट्यपुरस्कारेण चानुगतसत्त्वादेर्न द्रव्यत्वानुमापकता स्वीक्रियते अपि तु तदन्यतादृशविशेषणविशिष्टगुणाद्यवृत्तिवस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तिविरहेऽपि न क्षतिरिति चेत्, तादृशवस्तूनां केन रूपेण व्याप्यता, न द्रव्यवृत्तित्वादिविशिष्टत्वेन, तादृशरूपस्याव्याप्यानुगतधर्मसाधारण्यात्, नापि तादृशविशेषणविशिष्टतत्तद्व्यक्तित्वादिना, तादृशविशेषणवैशिष्ट्यांशस्य व्यर्थत्वात्तद्व्यक्तित्वानुपस्थितावनुमानानिर्वाहाच्च। एवं विशिष्टसत्ता नास्तीत्यत्र विशिष्टसत्तात्वावच्छिन्नाभावस्य न विधेयतासम्भवस्तद्रूपावलीढानुगतसत्तावति तद्रूपावच्छिन्नाभावासम्भवात्। नापि तत्तद्व्यक्तित्वावच्छिन्नाभावस्य, तत्तद्व्यक्तित्वस्य प्रतियोगिकोटावनुल्लेखात्, विशेषणावच्छिन्नप्रतियोगिकसम्बन्धो विलक्षणः, स च नानुगतसत्तायाः सम्बन्धोऽपित्वतिरिक्तविशिष्टसत्ताया एवेति प्रतियोगितावच्छेदकधर्मस्य गुणादिवृत्तिसत्तासाधारण्येऽपि तत्र विशिष्टाभावोऽक्षत एव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकसम्बन्धशून्यत्वमात्रस्य विशिष्टाभावसत्त्वेऽपेक्षितत्वादिति चेत्, तर्हि गुणादिसाधारणसत्ताया एव तादृशातिरिक्तसम्बन्धेन गुणादिव्यावृत्तिः क्रियतां किं सम्बन्धान्तरकल्पनेनेत्यभिप्रेत्याह, 'अनतिरिक्तत्वे तु' इति। 'विशेषणविशेष्यसम्बन्धस्यैव' इति। सत्त्वगुणाद्यन्यत्ववैशिष्ट्यस्यैवेत्यर्थः। 'परम्परया' परम्परासम्बन्धेन, स्वावच्छिन्ननिरूपितसमवायादिसम्बन्धेनेति यावत्।

जागदीशी

ननु विशिष्टसत्त्वस्यातिरिक्तत्वे मानाभावः। न च गुणो विशिष्टसत्तावानिति प्रतीत्यभाव एव मानम्। गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्रतीत्यसंभवात्। न च विशिष्टनिरूपितमधिकरणत्वं यद्यतिरिक्तं तदा विशिष्टमेवातिरिक्तमस्तु विशिष्टाधिकरणताया क्लृप्ताधिकरणस्वरूपत्वाभ्युपगमात्। किञ्च विशिष्टस्यातिरिक्तत्वे द्रव्यं विशिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं न सत्तावदिति प्रत्ययप्रसङ्गः, सत्ताभाववुद्धिं प्रति सत्तानिश्चयस्यैव विरोधितया तदसत्त्वात्।

जागदीशी

यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्ताव्यक्तावव्याप्त्याशङ्कायामुत्तरग्रन्थेन तदनिरासादसङ्गत्यापत्तेः । 'अतिरिक्तत्वात्' इति । विशेष्यविशेषणाभ्यां भिन्नत्वादित्यर्थः । तथा च गुणादिकं न हेत्वधिकरणमतो नाव्याप्तिः । उभयत्वमप्येकविशिष्टापरत्वमेव तच्चातिरिक्तमेव नातः स्पर्शवान् मूर्तत्वभूतत्वोभयस्मादित्यादावव्याप्तिरिति भावः । यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावपि विशिष्टसत्तादिहेतौ नाव्याप्तिः । न च धूमाधिकरणमहानसाद्यवच्छेदेन पर्वतीयादिधूमे वह्निमत्संयुक्तत्वाभावस्य (चालनीन्यायेन) सत्त्वादव्याप्तिः महानसादेरपि कालिकादिसम्बन्धेन पर्वतीयधूमाधिकरणत्वात् तत्र साध्यवद्वृत्तित्वाभाववत्तायामवच्छेदकत्वादिति वाच्यम् । [१]स्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाववदवृत्तिधर्मवत्त्वमित्यस्यैव फलितार्थस्य तत्तद्धूमत्वधर्ममादायैव लक्षणसम्भवेन धूमत्वस्य हेतुतावच्छेदकत्वेपि क्षत्यभावात् । तथापि विशिष्टस्यातिरिक्तत्वात्तत एवाव्याप्तिवारणसंभवे हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशे गौरवम्[२]असंभवो वा विशिष्टनिरूपकाधिकरणत्वाप्रसिद्धेः ।[३] एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वे ताद्रूप्येण कथायां हेतोरुपन्यासो न स्यादित्याशयः ।

दीधितिः

अनतिरिक्तत्वे तु विशेषणविशेष्यसंबन्धस्यैव परम्परया व्याप्तत्वात् । केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुस्तच्चिन्त्यम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि—

---

१. 'स्वावच्छिन्नेति' स्वपदेन धूमत्वं ग्राह्यम् । धूमत्वावच्छिन्नाधिकरणमहानसावच्छेद्यवह्निमद्वृत्तित्वाभाववति पर्वतीयधूमेऽवर्त्तमानतद्धूमत्व- (महानसीयधूमत्व) वत्त्वाद्धूमे लक्षणसमन्वयः ।

२. नन्वतिरिक्तपदार्थाभ्युपगमापेक्षया लक्षणे हेतुतावच्छेदकावच्छिन्नत्वनिवेशे गौरवं न दोषाववहमत आह—'असम्भवो वेति' ।

३. 'ननु हेतुतावच्छेदकधर्मे स्वा- (हेतुतावच्छेदका) श्रययन्निष्ठाधिकरणतानिरूपितनिरुपकतानवच्छेदकत्वयत्किञ्चिन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वोभयाभावस्तदवच्छेद्यसाध्यवद्वृत्तित्वाभाववद्वृत्तिधर्मवत्त्वविवक्षणे नासंभव इत्याशङ्कायामाह—'एवमिति' । तद्धूमत्वेन हेतोरुपन्यासो भवेन्नतु धूमत्वेनेति भावः ।

गादाधरी

अथ प्रत्यभिज्ञाद्यनुरोधेनैकस्मिन्नानादेशकालवृत्तित्ववैशिष्ट्यं स्वीक्रियत एव। परन्तु 'गुणे द्रव्यवृत्तित्वविशिष्टसत्ता नास्ति' इदानीं पूर्वक्षणवृत्तित्वविशिष्टघटो नास्तीति प्रतीत्यनुरोधेन मिथो भिन्ना अपि तत्तद्विशेषणविशिष्टसत्त्वघटत्वादयः स्वीक्रियन्ते तदवलम्बनेनैव तादृशप्रतीत्युपपत्तेर्द्रव्यवृत्तित्वादिवैशिष्ट्यपुरस्कारेण चानुगतसत्त्वादेर्न द्रव्यत्वानुमापकता स्वीक्रियते अपि तु तदन्यतादृशविशेषणविशिष्टगुणाद्यवृत्तिवस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तिविरहेऽपि न क्षतिरिति चेत्, तादृशवस्तूनां केन रूपेण व्याप्यता, न द्रव्यवृत्तित्वादिविशिष्टत्वेन, तादृशरूपस्याव्याप्यानुगतधर्मसाधारण्यात्, नापि तादृशविशेषणविशिष्टतत्तद्व्यक्तित्वादिना, तादृशविशेषणवैशिष्ट्यांशस्य व्यर्थत्वात्तद्व्यक्तित्वानुपस्थितावनुमानानिर्वाहाच्च। एवं विशिष्टसत्ता नास्तीत्यत्र विशिष्टसत्तात्वावच्छिन्नाभावस्य न विधेयतासम्भवस्तद्रूपावलीढानुगतसत्तावति तद्रूपावच्छिन्नाभावासम्भवात्। नापि तत्तद्व्यक्तित्वावच्छिन्नाभावस्य, तत्तद्व्यक्तित्वस्य प्रतियोगिकोटावनुल्लेखात्, विशेषणावच्छिन्नप्रतियोगिकसम्बन्धो विलक्षणः, स च नानुगतसत्तायाः सम्बन्धोऽपित्वतिरिक्तविशिष्टसत्ताया एवेति. प्रतियोगितावच्छेदकधर्मस्य गुणादिवृत्तिसत्तासाधारण्येऽपि तत्र विशिष्टाभावोऽक्षत एव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकसम्बन्धशून्यत्वमात्रस्य विशिष्टाभावसत्त्वेऽपेक्षितत्वादिति चेत्, तर्हि गुणादिसाधारणसत्ताया एव तादृशातिरिक्तसम्बन्धेन गुणादिव्यावृत्तिः क्रियतां किं सम्बन्धान्तरकल्पनेनेत्यभिप्रेत्याह, 'अनतिरिक्तत्वे तु' इति। 'विशेषणविशेष्यसम्बन्धस्यैव' इति। सत्त्वगुणाद्यन्यत्ववैशिष्ट्यस्यैवेत्यर्थः। 'परम्परया' परम्परासम्बन्धेन, स्वावच्छिन्ननिरूपितसमवायादिसम्बन्धेनेति यावत्।

जागदीशी

ननु विशिष्टसत्त्वस्यातिरिक्तत्वे मानाभावः। न च गुणो विशिष्टसत्तावानिति प्रतीत्यभाव एव मानम्। गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्रतीत्यसंभवात्। न च विशिष्टनिरूपितमधिकरणत्वं यद्यतिरिक्तं तदा विशिष्टमेवातिरिक्तमस्तु विशिष्टाधिकरणताया क्लृप्ताधिकरणस्वरूपत्वाभ्युपगमात्। किञ्च विशिष्टस्यातिरिक्तत्वे द्रव्यं विशिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं न सत्तावदिति प्रत्यय-प्रसङ्गः, सत्ताभावबुद्धिं प्रति सत्तानिश्चयस्यैव विरोधितया तदसत्त्वात्।

स्वातन्त्र्येण[१] विरोधितान्तरकल्पने गौरवात् एवं विशेषणविशेष्योभयग्राहकसामग्रीविरहेपि विशिष्टग्रहप्रसङ्गः। तदुभयग्राहकसामग्र्या विशिष्टस्य ग्रहे हेतुत्वकल्पनेपि गौरवान्तरं स्फुटमेवेत्यत आह— 'अनतिरिक्तत्वे तु' इति। गुरवस्तु 'विशिष्टस्यातिरिक्तत्वात्' इति। ग्रन्थस्य विशिष्टनिरूपिताधिकरणत्वस्यातिरिक्तत्वादित्यर्थः।

गादाधरी

'व्याप्तत्वात्' इति। गुणाद्यन्यत्ववैशिष्ट्यावच्छिन्नाधिकरणताया गुणादावसत्त्वात्तादृशसम्बन्धेन तद्वैशिष्ट्यस्य द्रव्यमात्रवृत्तित्वादितिभावः। एवकारेण सत्ताया व्याप्यत्वव्यवच्छेदः। यत्र विशेषणवैशिष्ट्यावच्छिन्नसत्ताहेतुकद्रव्यत्वाद्यनुमितिरभिमता तत्र तद्वैशिष्ट्याहेतुकानुमितिरेवोपेयते वैशिष्ट्ये परम्परासम्बन्धेन व्याप्तिधीविरहे चानुमितिरसिद्धैवेतिभावः। यद्यपि विशिष्टनिरूपितसम्बन्धस्य विलक्षणत्वे तादृशसम्बन्धेन सत्ताया अपि व्याप्यत्वं निर्वहति, तथापि विशेषणावच्छिन्ननिरूपितसमवायत्वादिना न सत्तादिसम्बन्धता किन्तु विशिष्टसत्तावानिति प्रत्यये वैशिष्ट्यस्यैव सत्तादिविशेषणतापन्नस्योक्तपरम्परासम्बन्धेन धर्मिणि विशेषणत्वोपगमान्नातिऽप्रसङ्गशङ्केत्याशयेनेदमभिहितम्। नन्वेवं रीत्या प्रथमलक्षणपरिष्कारे वक्ष्यमाणकेवलान्वयिसाध्यकाव्याप्त्यसङ्गतिस्तत्रापि सम्बन्धान्तरेण हेतुमद्वृत्तौ हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याभावप्रसिद्ध्या लक्षणगमनसम्भवादत आह, 'केवलान्वयिनि' इति। 'द्वितीयलक्षण' इति। न च 'तच्च' इत्यनेनोभयत्वावच्छिन्नस्यैव परामर्शात्प्रथमलक्षणेऽव्याप्त्यभावेऽसङ्गतिर्दुर्वारैवेति वाच्यम्, केव. .न्वयिसाध्यके धूमे चाव्याप्तिप्रदर्शनादुभयत्वेनोपस्थितेऽपि लक्षणद्वये यथायोगं तत्तत्स्थलेऽव्याप्त्यन्वये तात्पर्यात्। यद्यपि धूमादावपि साध्यसामानाधिकरण्यसामान्याभावघटितस्य प्रथमलक्षणार्थस्य नाव्याप्त्यवकाशः, तथापि यत्किञ्चत्साध्यवद्व्यक्तिभेदनिवेशाभिप्रायेण द्वितीयलक्षणस्येव यत्किञ्चित्साध्यसामानाधिकरण्याभावनिवेशाभिप्रायेणैव प्रथमलक्षणस्यापि नानाव्यक्तिसाध्यकेऽव्याप्तिप्रदर्शनमविरुद्धम्। मूले च 'यत्किञ्चित्साध्यानधिकरणाधिकरणे',

---

१. 'विरोधितान्तरेति'। सत्त्वाभावबुद्धिं प्रति विशिष्टसत्तानिश्चयत्वेनातिरिक्तप्रतिबन्धकत्वकल्पने गौरवमित्यर्थः।

इत्युपलक्षणं यत्किञ्चित्साध्याधिकरणावृत्तिरित्यपि बोध्यम् तेन प्रथमलक्षणाव्याप्तिसम्पादकहेत्वकथनान्न्यूनत्वस्य नावकाश इति ध्येयम् ।

जागदीशी

तथा च हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेन तादृशवृत्तित्वाभाववत्त्वमपि निवेश्यमतो नाव्याप्तिरित्याशयः । ननु विशिष्टाधिकरणत्वं यदि[१]नातिरिक्तं, [२]विशिष्टसत्तावानिति प्रतीतेः प्रत्येकनिरूपिताधिकरणताद्वयावगाहितयैवोपपत्तेः । अन्यथा विशेषणाभावनिर्णयदशायामपि विशिष्टसत्तावत्त्वप्रतीत्यापत्तेः । विशिष्टसत्ताबुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबन्धकतायाः स्वातन्त्र्येण कल्पनापातादित्युच्यते तदाप्याह, 'अनतिरिक्तत्वे तु' इति । प्राहुः । 'विशेषण' इति । विशेषणं गुणकर्मान्यत्वं, विशेष्यं सत्ता, तयोः सामानाधिकरण्यात्मकसंबन्धस्यैवेत्यर्थः । साक्षात्संबन्धेन तस्य व्यभिचारित्वादाह—'परम्परया' इति । अवच्छेदकताख्यस्वरूपसंबन्धेनेत्यर्थः । सत्त्वगुणकर्मान्यत्वयोर्द्रव्ये एव सामानाधिकरण्यमिति प्रतीत्यावच्छेदकतासम्बन्धेन तदुभयसामानाधिकरण्यस्य द्रव्य एव सत्त्वान्न व्यभिचार इति भावः । नन्वेवं ज्ञेयत्वाधिकरणपटाद्यवच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य पटीयरूपादावेव सत्त्वात्तदधिकरणभिन्नत्वमस्त्येव ज्ञेयत्वादिहेतोरित्यग्रे केवलान्वयिन्यव्याप्तिप्रदर्शनमसङ्गतमत आह—'केवलान्वयिनि' इति । 'द्वितीय' इति । तत्र साध्यवद्भिन्नस्याप्रसिद्धत्वादिति भावः । यद्यपीदं वाच्यं प्रमेयादित्यादौ तादात्म्येन केवलान्वयिनि हेतौ प्रथमलक्षणेऽव्याप्तिः संभवति प्रमेयावच्छेदेन वाच्यत्ववत्तादात्म्यकत्वविरहिणोऽप्रसिद्धेः । न च घटावच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वादौ सुलभः, तथा सति घटत्वं घटे न वाच्यमिति प्रतीत्यापत्तेः तथापि[३]स्वाधिकरणनिरू-

---

१. 'नातिरिक्तमिति' । विशेषणाधिकरणत्व-विशेष्याधिकरणत्वाभ्यां नातिरिक्तं लाघवादित्यर्थः ।

२. ननु यदि विशिष्टाधिकरणत्वं नातिरिक्तं तदा गुणादावपि विशिष्टसत्तावनिति प्रतीतिः स्यादत आह—'विशिष्टसत्तावानिति' । तथा च यत्र गुणकर्मान्यत्वरूपं यद्विशेषणं यश्च सत्वात्मको विशेष्यः प्रत्येकं तदुभयाधिकरणत्वावगाहित्वेन न गुणादौ तादृशप्रतीतेः प्रमात्वमिति भावः ।

३. 'स्वाधिकरणनिरूपितेति'—तत्तद्धेत्वधिकरणानुयोगिकहेतुतावच्छेदकसंसर्गेणेत्यर्थः ।

पितहेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावोऽत्र लक्षणघटक इत्यभिप्रायेण द्वितीयलक्षणाभिधानम्।

दीधितिः

द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य;

गादाधरी

सामानाधिकरण्यस्याव्याप्यवृत्तितायां प्रमाणसिद्धायामेव दर्शितातिव्याप्तिर्वारयितुं शक्यते, तत्रैव न प्रमाणमुक्तप्रतीतेरन्यविषयकत्वादित्याह, 'सत्तायाम्' इति। 'प्रतीतिर्हि, इति। 'अभावं गुणेऽवगाहत' इत्यनेनान्वयः। 'अवच्छेदकत्वस्य' इति। निरूपकत्वस्येत्यर्थः। तेन सामानाधिकरण्यस्य व्याप्यवृत्तितामते तदवच्छेदकत्वस्याप्रामाणिकत्वेऽपि न क्षतिः, उक्ताकारप्रतीतावच्छेदकत्वानुल्लेखादवच्छेदकत्वाभावावगाहिता न सम्भवतीत्याशङ्क्याह, 'परम्परा' इति। ननूक्तपरम्परासम्बन्धो न वृत्तिनियामक आकाशं द्रव्यत्वसामानाधिकरण्यवदित्यप्रत्ययादित्युक्तसम्बन्धावच्छिन्नाभाव एवाप्रामाणिक इति तादृशाभावावलम्बनतापि नोक्तप्रतीतेः सम्भवति इत्याशङ्क्योद्धारायानुरूपं दृष्टान्तमाह 'द्रव्यत्वे' इति।

जागदीशी

स्वपदस्य तत्तत्साधनव्यक्तिपरतया तादात्म्येन पटात्मकहेत्वधिकरणीभूतपटव्यक्तिनिरूपिततादात्म्येन वाच्यत्ववत्तादात्म्यकत्वाभावस्य, पटावच्छेदेन पटत्वादावेव प्रसिद्धेः। वस्तुतस्तु केवलान्वयित्वं वृत्तिमदत्यन्ताभावाप्रतियोगित्वमात्रं नत्ववच्छेदकगर्भम्। तथा च तादात्म्येन किञ्चिदपि प्रमेयं[१] न केवलान्वयीति द्वितीयलक्षणे एव तादृशकेवलान्वयिन्यव्याप्तिसंभवात्। यथाश्रुतमेव सम्यगिति ध्येयम्। नव्यास्तु 'केवलान्वयिनि चाव्याप्तेः' इति। केवलान्वयिसामान्येऽव्याप्ते-

---

१. 'न केवलान्वयीतीति'। तादात्म्येन प्रमेयादेरपि वृत्तिमदत्यन्ताभावप्रतियोगित्वानपेक्षितकेवलान्वयित्वाभाववत्त्वेन तत्र प्रथमलक्षणसमन्वयो न प्रतिज्ञाविरोधी। वस्तुतस्तु गगनाभावादिस्तादृशकेवलान्वयी तत्र न प्रथमलक्षणाव्याप्तिः किन्तु साध्यवद्भिन्नत्वाप्रसिद्ध्या द्वितीयलक्षणस्यैवेति भावः।

रभिधानं द्वितीयलक्षणाभिप्रायेणेत्यर्थः। प्रथमलक्षणे यत्किञ्चित्केवलान्वयिनि तादात्म्येन प्रमेयादिहेतावव्याप्तावपि न क्षतिरित्याहुः। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यावच्छेदकत्वाभावं गुणादाववगाहते, इत्यत्र समानाकारकप्रतीतिं दृष्टान्तयति— 'द्रव्यत्वे गुणे' इति। न तूक्तप्रतीतेर्गुणावच्छेदेन द्रव्यत्वे पृथिवीत्वसामानाधिकरण्याभावो विषयः, गुणस्य द्रव्यत्वानधिकरणतया तन्निष्ठपृथिवीवृत्तित्वाभावावच्छेदकत्वासंभवात्, किन्तु द्रव्यत्वनिष्ठं यत्पृथिवीत्वसामानाधिकरण्यं तदवच्छेदकत्वाभाव एव गुणे विषय इति तद्वदियमपीति भावः। 'अवच्छेदकत्वस्य' इति।

दीधितिः

परम्परासंबन्धेन सामानाधिकरण्स्य वा अभावं गुणेऽवगाहते न तु सत्तायामेव द्रव्यवृत्तित्वाभावं, सत्ता न द्रव्यवृत्तित्वाभाववती;

गादाधरी

गुणस्यावच्छेदकतानियामकद्रव्यत्वसम्बन्धशून्यतया द्रव्यत्वनिष्ठाभावावच्छेदकत्वं न सम्भवतीत्यगत्या गुणनिष्ठो द्रव्यत्ववृत्तिपृथिवीत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन तादृशसामानाधिकरण्यस्याभाव एव वा तादृशप्रतीतिविषय इत्यवश्यमुपेयं तद्वदत्रापीत्यर्थः। "स्वरसतो यादृशशब्दाद्यादृशोऽर्थः प्रतीयते तादृशशब्दोल्लिखितप्रत्यये तादृशार्थविषयकत्वमेवासति बाधके युज्यत" इत्याशयेन दर्शितप्रतीतेः सत्तायां गुणावच्छिन्नद्रव्यवृत्तित्वाभावावगाहितायां बाधकप्रतीतिमाह, 'सत्ता न द्रव्यवृत्तित्वाभाववती' इति। न च द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्वरूपस्य सत्तायामस्मन्मतेऽपि सत्त्वान्नैतस्याः प्रतीतेर्बाधकत्वं सम्भवति विरोध्यविषयकत्वादिति वाच्यम्, तादृशशब्देन द्रव्यवृत्तित्वाभाववद्भेदस्यैव प्रत्यायनात्तदाकारप्रतीतेरपि तद्भेदावगाहितया बाधकत्वाद्भेदस्याव्याप्यवृत्तिताविरहेण सामानाधिकरण्याभाववद्भेदस्य तदभावविरोधित्वात्। यदि च भेदस्याव्याप्यवृत्तित्वमतमवलम्ब्य तादृशप्रतीत्योर्विरोध्यविषयकत्वमुपपाद्यते तदा सत्तायां द्रव्यत्वसामानाधिकरण्याभावेऽपि तदधिकरणभिन्नत्वस्याक्षततयाऽतिव्याप्तिवारणमशक्यमिति भावः।

जागदीशी

[1]प्रात्यक्षिकप्रत्ययाभिप्रायेणेदं, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यादिशाब्दस्थलेऽवच्छेदकत्वोपस्थापकपदान्तरविरहात्तदभावस्य गुणादौ बोधयितुमशक्यत्वात्, किन्तु सत्तानिष्ठं द्रव्यत्वसामानाधिकरण्यं न गुणावच्छेद्यमित्याकार एव तत्र बोधः, गुणादावित्यत्र[2]सप्तम्यर्थस्य नञर्थेऽन्वयादिति ध्येयम्। नन्वेवं तादृशप्रतीतेः सामानाधिकरण्याभावविषयकत्वमनुभवसिद्धं विरुध्येत। सामानाधिकरण्यस्य व्याप्यवृत्तित्वेन तदवच्छेदकत्वाप्रसिद्ध्या तादृशावच्छेदकत्वाभावविषयकप्रतीतेर्भ्रमत्वापत्तिश्च[3] स्यादत आह, 'परम्परासंबन्धेन' इति। निरूपकताख्यस्वरूपसम्बन्धेनेत्यर्थः।[4]न त्ववच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः। तथा सति सत्तायां द्रव्ये न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिप्रसङ्गात्। सामानाधिकरण्यस्य व्याप्यवृत्तितया कुत्राप्यवच्छेदकत्वसम्बन्धेन तस्यासत्त्वात्। 'न तु' इति। तथा च द्रव्यं सत्त्वादित्यादावतिव्याप्तिरिति भावः।

दीधितिः

द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादिसर्वजनप्रसिद्धप्रतीतिबाधितत्वात्। बाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेदेनैकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः।

गादाधरी

अव्याप्यवृत्तित्वबाधकदर्शितप्रतीतेरभावरूपविशेष्ये सत्तावृत्तित्वावगाहिताया उपगमात्तत्राभावविशेष्यकसत्तावृत्तित्वविरोधिविषयकप्रत्ययं बाधकतयोपन्यस्यति, 'द्रव्यवृत्तित्वाभाव' इति।

---

१. 'प्रात्यक्षिकेति'। इन्द्रियसन्निकृष्टा योग्याश्च ये पदार्थास्तेषां समेषां प्रत्यक्षे भानं संभवत्यतः प्रत्यक्षे पदानुपस्थितस्याप्यवच्छेदकत्वपदार्थस्याभावविशेषणतया भानं भविष्यति न तु तादृशशाब्दबोधे पदानुपस्थापितत्वादिति भावः।

२. सप्तम्यर्थस्यावच्छेद्यत्वस्य नञर्थेऽन्वय इति भावः।

३. 'भ्रमत्वापत्तेरिति'। निरूपितत्वसम्बन्धेन सामानाधिकरण्यशून्येऽवच्छेदकत्वे सामानाधिकरण्यावगाहित्वेनोक्तप्रतीतेर्भ्रमत्वमित्यर्थः।

४. पूर्वं परम्परासंबन्धेनेत्यस्यावच्छेदकतासंबन्धेनेत्यर्थस्स्वीकृतः स एवात्रापि कुतो न गृह्यतेऽत आह—'नत्ववच्छेकतेति'।

यत्तु द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वं गुणाद्यवच्छेदेन न तु द्रव्यावच्छेदेनेति तदवच्छेदेन तत्र सत्तावृत्तित्वाभावः सम्भवति, एवं सत्तावृत्तित्वं सत्तात्वसामानाधिकरण्यरूपं सामानाधिकरण्यस्याव्याप्यवृत्तितामतेऽव्याप्यवृत्तीति तदनवच्छेदकगुणत्वाद्यवच्छेदेन द्रव्यवृत्तित्वाभावः सम्भवत्येवेति न विरोधः, तथाप्युक्तयुक्त्या दर्शितप्रतीतेः सत्तावृत्तिभेदावगाहितया बाधकत्वं दुर्वारमेव ।

यत्तु सत्तावृत्तावभावेऽवच्छेदकभेदेन सत्तावृत्तित्वाभावसम्भवेऽप्यवच्छेदकाप्रतीतिदशायां जायमानतत्प्रत्ययस्य सत्त्वावृत्तित्वग्रहप्रतिबन्धकतया तदुत्तरं जायमानायाः सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतेः सामानाधिकरण्याभावे सत्तावृत्तित्वावगाहित्वासम्भवेन गुणनिष्ठसामानाधिकरण्यावच्छेदकत्वाभावावगाहित्वे सर्वत्रैव तदवगाहित्वकल्पनमुचितमिति भाववर्णनम्, तदसत्, एवं सत्यवच्छेदकविषयिण्या द्रव्यत्वसामानाधिकरण्यत्वेन सत्तायां तत्सामानाधिकरण्यविषयकप्रतीतेरपि बाधकतासम्भवेन 'सत्ता न द्रव्यवृत्तित्वाभाववती' इत्यादिप्रतीतिपर्यन्तानुधावनस्य निर्बीजतापातात् । नन्वेवं संयोगादिमति संयोगादेरप्यभावो मा सैत्सीद्मूले न कपिसंयोग इत्यादिप्रतीतेरपि मूलनिष्ठकपिसंयोगावच्छेदकत्वाभावावलम्बनतयोपपत्तेरित्यत आह, 'बाधकाभावात्' इति । तत्र कपिसंयोगाभावो वृक्षावृत्तिरित्यादिप्रत्ययस्याननुभवादिति भावः । संयोगाभावे वृक्षावृत्तित्वप्रत्यय इव द्रव्यवृत्तित्वाभावे सत्ताऽवृत्तित्वप्रत्ययेऽपि विवादसम्भवाद्यत्र सामानाधिकरण्याभावस्य न प्रत्यक्षसम्भवस्तत्र तत्सत्त्वे मानाभावेन तदनधिकरणत्वं निष्प्रत्यूहमित्यतिव्याप्तिरित्याह, 'अतीन्द्रियसाध्यके' इति ।

जागदीशी

ननूक्तदृष्टान्तस्थले बाधकसत्त्वादवच्छेदकत्वाभावोऽस्तु प्रतीतेर्विषयः प्रकृते तु साक्षात्सामानाधिकरण्याभावविषयकत्वे न किञ्चिद्बाधकमस्तीत्यतो बाधकमाह— 'सत्ता न' इति । तथा च सत्तायां द्रव्यवृत्तित्वाभावसत्त्वे द्रव्यवृत्तित्वाभाववद्भिन्नत्वधीस्तत्र न स्यादिति भावः । ननु द्रव्यवृत्तित्वाभावोऽव्याप्यवृत्तिरेवेति तद्वद्भेदोप्यव्याप्यवृत्तिर्वाच्यः तथा च द्रव्यगुणात्मकविभिन्नावच्छेदेन तयोः सत्तायां समावेशात्कुतो विरोध इत्यत आह,[1] 'द्रव्यवृत्तित्वाभाव' इति । नन्वेवं मूले न कपि-

---

१. 'द्रव्यवृत्तित्वाभाववतीति' । तथा च द्रव्यवृत्तित्वाभावे सत्तावृत्तिभिन्नत्वनिश्चयेन सत्तायां गुणावच्छेदेन द्रव्यवृत्तित्वाभावस्य बाधितत्वादिति भावः ।

संयोगीति प्रतीत्या वृक्षादौ कपिसंयोगाभावोऽपि न सिद्ध्येत्तत्रापि वृक्षनिष्ठ-संयोगावच्छेदकत्वाभावस्य मूलेऽवगाहनसम्भवादत आह—'बाधकाभावात्' इति। कपिसंयोगाभावो न वृक्षवृत्तिरित्यादिप्रत्ययस्यासम्भवादिति भावः। ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रतीतिरेवासिद्धा द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरिति प्रत्ययात्।[१]एकशेषस्य कर्तुमशक्यत्वादतो दोषान्तरमाह—'अतीन्द्रिय' इति। मनस्त्ववदणुत्वादित्यादावित्यर्थः। 'तत्र'। अतीन्द्रिसाध्यकेऽसद्धेतौ।[२]

दीधितिः

अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्रसङ्गाच्च, तत्र सामानाधिकरण्याभावस्य प्रत्यक्षत्वासम्भवेनासिद्धेः। न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयम्। तद्वद्वृत्तिभिन्नत्वस्योपाधित्वात्। किञ्च इदमिदानीमितिप्रतीतिनियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः। तेन संबन्धेनाधिकरणे काले तेन संबन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः।

इति दीधितिः

गादाधरी

इदं गुरु द्रव्यत्वात्, पृथिवी आकाशाभावादित्यादावित्यर्थः। अथवा स्तम्भादौ पिशाचत्वाभावस्येव स्तम्भत्वादौ पिशाचत्वसामानाधिकरण्याभावस्य महति वाय्वादौ रूपाभावस्येव महावायुत्वादौ रूपसामानाधिकरण्याभावस्यापि प्रत्यक्षत्वादुभयत्रातीन्द्रियत्वोपादानम्। 'तत्र' इति। गुरुत्वादिसाध्यकस्थले साध्यसामानाधिकरण्याभावस्यातीन्द्रियप्रतियोगिकत्वेनातीन्द्रियतयाऽतीन्द्रियहेतुकस्थले च धर्मिण एव तथात्वेन हेतौ साध्यसामानाधिकरण्याभावस्य प्रत्यक्षासम्भवेन तत्र तदसिद्धेरित्यर्थः। 'तदभाववद्वृत्तित्वेन'। गुरुत्वाभाववद्वृत्तित्वेन। 'तत्र'। द्रव्यत्वादौ। 'तत्'। गुरुत्वादिगद्वृत्तिवत्त्वाभावत्वम्। 'अनुमेयमिति'। तद्विरुद्धदृष्टान्ते-

---

१. 'एकशेषस्येति'। 'गुणावच्छेदेन द्रव्यवृत्तित्वाभावः सत्तावृत्तिः' इति प्रत्ययो न भवति 'द्रव्यवृत्तित्वाभावो न सत्तावृत्तिः' इत्येव प्रत्ययो भवतीत्याकरक एकप्रतीतिपरिशेषः कर्तुं न शक्यते विनिगमनाविरहादित्यर्थः।

२. 'अतीन्द्रियसाध्यके अतीन्द्रियासद्धेतौ' इति पाठान्तरम्।

नेत्यादिः । 'तद्वद्' इति । गुरुत्वादिमदित्यर्थः । 'उपाधित्वाद्' इति । तद्विरुद्धदृष्टान्ते तद्वद्वृत्तिभिन्नत्वस्य साध्यव्यापकतायाः पक्षीभूते प्रकृतहेतौ च भेदस्य व्याप्यवृत्तित्वेन साधनाव्यापकतायाः सुग्रहत्वात्, पक्षे साध्यसन्देहेन पक्षावृत्तितादृशोपाधौ साध्यव्यापकत्वनिश्चयासम्भवेऽपि सन्दिग्धोपाधित्वस्य दुर्वारत्वादनुकूलतर्कविरहेण सन्दिग्धोपाधेरपि दूषकत्वादिति भावः । नन्वेवमतीन्द्रियसंयोगादेरप्यव्याप्यवृत्तित्वं न स्यात् तद्वति तदभावस्य प्रत्यक्षासम्भवेनासिद्धेरनुमानस्याप्रयोजकत्वात् । एवं सामानाधिकरण्यस्याव्याप्यवृत्तितामाश्रित्य मणिकृतैव सिद्धान्तलक्षणे हेतुसमानाधिकरणाभावे प्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे 'कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः' इति ग्रन्थेनाव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिरुद्धृता । तथा च तन्मते युक्तिर्भवतु मा वोभयथापि तदाश्रित्य पूर्वपक्षलक्षणं व्याचक्षाणो नापराध्यतीत्याशङ्क्य दूषणान्तरमाह, 'इदमिदानीम्' इति । कालिकविशेषणतात्मकविलक्षणसम्बन्धेनेत्यर्थः । अभावादेरिहेतिप्रत्ययनियामको यो दैशिकविशेषणताविशेषस्तत्र तादृशसम्बन्धवैलक्षण्यस्य प्रामाणिकतालाभाय विलक्षणप्रतीतिनियामकत्वाभिधानम् । न चेदानीमितिप्रतीतौ सम्बन्धवैलक्षण्याभावेऽपि कालत्वेनाधिकरणावगाहनादिहेतिप्रत्ययात्तस्य वैलक्षण्यमुपपद्यत इति किं सम्बन्धवैलक्षण्येनेति वाच्यम्, सम्बन्धविशेषानुयोगित्वादन्यस्य कालत्वस्य दुर्वचत्वादिदानीं कालत्वाभाव इत्यादिप्रतीत्या काले कालत्वाभाववृत्तेः प्रामाणिकत्वेऽपि काले कालत्वं नास्तीति प्रतीत्यनुदयान्नास्तीत्याकारकप्रतीतौ कालिकसम्बन्धव्यावर्त्तकरूपावच्छिन्नाया एव विशेषणताया नियामकत्वस्यावश्यकत्वाद्दैशिककालिकसम्बन्धसाधारणसम्बन्धतावच्छेदकस्याप्रामाणिकतया कालिकसम्बन्धतावच्छेदकीभूतस्य वैलक्षण्यस्य सिद्धेर्निष्प्रत्यूहत्वाच्च । 'सद्धेतौ' इति । कालत्वादिसाध्यकघटादिहेतावित्यर्थः । 'काले' इति । कालावच्छेदेनेत्यर्थः । 'अप्रसिद्धेः' इति । वृत्तिमतः कालावच्छेदेन कालात्वादिसामानाधिकरण्यवत्त्वादवृत्तिनिष्ठतदभावस्य च कालानवच्छिन्नत्वादवच्छेद्याधिकरणासम्बन्धिनोऽनवच्छेदकत्वात् ।

जागदीशी

ननु प्रत्यक्षासम्भवेऽप्यणुत्वं मनस्त्वसामानाधिकरण्याभाववन्मनस्त्वाभाववद्वृत्तित्वात् पृथिवीत्ववदित्यनुमानेनैव तत्र सामानाधिकरण्याभावः सेत्स्यतीत्यत आह—'न च' इति ।

'तद्वद्वृत्ति' इति । साध्यवद्वृत्तिभिन्नत्वस्येत्यर्थः । तथा चोक्तानुमाने मनस्त्ववद्वृत्तिभिन्नत्वमुपाधिस्तस्य च साध्यव्यापकत्वं घटत्वादौ साधनाव्यापकत्वं द्रव्यत्वादौ ग्राह्यम् ।[१]भेदस्याव्याप्यवृत्तित्वे तु साध्यवद्वृत्तितत्तद्व्यक्तित्वावच्छिन्नभेदकूट उपाधिर्बोध्यः । ननूक्तोपाध्यप्रतिसन्धानदशायामुक्तानुमानादेव साध्यवद्वृत्तित्वाभावसिद्धिस्तत्र भविष्यति । अन्यथा व्याप्त्यन्तरस्यापि तत्रातिप्रसङ्गादित्यत आह—'किञ्च इदम्' इत्यादि ।

गादाधरी

अथ हेत्वधिकरणमहाकालावच्छेदेन महाकाल एव कालवृत्तित्वाभावः प्रसिध्यति महाकालस्य गगनादिवदवृत्तितया तत्र कालवृत्तित्वासत्त्वात् स्वस्य तादात्म्यसम्बन्धेन स्वसम्बन्धितया स्वनिष्ठाभावावच्छेदकत्वसम्भवाच्च । न च तादात्म्यसम्बन्धो नावच्छेदकतानियामको रूपे पर्वते न वह्निमत्संयुक्तत्वमितिप्रतीतिवत् स्वस्मिन् रूपे न वह्निमत्संयुक्तत्वमित्यादिप्रतीतेः सविवादत्वादिति वाच्यम्, तथा सति तादात्म्यसम्बन्धेन व्यभिचारिणि तदतिरिक्तसम्बन्धेन स्वासम्बद्धे हेतौ तेन सम्बन्धेन हेतुमत्स्वावच्छेदेन साध्यासामानाधिकरण्यवत्त्वविरहादतिव्याप्तेः स्फुटतया तद्दोषोपेक्षाया अनुचितत्वापातात् ।

अत्र केचित् कालिकसम्बन्धेन गगनादेरपि वृत्तिमत्त्वमताभिप्रायकोऽयं ग्रन्थः, तथा च कालावच्छेदेन महाकालेऽपि कालिकसम्बन्धेन साध्यवद्वृत्तित्वसत्त्वात्तद्विरहिणोऽप्रसिद्धिर्न विरुध्यत इति वदन्ति ।

वस्तुतस्तु स्वस्मिन्सामानाधिकरण्यतदभावयोर्वृत्तावच्छेदकत्वे स्वाधिकरणत्वमेव नियामकं न तु सम्बन्धितामात्रं स्वाधिकरणावच्छेदेनैव स्वस्मिन् तत्प्रतीतेरनुभवसिद्धत्वादत एव 'सम्बन्धान्तरेण सम्बद्धे' इत्युपेक्ष्य 'सम्बन्धान्तरेण वर्तमाने' इत्यभिहितम् । न च तादात्म्यादिवृत्त्यनियामकसम्बन्धेन व्यभिचारिण्यतिव्याप्त्यकथनान्न्यूनता दुर्वारैवेति वाच्यम्, तादृशसम्बन्धेन साध्यवद्वृत्तित्वस्य हेत्वधिकरण-

---

१. ननु मनस्त्वाभाववद्वृत्तित्वरूपहेत्वधिकरणे द्रव्यत्वादौ पृथिव्याद्यवच्छेदेन मनस्त्ववद्वृत्तिभिन्नत्वस्य सत्वमस्त्येव भेदस्याव्याप्यवृत्तित्वात्तथा च नोक्तोपाधेः साधनाऽव्यापकतेत्यत आह—'भेदस्याव्याप्यवृत्तित्वेत्विति' तथा च 'द्रव्यत्वव्यक्तेरपि मनस्त्ववद्वृत्तित्वेन तद्व्यक्तिभेदस्य व्याप्यवृत्तित्वेन द्रव्यत्वादावसत्त्वेनोक्तकूटस्योपाधित्वं भवति साधनाव्यापकत्वादिति भावः।'

त्वस्य चाप्रसिद्ध्यातिव्याप्त्यसम्भवात् । न च तेन सम्बन्धेन सद्धेतौ लक्षणसङ्गमनाय वृत्तेरधिकरणतायाश्च स्थाने सम्बन्धप्रतियोगित्वानुयोगित्वयोरेव निवेशनीयत्वादतिव्याप्तेरावश्यकतेति वाच्यम्, प्राचां तेन सम्बन्धेन व्याप्त्यनभ्युपगमसम्भवेन वृत्त्यादेरपि निवेशसम्भव इत्यभिप्रायेणैवातिव्याप्त्यनुद्भावनात् । एतेन हेत्वधिकरणखण्डकालविशेषावच्छेदेन कालिकसम्बन्धेन तदवृत्तौ तद्विषयकज्ञान एव साध्यासामानाधिकरण्यप्रसिद्धिः सम्भवति । न चैवमपि कालत्ववान् सर्वस्मादित्यादौ खण्डकालस्य हेत्वनधिकरणतया हेत्वधिकरणावच्छिन्नसाध्यासामानाधिकरण्याप्रसिद्धिर्दुर्वारैवेति वाच्यम्, हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणतापर्यन्तानिवेशे वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नस्य यत्र हेतुत्वमभिहितं तत्र तादृशधर्मस्यैव । तन्मते स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन हेतुत्वस्यानुमततयोक्तस्थले सर्वस्यैव तादृशसम्बन्धेन हेतुतया तादृशसम्बन्धेनावृत्तौ कालिकसम्बन्धेन कालवृत्तौ गगनत्वादावेव तादृशसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धेरिति निरस्तम् । तादृशकाले तज्ज्ञानस्य विषयतासम्बन्धसत्त्वेऽपि तादृशसम्बन्धस्य वृत्तिनियामकत्वानभ्युपगमेन तज्ज्ञानस्य तत्कालीनताविरहे च तस्य तज्ज्ञानानधिकरणत्वात्तज्ज्ञानेऽभाववृत्तौ तत्कालस्यानवच्छेदकत्वाद्, महाकालानुयोगिकविशेषणताविशेषेण घटादिहेतुकस्थलाभिप्रायकोऽयं ग्रन्थस्तादृशसम्बन्धेन हेतुमत्तायाः खण्डकालेऽभावान्नोक्तदिशा प्रसिद्धिरित्यपि केचित् ।

जागदीशी

तथा च कालो गोमान् गोत्वादित्यादौ कालिकसम्बन्धेन हेतावव्याप्तिः कालिकसम्बन्धेन हेतुमति महाकाले तेन सम्बन्धेन कालवृत्तित्वाभावस्य कुत्राप्यसत्वात् । न च कालावच्छेदेन गगनादावेव साध्यवद्वृत्तित्वाभावस्य प्रसिद्धिः, कालस्य गगनाद्यनधिकरणत्वेन तन्निष्ठवृत्तित्वाभावे कालावच्छेद्यत्वासम्भवात् कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वस्वीकाराच्च । यद्यपि गोत्वाद्यधिकरणतत्तत्क्षणावच्छेदेन कालवृत्तित्वाभावस्य तत्तत्क्षणासमानकालीने तत्तत्क्षणगोचरज्ञाने प्रसिद्धिः[१]तत्तत्क्षणस्यापि विषयतया स्वविषयकज्ञानाधिकरणतया तन्निष्ठतादृशवृत्तित्वाभाववत्तायामवच्छेदकत्वसंभवात् । तथापि महाकाल एव कालिकसम्बन्धेनाधिकरणं उपाधीनां

१. तत्तत्क्षणासमानकालिकतत्तत्क्षणगोचरज्ञानोपादानस्य प्रयोजनमाह 'तत्तदिति' ।

तु[१] तत्तद्वृत्तितायामवच्छेदकत्वमात्रमिति प्राचीनसिद्धान्तमनुरुध्येदम्[२] महाकालनिरूपितविशेषणतया वा हेतावव्याप्तिर्द्रष्टव्या, इदमिदानीमित्याकारकप्रतीतिनियामकविशेषणतायां यो विशेषस्तेन हेतुतायामिति व्याख्यया तादृशविशेषणतायाः प्राप्तेः सामान्यत एव विभिन्नकालीनयोर्नाधाराधेयभाव इति मते नानुपपत्तिगन्धोऽपि। क्षणानां स्वसमानकालीनविषयतयाप्यनधिकरणत्वेन तदवच्छेदेन ज्ञाने साध्यवद्वृत्तित्वाभावप्रसिध्यसम्भवादिति ध्येयम्[३] अत्र हेतुतावच्छेदकसम्बन्धेन स्वाधिकरणे स्वनिरूपितहेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य विवक्षायां न कोऽपि दोषः।

गादाधरी

अत्र स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतादृशसम्बन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वं विवक्षणीयमिति नोक्ताव्याप्त्यवकाशः, स्वावयवपरमाण्ववच्छेदेन घटादौ वर्तमाने कालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्यानवच्छेदकतया तत्र लक्षणसमन्वयसम्भवात्, केवलान्वयिसाध्यके मेयत्वादौ सर्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वसत्त्वात् स्वनिष्ठतदभावाप्रसिद्ध्याऽव्याप्तिर्न क्षतिमावहति,मूलकृतैव तत्राव्याप्तेर्वक्ष्यमाणत्वात्। यदि चैवमात्मभिन्नं ज्ञानवदन्यत्वादित्यादौ हेतोरात्मान्यसकलवस्त्ववच्छेदेनैव दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्त्वादात्मनश्च केनापि सम्बन्धेन हेतुमत्त्वाभावात्तदवच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववृत्त्यसम्भवाद्धेतुनिष्ठतादृशाभावप्रसिद्ध्याव्याप्तिरिति विभाव्यते, तदा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छेदेन स्वस्मिन् वर्तते योऽभावस्तत्प्रतियोगितानवच्छेदकतादृशसम्बन्धावच्छिन्नसाध्यव-

---

१. 'तत्तद्वृत्तितायामिति'। तत्तत्पदार्थनिष्ठमहांकालनिरूपितवृत्तितायामुपाधीनामवच्छेदकत्वमित्यर्थः। 'तत्तत्क्षणवृत्तितायाम्' इति पाठान्तरम्।

२. महाकालनिरूपितेत्यस्य महाकालानुयोगिकत्वविशिष्टविशेषणता- [कालिक] संबन्धेनेत्यर्थः।

३. सार्वभौमपरिष्कारे निर्दोषत्वं प्रदर्शयन्नाह—'अत्रेति'। 'स्वाधिकरणे स्वनिरूपितेत्यत्र' स्वपदद्वयं हेतुपरम्। निरूपितत्वं प्रतियोगिकत्वरूपं बोध्यम्। तथा च हेतुप्रतियोगिकत्वविशिष्टहेतुतावच्छेदकसंबन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावस्य लक्षणघटकत्वान्न कोऽपि दोष इति भावः।

द्वृत्तित्वकत्वं व्याप्तिरित्येव विवक्षणीयं, कालत्ववान् घटादित्यादौ वर्तमानः कालसमवेतत्वाद्यभाव एव प्रसिद्धस्तत्प्रतियोगितानवच्छेदकञ्च कालिकसम्बन्धावच्छिन्न कालवृत्तित्वत्वादिकमिति लक्षणसमन्वयः। हेतुतावच्छेदकसम्बन्धेन यद्वृत्तिमत्तन्निष्ठतत्सम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतत्सम्बन्धावच्छिन्नतद्वस्तुप्रकृतहेतूभयाधिकरणतावत्सामान्यकत्वं वा वक्तव्यम्, आत्मभिन्नं ज्ञानवदन्यत्वादित्यादावात्माद्यवच्छेदेन घटत्वाभावादिनिष्ठस्यात्मान्यवृत्तित्वाभावस्यानवच्छेदकं घटत्वाभावज्ञानवदन्यत्वोभयाधिकरणसामान्यमिति लक्षणसमन्वयः। उभयाधिकरणत्वनिवेशाद्वह्निमान् धूमादित्यादौ धूमादिसंयोगिनः कपालादेर्घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेऽपि न क्षतिः, कपालादेः संयोगेन घटानधिकरणतयोक्तोभयाधिकरणतावत्सामान्यानन्तर्गतत्वात्।

अथवा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छिन्नस्ववृत्तिकान्यहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावकत्वविवक्षणान्न कश्चिद्दोषः, सर्वत्र सद्धेतावन्ततोऽवृत्तौ प्रसिद्धे साध्यसामानाधिकरण्याभाव एव तादृशस्ववृत्तिकान्यत्वसत्त्वेन लक्षणसमन्वयात्। वह्न्यादिनिष्ठधूमादिसामानाधिकरण्याभावेऽयोगोलकादेरिव तद्वृत्तित्वस्याप्यवच्छेदकत्वात् स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्त्यनवच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नसामानाधिकरण्याभावकत्वं वा विवक्षणीयमित्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः।

इति गादाधरी

जागदीशी

साधनीभूतगोत्वाधिकरणमहाकालावच्छेदेन गोत्वनिरूपितकालिकसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य घटादावेव प्रसिद्धत्वात्।[१]साध्यसामानाधिकरण्यं यद्धर्मावच्छिन्नाधिकरणावच्छेद्यहेतुवृत्तिकात्यन्ताभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं वा विवक्षितम्। इत्थं च वाच्यं प्रमेयादित्यादौ प्रमेयव्यक्तीनां भेदेपि न व्याप्तेर्भेद इत्यस्मद्गुरुचरणाः।

---

१. 'साध्येति'-अत्र यद्धर्म-तद्धर्म-पदाभ्यां हेतुतानच्छेदकधर्मो धर्तव्यः।

[१]केचित्तु स्वनिष्ठं यत्साध्यवद्वृत्तित्वं हेत्वधिकरणावच्छेद्यतदभावाधिकरण-भिन्नत्वमित्यर्थस्तादृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नव्यक्तावेव प्रसिद्ध-मतो नाव्याप्तिरित्याहुः। साध्यवद्वृत्तित्वाभावाधिकरणत्वसामान्ये यन्निष्ठत्व-यदधिकरणावच्छेद्यत्वोभयाभावस्तत्त्वं व्याप्तिः।[२] पर्वतीयरूपनिष्ठं यत्पर्वताव-च्छेद्यं वह्निमत्संयुक्तत्वाभावाधिकरणत्वं न तद्धूमनिष्ठं यच्च धूमनिष्ठं न तद्धूमा-धिकरणावच्छेद्यम्[३] अधिकरणभेदेन तस्य नानात्वात्।[४]अन्यथा पर्वते तदीयरूपे न वह्निमत्संयुक्तत्वमितिवत्पर्वते धूमे न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या-पत्तेः।[५]अतो वह्निमान्धूमादित्यादौ नाव्याप्तिः। व्याप्यवृत्तेरवच्छेदकत्वास्वीकारे तु तादृशाभावाधिकरणत्वसामान्ये यदधिकरणावच्छेद्यत्वसामान्याभावस्तत्त्वमित्येव वाच्यमित्यादिकं पुनरुदक्षरत्वादुपेक्षितम्[६]। वाच्यत्वादिसाध्यके तादात्म्येन हेता-वव्याप्तेश्च वाच्यत्ववत्तादात्म्याभावाप्रसिद्धेः।[७]एतेन सत्तायां कर्मणि न द्रव्यत्वसा-मानाधिकरण्यमिति प्रतीतौ कर्मण इव कर्मसत्त्वयोः समवायस्याप्यवच्छेदकत्वं भासते। अन्यथा इदानीं सत्तायां न द्रव्यत्वसामानाधिकरण्यमित्यादिप्रतीत्यापत्तेः

---

१. 'केचित्त्विति'-अत्र स्वपदं हेतुपरम्।

२. ननूभयाभावनिवेशापेक्षया लाघवात्प्रत्येकाभाव एव निवेशनीय इत्याशङ्क्याह—'पर्वतीयेति' तथा च प्रतियोगिविधया य- (धूम)न्निष्ठत्वोपादानाभावे पर्वतीयरूपनिष्ठवह्निमद्वृत्तित्वाभावाधिकरणतायां धूमाधिकरणपर्वतावच्छेद्यत्व-सत्त्वेनाव्याप्तिः, य- (धूम) दधिकरणावच्छेद्यत्वानुपादानेऽन्यावच्छेदेन धूमनिष्ठवह्निमद्वृत्तित्वाभावाधिकरणत्वे यन्निष्ठत्वस्य सत्त्वादव्याप्तिरिति भावः।

३. ननु धूमाधिकरणमहानसावच्छेदेन पर्वतीयधूमनिष्ठे वह्निमद्वृत्तित्वाभावाधिकरणत्वे यन्निष्ठत्व-यदधिकरणावच्छेद्यत्वोभयसत्त्वेनाव्याप्तितादवस्थ्यमत आह—'अधि-करणभेदेनेति'। तस्य अवच्छेद्यत्वस्येत्यर्थः। तथा च यद्यपि धूमाधिकरणमहानसावच्छेद्यत्वमस्ति तादृशाधिकरणत्वे, तथापि धूमाधिकरण-पर्वतावच्छेद्यत्वाऽभावसत्त्वाल्लक्षणसमन्वय इति भावः।

४. 'अन्यथेति'—यद्यधिकरणभेदेनावच्छेद्यत्वमतिरिक्तं न स्यात्तदा 'पर्वते धूमेनेत्यादि' प्रतीत्यापत्तिः स्यादित्यर्थः।

५. अतः—अवच्छेद्यत्वस्याधिकरणभेदेन भिन्नत्वादित्यर्थः।

६. उदक्षरत्वादित्यस्य यथाश्रुतमूलाक्षराननुसारित्वादिति तत्त्वम्।

७. कालो गोमान् गोत्वादित्यत्राव्याप्तिवारकं केषाञ्चित्परिष्कारं निराकरोति-'एतेनेति'। उदक्षरत्वेन वाच्यत्वसाध्यकतादात्म्येन हेतावव्याप्त्या चेत्यर्थः। अस्य निरस्तमित्यग्रिमेणान्वयः।

एतत्कालस्य कर्मानतिरेकात्। एवं च यद्धेतुव्यक्त्यधिकरणीयहेतुतावच्छेदकसम्बन्धे साध्यवद्वृत्तित्वाभावावच्छेदकत्वं नास्ति[1] तत्त्वमित्यर्थः। कालो गोमान् गोत्वादित्यादौ कालवृत्तित्वाभावावच्छेदकत्वस्य[2] द्रव्यत्वादिनिष्ठात्मसमवेतत्वादौ प्रसिद्धस्य गोत्वाधिकरणीयकालिकसम्बन्धे विरहान्नाव्याप्तिरित्यपि निरस्तमिति संक्षेपः।

इति जागदीशी

॥इति सप्तमं व्याघ्रव्याप्तिलक्षणम्॥

व्याप्तिसप्तकं सम्पूर्णम्

---

१. 'तत्त्वमिति'। यद-(गोत्वा) धिकरणकालानुयोगिककालिकसम्बन्धस्य पूर्वोक्तनियमेन कालवृत्तितावच्छेदकत्वेन कालवृत्तित्वाभावावच्छेदकत्वाभावसत्त्वाल्लक्षणसमन्वयः।

२. अभावस्य सन्मात्रप्रतियोगिकत्वेन प्रतियोगिनः सत्त्वं दर्शयति, 'द्रव्यत्वादीति'।

* श्रीः *

व्याप्तिपञ्चकमाथुर्याः क्रोडपत्रम्।

साध्याभाववदवृत्तित्वलक्षणे साध्याभाववद्वृत्तिनोऽभावो यत्रेति बहुव्रीहिसमासादेव तादृशाधिकरणलाभाद्वृत्तपदोत्तरं मत्वर्थीयप्रत्ययो न भवितुमर्हतीति दोषोद्घाटनं प्राचीनमते "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिरि" त्यादिना मथुरानाथेन कृतम्।

अत्रेयमाशङ्का—ननु तदुत्तरं वस्तुतस्त्वित्यादिकल्पेऽपि साध्यस्याऽभावः साध्याभावः स यत्रास्त्यसौ साध्याभाववान् इत्यत्र साध्यस्याभावो यत्रेति बहुव्रीहिणा तादृशार्थलाभसंभवात्कथं साध्याभावपदोत्तरं साध्यस्याभाववानिति षष्ठीतत्पुरुषाश्रयणान्न दोष इति वाच्यम्। न सापेक्षे कृत्तद्धितसमासा इत्यनेनैव विरोधात्। इति चेदुच्यते—यत्र मत्वर्थीयप्रत्ययेन यद्यदर्थः प्रत्याय्यते तत्र यदि बहुव्रीहिणातत्तदर्थः प्रत्याय्येत तदैव तादृशव्युत्पत्तेरादरो नतु सर्वत्र। अत्र तु तादृशप्रत्ययस्य यथाधिकरणार्थकता तथा प्रशंसार्थकता च। प्रशंसा चात्राभावनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वम्। तथा च बहुव्रीहिणाऽधिकरणत्वलाभेऽपि न तादृशार्थलाभसंभवः। न च प्राचीनमतेऽपि अवृत्तपदोत्तरमत्वर्थीयप्रत्ययस्य वृत्तित्वत्वावच्छिन्नप्रतियोगिताकत्वरूपाभावनिष्ठप्रशंसाबोधकत्वमसम्भवान्न दोष इति वाच्यम्। तत्र नञ्पदस्यैवान्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावत्वविशिष्टबोधकत्वात्। नञ्पदस्य तादृशव्युत्पत्त्यस्वीकारे पुनर्घटवत्यपि घटो नास्तीति प्रत्ययापत्तिस्तत्र घटनिष्ठप्रतियोगिताकाभावसत्त्वात्। न च साध्याभाववानित्यत्राभावपदादेव तादृशार्थलाभः सम्भवतीति वाच्यम्। अभावपदस्य तादृशार्थाबोधकत्वात्। अत एव दीधितौ साकल्यघटितलक्षणे साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावो विवक्षितः। अन्यथा तत्र साध्याभावपदेनैव तादृशार्थलाभसम्भवाद्विवक्षाया निष्फलत्वापत्तिरिति ध्येयम्॥१॥

तादृशवृत्तित्वसामान्यभाव इत्यस्य—

साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तियत्प्रतियोगित्वसम्बन्धावच्छिन्नावच्छेदकत्वं तद्भिन्ना सती या अभावत्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकता, तदनिरूपकं यदभावानिष्ठावच्छेदकत्वं तद्भिन्ना सती या अधिकरणत्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकता तदनिरूपकं यदधिकरणनिष्ठावच्छेदकत्वं तद्भिन्ना सती या वृत्तितात्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकता तदनिरूपकं यद्वृत्तित्वनिष्ठं प्रतियोगित्वं तन्निरूपकोऽभाव इत्यर्थः। उक्तरूपवृत्तित्वञ्चावच्छेदकतायां स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन महानसीयवह्निमान् धूमादित्यत्र वह्न्यभाववदवृत्तित्वमादायातिव्याप्तिवारणाय तादृशावच्छेदकतायां निरुक्तसम्बन्धेन उक्तरूपवृत्तित्वं निवेशितम्। धूमवान्, वह्नेरित्यत्र ह्रदवृत्तित्वविशिष्टधूमाभाववदवृत्तित्वमादायातिव्याप्तिनिरासाय प्रथमनिरूपकान्तं, धूमाभाववद्ध्रदावृत्तित्वमादायातिव्याप्तिवारणाय द्वितीयमनिरूपकान्तमवच्छेदकताविशेषणं, धूमाभाववद्वृत्तित्वजलत्वोभयाभावमादायातिव्याप्तिवारणाय च तृतीयमनिरूपकान्तं प्रतियोगिताविषशेणं बोध्यमिति ॥ २ ॥

साध्यतावच्छेदकसम्बन्धावच्छिन्नेत्यादि—

ननु साध्यतावच्छेदकावच्छिन्नेत्यस्य साध्यतावच्छेदकेतरानवच्छिन्नार्थकतयैवोपपत्त्या किमत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशेनेति चेन्न। समवायिनः संयोगेन साध्यतायां समवायेन संयोगिनोऽभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणस्य सार्थक्यात्। स्वनिरूपितसंसर्गानवच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगिताकोऽभाव इति तदर्थः ॥ ३ ॥

नन्वत्र लक्षणे प्रतियोगितापदं व्यर्थमिति चेन्न।

अभावत्वप्रकारकप्रमाविशेष्यमभावत्वादित्यत्र अधिकरणस्याधेयतानिरूपकत्वेन तादृशविशेष्यत्वरूपसाध्यनिष्ठाधेयतानिरूपको यो घटाद्यभावस्तद्वति पटाद्यभावे हेतोर्वृत्तेरव्याप्तिवारणाय तस्य आवश्यकत्वात् ॥ ४ ॥

अभावत्वरूपानुयोगिताया अपि निरूक्तप्रतियोगिताकतया तत्रैवाव्याप्तिवारणायाभावपदमपि। इत्थञ्च निरुक्तप्रतियोगिताकत्वाभावत्वरूपधर्म्मद्वयावच्छिन्नाधिकरणताया अभावेऽसत्त्वात् न तत्राव्याप्तिरिति ॥ ५ ॥

अथात्र साध्याभावाधिकरणनिरूपितस्याभावनिवेशेनैवोपपत्तौ तादृशवृत्तित्वाभावनिवेशः किमर्थ इति चेन्न।

तथा सति हेत्वभावस्यापि साध्याभावाधिकरणतया तन्निरूपितप्रतियोगिताया हेतौ सत्त्वेन वह्निमान् धूमादित्यादावव्याप्त्यापत्तेः।

'यद्यपि वह्निमान् धूमादित्यादावेतल्लक्षणाव्याप्तिः हेत्वधिकरणताया अपि साध्याभावाधिकरणत्वेन तन्निरूपितवृत्तित्वस्य हेतौ सत्वात्, तथापि स्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वोभयसम्बन्धेन साध्याभावाधिकरणविशिष्टं यद्वृत्तित्वं तदभावस्य विवक्षितत्वात्। वस्तुतस्तु निरूपितत्वसम्बधेन साध्याभावाधिकरणविशिष्टं यद्वृत्तित्वं तदभावो निवेश्यः, निरूपितत्वञ्च विशिष्टप्रतीत्यनुरोधात् कुत्रचिदेव वृत्तितायां कस्यचित् सम्बन्धो न तु सर्वेषां सर्वत्र, एवञ्च धूमाधिकरणतायां धूम इत्यप्रत्ययात् न तन्निरूपितवृत्तित्वं धूम इति लक्षणसमन्वये न कोऽपि दोषः ॥ ६ ॥

नन्वत्र कालिकसम्बन्धेन पर्वतादेः साध्याभावाधिकरणतया वह्निमान् धूमादिति प्रसिद्धस्थल एवाव्याप्तिसंभवे गुणत्ववान् ज्ञानत्वादित्यादिस्थलान्तरानुसरणमनर्थकमिति चेन्न। जन्यमात्रस्य कालोपाधित्वमनङ्गीकर्त्तृमते तत्राव्याप्तिविरहात्। विषयिताया वृत्त्यनियामकत्वमनुस्मृत्याह—'अव्याप्यत्वेति'। ननु कालिकतादात्म्यादिघटिताव्याप्यत्वसंबन्धेनापि गुणत्ववान् ज्ञानत्वादित्यत्राव्याप्तिसम्भवे सत्तावानित्यादिस्थलान्तरानुसरणमनर्थकमिति चेन्न। जन्यमात्रे, कालोपाधित्वानङ्गीकारेण वृत्त्यनियामकसम्बन्धघटिताव्याप्यत्वस्य वृत्त्यनियामकत्वेन च तत्र दोषदानस्य पूर्ववदेवासङ्गतेः। ज्ञानत्वहेतुम्परित्यज्य जातिरूपहेत्वन्तरानुसरणे बीजन्तु सत्त्वसाध्यकस्थले जातेः प्रसिद्धहेतुत्वम् अव्याप्यत्व- सम्पादनसौकर्यञ्चेति ॥ ७ ॥

साध्यतावच्छेदकसम्बन्धेन वृत्तिमत्साध्यनिरूपितप्रतियोगितानिवेशे समवायेन प्रमेयसाध्यके सामान्यपदव्यावृत्त्यसम्भवाद्विषयितादिसम्बन्धेन तत्साध्यानुसरणमिति ॥ ८ ॥

आत्मत्वप्रकारकप्रमाविशेष्यत्वाभाववान् आत्मत्वादिति—

अत्र साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाश्रयीभूतस्य साध्याभावस्य साध्यसामान्यीयप्रतियोगितावच्छेदकसंबन्धेनाधिकरणे वृत्तित्वं हेतोर्व्याप्तिरित्युक्तौ विशेष्यत्वाभावसाध्यके अव्याप्त्यभावादात्मत्वप्रकारकेत्यादि । एवं प्रमापदमप्यत्राव्याप्तिदानार्थम् अन्यथा आत्मत्वप्रकारकभ्रमप्रमासाधारणज्ञानविशेष्यत्वस्यापि केवलान्वयितया स्वरूपसम्बन्धावच्छिन्न- प्रतियोगित्वानधिकरणतया धर्तुमशक्यत्वात् ॥ १० ॥

पूर्वक्षणादिवृत्तित्वविशिष्टसाध्याभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनाभावनिवेशः ॥ ११ ॥

कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्यापि साध्यवत्त्वेन साध्यतावच्छेदकधर्म-संबन्धावच्छिन्नवृत्तितानिरूपकतया तन्निष्ठकालिकसंबन्धावच्छिन्नप्रतियोगितामादायाव्याप्तितादवस्थ्यात् प्रतियोगितापदम् ॥ १२ ॥

अनुयोगितायाः कालिकसम्बन्धावच्छिन्नाभावे कालिकसम्बन्धेन साध्ये महाकालत्वहेतावव्याप्तिवारणायाभावपदम्, अन्यथा निरुक्तविशेषणाक्रान्तसाध्यनिष्ठप्रतियोगिताया निरूपकं यदभावरूपानुयोगित्वं तत्रापि अनुयोगितात्वावच्छिन्नायाः साध्यीयप्रतियोगितायाः सत्त्वेन तदवच्छेदककालिकसम्बन्धेन महाकालस्यापि साध्याभावाधिकरणत्वात् ॥ १३ ॥

साध्याभावनिष्ठं यत्कालिकादिसम्बन्धावच्छिन्नं साध्यनिरूपितवृत्तित्वं तदवच्छेदककालिकादिसम्बन्धेन साध्याभाववति पर्वतादौ हेतोःसत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिवारणायान्तिमं प्रतियोगितापदमिति ॥ १४ ॥

अथात्र कालिकसम्बन्धावच्छिन्ननिरूपकताकाधिकरणतायां निरवच्छिन्नत्वाभावेनाव्याप्तितादवस्थ्यमिति चेन्न । कालिकान्यसम्बन्धावच्छिन्नत्वस्य किञ्चिदवच्छिन्नत्वस्य च द्वयोर्व्यतिरेकस्यैव निरवच्छिन्नपदेनापेक्षितत्वात् ॥ १५ ॥

नन्वत्र लक्षणे घटभिन्नं कपालत्वादित्यत्र गुणभिन्नं द्रव्यत्वादित्यत्र चाव्याप्तिर्घटत्वगुणत्वादिनिष्ठात्यन्ताभावत्वनिरूपितप्रतियोगितावच्छेदकसमवायसम्बन्धेन घटगुणादिरूपसाध्याभावस्याधिकरणे कपाले द्रव्ये च हेतोः सत्त्वादिति चेन्न यादृशसाध्याभाव वृत्तिसाध्यीयप्रतियोगितावच्छेदको यः संबन्धस्तत्सम्बन्धेन तादृशसाध्याभावाधिकरणनिरूपितवृत्तित्वसामान्याभावस्य विवक्षितत्वात् ॥ १६ ॥

उभयंत्वमुभयत्रैवेति—

नन्वेवमपि द्रव्यं घटत्वपटत्वोभयस्मादित्यादावतिव्याप्तिः साध्याभाववति गुणादौ तदुभयोरवृत्तेस्तथा घटे घटत्वस्य पटे च पटत्वस्य साध्यसमानाधिकरणत्वात् । तथा च हेतुतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यमेव वाच्यमित्युभयत्वावच्छिन्नस्य कुत्राप्यवृत्त्या नातिव्याप्तिरिति वाच्यम्ः तथा सति हेतुतावच्छेदकभेदेनानन्तकार्य्यकारणाभावभेदापत्तेरिति चेन्न । तादृशसामानाधिकरण्यविशिष्टहेतुतैव व्याप्तिः वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व- स्वसामानाधिकरण्य-स्वानवच्छेदकानच्छिन्नत्वचतुष्टयसम्बन्धेन स्ववृत्तित्वमपि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन बोध्यमित्यदोषः ॥ १७ ॥

अन्येत्विति ।

अथात्र तादृशहेत्वधिकरणनिरूपितनिरवच्छिन्नवृत्तितानवच्छेदकनिरुक्तसाध्याभावत्वकत्वमित्येवोच्यताम् । न । तथा सति द्रव्यत्वाभाववान् जातित्वादित्यादौ निरुक्तसम्बन्धावच्छिन्नहेत्वधिकरणवृत्तित्वंप्रसिद्ध्याऽव्याप्तिप्रसङ्गात् ॥ १८ ॥

नन्वेवमपि घटत्वतद्घटाकाशसंयोगान्यतराभाववान् गगनत्वादित्यत्राव्याप्तिः साध्यवद्भिन्ने घटे वर्त्तमानस्य तत्संयोगात्मकसाध्याभावस्य गगनेऽपि सत्त्वादिति चेन्न यतस्तादृशान्यतराभावत्वावच्छिन्नाभावो न तादृशान्यतरस्वरूपः तथा सति तत्संयोगे स्वप्रतियोगिसमानाधिकरणत्वतदभावयोरध्यासात्, किन्तु ततो भिन्नं घटे गगने च द्वयमेवेति न तत्राव्याप्तिरिति ॥ १९ ॥

प्रतियोग्यवृत्तित्वेनेति ।

न चैवं सर्वत्रासम्भवः भेदमात्रस्य प्रतियोगितावच्छेदकरूपप्रतियोगिवृत्तित्वादिति । अन्योन्याभावत्वनिरूपितप्रतियोगित्वाश्रयावृत्तित्वनिवेशे तु लक्षणस्थान्योन्याभावपदवैयर्थ्यमभावनिवेशेनैवोपपत्तेरिति चेन्न । तल्लाभार्थमेव तस्योपादानादिति ॥ २० ॥

न चात्र प्रतियोग्यवृत्तित्वमपहाय साध्यवदवृत्तित्वमेवोच्यतां तथा च पञ्चमलक्षणाभेदस्यापि वारयितुं शक्यत्वादिति वाच्यम्, अन्योन्याभावपदवैयर्थ्यापत्तेरिति ॥ २१ ॥

चतुर्थलक्षणे तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वमिति ।

अत्र तद्वन्निष्ठत्वमभावस्य न सम्बन्धसामान्येन धूमाभावाभावस्यापि कालिकादिसम्बन्धेन साध्याभाववति वृत्त्या वह्निमान् धूमादित्यादावव्याप्त्यापत्तेः । न वा हेतुंतावच्छेदकसम्बन्धेन सत्तावान् द्रव्यत्वादित्यादौ तादृशसम्बन्धेन साध्याभाववति वृत्तेरप्रसिद्ध्या अव्याप्त्यापत्तेः किन्तु स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगिमत्वबुद्धेर्विषयविधयाप्रतिबन्धकतावच्छेदको यः सम्बन्धस्तेनैव सम्बन्धेनेति तत्त्वम् ॥ २२ ॥

ननु तथापि संयोगसम्बन्धावच्छिन्नधूमाभावाभावात्मकस्य धूमस्य वह्न्यभाववति धूमावयवे समवायेन वृत्त्या वह्निमान् धूमादित्यत्राव्याप्तिरिति चेन्न । तादृशसाध्याभावाधिकरणवृत्तितावच्छेदकानुयोगितानिरूपितप्रतियोगितानवच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्वस्य विवक्षितत्वात् । संयोगसम्बन्धावच्छिन्नधूमाभावाभावत्वं तत्ससम्बन्धावच्छिन्नवृत्तिताया एवावच्छेदकं, न तु सम्बन्धान्तरावच्छिनवृत्तिताया, धूमस्य तत्सम्बन्धेनैव तदभावाभावत्वसिद्धेरिति ॥ २१ ॥

इति माथुर्याः क्रोडपत्रम्

व्याप्तिसप्तकजागदीश्याः क्रोडपत्रम्

स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यवद्भिन्ने वर्तते यः समवायसंबन्धावच्छिन्नवह्न्यभावस्तद्वति हेतोर्वृत्तितयाऽव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितालाभाय साध्यपदमिति जगदीशः ।

अत्रेयमाशङ्का । एवं सति स्वप्रतियोगितावच्छेदसंबन्धेन साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारयः कथं परित्यक्त इति चेत्, सप्तमीसमासपक्षे स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यवद्भिन्ने यः साध्यताघटकसंबन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावस्तद्वदवृत्तित्वमेव वाच्यम् अन्यथा साध्यताघटकसंबन्धावच्छिन्नप्रतियोगिताकाभावमात्रनिवेशे घटभिन्नस्य तादात्म्येन साध्यत्वे पटत्वादिहेतौ द्रव्यत्वात्मकं द्रव्यभिन्नभेदमादायाव्याप्त्यापत्तेः । तद्भिन्नाभावस्यातिरिक्तत्वेपि तद्भिन्नभेदस्य तत्स्वरूपत्वोपगमात् ।कर्मधारयपक्षे तु साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशवैयर्थ्यमिति ध्येयम् ॥११ ॥

गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादि ।

ननु साकल्यविशेषणे दत्तेऽपि गगनत्वसाध्योभयाभावमादायातिव्याप्तिरिति चेन्न। इदानीं व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायामस्तीत्यभिप्रायात्। अत्रेदं तत्त्वम्। साध्ये साकल्यविशेषणस्य वास्तवफलं यदव्याप्तिवारणं तदग्रे न संभवतीति प्राचामाशयः। विपक्षे साकल्येन वारयितुमशक्यस्यैव साध्ये साकल्य-वास्तवफलत्वात्। न च गगनैतद्रूपोभयवान् न तद्रसादित्यादौ साध्याभाववति साकल्यविशेषणे दत्तेऽपि तत्र साध्यप्रतियोगिकस्य एतद्रूपाभावस्याधिकरणे हेतोर-भावात् गगनैतद्रूपोभयत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकर-णप्रसिद्ध्या प्रतियोगिवैयधिकरण्यस्यैव दौर्लभ्याच्च संभवन्त्यतिव्याप्तिः साध्ये साकल्यदाने तादृशसकलसाध्यप्रतियोगिकाभावप्रसिद्ध्यैव वार्यत इति साध्ये साकल्यविशेषणस्य फलमपि वास्तवमतिव्याप्तिः प्रथमतः संभवतीति वाच्यम्। तत्र साध्ये साकल्यविशेणासत्त्वेऽपि एतद्घटावृत्तित्वावच्छिन्नाभावं एतद्रूपगगनान्य-तराभावं चादायातिव्याप्तिवारणसंभवेन तस्य वास्तवफलत्वाभावात्॥ २॥

दीधितिकारः, चतुर्थलक्षणे हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिक-रण्यं निवेश्य प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वं वक्ति स्म। तत्राशङ्क्यते अत्र हेतुतावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणाभावीयप्रतियोगित्वापेक्षया प्रति-योगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणाभावीयहेतुतावच्छेदकावच्छिन्न-प्रतियोगित्वनिवेशनं यद्यपि गुरु। तथापि यथासन्निवेशे न वैयर्थ्यम्। वस्तुतः साध्याभाववत्सकलनिष्ठहेतुतावच्छेदकावच्छिन्नस्वप्रतियोग्यनधिकरणताकाभा-वप्रतियोगित्वापेक्षया हेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छि-न्नानधिकरणत्वं साध्याभाववतस्तद्वत्त्वं न गौरवग्रस्तमिति॥ ३॥

तत्तत्सपक्षावृत्तित्वावच्छिन्नाभावेति।

न च साध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य लक्षणे निवेश-नीयतया तद्ध्रदावृत्तिर्नास्तीत्याद्यभावमादाय कथमव्याप्तिरिति वाच्यम्। अभाव-द्वये प्रतियोगिवैयधिकरण्यावच्छिन्नत्वस्यावश्यं निवेशनीयतया समवायाद्रिसंब-न्धावच्छिन्नप्रतियोगिताकाभावमादाय दोषाभावादेतल्लक्षणे तस्यानिवेशनीयत्वा-दन्यथा धूमवान्वह्नेरित्यादौ दोषाभावादेतल्लक्षणे तस्यानिवेशनीयत्वादन्यथा धूमवान्वह्नेरित्यादौ संयोगसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य गुणादावेव सत्त्वादप्रसिद्ध्यभिधानस्योन्मत्तप्रलपितत्वापत्तेः॥ ४॥

अथ प्रागुक्तयुक्त्याऽसंभवेऽव्याप्त्यभिधानमसङ्गतम्: न च तद्घटदभिन्नं पटत्वादित्यादावेव लक्षणगमनसंभव इति वाच्यम्। तत्रापि घटभेदत्वावच्छिन्नभे-

दत्वावच्छिन्नाभावरूपसाध्याभावस्तोमस्याधिकरणाप्रसिद्धेर्दुर्वारत्वात्। न च भेदत्वावच्छिन्नत्वाभावस्य प्रतियोगित्वं घटादिभेदे स्वीक्रियते न तु तस्य प्रतियोगित्वं साध्येऽपीति वाच्यम्। तावत्पर्यन्तानुधावने धूमवान्वह्नेरित्यादौ घटावृत्तित्वावच्छिन्नाभावस्य प्रतियोगित्वं घटादिभेदे स्वीक्रियते न तु प्रतियोगित्वं धूमादावप्यतः साध्याभावे साकल्येऽपि दोषो नास्तीति चेन्मैवम्। पटावृत्तिधर्मवान् घटत्वादित्यादौ लक्षणसमन्वयसंभवान्नासंभव इति। न च तत्रापि पटभेदत्वावच्छिन्नाभावस्य तत्तत्पटावृत्तिधर्माभावस्य च साध्याभावस्तोमस्याधिकरणाप्रसिद्ध्यैवाव्याप्तिसंभव इति वाच्यम्। तादृशाभावस्य यावत्साध्यप्रतियोगिकत्वविरहेण साध्याभावे यावत्साध्यप्रतियोगिकत्वविवक्षया तद्वारणात्॥ ५॥

चतुर्थलक्षणे निर्धूमत्वव्याप्येति।

ननु निर्धूमत्वव्याप्याभाववति पर्वतमहानसादौ वह्न्यभावाभावस्य वह्निस्वरूपस्य यावद्विपक्षावृत्तित्वेपि वह्न्यभावभेदस्य यावद्विपक्षवृत्तित्वसंभवान्नाव्याप्तिः न चात्यन्ताभाव एव सकलसाध्याभाववन्निष्ठो निवेश्यः तदनिवेशे धूमवान् वह्नेरित्यादावतिव्याप्तिरयोगोलके वह्निभेदासत्त्वादिति वाच्यम्। धूमाभाववति वह्न्यादौ वह्निभेदासत्त्वेनातिव्याप्तेरनवकाशादिति चेत्। वह्न्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यवान् वह्न्यभावान्यत्वविशिष्टनिर्वह्नित्वादित्यादावव्याप्तिस्तत्र साध्याभाववति वह्न्यभावे वह्न्यभावभेदात्मकहेतुभेदस्यासत्त्वात् पर्वतादौ च वह्न्यात्मकहेत्वभावस्य यावद्विपक्षावृत्तित्वादिति॥ ६॥

निरुक्तप्रतियोगिवैयधिकरण्यावच्छिन्नेत्यादि।

नन्वत्र कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिवारणाय साध्याभावे प्रतियोगिवैयधिकरण्यस्य सार्थक्येऽपि हेत्वभावे प्रतियोगिवैयधिकरण्यंमनर्थकमेव न चैतद्वृक्षत्ववान् कपिसंयोगादित्यादावतिव्याप्तिवारणाय तदिति वाच्यम्। तत्र साध्याभाववति जलादौ कपिसंयोगाभावस्यासत्त्वेपि तदवच्छिन्नाभावस्यापि तत्रासत्त्वात्तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वरूपसाध्याभावव्यापकत्वस्य हेत्वाभावेऽभावादितिचेन्न द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यस्य व्यापकताशरीरे निवेशनीयत्वात् अन्यथा द्रव्यत्वाभाववति गुणादौ विशिष्टसत्त्वाभावत्वावच्छिन्नाभावस्य सत्तास्वरूपतया तस्य तत्र सत्त्वेन विशिष्टसत्ताभावत्वस्य व्यापकतावच्छेदकत्वविरहादव्याप्तिः। अधुना तु प्रतियोगिवैयधिकरण्यावच्छिन्नाभावस्य व्यापकताशरीरे निवेशनीयतया गुणादौ विशिष्टस-

त्त्वाभावस्याभावसत्त्वेऽपि तादृशाभावप्रतियोगिनो विशिष्टसत्त्वाभावस्यापि सत्त्वेन तद्दोषवारणेऽपि वृक्षत्ववान् कपिसंयोगादित्यादावतिव्याप्तिर्दुर्वारैवेति तद्वारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यावच्छिन्नत्वविशेषणमवश्यं निवेशनीयमिति ध्येयम् । वस्तुतः साध्याभाववन्निष्ठाधिकरणतानिरुपकतावच्छेदकानुयोगितानिरूपितप्रतियोगिताया अवच्छेदकत्वाभावस्य तादृशाभावत्वे निवेशनीयतयैव द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिवारणसंभवे व्यापकताशरीरे प्रतियोगिवैयधिकरण्यमनादेयमिति ध्येयम् ॥ ७ ॥

सिंहव्याघ्रलक्षण-जागदीश्याः क्रोडपत्रम्

साध्यासामानाधिकरण्यस्य तृतीयपरिष्कारं परित्यज्य चतुर्थपरिष्कारानुसरणे विषमव्याप्ते हेतावव्याप्तिर्गौरवञ्च बीजत्वेनोक्तं जगदीशेन ।

ननु साध्यसामान्यनिष्ठाभावेत्यादिकल्पे साध्यतावच्छेदसंबन्धावच्छिन्नाधेयतानिवेशस्यावश्यकत्वम् अन्यथा समवायसंबन्धावच्छिन्नपर्वतवृत्तिः तथा च द्रव्यवान् धूमादित्यादावव्याप्तिः साध्यसामान्यनिष्ठाभावप्रतियोगिसाध्यतावच्छेदकसंबन्धावच्छिन्नाधेयत्वाप्रसिद्धेः सत्त्वात् । अत्र केचित् । साध्यसामान्यनिष्ठाभावीयसाध्यतावच्छेदकसंबन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रतियोगिताश्रयनिरूपितवृत्तित्वस्यानधिकरणत्वमेव निष्कृष्टदलार्थः । तथा च पर्वतादौ वह्निनिष्ठाभावप्रतियोगित्वाभावान्नाव्याप्तिरित्याहुः अत्र यद्यप्येतादृशसंबन्धस्य वृत्त्यनियामकतया तत्संबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्याऽसंभवापत्तिः तथापि साध्यतावच्छेदकसंबन्धावच्छिन्नत्वसाध्यनिष्ठत्वोभयाभाववत्त्वस्याधेयतायां निवेशेन पूर्वोक्तदोषानवकाश इति ॥ १ ॥

अथात्र आर्द्रेन्धनप्रभववह्निमान्धूमादित्यादिसमव्याप्तहेतावप्यव्याप्तिः संभवति महानसीयवह्न्यात्मकार्द्रेन्धनप्रभववह्नौ वर्तमानो यः पर्वतवृत्तित्वाभावस्तत्प्रतियोगि यत्पर्वतवृत्तित्वं तन्निरूपकाधिकरणवृत्तित्वस्य पर्वतीयधूमे सत्त्वादिति चेन्न । व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वस्य विषमव्याप्तिपदेन विवक्षितत्वान्नानुपपत्तिरिति ध्येयम् ॥ २ ॥

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वानधिकरणत्वमित्यत्र साध्यनिष्ठत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं बोध्यम् अन्यथा समवायेन रूपवान् महाकालत्वादित्यादौ व्यभिचारिण्यतिव्याप्तिरिति जगदीशः ।

यद्यपि कालिकसम्बन्धावच्छिन्नरूपनिष्ठाधेयतानिरूपकाधिकरणत्वस्यैवं महाप्रलये सत्त्वात् संबन्धसामान्येन रूपनिष्ठाधेयत्वानिरूपकाधिकरणत्वं न महाप्रलये किन्तु गगन एव तन्निरूपितवृत्तित्वानधिकरणत्वं च कालत्वहेतावपि, तथा च तत्रैवातिव्याप्तिसंभवे महाकालत्वपर्यन्तानुधावनं व्यर्थम् तथापि यादृशव्यभिचारिमात्र एवाधेयतायां साध्यतावच्छेदकसंबन्धानिवेशेऽतिव्याप्तिस्तादृशहेतुः महाकालत्वमेव न तु केवलं कालत्वम्। तथा हि, जन्यरूपवान् कालत्वादित्यादौ जन्यभावानधिकरणमहाप्रलये कालिकसंबन्धावच्छिन्ना या जन्यरूपादिनिष्ठाधेयता तदनिरूपकाधिकरणत्वस्य सत्त्वात् तादृशप्रलयनिरूपितवृत्तित्वस्य कालत्वे सत्वात् महाकालत्वानुधावनम्। तथा च महाकाले वृत्तिमन्मात्रस्यैव कालिकसंबन्धेन वृत्तिमन्मात्रस्यैव कालिकसंबन्धेन वृत्तित्वात् न कालिकसंबन्धावच्छिन्नकिञ्चिन्निष्ठाधेयताया अनिरूपकाधिकरणत्वं महाकालेऽस्तीति ॥ ३ ॥

अस्माकं तु तादृशसम्बन्धेन यद्धेतुसंबन्धित्वं तस्य स्वरूपसंबन्धावच्छिन्नाभावमादाय लक्षणसमन्वयसंभवादिति जगदीशः।

अत्रेयमाशङ्का हेतुतावच्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वेन व्यापकतानिवेशे साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकं हेतुतावच्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वं व्याप्तिरिति पर्यवस्यति तत्र साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यं हेतुतावच्छेदकसंबन्धेन वक्तव्यम् अन्यथा वह्निमान् धूमादित्यादौ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणीभूतो यो धूमावयवस्तत्र धूमाभावस्य समवायेन वर्तमानत्वात्तत्प्रतियोगितावच्छेदकं धूमाभावत्वमित्यव्याप्तेः। एवं च सत्तावान् जातेरित्यादौ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे सामान्यादौ हेतुतावच्छेदकसंबन्धेन वृत्तित्वाप्रसिद्ध्याऽव्याप्तिः एवं च यादृशस्थलेऽव्याप्त्या पूर्वोक्तलक्षणं परित्यज्य एतादृशलक्षणं कृतं तादृशस्थल एवाव्याप्तिः सम्भवतीति तामुपेक्ष्य कथं चैत्रत्ववान् तद्धनादित्यादिस्थलान्तरानुधावनं कृतम्। एवं द्रव्यं विशिष्टसत्त्वादित्यत्र साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे गुणे सत्तास्वरूपविशिष्टसत्ताभावाभावो वर्तते तत्प्रतियोगितावच्छेदकं विशिष्टसत्त्वाभावत्वमिति तत्राप्यव्याप्तिपरिहार एतादृशविवक्षायां न संभवतीति चेत्। अत्राहुः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकत्वमत्र साध्यनिष्ठाधेयत्वानिरूपकाधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्त्यधिकरणतानवच्छेदकं यत्तद्भिन्नत्वरूपं निवेशनीयम् ॥ ४ ॥

साध्यानधिकरणेत्यादौ नञ्व्यत्ययेन चरमाधिकरणत्वेन सहान्वयाल्लाभालाभ इति जगदीशः ।

ननु साध्यानधिकरणानधिकरणत्वशब्देन साध्यं यदधिकरणानधिकरणं तत्त्वाभावस्याबोधनादसङ्गतिरिति चेत् नव्यमते बहुब्रीहिस्थले विग्रहवाक्येन यादृशार्थः प्रत्याय्यते तत्पदार्थ्यवैपरीत्येनान्वयावगाहिबोधः समासेन जन्यते इति व्युत्पत्तेरधिकरणमनधिकरणमाधेयतानिरूपकं यस्य साध्यस्येति प्रथमं बहुब्रीहिः ततोऽधिकरणानधिकणं यस्य इति तदुत्तरं भावप्रत्ययाच्च नञ्तत्पुरुषः । नञः साध्यपदोत्तरं निपातः भट्टाचर्येण नञः साध्यनिपातस्य चापि नयेन व्युत्पत्त्यविरोधात्, तत्रप्रथमबहुब्रीहिवाक्येन यत्पदार्थे साध्यनिष्ठाधेयत्वनिरूपकत्वावच्छिन्नप्रतियोगिताकभेदवदधिकरणमिति बोधः । समासेन तु अधिकरणनिष्ठाभावप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावत्साध्यमिति बोधो जायते द्वितीयबहुव्रीहिवाक्येन तु यत्पदोत्तरषठ्यर्थस्य वृत्तितानिरूपकत्वस्याधिकरणांशेवगाहिनोक्तप्रकार एव बोधः द्वितीयबहुब्रीहिणा तु पुनस्तत्पदार्थे नञ्व्यत्ययेन साध्यनिष्ठाधेयत्वनिरूपकत्वावच्छिन्नप्रतियोगिताकभेदवदधिकरणनिरूपितत्वं यत्पदार्थे बोध्यते भावप्रत्ययेन तादृशवृत्तित्वमात्रं नञ्तत्पुरुषेण तदभाव इति रीत्या चरमाधिकरणांशविनिर्मुक्तस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपस्य प्रथमलक्षणार्थस्यावगतेः । द्वितीयलक्षणार्थाव- गतिस्तु एवं रीत्या, साध्यस्यानधिकरणं साध्यानधिकरणं साध्यवद्भिन्नमिति यावत् तदेवाधिकरणमाधेयतानिरूपकं यस्येति वाक्येन यन्निष्ठाधेयतानिरूपकं साध्यवद्भिन्नमिति बोधः, समासेन तु साध्यवद्भिन्ननिरूपितवृत्तित्वं यत्पदार्थे बोध्यते; इति प्राचां समाधानम् ॥ ५ ॥

अत्र केचिदाक्षिपन्ति हेतुतावच्छेदकसंबन्धावच्छिन्नहेत्वधिकरणावच्छेद्यसाध्योपलक्षितनिरूपितवृत्तित्वाभावस्यैव लक्षणे निवेशः । अन्यथा वह्निप्रागभावे वह्निविशिष्टनिरूपितवृत्तित्वाभावस्य सत्त्वात् वह्निमान् वह्निप्रागभावादित्यादावव्याप्तिस्स्यात् । तथा च कथं हेत्वधिकरणनिष्ठावच्छेदकतायां निरवच्छिन्नत्वं निवेशितमिति । तन्न । साध्योपलक्षितनिरूपितवृत्तित्वाभावस्य निवेशेऽपि वह्निमान् वह्निप्रागभावादित्यादावव्याप्तिवारणार्थ हेत्वधिकरणनिष्ठावच्छेदकतायां निरवच्छिन्नत्वं देयम् । अन्यथा वह्न्यधिकरणकालावच्छेदेन वह्न्युपलक्षितनिरूपितवृत्तित्वाभावसत्त्वादव्याप्ति रिति ध्येयम् ॥ ६ ॥

*** इति क्रोडपत्रम् ***

परिशिष्टम्

सन्दर्भग्रन्थसूची

१. 'अवयवप्रकरणम्' ज्वालाप्रसादगौडविरचितया टीकया सम्वलितम्, प्रकाशकः लोकसंगमप्रकाशनम्, बागबरियारसिंहः, वाराणसी, खीष्टाब्दः १९६४

२. गङ्गेशोपाध्यायविरचिता 'तत्त्वचिन्तामणिः' रघुनाथशिरोमणिविरचितया दीधित्या, गदाधरभट्टाचार्यविरचितया गादाधर्या च सम्वलितः। अनुमानखण्डस्य अनुमितिप्रकरणम्।

३. गङ्गेशोपाध्यायविरचिता 'तत्त्वचिन्तामणिः' रामकृष्णाध्वरिकृतन्यायशिखामणिभूषितेन रुचिदत्तमिश्रविरचितप्रकाशेनालङ्कृतः, प्रत्यक्षखण्डात्मकः प्रथमो भागः, केन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला, २०१, सम्पादकः एन० एस० रामानुज ताताचार्यः, प्रकाशकः डॉ० मण्डनमिश्रः प्राचार्यः केन्द्रीयसंस्कृतविद्यापीठम् तिरुपतिः खीष्टाब्दः १९७३

४. गङ्गेशोपाध्यायविरचिता 'तत्त्वचिन्तामणिः' रघुनाथशिरोमणिविरचितया दीधित्या, जगदीशेन विरचितया जागदीश्या च समन्वितः, अनुमानखण्डः।

५. 'तत्त्व-चिन्तामणिः' दीधिति-गादाधरीगर्भितः। सम्पादकः म० म० विन्ध्येश्वरी प्रसादद्विवेदी, म० म० वामाचरणभट्टाचार्यः, पं० रामशास्त्री, पं० ढुण्ढिरशास्त्री, द्वितीयं संस्करणम्। प्रकाशकः चौखम्बासंस्कृतसिरीजकार्यालयः, वाराणसी, खीष्टाब्दः १९७०

६. 'तत्त्वचिन्तामणिः' दीधिति-दीधितिप्रसारिणीसम्वलितः। दीधितिप्रसारिणीव्याख्याकारः कृष्णदाससार्वभौमः, सम्पादकः प्रसन्नकुमारतर्कनिधिः, प्रकाशकः एसियाटिक सोसाइटी बेंगाल, कलकत्ता १९१२ न्यू सिरीज सं० १३३४

७. 'तत्त्वचिन्तामणिः' दीधिति-प्रकाशसहितः, प्रकाशकारः भवानन्दसिद्धान्त-वागीशः, सम्पादकः म० म० गुरुचरणतर्कदर्शनतीर्थः भाग १, प्रकाशकः-एसियाटिक सोसाइटी बेंगाल न्यूसिरीज १३२१ (नवम्बर) कलिकाता खीष्टाब्दः १९१२ ।

८. 'तत्त्वचिन्तामणिः' मथुरानाथतर्कवागीशकृतरहस्यव्याख्योपेतः, अनुमान्-खण्डः, सम्पादकः पं० कामाख्यानाथतर्कवागीशः, प्रकाशकः एसिआटिक सोसाइटी आफ बेंगाल कलिकाता खीष्टाब्दः १८१२ ।

९. 'तत्त्वचिन्तामणिः' धर्मराजाध्वरिकृततर्कचूडामणिविभूषितेन रुचिदत्त-मिश्रविरचितप्रकाशेनालङ्कृतः, द्वितीयभागस्यानुमानखण्डस्य प्रथमो भागः, सम्पा-दकः डा० एन० एस० रमानुजताताचार्यः प्रकाशकः—डा० भल्लादि द० बालसुब्रह्मण्यशर्मा केन्द्रीयसंस्कृतविद्यापीठप्राचार्याः तिरुपति-केन्द्रीय-संस्कृतवि-द्यापीठम्, ग्रन्थमाला ३३ खीष्टाब्दः १९८२

१०. केशवमिश्रणीता 'तर्कभाषा'-हिन्दीव्याख्यासहिता व्याख्याकारः आचार्य श्रीबदरीनाथशुक्लः, प्रकाशकः श्रीमोतीलालबनारसीदासः प्रथमसंस्करणम्, खीष्टाब्दः १९६८

११. 'तर्कसंग्रहः' सिद्धान्तचन्द्रोदयाख्यव्याख्यासम्वलितः लेले इत्युपाख्यवें-कटेशशास्त्रिणा संशोधितः मुम्बय्यां गुजरातीमुद्रणालयाधिपतिना प्रकाशितः सम्वत् १९८०

१२. श्रीकाशीसंस्कृतग्रन्थमाला श्रीमदन्नम्भट्टविरचितः 'तर्कसंग्रहः' गोवर्धन मिश्रकृतन्यायबोधिन्या, मेरुशास्त्रिकृतवाक्यवृत्या, जगन्नाथशास्त्रिकृतनिरुक्त्या, पट्टाभिरामशास्त्रिकृतटिप्पण्या तथा रामरुद्रकृतरामरुद्रीयराजनरसिंहशास्त्रिकृतनृ-सिंहप्रकाशिका—नीलकण्ठशास्त्रिकृतनीलकण्ठप्रकाशिका-पट्टाभिरामशास्त्रिकृत-पट्टाभिरामप्रकाशिकेति व्याख्याचतुष्टयसमुपेतः-स्वोपज्ञतर्कसङ्ग्रहदीपिकया च समुपबृंहितः, सम्पादकः सत्कारिशर्मा, प्रकाशकः चौखं० सं० सिरीज वाराणसी, खीष्टाब्दः १९६९

१३. 'तन्त्रसिद्धान्तरत्नावलिः' ग्रन्थकर्त्ता श्रीचिन्नस्वामीशास्त्रिमहोदयाः सम्वत् २००१ खीष्टाब्दः १९४४

१४. श्रीमदन्नम्भट्टविरचित: 'तर्कसंग्रह:' सुखप्रवेशिनीव्याख्यासम्वलित: वि० वीरराघवाचार्येण विरचिता श्रीतन्जापुरसन्निकृष्टपञ्चनदस्थे श्रीनिवासमुद्रणालये मुद्रित: खीष्टाब्द: १९३४

१५. 'तर्कसङ्ग्रह:' मूलसहित: टीकात्रयोपेत: गङ्गाटीकारचयिता पं० शिवदत्तमिश्रगौड़:, प्रथमसंस्करणम्, सम्वत् १९९१ प्रकाशक: विद्याभवनम् रानीभवानी की गली काशी।

१६. गौतमकृतं 'न्यायदर्शनम्' वात्स्यायनभाष्योद्योतकरवार्तिकवाचस्पतितात्पर्यटीकोदयनपरिशुद्धिसमलङ्कृतम् प्रथमाध्यायात्मक: प्रथमोभाग:, मिथिलाविद्यापीठग्रन्थमाला-२० सम्पादक: श्रीअनन्तलालठक्कुर:, प्रकाशक: डाइरेक्टर मिथिला इन्स्टीट्यूट आफ पोस्ट ग्रेजुएट स्टडीज़ एण्ड रिसर्च इन संस्कृत लर्निंग द्वारभङ्ग: सम्वत् २०२४

१७. विश्वनाथपञ्चाननभट्टाचार्यविरचिता 'कारिकावली' 'न्यायसिद्धान्तमुक्तावली-दिनकरी-रामरुद्री-संवलिता, काशी-संस्कृतग्रन्थमाला-६, सम्पादक: पं० हरिरामशुक्ल:, द्वितीयं संस्करणम्, प्रकाशक: चौखम्बा-संस्कृत-सीरिजकार्यालय: वाराणसी खीष्टाब्द: १९५१

१८. श्रीमदुदयनाचार्यविरचिता 'न्यायवार्तिकतात्पर्यपरिशुद्धि:, न्यायनिबन्धाख्यप्रकाशव्याख्यासहिता व्याख्याकार: श्रीवर्धमानोपाध्याय: । सम्पादक: पं०विन्ध्येश्वरीप्रसादद्विवेदी पं०लक्ष्मणशास्त्रीद्रविण: खीष्टाब्द: १९११ प्रकाशक: एसिआटिक सोसाइटी बेंगाल, कालिकता ।

१९. वात्स्यायनभाष्यसम्वलितम् 'न्यायदर्शनम्' हिन्दीभाषान्तरसम्पन्नम् । सम्पादक: स्वामी द्वारिकादासशास्त्री, प्रकाशक: बौद्धभारती वाराणसी खीष्टाब्द: १९७६

२०. 'न्यायकोष:' महामहोपाध्यायभीमाचार्येण विरचित:, सम्पादक: महामहोपाध्यायवासुदेवशास्त्री अभ्यंकर:, प्रकाशितम्-भण्डारकरप्राच्यविद्यासंशोधनमन्दिराधिकृतै:, खीष्टाब्द: १९७८ चतुर्थसंस्करणम् ।

२१. काशीसंस्कृतग्रन्थमाला, उदयनाचार्यप्रणीत: 'न्यायकुसुमाञ्जलि:' वरदराजाचार्यप्रणीतबोधिन्या, वर्धमानोपाध्यायप्रणीतप्रकाशेन, मेघठक्कुरप्रणीतप्रकाशिकया रुचिदत्तोपाध्यायप्रणीतमकरन्देन, बच्चाझाप्रणीतया टिप्पण्या च

समलङ्कृतः सम्पादकः—पद्मप्रसादोपाध्यायः, ढुण्ढिराजशास्त्री, प्रकाशकः—चौ० सं० सि० वाराणसी सं० २०१३ खीष्टाब्दः १९५७

२२.'प्रशस्तपादभाष्यम्' श्रीधरभट्टप्रणीतन्यायकन्दलीव्याख्यासम्वलितम्, सम्पादकः-श्रीदुर्गाधरझा, गङ्गानाथझाग्रन्थमाला प्रकाशकः डाइरेक्टर, रिसर्च इन्स्टीच्यूट वाराणसेय संस्कृतविश्वविद्यालयः, वाराणसी खीष्टाब्दः १९६३ (साधर्म्यवैधर्म्यप्रकरणम्)

२३. 'वैशेषिकदर्शनम्' श्रीमँदुदयनाचार्यविरचितकिरणावलीटीकासम्वलितम् प्रशस्तपादप्रणीतभाष्यसहितम् सम्पादकः म० म० विन्ध्येश्वरीप्रसादद्विवेदी ढुण्ढिराजशास्त्री, प्रकाशकः—ब्रजभूषणदास एण्ड कम्पनी खीष्टाब्दः १९१९

२४. पाणिनीयाष्टाध्यायी मूलपाठः ।

२५. इदं पुस्तकं मम गृहे विद्यते, अत्र प्रशस्तपादभाष्यस्यस्योपरि टिप्पणी पं०ढुण्ढिराजशास्त्रिणः अस्ति ।'

२६. हरिदाससंस्कृतग्रन्थमाला 'पक्षताप्रकरणम्' जागदीशीयुतम् शिवदत्तमिश्रविरचितगङ्गाव्याख्यासम्वलितम् सम्पादितमप्यनेनैव, प्रकाशकः-चौ० सं० सि० वाराणसी, खीष्टाब्दः १९३५

२७. खण्डदेवप्रणीता 'भाट्टदीपिका' शम्भुभट्टप्रणीतप्रभावलीव्याख्यासम्वलिता (निवीतान्तो भागः १) युक्तान्तकृष्णशास्त्रिसंङ्गृहीतमीमांसाशास्त्रसारयुतः अनन्तकृष्णशास्त्रिविरचितटिप्पणीयुक्तः, प्रकाशकः पाण्डुरङ्गजावजी स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये प्रकाशितवान् सन् १९२२

२८. 'मनुस्मृतिः' कल्लूकभट्टकृतया मन्वर्थमुक्तावल्या समन्विता, दशमं संस्करणम्, सम्पादकः, नारायणरामआचार्यः प्रकाशकः-सत्यभामाबाई-पाण्डुरङ्ग-निर्णयसागरमुद्रणालयः खीष्टाब्दः १९४६

२९. शारदासंस्कृतग्रन्थमाला श्रीकृष्णयज्वरचिता 'मीमांसापरिभाषा', सम्पादकः गौरीनाथपाठकः वि० सम्वत् १९२२, १९७-३६

३०. आपोदेवकृतः 'मीमांसान्यायप्रकाशः' वासुदेवशास्त्रि अभ्यङ्करकृतया प्रभया सम्वलितः प्रकाशकः भण्डारकर ओरियण्टल रिसर्चइन्स्टीट्यूट पूना सन् १९३७

३१. चौखम्बासंस्कृतग्रन्थमाला 'वाचस्पत्यम्' श्रीतारानाथतर्कवाचस्पतिभट्टाचार्येण सङ्कलितम् तेनैव संस्कृतम् षष्ठभागः, प्रकाशकः-चौखम्बा संस्कृत सिरिज वाराणसी, खीष्टाब्दः १९६२

३२. हरिदासग्रन्थमाला 'वैशेषिकदर्शनम्' प्रशस्तदेवाचार्यविरचितप्रशस्तपादभाष्यसंवलितम्, शङ्करमिश्रविरचितोपस्कारसहितम्, सम्पादकः,-ढुण्ढिराजशास्त्री, प्रकाशकः, जयकृष्णदासगुप्ता, खीष्टाब्दः १९२३

३३. हरिदाससंस्कृतग्रन्थमाला धर्मराजाध्वरीन्द्रकृता 'वेदान्तपरिभाषा' शिवदत्तकृतार्थदीपिका सहिता, प्रकाशकः—चौ० सं० सिरिज वाराणसी, खीष्टाब्दः १९३७, सम्पादकः सुदामामिश्रः, द्वितीयं संस्करणम् ।

३४. 'व्याप्तिपञ्चकम्' सिंहव्याघ्रलक्षणसहितम् रघुनाथशिरोमणिकृतया दीधित्या, मथुरनाथ तर्कवागीशजगदीशतर्कालङ्कारविरचिताभ्यां माथुरीजागदीशिटीकाभ्यां क्रोडपत्रेण च समन्वितम् ठक्कुरोपनामक पं० श्री कनकलालशर्मणा मैथिलेन संशोध्य काशीस्थसत्यनामाख्ययन्त्रालये महेशप्रसादद्वारा मुद्रयित्वा प्रकाशितम् सं० १९८२

३५. 'व्याप्तिपञ्चकम्, सिंहव्याघ्रलक्षणञ्च' । सटीकया माथुर्या जागदीश्या च शोभितम् टीकाकारः आचार्यश्यामसुन्दरझा विक्र० सं० २०१४

३६. सायणमाधवाचार्यप्रणीतः 'सर्वदर्शनसङ्ग्रहः' वासुदेवशास्त्रीअभ्यङ्करविरचितया दर्शनाङ्कुराभिधया व्याख्यया समेतः, तृतीयं संस्करणम्, प्रकाशकः भण्डारकर ओरियन्टल रिसर्च इन्स्टि्यूट, पूना (भारत) खीष्टाब्दः १९७८

३७. श्रीहरिनाथग्रन्थमालाया द्वितीयं पुष्पम् गङ्गेशोपाध्यायकृतं 'सामान्यनिरुक्तिप्रकरणम्' सम्पादकः-श्रीवामाचरणभट्टाचार्यः प्रथमं संस्करणम्; खीष्टाब्दः १९५३ सं० २०१० प्रकाशकः श्रीसाधुबेला आश्रमः वाराणसी ।

३८. 'सव्यभिचारप्रकरणम्' वामाचरणभट्टाचार्यकृतविवृत्या मनोरमया च सम्वलितम्, प्रकाशकः-खेलाड़ीलाल एण्ड सन्स, पुस्तकागाराध्यक्षेण प्रकाशितम् । प्रथमं संस्करणम् खीष्टाब्दः १९४०

३९. 'सत्प्रतिपक्षप्रकरणम्' ज्वालाप्रसादगौड़विरचितविलासिनीव्याख्यासहितम् प्रकाशकः-डा० शान्तिप्रकाश आत्रेयः, अध्यक्षः दर्शनस्य समाजशास्त्रस्य च बलरामपुरम् सं० २०१९

४०. वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम् (हिन्दीव्याख्यासहितम्) प्रथमः खण्डः प्रथमस्कन्धादारभ्याष्टमस्कन्धपर्यन्तः । प्रकाशकः गीताप्रेसगोरखपुरनगरम् षष्ठं संस्करणम् सं० २०२६

४१. मिथिलाविद्यापीठग्रन्थमाला, टीकाचतुष्टयसनाथीकृता 'सामान्यनिरुक्तिः' गङ्गेशोपाध्यायप्रणीता, रघुनाथशिरोमणेः दीधित्या गदाधरभट्टाचार्यस्य गादाधर्या बलदेवभट्टाचार्यस्य बलदेव्या झोपाह्वश्रीमद्रूपनाथदेवशर्मविरचितविमलप्रभया च विभूषिता । श्रीरूपनाथझामहोदयेनैव सम्पादिता, मिथिलाविद्यापीठप्रधानेन शीतांशुशेखरदेवशर्मणा प्रकाशिता । खीष्टाब्दः १९७०

४२. गङ्गेशोपाध्यायविरचितम् 'सिद्धान्तलक्षणम्' स्वामिदिव्यानन्दकृतया लक्ष्मीटीकया दिव्याटिप्पण्या च समलङ्कृतम् सम्पादकः ज्वालाप्रसादगौड़ः । प्रकाशनसम्वत्सरः १९७०

४३. गदाधरभट्टाचार्यप्रणीतः 'शक्तिवादः' हरिहरनाथतर्कसिद्धान्तभट्टाचार्यप्रणीतव्याख्यासम्वलितः सम्पादकः गोस्वामीदामोदरशास्त्री, प्रकाशकः—चौखम्बासंस्कृतसीरिजकार्यालयः वाराणसी सं० १९८६ हरिदाससंस्कृतग्रन्थमाला ।

४४. चौखम्बासंस्कृतग्रन्थमाला 'शब्दकल्पद्रुमः, स्यारराजाराधाकान्तदेवबहादुरेण रचितः, प्रकाशकः चौखम्बा संस्कृत सिरीज वाराणसी, तृतीयं संस्करणम्, सम्वत् २०२४ खीष्टाब्दः १९६७



व्याप्तिसप्तकसारस्यास्य लेखकः डॉ० पीयूषकान्त-दीक्षितः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विद्यापीठे साम्प्रतं न्यायवैशेषिकविभागाध्यक्षः कुलानुशासक (प्रोक्टर) पदमप्यधितिष्ठति।

अयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य स्नातकः। तत्रैव वाराणसेयैः न्यायशास्त्रपरम्पराविद्भिः नव्य-न्यायशास्त्रमधीत्य, तत्र व्युत्पत्तिमासाद्य साम्प्रतमपि नव्यन्यायशास्त्रं तदुपयोगि शास्त्रान्तरञ्च अध्ययनाध्यापननिबन्धादिभिः विस्तारयितुमहर्निशं यतते।

अयम् ५.२.६४ खिष्टाब्दे लब्धजनिः १९८२ खिष्टाब्दे सर्वाधिकैः अङ्कैः प्रथमश्रेण्यां नव्य-न्यायाचार्यपरीक्षां समुत्तीर्य समासादितस्वर्णपदकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालंयादेव १९९२ खिष्टाब्दे लब्धविद्यावारिधिपदवीकः दिल्लीविश्व- विद्यालयतः प्रथमश्रेण्यां संस्कृत एम० ए० परीक्षोत्तीर्णश्च।

प्रायस्त्रिंशत्सङ्ख्याका अस्य निबन्धाः प्रतिष्ठितासु शोधप्रवणासु पत्रिकासु प्रकाशिताः। अयमुत्तरप्रदेशीयमऊमण्डलान्तर्गतस्य 'हरहुआ' ग्रामस्य वास्तव्यः विद्वत्कुलप्रसूतो जन्मप्रभृत्येव शास्त्रीयवासनावासितः।